आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५३

सत्याषाढविरचितं श्रौतसूत्रं

गोपीनाथभट्टविरचितज्योत्स्नाव्याख्यासमेतम् ।

तत्र

सप्तमाष्टमप्रश्नद्वयात्मकः प्रथमो भागः ।

एतत्पुस्तकं

वे० शा० सं० रा० रा० काशीनाथशास्त्री आगाशे

इत्येतैः संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८३०

खिस्ताब्दाः १९०८

ॐ तत्सद्ब्रह्मणे नमः ।

सत्याषाढविरचितं श्रौतसूत्रं ।

गोपीनाथभट्टकृतज्योत्स्नाव्याख्यासमेतम् ।

अथ सप्तमप्रश्नप्रारम्भः ।

तत्र प्रथमः पटलः ।

वात्सल्यात्पितरौ कपोलयुगलं स्वस्याऽऽगतौ चुम्बितुं
दृष्ट्वाऽऽकुञ्चितमास्यपद्मममलं सेषत्स्मितं सत्वरम् ।
अन्योन्यं शिवयोस्ततः सुवदने युक्ते ह्यभूतां तयो-
रित्थं येन विनोदितौ स भगवान्बालो गजास्योऽवतु ॥ १ ॥
विद्यामहागणपतिं देवं व्याडीश्वरं तथा ।
योगेश्वरीं च वाग्देवीं लक्ष्मीनारायणौ रविम् ॥ २ ॥
सत्याषाढं मुनिश्रेष्ठं जातरूपशिरोरुहम् ।
गुरूंश्च मातापितरौ नत्वेदानीं यथामति ॥ ३ ॥
ओकोपाह्वेन कुतुकाद्गोपीनाथेन धीमता ।
सत्याषाढेन रचितं सूत्रं व्याख्यायते मया ॥ ४ ॥
सूत्राब्धिं मया तर्तुमरब्धं मन्दशक्तिना ।
तत्रावलम्बो मम तु पारे गन्तुं गुरुस्मृतिः ॥ ५ ॥

सर्वकामोऽग्निष्टोमः ।

काम्यन्ते ते कामा इष्टानि सर्वे कामा येन साध्याः स सर्वकामोऽग्निष्टोमः । ते च कामाः स्वर्गप्रजापशुहिरण्यादयः । एवं क्रियान्तरसाध्या अन्येऽपि लोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं भुवनज्ञानं सूर्ये संयमादित्यादिपातञ्जलसूत्रबोधितयोगधारणासाधनकभुवनज्ञानमपि सर्वशब्देन ग्राह्यम् । प्रगीत्यधिकरणीभूतकर्संख्यावाची स्तोमशब्दः । स चात्र लक्षणया तत्संबद्धयज्ञायज्ञियाख्यस्तोत्रविशेषकरणकस्तुतिपरो ज्ञेयः । अग्नेः स्तोमः स्तुतिर्यस्मिन्सोऽग्निष्टोमः । योगरूढं पदम् । अग्निस्तुतिसंपादकेन यज्ञायज्ञियनामकेन स्तोत्रेण संस्था समाप्तिर्यस्य सोऽग्निष्टोम इति निष्कृष्टोऽग्नि-

ष्टोमशब्दार्थः । अग्निष्टोमस्य सर्वकामत्वे श्रूयते शाखान्तरम्—"एकस्मै वा अन्ये यज्ञाः कामायाऽऽह्रियन्ते सर्वेभ्योऽग्निष्टोमः" इति । आह्रियन्ते क्रियन्त इत्यर्थः । काम्य एव फलवत्ता जैमिनीयैः साधिता । न चास्मच्छाखायामग्निष्टोमस्य फलं श्रूयते । नच तस्मिन्नसति कथमित्याकाङ्क्षाप्रकरणमुदेति । तथा च तेन वसन्ते वसन्ते यजेत तस्य नानुपक्रान्तयोर्दर्शपूर्णमासयोराहार इत्यादिकं न व्याख्यातुं युक्तमिति फलमेव बुद्ध्वा पुरुषः प्रवर्तत इति तदादौ वक्तुं युक्तम् । ननु सर्वकामोऽग्निष्टोम इति वाक्यस्य फलसाधनीभूताग्निष्टोमविधायकत्वात्फलस्य यजमाननिष्ठत्वादेतद्वाक्यं याजमानसूत्र एव पठितव्यमिति चेन्न । साध्यसाधनाकाङ्क्षानिवृत्तौ सत्यामेवेतिकर्तव्यताकाङ्क्षोदयेन तदर्थं साध्यसाधनाकाङ्क्षानिवर्तकस्याऽऽध्वर्यवादिप्रयोगरूपेतिकर्तव्यताविधानात्पूर्वमेव सर्वकामोऽग्निष्टोम इति वाक्यपाठस्य युक्तत्वात् । नन्वेकस्मै वा अन्ये यज्ञाः कामायाऽऽह्रियन्ते सर्वेभ्यो ज्योतिष्टोम' इत्यपि श्रूयते । ततश्च त्रिवृत्पञ्चदशः सप्तदश एकविंशः । एतानि वाव तानि ज्योतींषि । य एतस्य स्तोमा इत्यनया श्रुत्या स्तोमचतुष्टयवत्सु कर्मसु शक्त्यवगमाद्व्यापकं धर्मं परित्यज्य किमर्थं व्याप्यधर्मनिर्देशः कृत इति चेन्न । उक्थ्येन पशुकामो यजेत, षोडशिना वीर्यकामो यजेत, अतिरात्रेण प्रजाकामो यजेतेत्यादिभिः श्रुतिभिरुक्थ्यादिषु स्तोमचतुष्टयवत्सु अग्निष्टोमगुणविकारेषु कर्मसु नियतफलश्रवणात्सर्वकामताया बाधितत्वेन ज्योतिष्टोमशब्देनाग्निष्टोमस्यैव ग्रहणात् । नच "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यत्राप्यग्निष्टोमस्य ग्रहणं ज्योतिष्टोमशब्देनास्त्विति वाच्यम् । एकस्मै वा अन्ये यज्ञा इति सर्वकामत्वप्रतिपादकश्रुतिविरोधापत्त्या तथा वक्तुमशक्यत्वात् । उक्थादिपरत्वमपि वक्तुमशक्यम् । तेष्वपि स्वतन्त्रफलश्रवणात् । मच ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्याः श्रुतेः कावकाश इति शङ्क्यम् । अत्यग्निष्टोमादिष्ववकाशसंभवात् । विश्वजिति तु फलस्याश्रवणात्फलमन्तरेण विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये सर्वाभिलषितत्वेन स्वर्ग एव कल्पितो जैमिनिना स स्वर्गः स्यात्सर्वान्प्रत्याविशिष्टत्वादिति सूत्रेण । सूत्रार्थस्तु यदेकं फलं स स्वर्गः स्यात्सर्वान्सर्वपुरुषान्प्रति अविशिष्टत्वादिति ।

> यन्न दुःखेन संभिन्नं नच ग्रस्तमनन्तरम् ।
> अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

इति वचनप्रतिपादितनिरतिशयसुखविशेषात्मस्वर्गस्याभिमतत्वेन विशिष्टतुल्यत्वादित्यर्थः । स्वर्गसुखं दुःखाननुषक्तमिति कृत्वा सर्वाभिमतं पश्वादिसुखं दुःखानुषक्तमल्पं चेति केचिदेव प्रार्थयन्ते । स्वर्गसुखं तु बहवः प्रार्थयन्त इति पूर्वसूत्रार्थः । प्रत्ययाच्चेति द्वितीयं सूत्रम् । तस्यार्थः—प्रतीयते निरतिशयसुखत्वेनाभिलष्यते सर्वैरिति प्रत्ययस्तस्माच्च हेतोरित्यर्थः । तथा चायं निर्गलितोऽर्थः—दुःखाननुषक्तस्वाधिकरणक्षणध्वंसान-

धिकरणनिरतिशयसुखात्मस्वर्गस्य सर्वपुरुषाभिमतत्वेन सर्वाभिलषितत्वेन च स एव फलत्वेन परिकल्प्यत इति । प्रत्यवायपरिहारस्तु सर्वाभिलषितोऽपि प्रत्यवायापेक्षया कियताऽपि विलम्बेन हृदयमागच्छति । स्वर्गः कस्यचित्पुरुषस्याभिमतः कस्यचिदनाभिमत इत्ययं विशेषोऽत्र नास्ति किंतु सर्वपुरुषाभिमत एवेत्यतो भवत्यविशिष्ट इति सूत्रेण । सूत्रार्थस्तु—यदेकं फलं स स्वर्गः स्यात्सर्वान्सर्वपुरुषान्प्रत्यविशिष्टत्वादिति ।

यन्न दुःखेन संभिन्नं नच ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

इति वचनप्रतिपादितसुखविशेषमयस्वर्गस्य भूयोभिलषितत्वात्सर्वाभिमतत्वात्सुकरत्वाच्च स्वर्ग एव फलत्वेन कल्प्यते । प्रत्यवायपरिहारस्य सर्वाभिलषितत्वेऽपि दुष्करत्वेन तस्य फलत्वं न कल्प्यत इति । प्रत्ययात्प्रतीयते निरतिशयसुखत्वेन सर्वैर्ज्ञायत इति प्रत्ययस्तस्माच्च हेतोः स्वर्ग एव फलत्वेन कल्प्यत इति प्रत्ययाच्चेति द्वितीयसूत्रार्थः । अतः स फलं न भवति । एतद्दुःखनिवृत्तिरपि फलं न भवति दुष्करत्वात् । ततस्तु सुकरज्ञानं सुखमेव परं फलं, तच्चानतिशयत्वेन स्वर्गरूपमिति द्रष्टव्यम् । अयं न्यायश्चतुर्थाध्याये तृतीयपादे वर्तते । निश्रेयसफलकत्वं तु अग्निष्टोमोक्थ्यादिसाधारणं कर्मभिर्निश्रेयसमित्यनेनाऽऽचार्येण प्रदर्शितम् । नियतकर्ममात्रविषयं वैतत् । तच्च ज्ञानद्वारा साक्षाद्वेत्यन्यदेतत् । य एवं विद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति परिप्रजाता गृह्णातीत्यर्थवादेन फलकल्पनाऽपि साक्षाच्छ्रूयमाणे श्रौते फले सति न युक्ता । रात्रिसत्रे स्वतन्त्रे कर्मणि तु प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यत्र विध्युद्देशे फलाश्रवणात्फलमन्तरेण विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये आर्थवादिकं प्रतिष्ठाख्यं फलमुक्तम् । विश्वजिदधिकरणन्यायेनानुपस्थितस्वर्गकल्पने तस्य प्रकृतसंबन्धकल्पने गौरवादर्थवादोपस्थितस्यैव प्रकृतफलत्वकल्पने लाघवात् । एतदुक्तं जैमिनिना—क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः । फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात् । अङ्गेषु श्रुतिः परार्थत्वादिति । क्रतौ रात्रिसत्रे प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीति फलश्रुतिः । यस्य पर्णमयी जुहूर्भवति न पापं श्लोकं शृणोतीति पर्णतादावङ्ग इव फलार्थवादं कार्ष्णाजिनिराचार्यो मन्यत इति प्रथमसूत्रार्थः । आत्रेय आचार्यस्तु प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीति श्रुतौ प्रतिष्ठाया निर्देशात्प्रतिष्ठैव फलम् । अश्रुतौ, अर्थवादेऽपि फलाश्रवणे सति हि अनुमानेन कल्प्यं स्वर्गादिरूपं फलं स्यात् । प्रकृते तु प्रतिष्ठारूपफलश्रवणमेवास्ति । अतो नात्र स्वर्गः फलत्वेन कल्प्यत इति मन्यते । रात्रिशब्देन ज्योतिर्गौरायुरित्यादिवाक्योत्पन्न-

---

१ ख. ग. फलश्र॰ ।

द्दितानि सौत्यानि कर्माण्युच्यन्ते । तद्रूपः कर्मसमुदायः सत्रमिति द्वितीयसूत्रार्थः । अङ्गेषु श्रुतिः फलश्रुतिः परार्थत्वादङ्गानां प्रधानार्थत्वादङ्गेषु अङ्गविषयिणी या श्रुतिः फलश्रुतिरर्थवाद एवेति कार्ष्णाजिन्यात्रेययोरुभयोरपि मते तुल्यमेवेति तृतीयसूत्रार्थः । इदमधिकरणं चतुर्थाध्याये तृतीयपादे वर्तते । साक्षाच्छ्रूयमाणश्रौतफलासत्त्वादेव रात्रिसत्र आर्थवादिकफलकल्पनम् । अङ्गेषु फलश्रवणं कमिधातुश्रवणं विनाऽर्थवाद एव । तथाच सूत्रम्—समस्ते क्रत्वर्थं श्रूयमाणं यजमानः कामयते तथा नित्येषु यज्ञाङ्गेषु यानि तु कामयतिः श्रावयति यथाऽऽघारस्योर्ध्वतायां नीचैस्तायां चार्थवादा इतरे तथाऽन्येषु यज्ञाङ्गेषु पुरीषवतीं करोति प्रजयैवैनं पशुभिः पुरीषवन्तं करोति यद्यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्या इषे त्वोर्जे त्वेति शाखामाच्छिनत्तीषमेवोर्जं यजमाने दधातीति । जैमिनिरपि चतुर्थाध्याये तृतीयपादे द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादुत्पत्तेश्चातत्प्रधानत्वादिति । अत्र द्रव्ये फलश्रुतिर्यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोतीत्येवमाद्या । संस्कारे फलश्रुतिर्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्त इत्येवमाद्या । कर्मणि फलश्रुतिर्यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्मयजमानायेत्येवमाद्या । अत्र कर्मपदं त्वर्थकर्मपरं द्रष्टव्यम् । संस्कारकर्मणः पृथक्संकीर्तनात् । एवं च कमिधातुर्येषु श्रूयते तान्येवेच्छाविषयाणि कामयितव्यानि नान्यानीति । द्रव्ये संस्कारेऽर्थकर्मणि च फलश्रुतिरर्थवादः स्यात्तेषां परार्थत्वात्क्रत्वर्थत्वादिति पूर्वसूत्रार्थः । उत्पत्तेः, यस्य पर्णमयी जुहूर्भवतीत्यादितत्तद्वाक्यबोधितपर्णमयत्वादित्याद्युत्पत्तेः । अतत्प्रधानत्वात्तच्छब्देन पुरुष उच्यते । स एव प्रधानं यत्र सा तत्प्रधाना न तत्प्रधानाऽतत्प्रधाना तस्या भावस्तत्त्वं तस्मात्पुरुषप्रधानत्वाभावादित्यर्थः । तेनार्थात्क्रतुप्रधानत्वं सिद्धं भवति । तत्प्रधानत्वं तदर्थत्वं तस्याभावादिति निर्गलितोऽर्थ इति द्वितीयसूत्रार्थः । अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति सूत्रे प्रथमोपात्तक्रत्वर्थपदसूचिता क्रतुप्रयुक्तिः पादद्वयेन विचारिता, इदानीं चरमोपात्तपुरुषार्थपदसूचिता प्रयुक्तिर्विचार्यत इति पादान्तरस्यानन्तर्यं च बोध्यमिति ससोमके कर्मणि त्रिभिर्नामभिराचार्यो व्यवहरति सर्वकामोऽग्निष्टोमः, यस्य भ्रातृव्यः सोमेन यजेत ज्योतिष्टोमे[1] प्रागग्नीषोमीयादिति । ज्योतिष्टोमे प्रागग्नीषोमीयादित्यत्र ज्योतिष्टोमशब्दः साधारण एव विरोधाभावात् । नन्वेवं वाजपेये त्रिवृत्पञ्चदशः सप्तदश एकविꣳशाः । एतानि वाव तानि ज्योतीꣳषि । य एतस्य स्तोमा इतिश्रुतिसिद्धस्तोमचतुष्टयसाध्यत्वाभावेन ज्योतिष्टोमत्वाभावात्कथं याजुर्वेदिकमन्त्राणामिवाऽऽर्ग्वेदिकसामवेदीयमन्त्राणामपि प्रागग्नीषोमीयादुपांशुत्वनियमप्राप्तिः संभवतीति चेन्न । प्रकृतिष्वेतेन वचनेनोपांशुत्वनियमे सिद्धे वाजपेये प्रकृतिवद्वि-

---

१ ख. ग. °जेतेति ज्यो° ।

कृतिः कर्तव्येतिन्यायेनैव तत्प्राप्तिसंभवात् । नचैवमग्निष्टोमशब्द एवात्र प्रयोक्तव्यः । उक्थ्यादिषु तु वाजपेय इवोपांशुत्वनियमः प्राप्नोत्येवेति वाच्यम् । उक्थ्यादीनां चतुर्णामपि तत्तत्क्रतुविशेषे प्रकृतित्वमस्तीति ज्ञापनाज्ज्योतिष्टोमशब्दोपादानाज्ज्योतिष्टोमशब्देनाप्यागूरणकर्तव्यताप्रतिपादनार्थत्वात् । अग्निष्टोमवदुक्थ्यादीनां नित्यत्वमपि भवतीतिज्ञापनार्थत्वाच्च । ज्योतिष्टोमशब्दः स्तोमचतुष्टयवत्कर्मपर इत्युक्तमेव । अग्निष्टोमशब्दः संस्थाविशेषपरः । सोमशब्दोऽत्र लताविशेषपरो नतु चन्द्रादिपरः । तस्य प्रकृतेऽनुपयोगात् । अन्यथा द्रव्याकाङ्क्षानिवृत्तिर्न स्यात् । सोमशब्दवाच्यद्रव्यविशेषस्य मत्वर्थलक्षणया यागविशेषणत्वम् । तथाचायमर्थो भवति सोमवता यागेनेष्टं भावयेदिति । एतेनोद्भिदादिवद्यागनामधेयत्वं निरस्तं ज्ञेयम् । तत्र श्यामलाऽम्ला च निष्पन्ना क्षीरिणी त्वचि मांसला श्लेष्मला वमनी वल्ली सोमाख्या छागभोजनमिति आयुर्वेदतः सोमस्वरूपमवगन्तव्यम् । स च मुख्यः पर्वतजः सोमस्येव मौजवतस्य भक्ष इति लिङ्गात् । मूजवता मूजवतो हीति बौधायनेनाध्वर्युसोमविक्रयिणोः प्रश्नप्रतिवचनयोरेव तथोक्तत्वाच्च । अभाव इतरः । मूजवच्छब्दः पर्वतवाची । सोमाभावे पूतीकानभिषुणुयादित्यादिः प्रतिनिधिर्ग्राह्यः । प्रतिनिधावपि मुख्यशब्द एव प्रवर्तते । प्राकृतास्त्वेव मन्त्राणां शब्दाः प्रतिनिधिष्वपीत्याश्वलायनोक्तेः । आम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् । तादर्थ्याद्वा तदाख्यं स्यात्संस्कारैरविशिष्टत्वात् । उक्तं च तत्त्वमस्येति प्रतिनिधौ चाविकारमाश्रित्यैव मन्त्रः प्रयोक्तव्य इति प्रथमसूत्रार्थः । आम्नानात्सोमाभावे पूतीकानभिषुणुयादितिप्रतिनिधेराम्नानात् । इतरस्य प्रतिनिधेरितरस्य मुख्यस्येति यावत् । प्रतिनिधौ गृहीतेऽपि अभावाच्च । अशब्दत्वं प्रतिनिधौ न विद्यते शब्दो मुख्यद्रव्यवाचकः शब्दो यत्र सोमशब्दः प्रतिनिधिस्तस्य भावस्तत्त्वं तस्स्यात्प्रतिनिधिभूतद्रव्ये मुख्यद्रव्यशब्दप्रवृत्तिर्न भवतीति द्वितीयसूत्रार्थः । इदं पूर्वसूत्रार्थोपरि पूर्वपक्षसूत्रम् । स एव मुख्यस्य योऽर्थः स एवार्थः प्रयोजनं यस्य स तदर्थः प्रतिनिधिस्तस्य भावस्तत्त्वं तस्मात् । प्रतिनिधेस्तादर्थ्यात्प्रतिनिधिरूपं द्रव्यं तदाख्यं सैवाऽऽख्या यस्य तत्तदाख्यं तन्नामकमेव स्यात् । संस्कारैरविशिष्टत्वात्संस्कारैस्तुल्यत्वाद्ये संस्कारा मुख्यद्रव्यस्य त एवास्येत्येवं च तुल्यसंस्कारत्वम् । प्रतिनिधिना कृतेऽपि मुख्येनैव कृतं भवतीति रहस्यम् । वाशब्दः पूर्वपक्षव्यावर्तकः । इति तृतीयसूत्रार्थः । उक्तं षष्ठाध्याये तृतीयपादे तत्त्वं संस्कारैरविशिष्टत्वम् । अस्य प्रतिनिधेर्द्रव्यस्य प्रतिनिधौ चाविकारादिति जैमिन्युक्तेश्च नवमाध्याये तृतीयपादे ।

युगपत्कामयेत ।

पूर्वसूत्रेऽग्निष्टोमस्य सर्वकामतोक्ता तत्रैकस्मिन्नेव प्रयोगे सर्वे कामाः कामयितव्या आहोस्वित्प्रयोगभेदेनेति विचारे, उच्यते—एकस्मिन्प्रयोगे सहैव सर्वान्कामान्स्वर्ग-

१ ख. ग. °शब्दे° ।

प्रजापशुहिरण्यादीनीप्सितान्कामयेत । यथा पशुकामोऽनेकान्पशूनेकस्मिन्प्रयोगे कामयत एवं सर्वान्कामान्कामयेत । यथा चैकस्मादाम्ररोपणात्फलं छाया गन्ध इत्यनुत्पद्यन्ते तथैकेन प्रयोगेणानेकानि फलान्यप्युत्पद्यन्त एवेति सूत्रार्थः ।

आहारपृथक्त्वे वा ।

वाशब्दः पूर्वपक्षं व्यावर्तयति । नैतदस्ति युगपत्कामयेतेति किं तर्हि आहारपृथक्त्व एव । आहारः प्रयोगः । एकैकस्मिन्प्रयोग एकैकं कामं कामयेतेति । कुतः, फलानि प्रधानभूतानि तदर्थानि कर्माणि प्रधानसंनिधौ गुणः शिष्यमाणः प्रतिप्रधानं विभज्यते हि । पशुदृष्टान्ते हि एकजात्या क्रोडीकृतानां बहूनामपि पशूनामेकफलत्वमेव । नचात्र तथा किंतु तत्तत्फलस्य तत्तत्स्वरूपेणैव फलत्वं नतु फलत्वेन क्रोडीकारः । नहि सर्वस्य सर्वं काम्यमानत्वेन काम्यम् । तथाचेदमिदमिति बुद्ध्या यद्ग्राह्यं तन्नैकया क्रोडीकर्तुं शक्यत इति प्रतिप्रधानमङ्गावृत्तिर्युक्तैव । यच्चैकस्य कर्मणोऽनेकफलता दृष्टेति तदप्यनैकान्तिकमेव । प्रकृते सर्वेषां फलानां स्वतन्त्रत्वेनाऽऽनुषङ्गिकफलस्य दृष्टान्तत्वेनोपादानासंभवात् । चतुर्थाध्याये तृतीयपादे तत्र सर्वेऽविशेषात् । योगसिद्धिर्वोऽस्यैकदेशत्वात्... सूत्राभ्यां जैमिनिनाऽपि एवमेव सिद्धान्तितम् । सूत्रार्थस्तु तत्र सर्वकामे कर्मणि अविशेषात्कामत्वाविशेषात्सर्वे कामा अपि युगपत्स्युरिति पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु यस्य यस्मिन्कामेऽभिलाषस्तस्य तादृशस्यार्थस्य कामस्यैव योगेन प्रयोगेणानुष्ठानेन सिद्धिर्नतु सर्वेषामर्थानां युगपत् । सर्वोत्पत्तावयोगित्वात्सर्वत्वस्योद्देश्यप्रतीतिपर्यवसानार्थत्वाभावात् । सर्वशब्दस्येह मुख्यत्वेऽपि नोद्देश्यसमर्पकत्वं सापेक्षत्वात्किंतु निरपेक्षत्वात्कामशब्दस्यैव । ततश्च ग्रहत्ववत्सर्वत्वस्योद्देश्यप्रतीतिपर्यवसानार्थत्वाभावादुद्देश्यविशेषणत्वमेवेति ग्रहैकत्ववदविवक्षितत्वान्न साहित्येन फलत्वं किंतु एकैकस्यैव फलत्वम् । फलस्य प्रधानत्वात्कर्मणो गुणत्वात्प्रतिप्रधानं गुणावृत्तिर्युक्तैवेति भावः ।

तेन वसन्ते वसन्ते यजेत ।

तेनाग्निष्टोमेन । तच्छब्दस्य सर्वनाम्न उत्सर्गतः संनिहितपरामर्शित्वात्काम्यस्य नियतकालताबाधाच्च तच्छब्देन संनिहितस्याग्निष्टोमस्य विशेष्यस्यैव परामर्शो न तु सर्वकामविशेषणस्यापि परामर्शः । नहि कामनाया वसन्त एव जननमिति नियमः । तेनार्थान्नित्ये पर्यवस्यति । वसन्तग्रहणं वसन्तमात्रमेव ग्राह्यमिति । यदि संवत्सरे संवत्सर इत्युच्यते तदा यस्यां तिथौ प्रथमः प्रयोगस्तस्यामेव तिथावभ्यासः कर्तव्यः स्यात्तथा मा भूत् । वसन्ते यस्यां कस्यांचिदनिषिद्धायां तिथौ यजेतेति । नित्यत्वेऽप्येतस्य दर्शपूर्णमासादिवत्फलोपबन्धः प्रत्येतव्यः । नित्यत्वं चैतस्यर्णसंस्तवात् । तथा हि श्रूयते जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः

प्रजया पितृभ्य इति। सोमान्तान्यज्ञाननुक्रम्य नैयमिकं ह्येतदृणसंस्तुतमिति वसिष्ठवचनं सोमपीथविच्छेदे प्रायश्चित्तश्रवणम्।

अनधीत्य द्विजो वेदाननुत्पाद्य च वै प्रजाः।
अनिष्ट्वा शक्तितो यज्ञैर्मोक्षमिच्छन्व्रजत्यधः॥

इति प्रकरणे प्रत्यवायश्रवणं चापि नित्यत्वे साधकम्। अत्र यद्यपि यज्ञैरित्यविशेषेणोक्तं तथाऽप्यग्निष्टोमसंस्थो ज्योतिष्टोमः सोम एव। स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः स एष यज्ञानां संपन्नतम इति पञ्चसंस्थावश्यकताबोधकबह्वृचब्राह्मणवाक्ये सोमस्यैव संपन्नतमपदेन मुख्ययज्ञत्वोक्तेः। एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽथान्येन यजेतेत्यत्र ज्योतिष्टोमस्य य एतेनेत्यग्निष्टोमः प्रकरणाल्लिङ्गाच्चेति पञ्चमाध्याये तृतीयपादगतसूत्रोक्तन्यायेन प्रथमयज्ञत्वाज्ज्योतिष्टोमोऽग्निष्टोमसंस्थः सोमो नित्यः सर्वकामोपबन्धात्काम्यश्च। सूत्रार्थस्तु एतेनेत्यग्निष्टोमसंस्था निर्दिश्यते। तत्संस्थायुक्तस्यैव प्रकरणत्वादिति प्रथमसूत्रार्थः। लिङ्गादपि अग्निष्टोमसंस्थस्यैव निर्देशः प्रथमो यज्ञ इति लिङ्गम्। इति द्वितीयसूत्रार्थः। ज्योतिष्टोमोऽग्निष्टोमसंस्थो नित्यः सर्वकामोपबन्धात्काम्यश्च। तदेतत्षष्ठाध्याये द्वितीयपादे तदेतद्ब्राह्मणस्य सोमविद्याप्रजमृणवाक्येन संयोगादिति सूत्रेण काम्यत्वं पूर्वपक्षीकृत्य तत्रैवर्णसंस्तवान्नित्यत्वमेवेति साधितं मीमांसकैः। सूत्रार्थस्तु सोमश्च विद्या च प्रजा च, एतेषां समाहारः सोमविद्याप्रजम्। एतत्सोमविद्याप्रजं जायमानो वै ब्राह्मण इत्यृणवाक्येन संयोगात्खलु सोमविद्याप्रजं ब्राह्मणस्यैवाऽऽवश्यकमिति मन्यसे नैतद्युक्तं विधिवाक्येष्वविशेषश्रवणादिति। तथा च ब्राह्मणग्रहणस्य क्षत्रियवैश्योपलक्षणार्थता सिद्धा भवतीति। प्रकारान्तरमाकरे द्रष्टव्यम्। संस्थाचतुष्टयं तु काम्यमेव। पशुकाम उक्थ्यं गृह्णीयात्, षोडशिना वीर्यकामः स्तुवीत, अतिरात्रेण प्रजाकामं याजयेत्, पशुकामोऽप्तोर्यामेण याजयेदिति प्रकृतज्योतिष्टोमाग्निष्टोमाश्रितसंस्थाचतुष्टयस्य फलोपबन्धो यतः। प्रकृताग्निहोत्रहोमाश्रितस्येव दध्नः। संस्थाचतुष्टयस्य केवलकाम्यत्वेऽपि ज्ञापकबलान्नित्यत्वमपि। तच्च प्रागेवोक्तम्। अत्र मीमांसका अग्निष्टोमसंस्थ एव प्रथमः प्रयोज्यः। य एतेनानिष्ट्वेति श्रुतेः। अतिरात्रस्य प्रथमयज्ञत्वपक्षेऽपि नाग्निष्टोमं विना क्रत्वन्तरारम्भः। सोमपूर्वाधाने त्वग्निष्टोम एव सर्वेषां पूर्वो नातिरात्र इति प्राहुः। उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामश्चेत्यग्निष्टोमस्य गुणविकारा भवन्तीति वक्ष्यमाणसूत्रादग्निष्टोमत्वमुक्थ्यादिषु चतुर्ष्वपि अग्निष्टोमवदुक्थ्यादयोऽपि प्रकृतय एवेत्याचार्यमतमेतदिति ज्ञायते। तेन ज्योतिरुक्थ्यादीन्विना

१ ख, ग. 'माश्रि'।

विकृतिभूता उक्थ्यादयो न भवन्ति । प्रथमयज्ञत्वं तु मुख्याग्निष्टोमस्यैव । वचनादतिरात्रस्यापि । न तूक्थ्यादीनामग्निष्टोमातिरात्रपूर्वभावित्वमिति । उत्तरभावित्वं त्वग्निष्टोमत एव नातिरात्रादिति ज्ञेयम् । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्था इति गौतमेन संस्कारमध्ये गणनात्, अष्टाचत्वारिंशत्संस्कारैः संस्कृतो ब्रह्मणः सायुज्यमाप्नोतीति वचनात्, अकरणे प्रत्यवायश्रवणाच्च सप्तापि सोमयज्ञसंस्था नित्या इति केचित्प्राहुः । अस्मिन्सूत्रे योगविभागः कार्यः । तेन वसन्त इत्येकं सूत्रम् । यजेतेत्युत्तरस्मादपकृष्यतेऽत्र । तेन नित्येनाग्निष्टोमेन वसन्ते यजेतेति तदर्थः । वसन्ते यजेतेति भिन्नं सूत्रम् । अस्मिन्सूत्रे पूर्वतनं कृत्स्नं सूत्रमाकृष्यते । तेन नित्येनाग्निष्टोमेन वसन्ते वसन्ते यजेतेत्यर्थो भवति । पूर्वसूत्रेण नित्यस्य सकृत्प्रयोगो वसन्ते कर्तव्यत्वेन विधीयते । उत्तरसूत्रेणाभ्यासो विधीयते । अभ्यासस्यावधेरभावाद्यावज्जीवत्वमर्थात् । अभ्यासस्यानित्यत्वे लिङ्गमप्यस्ति अपुनर्भक्षोऽस्य सोमपीथो भवतीति । अथवा तेनेत्यनेन नित्योऽग्निष्टोमः प्राप्यते । तत्र च साभ्यासो वसन्तः कालो विधीयते । अन्यत्र तु कृत्स्नोदगयनात्मकः । तदुक्तं छन्दोगैः—उदगयन आपूर्यमाणपक्षे पुण्याहे यज्ञकालोऽनादेश इति । अयमेवानिर्दिष्टकालानामपि कालः । सोमपूर्वाधाने सोमेन यक्ष्यमाण आदधानो नर्तुं न नक्षत्रं सूर्क्षेदित्येकेषामित्येतत्सूत्रविहिते बहुधा विप्रतिपत्तयः । तत्र केचिदाहुः—प्रकरणादाधानकालस्यैव बाधः, सोमस्य वसन्तकालता तु नैव बाध्यत इति । अन्ये तु सोमस्यापि य ऋतुस्तमपि न सूर्क्षेत् । तथा चोभयकालबाध इत्याहुः । परे तु उदगयन आपूर्यमाणपक्षे पुण्याहे यज्ञकालोऽनादेश इति च्छन्दोगसूत्रोक्तोदगयनाद्यावेन सोमाभिसंबिरूपकालान्तरविधानं सोमपूर्वाधाने । सोमे तूदगयनमपेक्ष्यत एवेत्याहुः । अपरे तु यदैवैनं यज्ञ उपनमेदिति सर्वकालानादर उक्त इति भारद्वाजसूत्रात्सर्वकालबाध उभयत्रेति प्राहुः । सोमेन यक्ष्यमाणोऽग्नीनाधास्ये यानि कर्माणि कर्तुं शक्ष्यामि येष्वास्म्यधिकृत इति सोमपूर्वाधानं संकल्प्य पवमानेष्ट्यन्ते कृते प्रतिबन्धेन सोमारम्भो यदि न जायते तदा सोमारम्भपर्यन्तमारम्भधर्मरहिता गुप्त्यर्थं तूष्णीं होमाः कार्याः । इष्ट्यारम्भोऽपि न भवति । सोमोत्तरमग्निमपौर्णमासेऽन्वारम्भणीयां कृत्वा पौर्णमासेष्ट्यादि कुर्यात् ।

तस्य नानुपक्रान्तयोर्दर्शपूर्णमासयोराहारः ।

तस्याग्निष्टोमस्यानुपक्रान्तयोरनारब्धयोः सतोराहारः प्रयोगो नेत्यर्थः । तथा च भरद्वाजः—न दर्शपूर्णमासाभ्यामनिष्ट्वा सोमेन यजेतेति । वैखानसबाधूलावपि—दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति । ब्राह्मणे—यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे देवानामवस्यतीति सोमस्य दर्शपूर्णमासोत्तरभावित्वमेव प्रस्तुतम् । शाखान्तरे ज्योतिष्टोमप्रकरण एव दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति या श्रुतिः

सा दर्शोत्तरकालतामात्रविधायिका नत्वङ्गाङ्गीभावबोधिकेति द्रष्टव्यम् । तथा च जैमिनिश्चतुर्थाध्याये तृतीयपाद उत्पत्तिकालविषये कालः स्याद्वाक्यस्य तत्प्रधानत्वादिति सूत्रेणामुमर्थमाह । एतत्सूत्रार्थस्तु कर्मान्तरोत्पत्तिकालविधिसंदेहे कालः स्यात्, दर्शपूर्णमासाभ्यामितिवाक्यस्य कालप्राधान्यादिति सोमेन यक्ष्यमाण आदधानो नर्तुं न नक्षत्रं सूर्क्षेदित्येकेषामित्यनेन दर्शपूर्णमासारम्भात्प्राग्विधानादेतेन प्रतिषेधाच्च विकल्पः। आश्वलायनोऽपि विकल्पमेवाऽऽह दर्शपूर्णमासाभ्यामिष्टेष्टिपशुचातुर्मास्यैरथ सोमेनोर्ध्वं दर्शपूर्णमासाभ्यां यथोपयन्त्येके प्रागपि सोमेनैक इति । जैमिनिरपि विकल्पमुक्तवान्वचनादिष्टिपूर्वत्वं सोमश्चैकेषामग्न्याधेयस्यर्तुनक्षत्रातिक्रमवचनात्तदन्तेनानर्थकं हि स्यादिति सूत्राभ्याम् । सूत्रार्थस्तु दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेतिवचनात्सोमस्येष्टिपूर्वत्वमेव स्यादिति पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु सोमोऽप्येकेषामाचार्याणां मते सोमेन यक्ष्यमाणोऽग्नीनादधानो नर्तुं पृच्छेन्न नक्षत्रमिति [ऋतु]नक्षत्रा[तिक्रम]वचनात्पक्ष इष्टिपूर्वभावी सोमोऽपि तदन्ते[न] भावप्रधानो निर्देशः । तेन तदन्तत्वेनेत्यर्थः । तदन्तत्वेनेष्ट्यन्तत्वेनेष्ट्युत्तरभावित्वेन । इदं वचनमनर्थकं यतो भवेदतो नेष्ट्यन्तत्वमिति नियमः । तस्य नानुपक्रान्तयोरित्यनेन प्रकृतिं विना विकृतिर्न कर्तव्येति प्रदर्शितं भवति । यो ज्येष्ठयज्ञोऽग्निष्टोमः स दर्शपूर्णमासारम्भं विना न भवति किमु वक्तव्यमिष्टिपशवो न भवन्तीति । यस्यैन्द्राग्नाश्विनौ पशू न स्तस्तस्याऽऽधानत्रयं विकल्पते । यस्य तु तौ स्तस्तस्य न सोमपूर्वत्वमसंभवादिति केचित् । मध्ये प्रायश्चित्तपशुभ्यां व्यवधानेन दर्शपूर्णमासारम्भं विना तयोरसंभवेन सोमपूर्वत्वस्यासंभवादित्येतन्मनाशयः । अन्ये तु एतयोः सोमारम्भानुगुणत्वादव्यवधायकत्वमेवेति वदन्ति । पवमानेष्ट्यव्यवहितोत्तरमेव चतुर्दश्यां पश्वोस्तन्त्रेणोत्तरवेदिकरणान्तं कृत्वा पर्वणि पशू तन्त्रेण कृत्वा यजनीयेऽहनि सोमारम्भं कुर्यात् । अथवा पवमानेष्ट्यव्यवहितोत्तरं चतुर्दश्यामेव तन्त्रेण पशू कृत्वा पर्वणि सोमारम्भं कुर्यात् । अथवा चतुर्दश्यामैन्द्राग्नपशोरुत्तरवेदिकरणान्तं कृत्वा पर्वण्यैन्द्राग्नेनेष्ट्वाऽनन्तरपर्वण उपवसथेऽहन्याश्विनपशोरुत्तरवेदिकरणान्तं कृत्वा पर्वण्याश्विनेनेष्ट्वा तृतीये पर्वणि सोमारम्भं कुर्यात् । सोमारम्भात्प्रागगुप्त्यर्थं तूष्णीमग्निहोत्रहोमाः कार्या इति प्रयोगक्रमत्रयमव्यवधायकत्ववादिमते सोमपूर्वाधानेऽग्नीषोमीयेण सवनीयेन वा सहोपालम्भत्वमपि पक्षे । अस्मिन्नर्थे ज्ञापकमग्रे वक्ष्यते । नाकृतायां प्रकृतौ विकृतिः कार्येत्ययं नियमस्तु यथा पवमानेष्टिपूर्वभावित्वविषये न भवति तथा प्रायश्चित्तपशुपूर्वभावित्वविषयेऽपि नेति ज्ञेयम् । न च सोमपूर्वाधानं विच्छिन्नसोमपीथस्य न भवति । दर्शपूर्णमासारम्भं विना प्रायश्चित्तपश्वारम्भासंभवात् । नाकृतायां प्रकृतौ विकृतिरिति नियमस्य जागरूकत्वादिति वाच्यम् । प्रायश्चित्तपश्वोः सोमानुगुणत्वेन सोमवत्तदारम्भेऽपि बाधकाभावात् । सत्यां सोमपीथेच्छायां तन्निरोद्धुरभावाच्च । एतेन प्रायश्चित्तपश्वोः सांनाय्यविकृतित्वात्सांनाय्यारम्भं

विना तयोरारम्भासंभवेन प्रायश्चित्तपश्वनुष्ठानं विना सोमासंभवेनान्योन्याश्रयपरिहारार्थं कापेयपक्षमाश्रित्य पूर्वं सांनाय्यमनन्तरं प्रायश्चित्तपशू इति केषांचिदुक्तिः परास्ता। सर्वथाऽपि तावत्सिद्धं विच्छिन्नसोमपीथस्यानालब्धव्रात्यपशोर्न सोम इति। विच्छिन्नसोमपीथपदार्थ उक्तो ब्राह्मणे—ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आतृतीयात्पुरुषात्सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथ इति। तत्र च त्रयः प्राञ्चस्त्रयः प्रत्यञ्च इत्यादौ प्राक्त्वेनोक्ता दीक्षावेदननामसुब्रह्मण्यादौ नामभिः संकीर्त्यमाना पित्रादित्रिपुरुषी तस्यां चरमः प्रपितामहस्तृतीयोऽभिप्रेतो नत्वात्मनस्तृतीयः पितामहः। कुतः, सोमपानोद्यतस्याऽऽत्मनस्तद्विच्छेदाभावात्। एतत्ते तत ये च त्वामन्विति तिसृषु स्रक्तीषु निदधाति तस्मादातृतीयात्पुरुषान्नाम न गृह्णन्तीत्यादौ व्यक्तार्थत्वाच्च। तथाच विध्यर्थत्वमप्यत एव निदर्शनादवगन्तव्यम्। तदयमर्थो भवति यस्य पित्रादयस्त्रयः पुरुषाः सोमं न पीतवन्तः स सोमपीतार्थी—ऐन्द्राग्नं पशुमालभेतेति। केचित्तु द्विपुरुषविच्छित्तावप्ययमिष्यते। यथाऽऽह कात्यायनः—वसन्तेऽग्निष्टोम ऐन्द्राग्नं पुनरुत्सृष्टमालभ्य द्विपुरुषाः सोमपीथिन इति प्राहुः। अन्ये तु पितुः पितामहस्य वोभयोर्वा सोमपीथाभाव ऐन्द्राग्न आलब्धव्यः सोऽयं व्रात्यपशुः पित्रादीनां त्रयाणामानन्तर्येण सोमपीथाभाव ऐन्द्राग्नेनेष्ट्वाऽऽश्विनं धूम्रललाममालभेतेत्याहुः। अत्रैकस्य सोमपानाभावे य ऐन्द्राग्न उक्तः स न युक्तः। यस्य परौ द्वावसोमपौ स्यातां स ऐन्द्राग्नेनेष्ट्वा सोमेन यजेतेत्यगस्त्यसूत्रे द्वयोरसोमपीथत्व एव तस्योक्तेः।

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्।
स वै दुर्ब्राह्मणो नाम ब्रह्मवादिषु गर्हितः॥

इति स्मृतौ यागाध्ययनयोरुभयोरेव विच्छेदे दौर्ब्राह्मण्यं मन्यमानाः सोममात्रविच्छेद आश्विनं नेच्छन्ति केचित्। अस्मिन्वचने चकाराभ्यां व्यक्तसमुच्चयावगमादुभयविच्छेद एव भवत्याश्विनो नान्यतरमात्रविच्छेद इत्यन्ये। तदुभयमप्यसत्। आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेदिति प्रकृत्याश्विभ्यां पूर्वमसोमपाभ्यां पश्चात्प्राप्तसोमपानाभ्यां दुर्ब्राह्मणस्य सादृश्यमपेक्ष्याश्विनावेव देवतां कर्तुं सोमपीथस्य प्रदानमुपनतिं च ब्रुवन्वाक्यशेषः सोमपीथविच्छेद एवाऽऽश्विनं दर्शयति नाध्ययनमात्रविच्छेदेन वोभयविच्छेदे। तस्मादसत्यप्यध्ययनाविच्छेदे सोमपीथमात्रविच्छेद आश्विनः कार्यः। यत्तु स्मृतिवचनं तदन्यतरविच्छेदेऽप्युपपद्यते। अत्र प्रत्येकं वाक्यपरिसमाप्तिराश्रीयते श्रुत्यनुरोधाय तर्हि सत्यामपि वेद्यां वेदविच्छेद आश्विनप्रसङ्गः। न। तस्य तु दुर्ब्राह्मणत्वं स्मर्यते परं तु नाऽऽश्विनाधिकारः। किंच वेदविच्छित्तौ वेदिविच्छित्तिरवश्यंभाविनी। अथापि नावश्यं भाविनी श्रद्दधानस्य साधुवृत्तस्योत्पत्तिशुद्धस्य तस्य सूत्रकारैरधिकारोक्तेः। नहि वैगुण्ये सत्येव ब्राह्मण्यं सुसंपादं भवतीति।

सर्वथाऽपि न दुर्ब्राह्मणमात्रस्याऽऽश्विनोऽभिधीयते । तथाच सोमपीथविच्छेद एवाऽऽश्विनः । वेदविच्छेदे स्मार्तं प्रायश्चित्तं कर्तव्यं प्रथमयज्ञे प्रवर्ग्यश्चेति । यत्तु बौधायनवचनम्—औपासनं वा धारयमाणो भवतीति तद्दौर्ब्राह्मण्यनिवृत्तिपरं नत्वाश्विननिषेधपरं, न तस्य प्रवर्ग्यनियमः स्मार्तप्रायश्चित्तं च नेति द्रष्टव्यम् । वेदिशब्देन महावेदिः । तया सोमयागो लक्ष्यते । विच्छिद्येते इति द्विवचनं वेदवेद्यभिप्रायेण । विच्छिद्येतेति पाठ ऋजुरेव । वेदिशब्दो दीर्घेकारान्तः । यस्य वेदश्च वेदिश्चेति पाठः सरल एव । ऐन्द्राग्नः पशुः पुनरुत्सृष्ट ऐन्द्राग्नं पुनरुत्सृष्टमालभेतेति श्रुतेः । वाहोत्सृष्टः पुनर्वहन्पुनरुत्सृष्टः । लिङ्गं चात्र भवति पुनरुत्सृष्ट इव ह्येतस्य सोमपीथ इति । स च च्छागः । तथा च भारद्वाजः—छागः पुनरुत्सृष्ट इति । पुनरुत्सृष्टोऽनड्वानिति सूत्रान्तरे । गोपशुः पुनरुत्सृष्टोऽग्नीषोमीयो भवतीति शाखान्तरे । अस्यां श्रुतौ पुनरुत्सृष्टशब्दार्थस्य गोशब्दे विशेषणाद्गो व्यतिरिक्ते छागेऽपि पुनरुत्सृष्टभाक्त्वमस्तीति गम्यते । छागे वहनकर्तृत्वं हिमाचले प्रसिद्धम् । लौगाक्षिस्तु ऐन्द्राग्नमनुसृष्टमालभेतेत्याह । एतल्लक्षणमप्याह स एव यमयोर्यः परो जातः सोऽनुसृष्ट इति । अत्रापि च्छाग एव । कलौ गोयागस्य निषेधाच्छाग एव ग्राह्यः । तत्र सोमात्पूर्वभाविनोः पर्वणोरुपादानपृथक्त्वात्क्रमेणैतौ कर्तव्यौ । तत्र प्रथमपर्वण्यैन्द्राग्नः पशुः, तदनन्तरपर्वण्याश्विनः, असंभवे सोमात्पूर्वभाविन्येकस्मिन्नेव पर्वणि समानतन्त्रावेतौ कर्तव्यौ । अत्रापि पाठक्रमात्पूर्वं ऐन्द्राग्नोऽनन्तर आश्विनः । पशुपशुप्रकृतित्वादैन्द्राग्नविकारौ । पक्षेऽग्नीषोमीयविकारत्वमपि । अत्र ज्ञापकमग्रे वक्ष्यते । समानतन्त्रत्वे द्विवचनान्त ऊहः । तन्त्रानन्तःपातित्वात्षड्ढोतृपश्विष्टी विधेते एव । एवं दक्षिणाऽपि । समानतन्त्रत्वेऽप्येक एव षड्ढोता, एकैव पश्विष्टिर्दक्षिणा च । ऐन्द्राग्नेन पशुना यक्ष्ये विच्छिन्नसोमपीथसंधानार्थमिति संकल्पवाक्यं, नैमित्तिकत्वान्नास्ति कामना, पुनरुत्सृष्टस्य च्छागस्य वपायाः पुनरुत्सृष्टस्य च्छागस्य हविष इति प्रैषयोर्विकार इति केचित् । छागशब्देनैवाऽऽश्विन इत्यपि केचित् । वस्तुतश्छागशब्देनैवोभयत्रापि विशिष्टेन वा । विशिष्टोल्लेखपक्षे धूम्रललामस्य च्छागस्य हविष इति प्रैषावाश्विनेऽपि । आश्विनस्य भिन्नतन्त्रत्व आश्विनेन पशुना यक्ष्ये दौर्ब्राह्मण्यपरिहारार्थमिति संकल्पवाक्यम् । समानतन्त्रत्वे विच्छिन्नसोमपीथसंधानार्थेनैन्द्राग्नेन पशुना दौर्ब्राह्मण्यपरिहारार्थेनाऽऽश्विनेन पशुना च तन्त्रेण यक्ष्य इति संकल्पवाक्यम् । गणवदूहः । एक एव यूपः । स्वरुरशनाहृदयशूलाः भिन्नाः । अग्नीषोमीयेण सवनीयेन वा समानतन्त्रत्वेऽग्नीषोमीयसवनीयानूबन्ध्यानां स्वरुहृदयशूलौ समानावेव । ऐन्द्राग्नाश्विनयोस्तु स्वरुहृदयशूलौ भिन्नावेव । यूपः सर्वेषामपि समान एव । यन्निषु यूपेष्वालभेत बहिर्धाऽस्मादिन्द्रियं वीर्यं दध्यात् । भ्रातृव्यमस्मै जनयेत्, इति श्रुत्या प्रतिपशु यूप इत्यमुं पक्षं निन्दित्वा, एकयूप आल-

मते, एकधैवास्मिन्निन्द्रियं वीर्यं दधाति नास्मै भ्रातृव्यं जनयतीति सौत्रामण्यामेकयूपस्यैव सिद्धान्तितत्वात्। पशुरशनाकुम्भीप्लक्षशाखावपाश्रपण्यो भिन्ना एव। मीमांसकमते सजातीयपशुबहुत्वेऽपि कुम्भ्यादि तदेवेति द्रष्टव्यम्।

स प्रथमः सोमानाम्।

सोमानां मध्ये सोऽग्निष्टोमः सोमः प्रकृतित्वात्प्रथमो भवतीति शेषः। सर्वेभ्यः सोमेभ्यः पूर्वमग्निष्टोमाख्यः सोमः कर्तव्यो न त्रिवृदादयस्तद्गुणविकारा नचान्य उक्थ्यादय एकाहा द्विरात्रादयोऽहीनाश्चेत्यर्थः। तथाचाग्निष्टोमं प्रस्तुत्य ब्राह्मणम्—तस्मादाहुर्ज्येष्ठयज्ञ इति प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजतेति। प्रजापतेर्ज्येष्ठत्वं प्रथमोत्पन्नत्वात्। तेनैव सर्वेभ्यः सोमेभ्यः पूर्वमग्निष्टोमस्यानुष्ठितत्वाज्ज्येष्ठत्वम्। प्रजापतिर्यथा सर्वोत्पादकत्वाज्ज्येष्ठस्तथाऽग्निष्टोमोऽपि सर्वेभ्यः सोमेभ्यो धर्माणां समर्पणाज्ज्येष्ठः। प्रजापतेः सर्वोत्पादकत्वं हिरण्यगर्भः समवर्तताग्र इत्यादिषु मन्त्रेषु प्रतिपादितम्। हिरण्यगर्भः प्रजापतिरेव। प्रजापतिर्वै हिरण्यगर्भ इति श्रुतेः। एवं चाग्निष्टोमे ज्येष्ठत्वं नाम प्रकृतित्वमेव। छन्दोगब्राह्मणमप्यग्निष्टोमस्य प्रथमत्वमाह एष वाव प्रथमो यज्ञो यज्ञानां य एतेनानिष्ट्वाऽन्येन यजते कर्त्रपत्यमेव जायते वा प्रमीयत इति। अस्ति चाग्निष्टोम एव सर्वधर्माम्नानम्। अतोऽग्निष्टोम एव प्रकृतिः। अत एव प्रथमो भवति। उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामश्चेत्यग्निष्टोमस्य गुणविकारा भवन्तीति वक्ष्यमाणसूत्रात्स्पष्टमग्निष्टोमस्य प्रकृतित्वं द्रष्टव्यम्। भरद्वाजोऽपि सुस्पष्टमाह नाग्निष्टोमेनानिष्ट्वेतरैः क्रतुभिरितीति। यजेतेति शेषः। नन्विदं सूत्रं व्यर्थं नाकृतायां प्रकृतौ विकृतिर्भवतीति शास्त्रान्तरप्रसिद्धन्यायेनैव सिद्धेरिति चेन्न। स्वशास्त्र एतादृशन्यायसिद्ध्यर्थमेवैतत्सूत्रप्रणयनात्।

अतिरात्रमेके प्रथमं यज्ञमधीयते।

अतिरात्रस्य प्रकृतित्वाभावेऽपि प्रकृतिभूताग्निष्टोमादपि पूर्वभावित्वमतिरात्रस्य वचनादेक आचार्या वदन्तीत्यर्थः। तच्च वचनं शाखान्तरादुन्नेयम्। अत्रातिरात्रो ज्योतिरतिरात्रो ग्राह्यः। तेन ज्योतिष ऋद्धिकाम इति वक्ष्यमाणे योनिभेदेन जैमिनिनोक्तोऽतिरात्रः प्रथमो न भवति। अत्रेदं सिद्धमतिरात्रस्य सोमात्पूर्वभावित्वमुत्तरभावित्वं वा। अतिरात्रव्यतिरिक्तानां क्रतूनां त्वर्थादग्निष्टोमोत्तरभावित्वमेवेति। सोमानामतिरात्रो वा प्रथमो यज्ञ इत्येतावतैव विकल्पे सिद्ध एके, एकेषामित्येवं क्वचित्क्वचिद्वचनं मङ्गलार्थं कृतं द्रष्टव्यम्। तच्च विशेषणैकशब्दस्मारितविशेष्यभूताचार्यस्मरणरूपं ग्रन्थस्य निर्विघ्नपरिसमाप्तये ग्रन्थमध्ये तस्य निबन्धनं तु शिष्यशिक्षार्थम्। प्रकृते फलं तु कर्मण्यपि मध्ये मध्ये मङ्गलकरणम्। आचरन्ति च शिष्टा ग्रन्थादौ

ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलं विघ्नशङ्कया । ग्रन्थादौ मङ्गलं यज्ञं व्याख्यास्याम इति यज्ञशब्दोपादानेन कृतम् । यज्ञो हि विष्णुरेव भवति यज्ञो वै विष्णुरिति श्रुतेः । कर्मण्यपि मङ्गलकरणं बौधायनेनोक्तं यज्ञाधिदैवतं विष्णुं ध्यायतीत्यनेन । मङ्गलस्य समाप्तिसाधनत्वं तु मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वादिति तार्किकोद्धोधितपरिशेषानुमानात् । तत्र विघ्नध्वंस एव मङ्गलस्य फलमिति नवीनास्तार्किकाः । विघ्नध्वंसपूर्वकसमाप्तिः फलमिति प्राचीनास्तार्किका इत्यास्तामप्रस्तुतम् । वाशब्दप्रदर्शितविकल्पस्थले तुल्यविकल्पमात्रप्रदर्शनमेव नतु मङ्गलार्थत्वमपीति द्रष्टव्यम् । नन्वेक इत्येकेषामिति वा यत्र पठ्यते तत्र तत्पक्षस्य हेयत्वप्रदर्शनार्थत्वमेवास्त्विति चेन्न । तत्पक्षानुक्त्यैव निर्वाहे तत्पक्षप्रदर्शनस्य निरर्थकत्वापत्तेः केषुचित्स्थलेषु मङ्गलार्थकत्वप्रदर्शनपूर्वकविकल्पदर्शनं केषुचित्केवलविकल्पप्रदर्शनमेवेत्यत्र नियामकं स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वादिति न्याय एव नान्यदिति ज्ञेयम् ।

अमावास्यायां यजनीयेऽहनि दीक्षते
पौर्णमास्यां यजनीयेऽहनि सुत्यमहः ।

अमावास्यायां पौर्णमास्यामित्युभयत्रापि समीपसप्तमी । अमावास्यासमीपवर्ति यद्यजनीयमहस्तस्मिन्दीक्षते । पौर्णमासीसमीपवर्ति यद्यजनीयमहस्तस्मिन्नहनि सुत्यं सुत्यावदहः । भवतीति शेषः । अर्शआदित्वान्मत्वर्थीयाच्प्रत्ययः । सुत्यमित्यत्र सुत्याशब्देन सोमकण्डनवत्कर्मोच्यते तद्वदित्यर्थः । यद्यप्यमावास्याशब्दः सूर्याचन्द्रमसोः परमसंनिकर्षनिमित्तः पौर्णमासीशब्दश्च परमविप्रकर्षनिमित्तोऽतः संनिकर्षो विप्रकर्षश्च संधिमध्यमक्षणमात्रं तच्च पञ्चदशीप्रतिपदोः समानमेवेति तयोर्द्वयोरप्यमावास्यापौर्णमासीशब्दाभ्यां ग्रहणं सिद्धं तथाऽप्यत्रामावास्यासमीपवर्तियजनीयेऽहनि दीक्षायां पौर्णमासीसमीपवर्तियजनीयेऽहन्येव सुत्या न तु पर्वण्यपीतिप्रदर्शनार्थम् । यजनीयदीक्षासुत्याविषय एव पौर्णमासीसमीपवर्तियजनीयेऽहनि दीक्षा, अमावास्यासमीपवर्तियजनीयेऽहनि सुत्येत्येतादृशवैपरीत्यव्यावृत्त्यर्थं च । ननु संनिकर्षनिमित्तप्रयुक्तं पौर्णमासीत्वं विप्रकर्षनिमित्तप्रयुक्तममावास्यात्वं पञ्चदशीवत्प्रतिपद्यपि समानमेवेति प्रतिपदोऽपि पौर्णमास्यमावास्याशब्दाभ्यां यथायथं ग्रहणमिति उक्तं तत्कथमिति चेत् । उच्यते— पौर्णमास्यां पौर्णमास्या यजतेऽमावास्यायाममावास्ययेति वाक्याभ्यां विहितो यागः संधौ यजेतेतिश्रुत्या पर्वप्रतिपत्संधौ प्राप्तः । तत्र च यागाधिकरणीभूतपर्वप्रतिपत्संधिरूपस्य कालस्य दुर्लक्ष्यत्वेन तस्यायोग्यत्वेन संधिमभितो यजेतेति श्रुतिः संधिपार्श्वद्वयगतं कंचित्स्थूलं कालं लक्षयति । तस्याप्ययोग्यत्वात्पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्या इति गोभिलेन पञ्चदशीवत्प्रतिपदोऽपि यागाधिकरणत्वेन स्वीकारात्तत्रापि पर्वत्वमवश्यं स्वीकार्यम् । अन्यथा पौर्णमास्यां पौर्णमास्या यजतेऽमावास्यायाममावास्ययेति वाक्याभ्यां पौर्णमास्यमावास्ययोर्याग उक्तः स प्रतिपदि विरुध्येत । अतोऽनु-

पपत्त्या चन्द्रपूरणनिमित्तोपलक्षितत्वेन चन्द्रक्षयनिमित्तोपलक्षितत्वेन च तत्तत्प्रतिपद्यपि पौर्णमासीत्वममावास्यात्वमवश्यमङ्गीकार्यमेव । तथा चन्द्रपूरणनिमित्तोपलक्षिता तत्प्रतिपदपि पौर्णमासी चन्द्रक्षयनिमित्तोपलक्षिता तत्प्रतिपदपि अमावास्येति तत्र यष्टव्यमित्यर्थादुक्तं भवति । यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी यः परमः संनिकर्षः साऽमावास्येति गोभिलवाक्ये क्षणमात्रमेव परमविप्रकर्षसंनिकर्षशब्दवाच्यम् । उभयत्रापि पर्वप्रतिपदोः स स एव संधानं तदुभयोरपि तिथ्योः सममेवेति तिथिद्वयात्मकः कालः स एव क्षणः । चन्द्रस्य पूरणनिमित्तत्वेन क्षयनिमित्तत्वेन चोपलक्षितस्तत्तदुत्तरक्षणश्च तावान्कालः संधिशब्दवाच्यः । स च तिथिद्वयसंबद्ध इति पञ्चदशीप्रतिपदोरुभयोरप्यमावास्यापौर्णमासीशब्दाभ्यां ग्रहणं युक्तमेवेति सुस्थम् ।

अमावास्यायां पौर्णमास्यां वा ।

मण्डूकप्लुत्या दीक्षेत इत्येवानुवर्तनीयम् । तेनामावास्यायां दीक्षेते पौर्णमास्यां वा दीक्षेत इत्यर्थो भवति । सुत्या तु सोमेनेष्ट्या पशुबन्धेन वाऽमावास्यायां पौर्णमास्यां वा यजेतेति सामान्यसूत्रादमावास्यायां पौर्णमास्यां वा भवति । अस्मिन्सूत्रे मुख्यत्वेन सुत्याया एव यागशब्देन ग्रहणम् । एवं चात्रापि षोडशापवर्गताऽपरपक्षे यागश्च सिध्यति । ननु यं कामयेत वसीयान्त्स्यादिति तं पूर्वपक्षे याजयेत्, वसीयानेव भवतीति पूर्वपक्षयागस्य प्रस्तुतत्वात्, यं कामयेत पापीयान्त्स्यादिति तमपरपक्षे याजयेत्पापीयानेव भवतीत्यपरपक्षयागस्य निन्दितत्वात्कथमेतदिति चेन्न । आमावास्येन वा पौर्णमासेन वा हविषेष्ट्वा दीक्षेतेति प्रत्यक्षश्रुत्या सोमे पूर्वपक्षयागनियमश्रुतेर्बाधितत्वात्। अस्यां श्रुतौ क्त्वाप्रत्ययश्रवणात्प्रकृतियागसमाप्तिसोमारम्भाव्यवधानमपि लभ्यते । वाशब्दद्वयश्रवणं द्वयोस्तुल्यबलत्वख्यापनार्थम् । न चोदगयन आपूर्यमाणपक्षे पुण्याहे यज्ञकालोऽनादेश इति च्छन्दोगसूत्रविरोधः । अस्मिन्नेव सूत्रेऽनादेश इति श्रवणादादेशव्यतिरिक्तस्थल एवैतस्य कालस्य प्रवृत्तेः । प्रकृत आदेशस्यैव सत्त्वेन सूत्रविरोधाभावात्पुण्याहपदसाहचर्यात्पाकयज्ञपरताऽपि च्छन्दोगसूत्रस्य गम्यते । यं कामयेत वसीयान्स्यादिति पूर्वपक्षयागप्रस्ताविका श्रुतिरप्यनादेश एव सावकाशा । वक्ष्यति च गृह्ये पाकयज्ञेष्वापूर्यमाणपक्ष इति पर्वणोः खण्डत्वे संधिमदहोरात्रयोर्दीक्षासुत्ये भवतः । एतदनुरोधेन दीक्षावृद्धिह्रासौ ।

कर्मण आरम्भापवर्गप्रधानत्वादेकादिदीक्षापक्षे मुख्यकाल उभयोरसंभवेनान्यतरच्चोदितकाले कर्तव्यमित्यभिप्रायेणाऽऽह—

यदि त्वेका दीक्षा द्वे तिस्रश्चतस्रोऽपरिमिता वा तत्रापर्वणि सुत्यमहर्दीक्षा वा ।

दीक्षाशब्दस्य वचनविपरिणामेन द्वे तिस्र इत्यादिष्वन्वयः । अपरिमितशब्द उक्तप्रमाणाधिकप्रमाणवाची । अपरिमितं प्रमाणाद्भूय इति कात्यायनोक्तेः । तत्रापरि-

मितत्वावधिर्मासः संवत्सरो वा सामर्थ्यानुसारेण । अथवा यावत्पर्यन्तं कृशता तावत् । तथाचाऽऽपस्तम्बः—द्वादशाहर्ध्यमवरं दीक्षितो भवति मासं संवत्सरं यदा वै कृशः स्यादित्यपरमिति । अत्राऽऽश्वलायनो व्यवस्थामाह—दीक्षणादिरात्रिसंख्यानेन दीक्षा अपरिमिता एकाहप्रभृत्या संवत्सरात्संवत्सरं त्वेव सत्रे द्वादशाहतापश्चितेषु यथा सुत्योपसदः कर्माचारस्त्वेकाहानामेका तिस्रो वा दीक्षास्तिस्र उपसदः सुत्यमहरुत्तमं दीक्षान्ते राजक्रयस्तदहः प्रायणीयेष्टिरिति । द्वादशाहस्तु लिङ्गात्स्यादिति सूत्राभ्यां द्वादशाहतापश्चितेषु सत्रेषु यथा सुत्योपसदस्तथा दीक्षा अपि उपसत्संख्याया अप्यन्यत्राविहितत्वादत्रैव विधिः कल्प्यते यत्संख्याः सुत्या उपसदश्च तत्संख्या एवेति । एतदुक्तं भवति—द्वादशाहतापश्चितेषु यत्संख्याः सुत्यास्तत्संख्या एवोपसदश्च दीक्षाश्च भवन्तीति । आचर्यतेऽस्मिन्नित्याचारः कालः कर्मण आचारः कर्माचार एकाहानां प्रयोगकालो वक्ष्यत इत्यर्थः । एकाहशब्देन विकृत्येकाहा उच्यन्ते बहुवचनसंबन्धात् । प्रकृतौ दीक्षाणां विहितत्वाच्चतुःशब्दो विशेषविध्यर्थोऽन्यत्स्पष्टम् । एते कल्पाः प्रकृतावेव विकल्पन्ते सर्वेषां प्रकरणाम्नानाविशेषात् । यथोक्तं षष्ठाध्याये पञ्चमे पादे जैमिनिना दीक्षापरिमाणे याथाकाम्यमविशेषात् । सर्वेषां पक्षाणामविशेषात्, विशेषाभावात् । द्वादशाहस्तु लिङ्गात्स्यादिति सूत्राभ्याम् । द्वादशाहं दीक्षितो भूतिं वन्वीतेति लिङ्गाद्द्वादशदीक्षापक्षोऽपीति द्वितीयसूत्रार्थः । भूतिवननं तु द्वादशपक्षे भविष्यति । यद्वा दीक्षितो भूतिं वन्वीतेत्येतावद्विधीयते । द्वादशग्रहणं तु प्रदर्शनार्थमिति वार्तिककारीतिमनुसृत्येदं व्याख्यानम् । यदि त्वेकाद्यन्यतमदीक्षापक्षस्तदा गौणमुख्यन्यायेनापर्वणि सुत्यमहर्दीक्षा वा भवतीत्यर्थः । तत्र पर्वणि सुत्येत्ययमेव पक्षः प्रबलः । सोमेनेष्ट्वेतिपरिभाषासूत्रात्[1] । कथमेकावरेषु दीक्षाकल्पेषु तत्रापर्वणि दीक्षा सुत्या वा स्यादपर्वणि वा दीक्षां पर्वण्येव सुत्यां संपादयेदिति भारद्वाजसूत्रात् । अङ्गगुणविरोधे च तादर्थ्यादिति द्वादशाध्याये द्वितीयपादे जैमिन्युक्तेश्च । अङ्गानि दीक्षणीयादीनि तेषां गुणः प्रथमदिनादिकर्तव्यतारूपः । तत्र संकल्पादियूपच्छेदनान्तं प्रथमदिने कर्तव्यम् । प्रवर्ग्यसत्त्वे प्रवर्ग्यसंभरणमपि । प्रायणीया सोमक्रय आतिथ्या प्रवर्ग्य उपसत्प्रवर्ग्य उपसच्चेत्येतानि द्वितीयादिने कर्तव्यानि । प्रवर्ग्य उपसत्, वेदिकरणं प्रवर्ग्य उपसच्चेत्येतानि तृतीयदिने कर्तव्यानि । प्रवर्ग्य उपसत्प्रवर्ग्य उपसत्प्रवर्ग्योद्वासनमग्निप्रणयनं शाखाहरणं काष्ठवेदिबर्हिःप्रोक्षणं वेदिस्तरणं हविर्धानप्रणयनमुपरवकरणमाग्नीध्रीयमानमौदुम्बर्युच्छ्रयणं सदःकरणं धिष्ण्यनिवपनमन्वाधानादिकं साग्नीषोमप्रणयनवसतीवर्याहरणं पशुतन्त्रं वसतीवरीपरिहरणादिकं चेत्येतानि चतुर्थदिने कर्तव्यानि । प्रधानो जघन्यः सोमयागः ससवनीयादिः पञ्चमदिने कर्तव्यस्तत्र य इष्ट्वेति वाक्येन विहितपर्वकालविरोधे प्रधानस्यैव धर्मानुग्रहः । अङ्गानां प्रधानसाद्गुण्यार्थत्वेन तद्विरो-

१ क. °नेष्ट्वेति ।

घेऽङ्गसाङ्गुण्यस्याकिंचित्करत्वात् । लोके प्रथमं बहुभिरवरुद्धे स्थले पश्चादागतस्यैक-स्यापि राज्ञस्तद्ग्रहणदर्शनाच्च । अतस्तत्र सोमयागस्यैव पाठतोऽनुष्ठानतश्च जघन्य-स्यापि प्रधानतया पर्वकालकत्वम् । दीक्षणीयादेस्तु पाठतोऽनुष्ठानतश्च प्रथमोपस्थित-त्वेऽपि एकादिदीक्षापक्षे न पर्वानुग्रहः । द्वादशदीक्षापक्षे त्वविरोधाद्दीक्षणीयायामपि सः । अङ्गगुणेन सह विरोधोऽङ्गगुणविरोधः । तस्मिन्नङ्गगुणविरोधे । अङ्गगुणविरोध इत्यत्र प्रधानगुणस्येति शेषः । तथा च गुणेन सह प्रधानगुणस्य विरोधे सतीत्यर्थो भवति । तच्छब्दस्य सर्वनामत्वेन प्रधानपरामर्शित्वम् । तथाच तादर्थ्यात्प्रधानार्थत्वा-दित्यर्थो भवति । अङ्गानामिति शेषः । अङ्गानां प्रधानार्थत्वात्प्रधानानुग्रह एव न्याय्य इति सूत्रार्थः । दीक्षाया एकत्वादिकं शतपथ आम्नातम्—एकरात्रं दीक्षितो राजानं क्रीणाति त्र्यहे त्र्यहे चतुरहेऽपरिमिते वेति । इदं च याजमानसू-त्रेऽप्यनूदितमाचार्येण । अमावास्यायां यजनीये वा दीक्षायां चतुर्थ्यादिषु पञ्च-म्यादिषु वा यथोपनतं सुत्या । पौर्णमास्यां यजनीये वा सुत्यायां तदनुरोधे-नैकादिदीक्षाकल्पनम् । असंभवे शुक्लपक्षान्तर्गते देवनक्षत्र एव वा । यान्येव देवनक्षत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुत इति श्रुतेः । आमावास्येन वा हविषेष्ट्वा नक्षत्रे वेति सोमे बौधायनवचनाच्च । यत्कर्म कर्तुं शीलं यस्य स यत्कारी । देवनक्षत्राणि श्रुतौ प्रदर्शितानि—कृत्तिकाः प्रथमं विशाखे उत्तमं तानि देवनक्षत्राणीति । ज्योतिःशास्त्रे सोमदेवते नक्षत्र आरम्भोऽतिप्रशस्त इत्युक्तम् । सोमारम्भो वसन्तेऽतिप्रशस्तः । सोमदेवत इति सोमदेवतं मृगशिरः केवलं शुक्लपक्ष एव वा । उक्तं च कौषीतकिभिः—अमावास्यायां पौर्णमास्यां वा सुत्यमहर्दीक्षा वा शुक्लपक्ष एव वेति । केवले शुक्लपक्ष एव वोभयमित्यर्थः । शाङ्खायनः—शुक्लपक्षे दीक्षा पुण्ये नक्षत्रे समापनं चेति । सूत्रकृताऽपि सोमेनेष्ट्वा पशुबन्धेन वाऽमावास्यायां पौर्णमास्यां वा यजेतेति विपरीताभिधानेन ज्ञापितमस्ति अमावास्यापौर्णमासीमध्यगत-कालस्य केवलस्यापि कृत्स्नयागाङ्गत्वमस्तीति । एतेनापरपक्षस्य नास्तीत्यर्थात्सिध्यति । पौर्णमास्यां दीक्षायां चतुर्थ्यादिषु सुत्या तद्यजनीयायां दीक्षायां पञ्चम्यादिषु सुत्येत्यपि द्रष्टव्यम् । श्रूयते ह्यैतरेयिणामस्मिन्नर्थे श्रुतिः—आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन्बर्हिषि दीक्षेतैषो एका दीक्षेति । अमावास्या-काले कर्तव्यं हविरामावास्यं पौर्णमास्यां कर्तव्यं हविः पौर्णमासं, हविःशब्दोऽत्र यज्ञमुपलक्षयति । वाशब्दौ समुच्चयार्थौ । अमावास्यासंबन्धिना पूर्णमासीसंबन्धिना वा यज्ञेनेष्ट्वा दीक्षेत तस्मिन्हविष्येवेत्येवमन्वयः । तस्मिन्बर्हिषीत्यत्राप्येवेत्यस्यान्वयः । अत्रापि हविःशब्दो यज्ञोपलक्षकः । एवं बर्हिःशब्दोऽपि । तस्मिन्नामावास्याख्ये हविषि यज्ञे तस्मिन्पौर्णमासाख्ये बर्हिषि यज्ञेऽनुष्ठिते सति पश्चादेव दीक्षेतेत्यर्थः । तस्मिन्नेव हविषि तस्मिन्बर्हिषि दीक्षेतेत्ययमुक्तस्यैव प्रपञ्चः । एषा उ इति पदच्छेदः।

उकारोऽपिशब्दार्थकः। एषाऽप्येका दीक्षा। एवमुक्ते सत्यप्यन्याऽपि काचिद्दीक्षाऽस्तीति सूचितं भवति। अत एव सूत्रकार इष्टिपूर्वत्वं सोमपूर्वत्वं चेत्युभौ पक्षावुदाजहार। लाट्यायनद्राह्यायणावाहतुः—प्रथमायां पूर्वपक्षस्य दीक्षेतैषो एका दीक्षा दृष्ट्वा वा नक्षत्रयोगमिति। नक्षत्रयोगमित्यस्यायमर्थः—चैत्र्यादिपौर्णमासीषु चित्रादिनक्षत्रयोगं दृष्ट्वा दीक्षेतेति। अमावास्यायां सुत्यायां तु शास्त्रान्तराद्द्वादशैव दीक्षा नियताः। पूर्वपक्षयागविधायिका श्रुतिस्तु आदेशव्यतिरिक्तस्थल एवेति दर्शितमेव प्राक्। अमावास्यायां दीक्षा पौर्णमास्यां सुत्येत्यस्मिन्कल्पे दर्शपूर्णमासेष्टी अतिपन्ने तदर्थं क्रतुसमाप्त्यनन्तरं पथिकृद्वैश्वानर्यौ कार्यौ। यदि द्वितीयादिप्रयोगोऽनयोः। एकस्या अतिपातने पाथिकृती वैश्वानरी वा। पौर्णमास्यां दीक्षाऽमावास्यायामावर्तनप्राक्कालिकसंधिमत्यां सुत्या यदा तदा पौर्णमासदर्शातिपातने दोषो नेति केचित्। यदाऽऽवर्तनोत्तरकालिकसंधिमत्याममावास्यायां दीक्षाऽऽवर्तनप्राक्कालिकसंधिमत्यां पौर्णमास्यां सुत्या तदा तु पूर्णमासस्य चैकापूर्वजनकत्वनिर्वाहान्यथानुपपत्त्या लोपप्रायश्चित्तं कर्तव्यमेवेत्यवश्यमङ्गीकर्तव्यमेव। यदा तु प्रथमः पूर्णमासस्य लोपोऽनन्तरं दर्शस्य तत्र प्रायश्चित्तं नैवेति द्रष्टव्यं सुधीभिः। जुहोतेर्ग्रहणं यजतेरुपलक्षणम्। आधानानन्तरं प्रथमसंवत्सरे वसन्ते सोमारम्भः कर्तव्य इति याज्ञिकप्रसिद्धम्। तत्र वसन्तश्चान्द्रसौरभेदेन द्विविधः। चैत्रवैशाखात्मकमासद्वयात्मा चान्द्रः। मध्ये मलमासेऽपि

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः।

इति स्मृतेर्मासद्वयात्मक एको मासस्तेन मासद्वयात्मकत्वं न विरुध्यते। मासद्वयात्मकत्वं वसन्तर्तोर्मधुश्च माधवश्च वासन्तिकावृतू इत्यनया श्रुत्या। सौरो वसन्तस्तु मीनमेषात्मको मेषवृषात्मको वा। मीनमेषयोर्मेषवृषयोर्वा वसन्त इतिबौधायनोक्तेः। अनयोर्विनियोगः स्मृतौ—

श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रमसर्तुषु।
तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्॥ इति।

एतादृशद्विविधवसन्तान्तर्गतपर्वसु मध्ये यत्पर्व मलमासास्तादिदूषितं न भवति तत्रैव सोमस्य कर्तव्यत्वात्तदर्थं निर्णयः क्रियते।

तत्र कालादर्शे स्मृतिः—

अनित्यमनिमित्तं च दानं च महदादिकम्।
अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणम्॥
देवारामतडागादिप्रतिष्ठा मौञ्जिबन्धनम्।
आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः॥

राजाभिषेकः प्रथमश्चूडाकर्म व्रतानि च ।
अन्नप्राशनमारम्भो गृहाणां च प्रवेशनम् ॥
स्नानं विवाहो नामातिपन्नं देवमहोत्सवः ।
व्रतारम्भं समाप्तिं च काम्यस्यैव च पाप्मनः ॥
प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत् ॥ इति ।

अध्वरो यज्ञः । काठकगृह्ये—

रविसंक्रमहीने यो वर्ज्यावर्ज्यविधिः स्मृतः ।
स एव तु द्विसंक्रान्ते मलमासेऽप्युदीरितः ॥ इति ।
बृहस्पतिः—बाले वा यदि वा वृद्धे शुक्रे चास्तं गते रवौ ।
मलमास इवैतानि वर्जयेद्देवदर्शनम् ॥ इति ।
लल्लः—नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा
संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधस्तु दीक्षा ।
मौञ्जीबन्धोऽङ्गनानां[1] परिणयनविधिर्वास्तुदेवप्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते च ॥ इति ।

दीक्षा यागदीक्षा मन्त्रदीक्षा च । क्षयमासादिनिषेधास्तत्प्रतिप्रसवाश्च मत्कृतस्मार्तसंस्काररत्नमालातोऽवगन्तव्याः । यद्यपि काम्यारम्भं समाप्तिं च मलमासे च वर्जयेदिति काम्यारम्भसमाप्तिनिषेधेन नित्यनैमित्तिकारम्भसमाप्त्योरनिषेधस्तथाऽपि मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियामिति वचनात्संभवे निषेधोऽनयोरप्यस्त्येव । प्रथमे प्रयोगे गत्यन्तराभाव आरम्भः कर्तव्य एव । यद्यनतिक्रान्तः कालो भवति ।

यानि तु—उपरागोऽधिमासश्च यदि प्रथमपर्वणि ।

तथा मलिम्लुचे पौषे नान्वारम्भणमिष्यते ॥
गुरुभार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा ।

इत्यादीनि वचनानि तान्यालस्यादिनाऽतिक्रान्तशुद्धकालप्रारम्भविषयाणि ।

नामकर्म च दर्शेष्टिं यथाकालं समाचरत् ।
अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे ॥

इत्यपरार्के गर्गोक्तेरिति धर्मशास्त्रनिबन्धकाराः । कालप्राप्तस्य न दोष इति भावः । एवं चाष्टदोषग्रस्तो विकल्पः परिहृतो भवति सति संभवे । दर्शेष्टिग्रहणं नित्यनैमित्तिकश्रौतकर्मोपलक्षणम् । आरम्भणीयाग्रहणं कर्मारम्भोपलक्षणम् । पूर्वत्र दीक्षानिषेधः काम्यदीक्षापरः कालान्तरसंभवे दीक्षानिषेधपरो वा । इदानीमाचारस्तु शिष्टानामननु-

---

१ क. ख. °नां प्रतिगमन° ।

ष्ठानमेव । यदि तु वसन्तेऽन्तिममेव पर्वविशिष्टं तच्च व्यतीपातादिदोषग्रस्तं तत्र श्रौतस्य प्राबल्यात्कर्मारम्भः कर्तव्य एवेति यद्यपि प्राप्तं तथाऽपि ज्योतिःशास्त्रस्य विरवकाशत्वाद्वेदाङ्गत्वेन समबलत्वाच्च तदुक्ता दोषा अप्यङ्गीकार्या एवेत्यस्त्वप्रस्तुतविचारः । यदि त्वेकादिदीक्षास्तत्रापर्वणि मुख्यमहर्दीक्षा वेत्येतावत्येव वक्तव्ये चतुर्णां पृथगुपादानमारम्भे यः पक्षः कर्तव्यो भवति तस्य संकल्पेऽवधारणं कर्तव्यं पञ्चषट्सप्ताष्टनवदशैकादशान्यतमसंख्यात्मकापरिमितदीक्षापक्षे पञ्चषट्सप्ताष्टनवदशैकादशान्यतमाविभक्तिकसंख्याशब्दमुच्चार्यापरिमितदीक्षापक्षमाश्रित्येत्येवमुच्चार्यमित्येवंरूपेण संकल्पेऽवधारणम् , एकद्वित्रिचतुरन्यतमसंख्यात्मकदीक्षापक्ष एकद्वित्रिचतुरन्यतमभविभक्तिकं संख्याशब्दमुच्चार्य दीक्षापक्षमाश्रित्येत्येवमुच्चार्यमित्येवंरूपेणैव संकल्पेऽवधारणमित्येतादृशप्रयोजनभेदं प्रदर्शयितुम् । युगपत्कामयेताऽऽहारपृथक्त्वे वेति प्रथमसूत्रप्रयुक्तो विचार इत्यनन्तरं निरूपणम् । कालस्य सर्वापेक्षया मुख्याङ्गत्वात्तदनन्तरं विधिः । प्रसङ्गसंगत्या तदनन्तरं प्रकृतिविकृतिपौर्वापर्यनियामको दर्शपूर्णमासारम्भात्प्राक्कर्तव्यतानिषेधः । तदनन्तरं प्रसङ्गसंगत्याऽग्निष्टोमस्य सर्वसोमप्रकृतित्वप्रदर्शनम् । प्रसङ्गसंगत्याऽतिरात्रस्याग्निष्टोमपूर्वभावित्वप्रदर्शनम् । आकाङ्क्षितत्वात्तदनन्तरं दीक्षाणां यागार्थानां संख्यादिप्रदर्शनं चात्रैव कृतमिति द्रष्टव्यम् । अमावास्यायां यजनीयेऽहनीत्यादिदीक्षा वेत्यन्तं सर्वक्रतुसाधारणम् । विशेषतस्तु तत्र तत्र सूत्रकार एव वक्ष्यति । यत्र कर्तृनिर्देशो नास्ति तत्र यजुर्वेदेनाध्वर्युरिति परिभाषयाऽध्वर्युरेव कर्तेति सार्वत्रिकम् ।

महन्मेऽवोचो यशो मेऽवोचो भर्गो मेऽवोचो भुक्तिं
मेऽवोचः स्तोमं मेऽवोचः सर्वं मेऽवोचस्तन्माऽवतु
तन्मा विशतु तेन भुक्षिषीयेति वृतो वृतो जपति ।

यज्ञोपवीतं कृत्वाऽप आचम्य प्राङुदङ्वा तिष्ठञ्जपत्यासीनो वेति भरद्वाजः । यजमानेन वृतो वृत ऋत्विगिमं मन्त्रं जपतीत्यर्थः । वृतो वृत इति वीप्सा यजुर्वेदेनाध्वर्युरिति परिभाषयाऽध्वर्योरेव स्यात्तन्मा भूत् । किं तु सर्वेषामपि यथा स्यादित्येतदर्थम् । वृतो यजमानेन प्रार्थनया स्वकर्तव्याग्निष्टोम आर्त्विज्यप्रवृत्तिमान्कृत इत्यर्थः । तथा चाऽऽर्त्विज्यप्रवृत्तावेवायं मन्त्रजप इति लभ्यते । अमुमर्थमाहतुर्लाट्यायनद्राह्यायणौ—सोमप्रवाकमकरिष्यन्नमः सोमाय राज्ञ इत्युक्त्वा प्रत्याचक्षीत महन्मेऽवोच इति करिष्यन्प्रतिमन्त्रयेतेति । एतेनायाजयिष्यतोऽपि जपो भूर्भुवः सुवरायुर्मे प्रावोचो वर्चो मे प्रावोचो यशो मे प्रावोचः श्रियं मे प्रावोच आयुष्मानहं वर्चस्वी यशस्वी श्रीमानपचितिमान्भूयासं भूर्भुवः सुवः सर्वं भूयासमित्युक्त्वा प्रति वाऽऽचष्टे प्रति वा जानीत इति भारद्वाजोक्तो निवार्यते । प्रत्याख्यानं निराकर-

णम् । प्रतिज्ञानमार्त्विज्यं करिष्यामीति निश्चयः । सत्रे वरणाभावाज्जपस्याप्यभाव इत्यप्येतेन सिद्धं भवति । जप उच्चारणमात्रम् । व्याकरणरीत्या स्वराणां विज्ञातत्वे जपत्वाच्चातुःस्वर्यम् । अविज्ञातत्व ऐकश्रुत्यम् । एवं सर्वत्र सौत्रमन्त्रजपे द्रष्टव्यम् । जपव्यतिरिक्तकर्मसु सौत्रेषु वैदिकेषु च मन्त्रेषु तु यज्ञकर्मण्यजपन्यूङ्खसामस्विति पाणिनिस्मरणादैकश्रुत्यमेव । तानो वा प्रावचनो वेति कात्यायनप्रातिशाख्यसूत्रात्पक्षे चातुःस्वर्यमपि । तान ऐकश्रुत्यम् । तत्स्वरूपमाहाऽऽश्वलायनः—उदात्तानुदात्तस्वरितानां परः संनिकर्ष ऐकश्रुत्यमिति । प्रवचनो वेदपाठस्तत आगतः प्रावचनः । यथा वेदे पठितः स्वरस्तथेत्यर्थः । आचार्यस्य तूभयमपि अभिमतमिति विशेषानुक्त्या ज्ञायते । वैदिकमन्त्राणां जपे तु चातुःस्वर्यमेव । अभिमन्त्रणानुमन्त्रणाभिमर्शनोपस्थानानामपि नागृहीतविशेषणा बुद्धिरिति न्यायेन जपपरत्वाज्जपवदेतेषामपि स्वरः । उपांशुत्वं याजुर्वैदिकत्वाद्यजुर्वेदेनोपांश्विति परिभाषासिद्धम् । सर्वैरुपांशु ज्योतिष्टोमे प्रागग्नीषोमीयादिति सूत्रादित आरभ्याग्नीषोमीयस्य पशोस्तन्त्रं प्रक्रमयतीत्येतस्मात्प्राग्य ऋग्वेदसामवेदमन्त्रास्तेऽपि उपांश्वेव प्रयोक्तव्याः । तत ऊर्ध्वं यथोक्तस्वर एवेति द्रष्टव्यम् । श्रौते सौत्रमन्त्रवैदिकमन्त्राणामृष्यादिस्मरणे विकल्पः । तत्रर्षयः काण्डानुक्रमणिकातो द्रष्टव्याः । छन्दः पिङ्गलादिशास्त्रात्पादबद्धऋङ्मन्त्राणाम् । देवतास्तु मन्त्रलिङ्गात् । इदानीं शिष्टैरस्वीकारादृष्यादिकं नात्र प्रदर्श्यते । प्रयोगकाले मन्त्राणां पाठः सर्वत्र मध्यमया वृत्त्यैव नतु द्रुतया विलम्बितया च वृत्त्या । तथा च स्मृत्यन्तरम्—

अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम् ॥ इति ।

देवो देवमेतु सोमः सोममेत्वृतस्य
पथा विहाय दौष्कृत्यमित्यभिप्रव्रजति ।

दीक्षणीयार्थविहारं गन्तुं गृहाद्बहिर्निर्गच्छति देवो देव इ(मि)तिमन्त्रेण ।

पद्वा नामासि स्रुतिः सोमसरणी
सोमं गमेयमिति पन्थानमातिष्ठते ।

दीक्षणीयार्थविहारगामिनं(णं) पन्थानं प्रपद्यते पद्वेति मन्त्रेण ।

पितरो भूरिति त्रिः पितॄनभिमन्त्रयते ।

स्वान्पितॄनभिमन्त्रयते । दिव्यान्वा । मन्त्रप्रतिपाद्यं पदार्थं ध्यायंस्तत्पदार्थाभिमुखस्तमीक्षंस्तं* संस्तुवन्मन्त्रं पठेदित्येतदभिमन्त्रणम् । अत्र मन्त्रप्रतिपाद्याः पितरस्तेषाम-

---

* ईक्षन्निति प्रामादिकम् ।

---

१ क. °दम° ।

प्रत्यक्षत्वादभिशब्दार्थे आभिमुख्यं न भवति किंत्वभिध्यानमेव । तथाचाभिशब्दोऽनित्य-त्वुपसर्गस्यार्थे । तथाचाभिमन्त्रयत इत्यस्यानुमन्त्रणवेवार्थ इति । अथवा–एषा वै पितृणां दिगिति श्रुत्या दक्षिणदिशः पितृसंबन्धित्वदर्शनात्पितृणामप्रत्यक्षत्वेऽपि तत्सं-बन्धिदिशः प्रत्यक्षत्वात्तदाभिमुख्येन पित्राभिमुख्यमेव । दिक्शब्देन देश एवात्र ग्राह्यः । अन्यथा तद्दोषतादवस्थ्यापत्तेः । एतेन दूरत्वसमीपत्वकृतपरत्वापरत्वलिङ्गकानुमानग-म्याया दिशः कथं प्रत्यक्षत्वमिति शङ्का परास्ता । अत्र दक्षिणाभिमुखता, एषा वै पितृणां दिगिति दर्शनात् । आपस्तम्बेनापि दक्षिणावृत्तः पितॄनुपतिष्ठत इति दक्षि-णावृत्तशब्देनोक्ता । भरद्वाजस्तु पितॄन्दक्षिणामुख उपतिष्ठत इति स्पष्टमेव दक्षिणा-मुखतामाह । अत्र प्राचीनावीते विकल्पः । अनियमोऽन्यत्रेति परिभाषासूत्रात् । यत्र यत्र प्राचीनावीतित्वविधानं तत्रैव तत्रान्यत्रेत्यवश्यं वक्तव्यम् । अन्यथा तस्य वैय-र्थ्यापत्तेः । तथा च प्रकृते विधानाभावादर्थादनियमोऽन्यत्रेति परिभाषाया एव प्रवृत्तिः । यत्रैकस्मिन्द्रव्ये चेष्टापृथक्त्वेनार्थो निष्पद्यते सकृदेव तत्र मन्त्रं ब्रूयादिति परिभाषया सकृन्मन्त्रेण द्विस्तूष्णीमिति न भवति किं तु मन्त्रावृत्तिरेवात्र । अभिमन्त्रणस्योच्चार-णप्रधानत्वात् । स्वपितृपक्षे जीवत्पितृकस्याभिमन्त्रणे विकल्पः । तथा च लाट्यायन-द्राह्यायणौ––यजुरन्तरयेऽन्वाहारं धानंजय्य उपेक्षणं शाण्डिल्य इति । अस्यार्थः–– यजुषामन्तरयो यजुरन्तरयस्तस्मिन्यजुरन्तरये । अन्तरय उत्सर्गः । जीवत्पितृकस्यैत-न्मन्त्रोत्सर्गे विचार उत्सर्गः कर्तव्यो वा न कर्तव्य इति । तत्र धानंजय्योऽन्वाहारं मन्यते । अन्वाहारोऽनुत्सर्ग इति । उपेक्षणं वर्जनमिति शाण्डिल्यो मन्यत इति । यजमानस्य पितॄनग्निष्वात्तादीन्पितॄन्वाऽवमादीन्पितॄन्वोद्दिश्य जपः कर्तव्य एवेति धानं-जय्याशयः । स्वानेव पितॄनुद्दिश्य जपः स्वपितृजीवने लोप एवेति शाण्डिल्याशयः । तथाचैवं सिद्धं भवति–स्वपितृपक्षे स्वपितुर्जीवने लोपः । यजमानपितृपक्षे यजमानपितृ-जीवने लोपः । दिव्यपक्षेऽग्निष्वात्तादीनामुपस्थानं जीवत्पितृकेणापि कार्यमेव । त्रयो ह नु वै पितरोऽवमा और्वाः काव्या इति च्छन्दोगश्रुत्युक्तानामवमादीनां वेति । एकव-चनादध्वर्योरेव देवो देवमित्यादि न सर्वेषामृत्विजाम् । अथवा वृतो वृत इत्यनुवर्तनी-यम् । एवं च समन्त्रकमभिप्रव्रजनं पन्था(ष्य)धिष्ठानमभिमन्त्रणं च सर्वेषामपि भवति । अग्निपक्षे संभारयजुर्होमेऽपि सर्वकर्तृकतां व्यावर्तयितुमेवाग्रिमसूत्रे दीक्षिष्यमाणवचनम् । अत्र कूश्माण्डहोमः कर्मादिष्वेतैर्जुहुयादिति श्रुतेः । स च श्रुत्युक्तरीत्या बौधायनोक्त-रीत्या वा । श्रुत्युक्तरीत्या क्रियमाणे वैश्वानरायेत्यनुवाकेन सर्वेणैवोपस्थानं नत्वन्त्यया समिदाधानमेवं वरदानमपि न । बौधायनोक्तरीत्या क्रियमाणेऽन्त्यया समिदाधानं वर-दानं च भवति । त्विष्योऽभ्यावर्तिन्यश्चास्मिन्कूश्माण्डहोमे बौधायनोक्तरीत्या क्रियमा-णेऽपि न भवन्ति । उद्धरणपक्षे कूश्माण्डहोमार्थमुद्धृतमाहवनीयं परित्यज्याऽऽयतनं

गोमयेनोपलिप्य पुनस्तं विहृत्य प्रवर्ग्यसंभरणं कुर्यात्। अत्र प्रवर्ग्यसंभरणे यजमानस्य दीक्षितत्वाभावाद्धोमो भवत्येव।

दीक्षिष्यमाणस्याग्निर्यजुर्भिरिति द्वादश संभारयजूꣳषि जुहोति।

द्वादशभिः संभारयजुर्भिः संभारयजुःसंज्ञकैर्मन्त्रैर्जुहोतीत्यर्थः। अथवा द्वादशसंभारयजुर्नामकान्होमाञ्जुहोतीत्यर्थः। प्रथमान्ता अग्न्यादयस्तृतीयान्ता यजुरादयश्च देवताः। उत्तमस्य मह्यं श्रद्धाया इति। अथवाऽहंकाराख्यदेवताविशेषस्य वाचकमहमित्यव्ययात्मकं पदम्। अस्मिन्पक्षेऽहं श्रद्धाया इदमित्येवोद्देशत्यागवाक्यम्। यजुर्भिः सहितायाग्नय इदं०। स्तोमैः सहिताय सवित्र इदं० इत्येवमेव त्यागवाक्यानि युक्तानि। उत्तमं तु श्रद्धया सहिताय मह्यमिदं० श्रद्धया सहितायाहमिदमिति वेति ज्ञेयम्। दीक्षिष्यमाणवचनमेतस्य होमस्य दीक्षार्थत्वमेव न वरणार्थत्वमिति बोधयितुम्। वरणप्रयुक्तत्वाभावादेव सर्वर्त्विक्कर्तृकताव्यावृत्तिरित्यांशिकं प्रयोजनं प्रागुक्तमेव। अन्यच्च प्रयोजनं यः प्रधानस्य कालः सोऽङ्गानां स देशः स कर्ता सोऽग्निरिति परिभाषया दीक्षाया अपराह्णे क्रियायामेतस्याप्यपराह्ण एव कर्तव्यतेति। तत्रायं प्रकारः—प्रातरेव संकल्पादिकूश्माण्डहोमान्ते कर्मणि जाते सत्यपराह्णप्रतीक्षार्थं विरम्यापराह्ण एव द्वादशसंभारयजुर्होमादीति। कूश्माण्डहोमोत्तरं प्रवर्ग्यस्यैवाऽऽदौ संभरणमिति कल्पे प्रातरेव तदन्ते कर्मणि जाते विरम्यापराह्णे द्वादशसंभारयजुर्होमादीति। अत्रापराह्णो द्वेधाविभक्तदिवसस्य द्वितीयो भागस्त्रेधाविभक्तदिवसस्य तृतीयो भागो वा ननु पञ्चधाविभागोऽत्रेत्यत्र मूलं याजमानसूत्रे प्रदर्शयिष्यते। द्वादशवचनमितरमन्त्रनिवृत्त्यर्थमितरहोमनिवृत्त्यर्थं वा। अग्निर्यजुर्भिरितिवचनं संभारयजूꣳषि वाचयति जुहोति चैतैर्मन्त्रैः संभारयजूꣳषि व्याख्याय निर्मन्थ्यस्याऽऽवृता निर्मन्थ्येन प्रचरतीत्येतेषु संभारयजूंषि कानीत्याकाङ्क्षां निराकर्तुम्। उपस्थितत्वादादित एव द्वादश। अग्निर्यजुर्भिरित्यादीनां सापेक्षत्वात्प्रकाशनाशक्तेस्त इमं यज्ञमवन्त्वित्यनेन नैरपेक्ष्यदर्शनात्। सर्वेषु वाक्येषु तदन्वयो मा भूदित्येतदर्थमेषोऽनुवाक आम्नात इत्याम्नातग्रहणमापस्तम्बेन कृतमिति द्रष्टव्यम्। संभारयजुर्होमार्थं पुनर्विहरणम्। होमान्ते परित्यागः। यत्र मन्त्रगणेन कर्म चोदयेत्प्रतिमन्त्रं तत्र जुहुयादिति परिभाषया प्रतिमन्त्रं होमः। जुहोतिचोदितत्वादेतेषु स्वाहाकारः। आहवनीये जुह्वा हूयन्त इति परिभाषयाऽऽहवनीयोऽधिकरणं जुहूः साधनं च। परिस्तरणं तु यत्र क्व चाग्नौ परिस्तीर्य होतव्यमिति भारद्वाजीयपरिभाषासूत्रात्। परिमृज्य परिषिञ्चति यथा पुरस्तादित्यग्निकार्यसूत्रोक्तज्ञापकात्परिमार्जनपरिषेकौ। दर्विहोमान्व्याख्यास्यामो जुहोतीति चोद्यमाने दर्विहोमो यत्र

१ ख. श्रद्धया।

च स्वाहाकारस्ताᳪस्तूष्णीकेनाऽऽज्येन सकृद्गृहीतेनाग्रेणाऽऽहवनीयं परीत्य दक्षिणतः स्तिष्ठञ्जुह्वाऽऽहवनीयेऽध्वर्युः स्वाहाकारेण जुहोति द्विप्रभृत्याहुतिगणेषु प्रत्याहुति गृहीत्वा प्रत्याहुति समिधोऽभ्याधाय विग्राहं जुहोति यत्र मन्त्रगणेन कर्म चोदये-त्प्रतिमन्त्रं तत्र जुहुयादिति परिभाषासूत्राद्दर्विहोमधर्मः सर्वत्र ।

सप्तहोतारं मनसाऽनुद्रुत्य सग्रहᳪ हुत्वा दीक्षणीयामिष्टिं निर्वपति ।

सप्तहोतृहोमे यजमानेनाध्वर्योरन्वारम्भः कर्तव्य इति बौधायनेनोक्तम्—सप्तहोतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेतीति सूत्रेण । वाचस्पति-र्देवता मन्त्रलिङ्गात् । अत्र केचित्—ब्रह्म वै चतुर्होतार इत्यर्थवादाद्ब्रह्मण इत्यप्युच्चार्यम् । तथाच वाचस्पतये ब्रह्मण इदमिति त्यागवाक्यमिति वदन्ति । पूर्वसूत्राद्दीक्षिष्यमाण-पदमत्राप्यनुवर्तते । अस्ति चोभयत्र श्रुतिः—दीक्षिष्यमाणः सप्तहोतारं मनसाऽनुद्रु-त्याऽऽहवनीये जुहुयादिति, आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाण इति । दीक्षिष्यमाण इति लृट्प्रत्ययेन क्रियार्थायां क्रियायामुपपदे विहितेन दीक्षाकर्तृसंस्कारा-र्थत्वं बोध्यते । यमनियमपरिग्रहानुकूलयोग्यतारूपा दीक्षा तत्कर्तृसंस्कारार्था दीक्ष-णीया । वक्ष्यमाणानां कृष्णाजिनमेखलादण्डादीनां तु अक्रियारूपत्वाद्दीक्षाभिव्यञ्जक-त्वमात्रं नतु दीक्षणीयेष्टिवद्दीक्षार्थत्वम् । अत इष्ट्यनन्तरमेव दीक्षितो न जुहोति न ददा-तीत्यादयो दीक्षितधर्माः ।

पञ्चमाध्याये तृतीयपाद उक्तमेतज्जैमिनिना—परेणाऽऽवेदनाद्दीक्षितः स्यात्सर्वैर्दीक्षा-भिसंबन्धात् । इष्ट्यन्ते वा तदर्था ह्यविशेषार्थसंबन्धात् । समाख्यानं च तद्वदिति सूत्रात् । सर्वैरिष्टिदण्डादिभिर्दीक्षाभिसंबन्धात्, आवेदनात्परेण दीक्षितमावेदयतीति विहितात्प-रेणाऽऽवेदनानन्तरमिति यावत् । दीक्षितः स्याद्भवेदिति । एनपा द्वितीयेत्यत्र पञ्च-म्यपि दृश्यत इति वचनं कल्पयित्वा परेणाऽऽवेदनादिति प्रयोगः समर्थनीय इति तन्त्ररत्ने । तथाच दीक्षितधर्माणामत्रैव प्रवृत्तिरिति पूर्वसूत्रार्थः । द्वितीयसूत्रार्थस्तु इष्ट्यन्ते वा वाशब्दः पूर्वपक्षव्यावर्तकः । इष्ट्यन्त एव दीक्षाधर्माणां प्रवृत्तिः । हि यस्मा-त्कारणादविशेषार्थसंबन्धात्तदर्था अत इष्टेरेव मुख्यत्वात्तदन्ते तत्समाप्त्यव्यवहितोत्तरमे-व दीक्षाधर्मप्रवृत्तिरिति । न विद्यते विशेषो विशेषवाक्यापेक्षा यत्र निरपेक्षेति यावत् । एतादृशोऽर्थो दीक्षणीयेष्टिः । दीक्षणीयेष्टिरितीष्टिसमाख्यानमपीष्ट्युत्तरं दीक्षितधर्माणां प्रवृत्तिरिति पूर्वसूत्रसाधकवत्तद्वदुपयुक्तं भवतीत्यस्यार्थः । इति तृतीयसूत्रार्थः । नन्वेवं वाग्य-मनोत्तरं दीक्षितधर्माणामुपादानं सूत्रकृदुक्तं निर्हेतुकं स्यादिति चेत्सत्यम् । कृष्णाजिनमेखलादण्डादिदानप्रभृतिकर्मणोऽपि दीक्षारूपत्वाभावेऽपि दीक्षार्थत्वं परम-स्त्येवेति । तथाचैतस्यापि कर्मणोऽपराह्ण एव क्रियेतिज्ञापनरूपहेतुलाभेन निर्हेतुकत्वा-

पत्त्यभावात्। प्राग्वंशप्रपादनोत्तरं दीक्षणीयेष्टिक्रियायामपि तदनन्तरमेव। दीक्षणीयेष्टेर्दीक्षाकर्तृसंस्कारार्थत्वात्प्रतिप्रयोगमावृत्तिः सिद्धा भवति। दीक्षणीयाया देवतापरिग्रहार्थत्वमपि, देवता एवोभयतः परिगृह्य यजमानोऽवरुन्ध इति श्रुतेः। तेन सर्वतोमुखे प्रतिविहारं सा भवति। न दीक्षणीयाङ्गं सप्तहोता किंतु दीक्षाङ्गम्। तेन दीक्षणीयोत्कर्षे सप्तहोतुर्नोत्कर्ष आहवनीयभेदश्च सप्तहोतृदीक्षणीययोरित्येतद्द्वयं सिद्धं भवति। क्त्वाप्रत्ययेन तु पूर्वकालतामात्रम्। ततश्च सप्तहोत्रर्थमाहवनीयं गार्हपत्यात्प्रणीय सप्तहोतारं हुत्वा सोमार्थमाहवनीयं प्रणीय दीक्षणीया कार्या। प्रतिबन्धकृतदीक्षणीयोत्कर्षवशेन सप्तहोतृहोमदीक्षणीयेष्ट्योर्मध्ये होमप्राप्तौ होमः कर्तव्य एव। सप्तहोतारं मनसाऽनुद्रुत्य सग्रहं हुत्वा दीक्षणीयामिष्टिं निर्वपतीति क्त्वाप्रत्ययबोधितसप्तहोतृहोमाव्यहितानन्तर्यं तु शिष्टाकोपन्यायेन बाध्यते। स च न्याय इत्थम्—आचाम्येन कर्तव्यमित्यादिस्मृतिविहिताचमनादेर्वेदं कृत्वा वेदिं करोतीत्यादिविहितश्रौतक्रमेण बाध इति प्राप्ते क्रमस्य पदार्थधर्मत्वात्तदपेक्षयाऽऽचमनादेः पदार्थत्वेन प्राबल्यम्। प्रमाणबलाबलापेक्षया प्रमेयबलाबलमेव पूर्वोपस्थितत्वाद्बलवत्। प्रमाणविरोधस्य प्रमेयविरोधमूलत्वेन पूर्वोपस्थिततद्विरोधेन प्रमेयबलस्य पूर्वमेवाऽऽलोचनादिति तेनैव निर्णय इति नाऽऽचमनादेर्बाधः किंतु क्रमस्यैवेति। प्रकृतेऽपि कालप्राप्तं नित्यं निरवकाशं कृत्वा सावकाशं ततः कर्तव्यमिति सामान्यस्मृतिविहितहोमकर्तव्यतया सप्तहोतृहोमानन्तर्यं बाधितं द्रष्टव्यम्। एवं चाग्निहोत्रहोमो मध्ये कर्तव्य एवेति। अमुमर्थमाह प्रथमाध्याये तृतीयपादे जैमिनिः—शिष्टाकोपेऽविरुद्धमिति चेत्। न शास्त्रपरिमाणत्वात्। अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्, इति त्रिभिः सूत्रैः। तत्राऽऽद्यं सूत्रं सिद्धान्तोपक्रमाशङ्कार्थं, द्वितीयसूत्रं तन्निरासार्थं, तृतीयं सिद्धान्तसूत्रम्। शिष्टस्य श्रौतक्रमादेरकोपेऽबाधे सति आचमनादिस्मरणमविरुद्धमिति प्रथमसूत्रार्थः। चेदित्यनेन सिद्धान्तोपक्रम आशङ्क्यते। द्वितीयसूत्रे नेत्यनेन तन्निरासः क्रियते। अविरुद्धं न किंतु विरुद्धमेव। तत्र हेतुमाह—शास्त्रपरिमाणत्वादिति। प्रत्यक्षशास्त्रेणाऽऽचमनादिप्राप्तेः पूर्वमेव पदार्थानां क्रमकालपरिमाणैः परिमितत्वादिति शास्त्रपरिमितत्वादित्यस्यार्थः। कारणस्य बाधकारणस्याग्रहणेऽनुपलम्भे सति प्रयुक्तानि शिष्टैः प्रयुक्तानि आचमनादीनि प्रतीयेरन्प्रमाणत्वेन प्रतीयेरन्निति तृतीयसूत्रार्थः। अपि वेत्यनेन पूर्वपक्षव्यावृत्तिः क्रियते। औपासनहोमोऽप्येवं मध्ये कर्तव्य एव। कूश्माण्डहोमाद्यर्थमाहवनीयस्य पृथक्पृथक्प्रणयनमुद्धरणपक्षे द्रष्टव्यम्। अर्थायार्थायाऽऽहवनीयं प्रणयतीति सूत्रात्। अजस्रपक्षे त्वाहवनीयस्य नित्यधार्यत्वान्न प्रणयनम्। उद्धरणपक्षेऽपि दक्षिणाग्नेर्नित्यं धारणमेव। नित्यं गार्हपत्यदक्षिणाग्नी धार्येते

इति सूत्रात् । वाचस्पते हृद्विध इति ग्रहसंज्ञको मन्त्रः । तेन सह यथा भवति तथा महाहविर्होतेति सप्तहोतृसंज्ञकं मन्त्रं मनसाऽनुद्रुत्योभयोर्मध्येऽनुच्छ्वसन्पठित्वा जुहोति-चोदितत्वात्स्वाहाकारमुक्त्वा दर्विहोमधर्मेण जुहोति । सूत्रे सग्रहमिति विशेषणं ग्रहस्यापि मनसा पाठार्थं नतु होमे ग्रहप्रापणार्थम् । तस्य तु तेषां ये होमार्थे श्रूयन्ते सग्रहाः सस्वाहाकारास्ते प्रयुज्येरन्निति वक्ष्यमाणसूत्रेणैव सिद्धिः । मनसेति परिभाषा-प्राप्तोपांशुत्वव्यावृत्त्यर्थम् । दीक्षतेऽनयेति दीक्षणीया तामिष्टिं निर्वपति करोतीत्यर्थः । निर्वपतीत्यस्य निर्वापार्थकत्वं वक्तुमशक्यम् । इष्टिशब्दस्य क्रियाविशेषपरत्वेन निर्वा-पासंभवात् । इष्टिग्रहणमन्वाधानमन्त्रे दैक्षणीयमैष्ट९ हविरिदमेषां मयीत्यैष्टशब्दप्रयोग-लाभार्थम् । अन्यथा दैक्षणीय९ हविरिदमेषां मयीत्येतावदेव स्यात् । अत इष्टिग्रहणम् । दीक्षणीयामिष्टिं निर्वपतीति सामान्यप्रतिज्ञेयमेतस्या इष्टेरिदं नामेति प्रदर्शयितुम् । तेनेदं सिद्धं भवति नामवतीनामिष्टीनामन्वाधानमन्त्रे नाम्नाऽपि निर्देशो नतु केवलमिष्टि-शब्देन निर्देश इति । तेन दैक्षणीयमित्यप्युच्चार्यम् । प्रायणीयाप्रभृतिष्ववभृथान्तेष्वि-ष्टिपशुबन्धेषु व्रतोपायनं जागरणं पत्नीसंनहनमारण्याशनं च न विद्यत इति सूत्रेण प्रायणीयाप्रभृतिषु व्रतोपायनादिनिषेधेन सप्तहोतृहोमानन्तरं दीक्षणीयेष्टिक्रियायां सोमा-ङ्गत्वसिद्धत्वेन व्रतोपायनं परिस्तरणोत्तरं जागरणाभावसंपादकनिद्रास्थानिकक्षाणिकनेत्र-निमीलनाकरणं पत्नीसंनहनं सत्यां क्षुधि आरण्याशनं च भवत्येव ।

दीक्षणीयायां द्रव्यदेवताकाङ्क्षायामाह—

आग्नावैष्णवमेकादशकपालमाग्नावैष्णवं वा घृतेचरुम् ।

अत्र हविर्जानीयादिति शेषः । अथवा तृतीयार्थे द्वितीया । आग्नावैष्णवेनैकादश-कपालेनाऽऽग्नावैष्णवेन शृतावस्थानिक्षिप्तघृतेन चरुणा वा दीक्षणीयामिष्टिं निर्वपती-त्यन्वयः । तथाचायमर्थः–एकादशकपालकरणकं चरुकरणकं वा यागं कुर्यादिति । आग्नावैष्णवमिति देवतार्थकाण्प्रत्ययेन देवता प्राप्यते । एकादशकपालशब्देन द्रव्यं प्राप्यते । एकादशसु कपालेषु संस्कृतः पुरोडाश एकादशकपालः । घृतेचरुमित्यनेनै-कादशकपालस्थाने द्रव्यान्तरं विधीयते । घृतेचरुमित्यस्य शृतावस्थायां घृते निक्षिप्ते सति यः सिद्धश्चरुः स घृतेचरुरित्यर्थः । नतु घृते शृतश्चरुरिति । केवलघृतस्य चरुश्र-पणानुकूलपाकसाधनत्वाभावात् । शृते नेदीयसि घृतमिति बौधायनोऽप्याह । चरोः पाके नेदीयसि निकटे सति घृतं प्रक्षिपतीत्यर्थः । एकेनैवाऽऽग्नावैष्णवग्रहणेन सिद्धे पुनर्ग्रहणं नियमार्थम्–आग्नावैष्णव एव घृतेचरुर्नाऽऽदित्य आपस्तम्बोक्तो घृतेचरुर्भव-तीति । एतेन ज्ञायते पुरोडाशो ब्रह्मवर्चसकामस्य घृतेचरुः प्रजाकामस्य पशुकामस्य वेत्यापस्तम्बोक्तं पुरोडाशचर्वोः काम्यत्वमप्युपसंहार्यमिति । चरुस्वरूपं सारसंग्रहे—

अनिर्गतोष्मा सुस्विन्नो ह्यदग्धोऽकठिनश्चरुः ।
न चातिशिथिलः पाच्यो न च वीतरसो भवेत् ॥ इति ।

अनवस्रावितान्तरूष्मपक्को वैशद्यानपेक्ष ओदनश्चरुरिति तृतीयाध्याये मीमांसका अपीत्थं चरुस्वरूपमाहुः । चरोरवदानं मेक्षणेन । मेक्षणेन चरूणामिति सूत्रात् । स्विष्टकृद्यागोत्तरं तस्य मेक्षणस्य प्रहरणम् । प्रायणीयायां विधानवचनेनान्यत्र तत्सिद्धेर्दर्शितप्रायत्वात् । बौधायनेन स्पष्टतयोक्तेश्च । अत्र प्रयाजाज्यभागस्विष्टकृदनूयाजसूक्तवाकशंयुवाकपत्नीसंयाजानां प्राकृतः स्वरः । प्रधानस्वरे विशेषः शाखान्तरे यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयादिति । अनेन दीक्षणीयायां यावद्भूम्नुच्चैस्त्वं भवति। एवं मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामिति प्रायणीयातिथ्याविषयकस्वरविशेषविषयेऽपि द्रष्टव्यम् । तत्राऽऽपस्तम्बेन प्रधानस्वरविषयेऽनेके पक्षा उक्ताः—यत्प्रागग्नीषोमीयात्तेनोपांशु चरन्त्यथैकेषां यावत्यस्य वाग्भवति तावत्या दीक्षणीयायामन्वाह ततो नीचैस्तरां प्रायणीयायां नीचैस्तरामातिथ्यायामुपांशूपसत्सूच्चैरग्नीषोमीये मन्द्रेण वा दीक्षणीयायां मन्द्रतरेण प्रायणीयायां मन्द्रतरेणाऽऽतिथ्यायामुपांशूपसत्सूच्चैरग्नीषोमीय उपांशु वा दीक्षणीयायामुपांशुतरं प्रायणीयायामुपांशुतरमातिथ्यायामुपांशूपसत्सूच्चैरग्नीषोमीय इति । चरन्तीतिवचनात्तत्र यावत्प्रधानमुपांश्विति न्यायादिष्टिप्रधानानामेवोपांशुत्वम् । अङ्गानां प्रयाजादीनां तु यथाप्रकृतीति तद्व्याख्यातारः । जैमिनिस्तु नवमाध्याये प्रथमे पादे देशसंबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्तस्य च तत्र भावादिति सूत्रेण प्रयाजादीनामङ्गानामेवोपांशुत्वमाह । प्राग्भागरूपदेशसंबद्धमुपांशुत्वं तद्भागवर्तिपदार्थानां धर्मः स्यात् । श्रुतिनिर्देशात्, यत्किंचिच्छब्दरूपश्रुतिसंयोगात् । अयमर्थः—प्राचीनशब्दः साकाङ्क्षत्वादवश्यं निराकाङ्क्षी कर्तव्यः । तत्र यज्ञशब्देन श्रुतेन निराकाङ्क्षीकरणं न संभवति त्सराशब्दसंबन्धित्वात्तस्य ततश्चाश्रुतोऽन्यो यज्ञशब्दः कल्पनीयः । तस्माच्छ्रुतेनाग्नीषोमीयशब्देन निराकाङ्क्षी क्रियते । ततश्चाग्नीषोमीयस्यानवयवित्वेन प्राचीनशब्दस्यावयवलक्षणभागपरत्वासंभवाद्भागवर्तिपदार्थपरत्वावश्यंभावात्तद्धर्म उपांशुत्वं तदपूर्वप्रयुक्तं तस्यापूर्वस्य तन्त्रे तेषु भागसंबन्धिपदार्थेषु भावादिति । अत्र बहुविस्तर आकरे द्रष्टव्यः । अस्मिन्सूत्र उपात्ता श्रुतिस्तु—त्सरा वा एषा यज्ञस्य तस्माद्यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति । योपांश्वनुष्ठितिः सैषा त्सरा । त्सरा छद्मगतिः । आश्वलायनस्तूपांशुत्वविधायके प्रकरणे सौमिकीषु इष्टिषु प्रधानविषये सौमिकय इतिवचनेनोपांशुत्वमेवोक्तवान् । शाङ्खायनोऽपि दीक्षणीयादीष्टिषूपांशुहविरिति प्रत्येकमुपांशुत्वं स्पष्टमेवोक्तवान् । तत्रोपसंहाराङ्गीकारपक्षे यो हौत्रशास्त्रानुगुणः पक्षः सोऽङ्गीकर्तव्य इति । उपसंहारानङ्गीकारपक्षे तु प्राकृतो मध्यमस्वर एव । उपसदि उपांशुत्वं तूपांशूपसदा चरामेति स्वशाखाविहितत्वान्नियतमेवेति द्रष्टव्यमिति ।

---

१ ख. °यवत्वे° ।

सप्तदश सामिधेन्यः ।

स्पष्टोऽर्थः । याजुषहौत्रसत्त्वे याजुषरीत्या सप्तदश सामिधेन्यः । आश्वलायनहौत्रसत्त्व आश्वलायनोक्तरीत्या । तत्राग्निर्मुखं प्रथमो देवतानामग्निश्च विष्णो तप उत्तमं मह इत्याश्वलायनीये याज्यानुवाक्ये । अग्निरग्रे प्रथमो देवतानामग्निश्च विष्णो तप उत्तमं मह इति याजुष्यौ याज्यानुवाक्ये ।

न यजमान भागमवद्यति सर्वेषु सौमिकेष्विष्टिपशुबन्धेषु ।

प्रायणीयायाः कृत्स्नत्वपक्षेऽपि यजमानभागावदाननिषेधं वारयितुमेव न यजमानभागमवद्यति । यदि शंयुवन्तेति प्रायणीयायां वचनमेतस्मादेव ज्ञायते सर्वेषु सौमिकेष्विष्टिपशुबन्धेष्विति पूर्वत्राप्यन्वेतीति । तेनाखण्डेषु प्रायणीयाव्यतिरिक्तेष्विष्टिपशुबन्धेषु यजमानभागावदाननिषेधः सिद्धो भवति । प्रणीताप्रणयनं भवत्येव । संयवनरूपदृष्टकार्यसद्भावात्, अवभृथवन्निषेधाभावात्, यजुरुत्पूताभिः संयौतीतिवचनाभावाच्च ।

नान्वाहार्यं ददाति ।

सर्वेषु सौमिकेष्विष्टिपशुबन्धेष्वित्यत्राप्यन्वेति । दानकर्ता यजमान एव । द्रव्यप्रकल्पनं यजमानस्य दक्षिणादानं ब्रह्मचर्यं जपाश्चेति याजमानसूत्रात् । ददातीति यजमानमित्याश्वलायनसूत्रात् । दानवाचनान्वारम्भवरवरणव्रतप्रमाणेषु यजमानं प्रतीयादिति कात्यायनसूत्राच्च । इष्टयश्च पशुबन्धाश्चेष्टिपशुबन्धाः सौमिक्यश्च सौमिकाश्च सौमिकाः सर्वाश्च सर्वे च सर्वे । पुमान्स्त्रियेत्यनेन सूत्रेणैकशेष इष्टिपशुबन्धेष्विति पुंलिङ्गान्तविशेष्यानुरोधात्सिद्ध एव । सर्वाः सौमिक्य इष्टयः सर्वे सौमिकाः पशुबन्धास्तेष्वन्वाहार्यं न ददातीत्यर्थः । प्रधानदक्षिणयैव प्रसङ्गसिद्धेरिति भावः । द्वादशाध्याये प्रथमे पादे भृतत्वाच्च परिक्रय इति जैमिनिनाऽप्ययं न्यायोऽनेन सूत्रेणोक्तः । अन्यविधानाद्दारण्यभोजनं न स्यादुभयं हि वृत्त्यर्थमिति सूत्रान्तेति मण्डूकप्लुत्याऽनुवर्तते । सौमिक्यैव दक्षिणया कर्तॄणां भृतत्वादानतत्वान्न पृथक्परिक्रयोऽन्वाहार्यदक्षिणेति सूत्रार्थः । पशुबन्धेष्वन्वाहार्यस्य सर्वथैवाभावेनार्थात्तद्दानाभावे सिद्धे निषेधो ज्ञापयति अत्यन्ताना ढ्यस्य पशुबन्धेष्वपि केवलमन्वाहार्य एव दक्षिणा तेनैव पशुबन्धोक्तदक्षिणादानफलसिद्धिरिति । अन्वाहार्यग्रहणं पशुबन्धदक्षिणोपलक्षणम् । तेन तस्या अपि निषेधः । बहुवचनेनैव सोमतन्त्रान्तर्गतकृत्स्नेष्टिपशुबन्धलाभे सर्वग्रहणं सोमतन्त्रबहिर्भूतावैन्द्राग्नाश्विनौ प्रायश्चित्तपशू अप्यन्तरा भवतस्तयोरपि दक्षिणा न भवतीतिज्ञापनार्थम् । उक्तं चाग्नीषोमीयस्य सवनीयस्य वोपालम्भ्यत्वमनयोर्बौधायनेन । एवं पाथिकृत्यादीनामपि सोमतन्त्रान्तःपातित्वे सति दक्षिणा नैव । यस्याऽऽश्विने शस्यमाने सूर्यो नाऽऽविर्भवति सौर्यं बहुरूपमालभेतेत्यस्य पशोस्तत्तन्त्रमुपजीव्यैव कर्तव्यतायामपि दक्षिणा न । अस्मि-

न्पक्ष आकाङ्क्षितत्वादत्रैव प्रसङ्गात्प्रयोगः प्रदर्श्यते । तत्र स्वधितिस्वरुमैत्रावरुणदण्ड-हृदयशूलयूपास्त एव स्फ्यादीनि च । उपादानलाघवात्प्लक्षशाखाकुम्भीसमवत्तधान्यस्ता एव प्रक्षाल्य प्रयोक्तव्याः । पशुरशनाया वपाश्रपण्योश्च मेदोऽर्थसिद्धः । षड्ढोतृप्रश्निष्टी न स्तस्तन्त्रान्तःपातित्वात् । न यूपच्छेदनं न वेदिकरणं नोत्तरवेदिचात्वालकरणम् । नाग्निप्रणयनान्वाधाने नेध्माबर्हिराहरणं न वेदकरणं न परिस्तरणं न पाणिप्रक्षालनम् । उलपराजीस्तरणे विकल्पः । न ब्रह्मयजमानयोः सदने । समवत्तधानी पशुरशना वपा-श्रपण्यौ कुम्भी प्लक्षशाखा इत्येतेषामेवाऽऽसादनम् । न ब्रह्मवरणं नोपवेशनम् । पवि-त्रकरणादिपात्रसंमर्शनकाले संविशन्तामिति समवत्तधानीपशुरशनादीनि पात्राण्यासा-दितान्येवाभिमृशति । दक्षाय वानस्पत्याऽसीत्यादिपशुबन्धोक्तप्रयोगक्रमेण पात्रप्रोक्ष-णान्तम् । उत्तरपरिग्रहादि स्वर्वगूहनान्तं लुप्यते । ततः प्रायश्चित्तहोमः पशूपाकरण-मुपाकरणाङ्ग(ङ्गा)पञ्चाऽऽहुतयश्च भवन्ति । बहुरूपोऽयं पशुः । न मन्थनम् । रशनादा-नादिअधस्तात्प्रोक्षणान्तं भवति । सामिधेन्यादि स्रुच्याघारान्तं निवर्तते । पृषदाज्यासत्त्वे पूर्ववदुत्पादनीयमत्र होत्रा प्रधानदेवतावाहनमात्रं तत्रैव तिष्ठता कर्तव्यम् । नान्येषामू-र्ध्वमावाहनादुत्पन्नानामित्याश्वलायनोक्तावाहननिषेधस्तु नियताङ्गदेवतावाहननिषेधपरो नाऽऽगन्तुकान्तःपातिदेवतावाहननिषेधपर इति ज्ञेयम् । वनस्पतेस्त्वावाहितत्वान्नाऽऽवा-हनम् । न ध्रुवासमञ्जनादि न प्रयाजाः । आज्यस्थाल्याः स्रुवेणाऽऽज्यं जुह्वां गृहीत्वा तेन स्वरुस्वधिती अङ्क्त्वा ताभ्यां पशुसमञ्जनं कृत्वा शमितरेषा तेऽग्निरित्युक्त्वा धारा-मादिशञ्छमित्रे स्वधितिं प्रदाय यथास्थानं स्वरुमवगूह्येत्यादि वपाया आसन्नाभिमन्त्रणा-न्तम् । पृषदाज्यस्य मध्य उत्पादने तदवेक्षणमुभयोः । नोत्तमः प्रयाजः । सारस्वतप्रा-जापत्यपशुवपानामनभिघारितानामेव सव्या वा एतर्हि वपा यद्यनभिघृता इति श्रुतेः । अनभिघारिताभिर्वपाभिः प्रचरन्तीति वाजपेयसूत्राच्च यथा याग उपयोगस्तन्न्यायेनात्राप्य-नभिघारिताया एव याग उपयोग इति द्रष्टव्यम् । नाऽऽज्यभागौ । यजमानेन व्याख्याते पञ्चहोतारि वपायागो निरूढवत् । सूर्याय च्छागस्य वपाया मेदसोऽनुब्रूहीति पुरोनुवाक्याप्रैषे विशेषः । आग्नेयपशुप्रकृतिकत्वे याज्याप्रैषो न । अग्नीषोमीयप्रकृतिकत्वे सूर्याय च्छागस्य वपाया मेदसः प्रेष्येति याज्याप्रैषोऽस्त्येव । सूर्यस्याहं देवयज्ययेन्द्रियावी भूयासमित्यनुम-न्त्रणम् । जेमानमिति महेन्द्रयाजिनः । चात्वाले मार्जनं वरदानं च, दक्षिणा नेत्युक्तमेव प्राक् । पशुपुरोडाशपात्रासादनादि आसादनान्तम् । आग्नेयविकारपक्षे यज्ञोऽसि अयं यज्ञः पञ्चहोता । अग्नीषोमीयविकारपक्षे प्रजापतिरसि अयं यज्ञः, विहव्यं चतुर्होता । ततो जुह्वामुपस्तीर्येत्यादि कपालविमोचनान्तम् । सूर्याय पुराडोशस्येति प्रैषे विशेषः । प्रैषनिर्णयः प्राग्वत् । ततो जुह्वां पञ्चगृहीतं गृहीत्वा पृषदाज्यस्रुवं चाऽऽदाय शृत१

---

१ ख. वसाया ।

हवीः३ शमितरित्यादि हविःशेषोद्वासनान्तम्। सूर्याय च्छागस्य हविष इति प्रैषे विशेषः। प्रैषनिर्णयः प्राग्वत्। स्विष्टकृद्यागसत्त्वाद्वनस्पतियागसत्त्वम्। वनस्पतेः स्विष्टकृद्विकारत्वेन तत्सजातीयधर्मत्वेन संनियोगशिष्टत्वात्। एतत्सर्वं पाशुकं कर्माऽऽश्विनशस्त्रसंबन्धिचमसहोमभक्षणान्ते पिष्टलेपहोमादि आश्विनकपालविमोचनान्तं कृत्वा कर्तव्यम्। ततोऽग्नीदौपयजानङ्गारानाहरेत्यादि समानतन्त्रेण। अतोर्यामे तु ततश्चत्वारि संधिस्तोत्रशस्त्राणि। ततोऽग्नीदौपयजानित्यादीति विशेषः। सूर्यो देवीमुषसमित्याद्याः षडृचो याज्यापुरोनुवाक्याः। अवशिष्टं विकल्पार्थे। वनस्पतिप्रैषेऽधितेत्यनन्तरं यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याऽऽज्यस्य हविषः प्रिया धामानि यत्र सूर्यस्य च्छागस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथाꣳसीत्यादि। स्विष्टकृत्प्रैषे होता यक्षदग्निꣳ स्विष्टकृतमयाडग्निरग्नेराज्यस्य हविषः प्रिया धामान्ययाट् सोमस्याऽऽज्यस्य हविषः प्रिया धामान्ययाट्सूर्यस्य च्छागस्य हविषः प्रिया धामान्ययाड्वनस्पतेः प्रिया पाथाꣳसीत्यादि। यदि सवनीयपशावाज्यभागौ न कृतौ तदैतत्पशुसंबन्धिनोरपि वनस्पतिप्रैषस्विष्टकृत्प्रैषयोराज्यभागोत्कीर्तनं न कर्तव्यम्। इति प्रसङ्गादेतत्तन्त्रोपजीविसौर्यपशुप्रयोग उक्तः। अथ प्रकृतमुच्यते—प्रकरणादेव सोमसंबन्धित्वे सिद्धे सौमिकेष्वितिवचनं वायव्यपश्वादिव्यावृत्त्यर्थं यानि यानि सोमाङ्गैः सिद्धार्थानि तान्यपि न भवन्तीतिज्ञापनार्थं च। तेन ब्रह्मवरणं संस्थाप्यास्वपीष्टिषु यज्ञविमोको ब्राह्मणतर्पणं चेत्येतानि न भवन्ति। एते पदार्था अवभृथोत्तरमपि वर्ज्या इत्यन्वाहार्यनिषेधसाहचर्यादवगम्यते। व्रतोपायनादीनामपि सोमाङ्गैः सिद्धार्थत्वेऽपि तेषामवभृथात्प्रागेव सिद्धार्थत्वं नोत्तरत्रेत्येवं भेदाद्विविभेदो द्रष्टव्यः। केचिद्यजमानार्थमासनकल्पनमपि न कर्तव्यं कृष्णाजिनस्याऽऽसनार्थत्वादिति वदन्ति। तत्तु न न्याय्यम्। अहे दैधिषव्येतिनिरसनदर्शनात्। इष्टिपशुबन्धेष्वितिवचनं सौमिकेष्वितिपुंलिङ्गानुरोधेन पशुबन्धानामेव ग्रहणं नेष्टीनामिति स्यात्तद्व्यावृत्त्यर्थम्। अन्वाहार्येण सोमं पिपासेत्, न त्वेवासोमयाजी स्यादिति शाखान्तरश्रुतेराढ्यस्यायमन्वाहार्यनिषेधो नानाढ्यस्य। तस्य सर्वासु सौमिकीष्विष्टिषु सर्वेषु सौमिकेषु पशुबन्धेष्वन्वाहार्यस्यैव दानम्। दक्षिणाकाल आग्नीध्रात्रेयाभ्यां हिरण्यदानम्। मन्थादीतरेभ्यः। एतावतैव सोमसिद्धिः। तदिदं सर्वमवश्यकर्तव्यत्वप्रतिपादनपरम्। अत्यन्तानाढ्यस्य दक्षिणालाघवे दोषाभावप्रतिपादनपरेयं शाखान्तरश्रुतिः। आढ्यस्य तु अल्पदक्षिणादाने फलाभावो दोषश्च।

तथा च स्मृतिः—

अग्निष्टोमादिकैर्यज्ञैर्यो यजत्यल्पदक्षिणैः।
स नाऽऽप्नोति सति द्रव्ये फलं दोषं च गच्छति॥ इति।

मनुरपि—

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ इति ।

स्मृत्यन्तरेऽपि—

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
स नाऽऽप्नोति फलं तस्य दोषं चैवाधिगच्छति ॥ इति ।

यो हि अल्पदक्षिणयज्ञ आर्त्विज्यनिषेधः स समर्थकर्तृकाल्पदक्षिणयज्ञविषयो द्रष्टव्यः । यद्यपीदं सूत्रं याजमानसूत्र एव पठितुं युक्तं तथाऽपि अभिघारणान्तर्वेद्यासादनसंप्रैषद्वाराऽध्वर्युसंबन्धादत्र पाठ इति द्रष्टव्यम् । ददातीत्यत्रान्तर्भावितो णिज्वा द्रष्टव्यः ।

ध्रुवायाः शेषं करोति ।

ध्रुवाशब्देन तद्गतमाज्यं लक्षणया गृह्यते मञ्चाः क्रोशन्तीत्यत्र मञ्चशब्दस्य तत्स्थपुरुषलक्षकत्वमिव । तात्पर्यानुपपत्तिरत्र लक्षणाबीजम् । ध्रुवागतस्याऽऽज्यस्य शेषं करोति स्थापयतीत्यर्थः । ध्रुवाया इत्यनन्तरमाज्यस्येति शेषो वा । ध्रुवासंबन्धिन आज्यस्य शेषं करोतीति तदर्थः । सप्तम्यर्थे षष्ठी वा । शेषं करोतीतिवचनात्स्विष्टकृदभिघारणद्वये ध्रुवाया नाऽऽप्यायनं ध्रुवाज्यस्य शेषत्वसंपादनाय । तत्र तत्राऽऽप्यायनं हि पूरणार्थम् । पूरितस्य शेषत्वं न संभवति । अत आप्यायननिषेध एवैतस्य विधेः पर्यवसानम् । स्विष्टकृदभिघारणद्वयस्यैवान्तिमत्वात्तत्रैव ध्रुवाप्यायनाभावः । आज्यस्थाल्याज्यशेषमपि स्थापयति प्रयोजनसद्भावात् । ध्रुवाशेषादाकूत्यै प्रयुजेऽग्नये स्वाहेति स्रुवेण चतस्रो दीक्षाहुतीर्जुहोत्यापो देवीरिति स्रुचा पञ्चमीमित्युत्तरत्र शेषविनियोगबलादेव शेषकरणे सिद्ध इदं वचनं शेषनाशे शेषत्वसिद्ध्यर्थं मौनैराद्यैरन्तिमैर्वा त्रिभिर्मन्त्रैर्ध्रुवायां गृहीत्वाऽनेनैव होमः कर्तव्य इत्यर्थविशेषं द्योतयितुम् । भ्रान्त्या कदाचित्स्विष्टकृदभिघारणद्वय आप्यायनं कृतं चेत्तदाऽपि तेनैवैतौ होमौ जुहुयात् । उभयत्रापि सर्वप्रायश्चित्तहोमोऽनाज्ञातजपादि च ।

पत्नीसंयाजान्ता दीक्षणीया संति-
ष्ठते भक्षयित्वाऽऽज्येडां विरमन्ति ।

पत्नीसंयाजैरन्तः समाप्तिर्यस्याः सा पत्नीसंयाजान्ता । पत्नीसंयाजान्ता दीक्षणीया भवतीत्येतावतैव कर्मसंस्थायां सिद्धायामपि संतिष्ठत इति पुनः संस्थाबोधकवचनं पत्नीसंयाजान्तैरप्रतिपत्तिकर्मभिः संस्थायामपि प्रतिपत्तिकर्मभिरपि संस्थापनीयेत्येतद-

१ ख. °त्वा तेनै° ।

र्थम् । तेन समन्त्रमेव प्रतिपत्तिकर्माणि । वेदप्रतिपत्तिरपि समन्त्रैव । योक्त्रमोचनव्रतवि-सर्गावपि समन्त्रमेव भवतः । अवभृथोत्तरमाविनीषूदयनीयादीष्टिषु सर्वाण्युत्तरासु क्रियन्त इत्यनेन संनहनव्रतोपायनयोः कर्तव्यतायां बोधितायां दीक्षणीयायामेतयोरार्थिकी सिद्धिरवगता भवति । अन्यथा दीक्षणीयायां कृतयोर्योक्त्रसंनहनव्रतोपायनयोरुदय-नीयायां विमोचनविसर्गयोः करणे सर्वाण्युत्तरासु क्रियन्त इति सूत्रत उदयनीयेष्टौ व्रतोपायनविधानमसंगतं स्यात् । प्रकरणादेव दीक्षणीयालाभे पुनर्वचनमत्रैव प्रतिपत्ति-कर्माण्यावश्यकानि न खण्डायां प्रायणीयायामपीत्येतदर्थम् । नन्वेवं तस्मादेता एत-दन्ता इष्टयः संतिष्ठन्त इति श्रुतिविरोध इति चेन्न । अप्रतिपत्तिकर्मभिरेतदन्तैरेवेष्टयः संस्थिता भवन्तीत्येतादृशकल्पनया विरोधाभावात् । भक्षयित्वाऽऽज्येडां विरमन्तीत्ये-तावतैव सिद्धे पत्नीसंयाजान्ता दीक्षणीया संतिष्ठत इतिवचनं पत्नीसंयाजान्तत्वप्रतिपा-दकविधिवाक्यस्याऽऽज्येडाभक्षणान्तत्वमेवार्थ इति दर्शयितुम् । तेन यत्र यत्र पत्नी-संयाजान्तत्वं श्रूयते पत्नीसंयाजान्तोऽग्नीषोमीयः संतिष्ठते पत्नीसंयाजान्तमहः संतिष्ठत इत्यादौ तत्र तत्राऽऽज्येडाभक्षणान्तत्वं सिद्धं भवति । भक्षयित्वाऽऽ-ज्येडामित्यत्राऽऽज्यग्रहणं यत्र निरुपपदेडाग्रहणं तत्र प्रधानहविःसंबन्धीडाया एव संप्रत्यय इतिप्रदर्शनार्थम् । यथाऽऽतिथ्यायामिडान्ताऽऽतिथ्येत्यत्र विरमन्ती-त्यत्राप्रतिपत्तिकर्मभ्य इति शेषः । एतावता पत्नीसंयाजान्तत्वमस्त्येवेति । पत्नी-संयाजान्ता दीक्षणीयेत्येतावत एव वाक्यस्य भक्षयित्वेत्यारभ्य विरमन्तीत्यन्तेनार्थः प्रदर्श्यते । भक्षयित्वेत्यत्रान्तर्भावितो णिच् । तेनाऽऽज्येडाभक्षणस्योभयकर्तृकत्वेन बहुकर्तृकत्वाभावेऽपि प्रयोजकत्वमादाय विरमन्तीतिबहुवचनबोधितबहुकर्तृकक्रियासा-मानाधिकरण्यं समानकर्तृकत्वं चोपपन्नं भवति । तथाचायमर्थो भवति—होतारमाग्नीध्रं चाऽऽज्येडाभक्षणं कारयित्वा विरमन्त्यप्रतिपत्तिकर्मभ्योऽध्वर्युब्रह्मयजमानाः । याजु-षहौत्रसत्त्व आज्येडाभक्षणोत्तरं वेदिप्रतिपत्तिमात्रमवशिष्टं तद्भवत्येव । आग्नीध्रस्य त्वग्रे कर्मैव नास्ति । पूर्वत्र दीक्षणीयाकरणपक्षे योक्त्रविमोचनं कर्तव्यमेव । यजुःशाखिनि यजमाने याजुषहौत्रस्य सत्त्वेऽपि मार्जनं न भवति नेदमादिषु मार्जनमर्वागुदयनीयाया इत्याश्वलायनोक्तस्य मार्जननिषेधस्य वैशेषिकशास्त्रत्वेनात्रापि प्रवृत्तेः ।

धारयत्याहवनीयम् ।

यः प्रधानस्य कालः सोऽङ्गानां[1] स देशः स कर्ता सोऽग्निरिति परिभाषया क्रतु-समाप्तिपर्यन्तं धारणं न पुनः पुनः प्रणयनम् । प्रधानदेवतामात्रपरिग्रहार्थया दीक्षणी-यया परिगृहीतस्य देवतारूपाग्नेस्त्यागायोगादिति भावः । प्रधानदेवतामात्रपरिग्रहार्थत्वं दीक्षणीयाया इत्यत्र साधकमग्रे वक्ष्यते । दीक्षणीयायां विशेषमाह बौधायनो द्वैधे—

1 ख. ग. °नाम° ।

अत्रो ह स्माऽऽह शालीकिः कामं पूर्वाह्णे वाऽपराह्णे वा शालामध्यवस्येत्प्राक्त्वस्त-मयाद्दीक्षणीयां संतिष्ठापयिषेदिति। यजमानोऽपराह्णे दीक्षत इति विधिं संपादयितु-मध्वर्युम स्तमयात्प्रागेव दीक्षणीयेष्टिं संतिष्ठापयिषेत्। संतिष्ठापयितुं समापयितुमी-च्छेदित्यर्थः। अस्तमयात्प्रागेव दीक्षणीयां समापयितुमध्वर्युं प्रयोजयेत्। अध्व-र्युशीघ्रयाधीनत्वात्समाप्तेरिति भावः। संतिष्ठापयेदिति पाठ ऋजुरेव। दीक्षितो न कांचनाऽऽहुतिं जुहोत्यन्यत्र क्रतुसंयुक्ताभ्य इत्यनेन श्वःप्रभृति प्रातर्होममा-रभ्य सर्वेषां होमानां निषिद्धत्वाल्लोपे सायंप्रातर्होमयोरेकफलकत्वेन प्रथमदिनसं-बन्धिसायंहोमस्यापि लोपार्थम स्तमयात्प्राग्दीक्षणीयासमाप्तिरावश्यकीति भावः। यदा कदाचिद्दीक्षणीयेष्टेरस्तमयात् प्रागसमाप्तिस्तदा मध्य एव सायमग्निहोत्रमपकृष्य प्रातर-ग्निहोत्रं च समासप्रकारेण हुत्वा कृतान्तादिष्टिं समाप्य विरम्य परेद्युः सर्व-प्रायश्चित्तं हुत्वाऽपराह्णे दीक्षत इति विधिबलात्परेद्युरेव वपनादि। प्राकृतीष्टिस्तु तदानीं कालाभावाल्लोप एव। अस्मिन्विषय एकापूर्वजनकत्वनिर्वाहाय क्रतुसमाप्त्यन-न्तरं लोपप्रायश्चित्तं कर्तव्यमेव। अथवा सर्वप्रायश्चित्तं हुत्वा तदैव दीक्षा। सर्वप्राय-श्चित्तहोमो दीक्षानन्तरं वा। यदि तु दीक्षणीयेष्ट्यारम्भात्प्रागेव सूर्योऽस्तमेति तदा परे-द्युरेव दीक्षणीयेष्ट्यादि। प्रातरग्निहोत्रहोमस्तु स्वकाले भवत्येव। कालसत्त्वे प्राकृतीष्टि-रपि नो चेल्लोपप्रायश्चित्तमेव तदैव वा दीक्षणीयेष्ट्यादि। अस्मिन्पक्षे प्रातर्होमाप-कर्षः प्राकृतेष्टिप्रकारश्च पूर्ववत्। यदि त्वारब्धाया दीक्षायाः प्रतिबन्धवशेनासमा-प्तिस्तदा सर्वप्रायश्चित्तं हुत्वा शिष्टं कर्म तदैव समापनीयम्। द्वादशसंभारयजुर्होमा-त्प्राग्यदि सूर्योऽस्तमेति तदा तु परेद्युरेव संभारयजुर्होमादि न तु तदैवेति द्रष्टव्यम्।

प्राचीनवꣳशां विमितं विमिन्वन्ति।

पुरस्तादुन्नतम्। विमितमिति भूतार्थे क्तप्रत्ययः। मिन्वन्तीत्यस्योपसर्गबलादु-परिष्टादाच्छादयन्तीत्यर्थः। तेन दीक्षणीयायाः प्रागेव विमानम्। अत्रोपरिष्टादाच्छा-दनादि। एतेन दीक्षणीयोत्तरं प्राग्वंशविमानं कथं भवति देशस्य व्यापृतत्वादिति शङ्का परिहृता भवति। प्राचीनवꣳशं करोति देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीं रुद्रा इति श्रुतौ दिग्विभागस्त्वर्थवाद एव। तथा च तृतीयाध्याये चतुर्थपादे जैमिनिः—दिग्विभागश्च तद्वत्संबन्धस्यार्थहेतुत्वादिति। दिग्विभागः प्रतीच्या दिशो मनुष्यकर्तृको विभागोऽपि निवीतवदर्थवादार्थः। प्रायेण पूर्वाह्णे व्याप्रियमाणानां मनुष्याणामादित्यं पृष्ठतः कर्तुं प्रतीचीसंबन्धस्यार्थतः प्राप्तत्वेन तत्र विध्ययोगादिति सूत्रार्थः। निवीताधिकरणवदेव सर्वमत्र। तथा च तेनैव गतार्थ-त्वेऽपि निवीतं मनुष्याणामित्यत्र प्रत्यक्षविध्यश्रवणादर्थवादत एव विधिः कल्पनीयः।

---

१ क. यदि। २ ख. ग. 'कर्षप्रा°।

तथा च तत्र निवीतस्तुतेरेवाऽऽज्ञस्येनाप्रतीतेरर्थवादेन निवीतविधिकल्पनं दूरापास्तमिति स्वतन्त्रविधित्वासंभवादस्तु तत्रोपव्यानस्तावकत्वम् । प्रकृते तु पूर्वं मनुष्याः प्रतीचीं व्यभजन्तेत्युक्त्वा पूर्वपुरुषाचरितत्वेन प्रतीचो विभागस्य प्राशस्त्यावगतेस्तेन प्रतीचीदिग्विभागः कार्य इति विधिः सुकल्प्य इतिविशेषशङ्कावारणार्थमिदमधिकरणम् । प्राचीनवꣳशं करोतीति विधौ श्रूयमाणो देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीꣳ रुद्रा इति योऽर्थवादः सोऽस्याधिकरणस्य विषयः । अत्र देवपदं पितृपलक्षकम् । रुद्राणां देवत्वेऽपि गोबलीवर्दन्यायेन पृथग्ग्रहणम् । तथा च प्राचीं देवा दक्षिणेत्यत्र देवशब्दो रुद्रातिरिक्तपरो ग्राह्य इति ज्ञेयम् । प्राचीनः प्रागग्रो वंशो यस्य विमितप्रदेशस्यैतदेव दीक्षितविमितमित्याख्यायते । एतदेव प्राचीनत्वं पृष्ठवंशस्यैव । प्रागायतं पृष्ठवंशं कुर्यादिति वाजसनेयिश्रुतेः । प्राचीनशब्दः पुरोवाची नचोर्ध्ववाची देवमनुष्या दिशो व्यभजन्तेति लिङ्गात् । तस्मिन्नुदीचीनवꣳशा शालेत्याग्न्याधेयिकयां शालायामुदीचीनत्वस्य प्रत्याम्नानाच्च । स च पृष्ठवंशस्तावान्ग्राह्यो यावता पृष्ठवंशेनाऽऽग्न्याधेयिको विहारः सपत्न्यायतनः ससंचरः संपस्येत । विमितस्य प्राचीनवंशमिति विशेषणाद्वंशोऽपि प्रागग्रो विमानोत्तरमेव दातव्य इति गम्यते । तद्धारकत्वाद्यावदुपयुक्ताः सर्वे स्तम्भा अपि । पुरस्तादुन्नतं पुरोभागे किंचिदुच्चम् । एतदप्यग्न्यायतननिर्माणात्पूर्वमेव कर्तव्यम् । प्राचीनवंशं पुरस्तादुन्नतम्, एतादृशविशेषणविशिष्टं विमितं प्रदेशमाच्छादयन्तीत्येतादृशार्थकरणाद्वंशस्तम्भदानस्योन्नतत्वस्य च पूर्वकर्तव्यता, इष्ट्युत्तरमाच्छादनपरिश्रयणद्वारकरणादि अग्रे विधानात् । पुरोभाग औन्नत्यविधानात्पश्चाद्‌र्यान्नीचता । स्पष्टमेतदुक्तमापस्तम्बेन—प्राचीनवंशं करोति पुरस्तादुन्नतं पश्चान्निनतमिति । बौधायनः—जुष्टे देवयजने शाला कारिता भवतीति । एतस्य प्रमाणविशेषानभिधानादर्थलक्षणायामविस्तारौ । अर्थात्परिमाणमिति कात्यायनोक्तेः । बौधायनस्तु शुल्बसूत्रे प्राग्वंशः षोडशप्रक्रमायामो द्वादशव्यासस्तस्य मध्ये द्वादशिको विहार इत्याह । प्रयोगसूत्रे च प्राचीनवंशा दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी तस्यै चतस्रो द्वारः कुर्वन्ति प्राचीं दक्षिणां प्रतीचीमुदीचीं दक्षिणतो व्रतश्रपणागारं कुर्वन्ति पश्चात्पत्नीशालामिति । आयतनानि पञ्चविधपि[१]शिलान्यतमप्रमाणानि समक्षेत्राणि संभवानुसारेण । सभ्यावसथ्ययपक्षे तयोरप्याहवनीयायतनवदेवाऽऽयतने आहवनीयात्पुरतः क्रमेण प्राक्संस्थे प्राग्वंश एव । औपासनाग्नेरायतनं तु प्राग्वंशसमीप एव संचाररहिते परिश्रिते प्रदेशे । प्रक्रमप्रमाणं यजमानस्याध्वर्योर्वा । यजमानस्याध्वर्योर्वैष हि चेष्टानां कर्ता भवतीति शुल्बसूत्रात् । प्रक्रमो द्विपदस्त्रिपदो वा शुल्बसूत्रात् । पद्यते गम्यत इति व्युत्पत्त्यैकपदोऽपि । पदस्यानेकविधत्वमुक्तं

१ क. °पिशीला° ।

शुल्बसूत्रे पदे युगेऽरत्नावियति शम्यायां च मानार्थेषु याथाकामी शब्दार्थस्य विशयित्वादिति । विशयित्वात्, अनेकविधत्वादित्यर्थः । पदं पञ्चदशाङ्गुलमिति बौधायनः । दशाङ्गुलं क्षुद्रपदमित्यपि सः । दशाङ्गुलं पदमिति कात्यायनः । एतानि प्रमाणानि सार्वत्रिकाणि । प्राची सर्वत्र लोकत एव ग्राह्या । तत्र बौधायनः—कृत्तिकाः खल्विमां प्राचीं न जहन्ति(ति) तासां दर्शनेनानुमापयेदित्येकं, श्रोणादर्शनेनानुमापयेदित्येकं, चित्रास्वात्योरन्तरालेनानुमापयेदित्यपरमिति । एतानि लक्षणानि देशविशेषेषु व्यवतिष्ठन्ते । सर्वदेशसाधारणं लक्षणं कात्यायन आह—समे शङ्कुं निखाय शङ्कुसंमितया रज्ज्वा मण्डलं परिलिख्य यत्र रेखयोः शङ्कग्रच्छाया पतति सा प्राचीति । अग्रे स्रक्तिष्वतीरोककरणविधानाद्विमितस्य चतुरश्रता गम्यते । पित्र्येष्टौ दिक्षु स्रक्तय इति विधानाद्दैवे कर्मणि चतुरश्रेषु विदिक्ष्वेव स्रक्तयः । आपस्तम्बः स्पष्टमेवामुमर्थमाह—अवान्तरदिक्षु स्रक्तय इति ।

परिश्रयन्तः स्रक्तिष्वतीरोकान्कुर्वन्ति ।

प्राग्वंशं विमितमुपरिष्टाद्वाच्छादितं परिश्रयन्तः परितः कटादिभिराच्छादयन्तः परिकर्मिणः स्रक्तिषु कोणेषु अतीरोकान्कुर्वन्ति । आरोकशब्दोऽन्तरालवाची गवाक्षाणीति यावत् । आरोकेष्वारण्यान्वारयन्तीत्यश्वमेधे श्रुतेः । दीर्घो लकारस्य रेफश्च च्छान्दसः । कोणेषु गवाक्षाणि कुर्वन्तीत्यर्थः । परिश्रयन्त इति शतृनिर्देशात्परिश्रयणसमकालमेवातीरोककरणम् ।

उत्तरपूर्वमवान्तरदेशं प्रति पञ्चमम् ।

उत्तरपूर्वावान्तरप्रदेशाभिमुखं पञ्चममित्यर्थः । अयमर्थः प्रतिशब्दाल्लभ्यते । उत्तरपूर्वं प्रति पञ्चममित्येतावत्युच्यमान उत्तरपूर्वशब्देन गवाक्षस्यैव ग्रहणं स्यात् । तथाच तत्समीपेऽवान्तरदेश एव पञ्चमं गवाक्षं स्यात्तन्मा भूत्किंत्ववान्तरदेशव्यतिरिक्तसमीपवर्तिनि पूर्वभाग उत्तरभागे वा यथा स्यादित्येतदर्थमवान्तरदेशवचनम् । दिक्स्थाश्चत्वारो भागा विदिक्स्थाश्चत्वारस्तत्र पूर्वभाग उत्तरभागे वा पञ्चमं गवाक्षमिति द्रष्टव्यम् । उत्तरपूर्वग्रहणमितरावान्तरदेशव्यावृत्त्यर्थम् ।

दिक्षु द्वाराणि ।

कुर्वन्तीति शेषः । श्रुतौ दिक्ष्वतीकाशान्करोतीत्यतीकाशशब्दो द्वारवाच्येव । तानि अरत्निमात्राणि । पृष्ठ्यासूत्रपाश्चात्योदक्सूत्रसंपाताद्दक्षिणतः प्रादेशमिते देशे द्वारस्तम्भः । एवमुत्तरतो द्वारस्तम्भः । एवं प्रत्यग्द्वारं संपन्नं भवति । पृष्ठ्यासूत्रपौरस्त्योदक्सूत्रसंपाताद्दक्षिणत उत्तरतश्च पूर्ववदेकैकं स्तम्भं दद्यात् । एवं प्राग्द्वारं संपन्नं भवति । उदक्सूत्रदक्षिणप्रान्तसूत्रसंपातात्प्राच्यां प्रतीच्यां च पूर्ववदेकैकं स्तम्भं दद्यात् । एवं दक्षिणद्वारं संपन्नं भवति । उदक्सूत्रोत्तरप्रान्तसूत्रसंपातात्प्राच्यां प्रतीच्यां च पूर्ववद्द्वार-

स्तम्भौ । एवमुत्तरद्वारं संपन्नं भवति । अरत्निप्रमाणं शुल्बसूत्रे—चतुर्विंशत्यङ्गुलयोऽरत्निस्तदर्धं प्रादेश इति कृप्तिरिति । सार्वत्रिकी चैषा कृप्तिरिति ज्ञेयम् ।

एकद्वाराः काम्याः कल्पाः ।

एकमेव द्वारं येषु कल्पेषु प्रकारेषु त एकद्वाराः कल्पाः काम्या भवन्तीति शेषः । न तु प्राकृतानामेव द्वाराणामर्थवादो यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनातीत्यादिवत् । यः कामयेतेतिविशेषविधानात् । तेन तेन निष्क्रान्तः सर्वं करोति यद्द्वारान्तरेण कर्तव्यं तच्च दक्षिणया द्वारोपनिर्हृत्येत्यादौ यदि प्रतीच्यामेव द्वारं तदा न प्रतीच्या द्वारा निष्कामतीति शाखान्तरप्रोक्तः प्रतिषेधः । तथा पूर्वया द्वारा प्राग्वंशं प्रविशयेत्यादिनियमो न भवति । तथा गवादीनां बन्धनार्थे शङ्कूनां च न द्वार्यादिनियमः । होतुः समीक्षणेऽभिध्यानमात्रं, शालामुखीयात्प्राक्सांकाशिनं सर्वदा कर्तव्यमेव । द्वारान्तरेण निष्कम्यापि उत्तरपूर्वदेश एवोच्छिष्टखरकरणम् । नन्विदं सूत्रं व्यर्थं प्राग्द्वारᳬ स्वर्गकामस्येत्यादिनैव सिद्धेरिति चेत्सत्यम् । स्वर्गकामनोद्देशेन प्राग्द्वारकरणेऽपीतरेषां नित्यत्वेनानिवृत्तिः स्यात्सा मा भूदितु एकस्य काम्यत्वे सर्वेषां नित्यत्वेऽपि निवृत्तिर्यथा स्यादित्येतादृशार्थज्ञापनार्थत्वेन वैयर्थ्याभावात् ।

कामानाह[1]—

प्राग्द्वारᳬ स्वर्गकामस्य दक्षिणाद्वारं पितृलोककामस्य
प्रत्यग्द्वारं मनुष्यलोककामस्योदग्द्वारं प्रजाकामस्यो-
त्तरतःपुरस्ताद्यः कामयेतोभयोर्लोकयोर्ऋध्नुयामिति ।

उत्तरत इति तस्प्रत्ययसंहितपाठेन यद्यपि द्वारद्वयं प्रतीयते तथाऽपि एकद्वाराः काम्याः कल्पा इत्युपक्रमादुत्तरपूर्वया द्वारोपनिर्हृत्येति दर्शनाच्चैकमेव द्वारमवान्तरदेश उत्तरपूर्वरूपे तस्प्रत्ययसहितः पाठोऽपपाठ एव । अन्यत्स्पष्टम् ।

दिक्षु द्वाराणीति सर्वद्वारकल्पस्य काम्यत्वमप्याह—

सर्वतोद्वारं यः कामयेत सर्वासु दिक्ष्वृध्नुयामिति ।

स्पष्टम् । ननूत्तरपूर्वया द्वारोपनिर्हृत्येति सिद्धवदनुवादात्तदपि नित्यमिति चेन्न । कामश्रुतिविरोधात्पाक्षिकेणाप्युपलक्षणसिद्धेश्च ।

प्रतिमायाश्च कुर्वन्ति दिक्षु प्रघाणरूपाणि ।

प्रतिमाशब्दः सादृश्यवाची । प्राग्वंशरूपा या शाला तत्प्रतिमा तत्सदृशी तत्समन्तप्रदेशे सदोहविर्धानमण्डपार्थं स्थलमवशेष्य यावदभीष्टप्रदेशं बाह्यतोऽन्या शाला तस्या अपि प्रान्तेषु दिक्षु द्वाराणि कुर्वन्तीत्यर्थः । सादृश्यमत्र निबिडच्छायत्वोच्चत्वाभ्याम् ।

---

[1] ख. ग. कामनामाह ।

अर्थात्परितःश्रयणम् । द्वारेषु विशेषमाह—प्रघाणरूपाणीति । बाह्यशालाया द्वाराणि प्रघाणरूपाणि कुर्वन्तीत्यर्थः । दिक्ष्विति वचनं विदिग्व्यावृत्त्यर्थम् । प्रहण्यते पादाभ्यां गमन आगमने च स प्रघाणः । हननं ताडनम् । अत्र हननशब्देन हननयोग्यता लक्ष्यते । योगरूढं पदम् । अगारैकदेशे प्रघणः प्रघाणश्चेति निपातनात्साधुः । अलिन्दरूपद्वारावयववाच्ययं शब्दः । प्राग्वंशस्य सदोहविर्धानयोश्च समानं सांकाशिनमित्ययं विधिर्बाह्यशालायाः पूर्वापरद्वारयोर्न भवति । अविधानादावश्यकाशुचिपुरुषादिदृष्ट्यसंपादनानुकूलत्वाच्च । बाह्यशालाद्वाराणि सर्वाणि कपाटवन्त्यपि कार्याणि श्वादीनामप्रवेशाय । द्वारवर्जं सर्वतः परिश्रयणम् ।

उत्तरेण प्राग्वꣳशं परिश्रिते यजमानस्य केशश्मश्रूणि वापयते ।

उत्तरेणेत्येनबन्तम् । प्राग्वंशाद्बहिरुत्तरतः समीप एवेत्यर्थः । उत्तरणेति वचनं प्रागादिदिग्व्यावृत्त्यर्थम् । दूरदेशव्यावृत्त्यर्थमेनपो वचनम् । प्राग्वंशवचनादग्न्यायतनस्य बाह्यशालाया गार्हपत्यार्थोदीचीनवंशायाः शालायाश्च व्यावृत्तिः । तेनात्रैकैव शाला भवति नतु शालाद्वयमिति । प्राग्वंशशब्दः शालाविशेषवाची । तथाच कोशः— प्राग्वंशः प्राग्घविर्गेहादिति । यो हविर्गेहाद्धविरर्थद्रव्यस्थापनार्थाद्गेहात्प्राक्पुरतो मण्डपः स प्राग्वंश इत्यर्थः । एतेनैव ज्ञायते यज्ञोपयुक्तहविरादिसंभारजातं प्राग्वंशस्य पश्चात्स्थापयितव्यमिति । अस्ति चायमर्थः स्पष्टः शास्त्रान्तरे—पश्चात्पत्नीशाला तस्या एव समीपे संभारान्निदधातीति । अत्र यजमानः प्राङ्मुख एव । उदङ्मुखत्वे विहारस्य पृष्ठतः कृतिः स्यात् । सा चात्यन्तमनुचिता । एतदभिप्रेत्यैव प्राङ्मुखतामत्राऽऽह बौधायनः— अथ प्राङ्मुखस्य दक्षिणं गोदानमद्भिरुनत्त्याप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इतीति । उत्तरेण प्राग्वꣳशं परिश्रिते यजमानस्य श्मश्रूण्यग्रे वापयतेऽथोपपक्षावथ केशानित्येतावतैव सिद्धे पृथक्सामान्यप्रतिज्ञानमन्यत्रापि यत्र केशश्मश्रूणि वापयत इति श्रूयते तत्राप्ययमेव क्रमो नतु केशश्मश्रु वपत इतिवाक्यानुसारेण क्रम इति । प्राग्वंशमित्यत्रैनपा द्वितीयेति द्वितीया षष्ठ्यर्थे । परिश्रिते कटादिभिर्वेष्टनार्थे प्रवेशार्थं पूर्वतो द्वारं कुर्यात् । उत्तरेण प्राग्वंशमित्यरण्ये दीक्षापक्षे । अस्मिन्पक्ष एव प्राग्वंशस्य संभवात् । गृहे दीक्षापक्षे तु प्राग्वंशासंभवे दीक्षणीयार्थविहारादुत्तरत एतद्भवति । प्राग्वंशसंभवे तु तदुत्तरत एव । अथवा गृहे दीक्षापक्षेऽपि प्राग्वंश आवश्यकः । उत्तरेण प्राग्वंशमिति वचनात्तं प्राग्वंशं प्रपाद्येति वक्ष्यमाणसूत्राच्च । प्रायणीयाद्यर्थं प्राग्वंशो भिन्न एव । यजमानग्रहणं पत्नीव्युदासार्थम् । स्पष्टमाहाऽऽपस्तम्बः—एवं पत्नीकेशवर्जमिति । वसिष्ठस्मृतिरपि—

केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः ।
गोवधादिषु सर्वेषु च्छेदयेदङ्गुलद्वयम् ॥ इति ।

ऋत्विग्व्युदासस्तु सुतराम्। ऋत्विजां प्राधान्याभावात्। जैमिनिरपि तृतीयाध्याये सप्तमे पादे फलसंयोगात्तु स्वामियुक्तं प्रधानस्येत्येतेन सूत्रेणाऽऽह। सूत्रार्थस्तु स्वामियुक्तं वपनपयोव्रतादिकं प्रधानस्य धर्मः। कुतः, फलसंयोगात्फलभाक्त्वरूपभोक्तृत्वसंयोगात्, योग्यताजननद्वारा प्रधानफलोत्पत्त्यर्थत्वादिति चेति। श्मश्रूणि च केशाश्च केशश्मश्रूणि। केशशब्दस्याद्यन्तत्वात्, यच्छ्मश्रुणस्तत्पुरुषाणा८ रूपमिति श्रुतेः श्मश्रुणः पुरुषशोभाधायकत्वेनाभ्यर्हितत्वाद्वा पूर्वनिपातः। उत्तरत्र कर्म(क्रम)विधानात्क्रमविधायकं नैतत्। केशश्मश्रुग्रहणं लोमोपलक्षणम्। न चेदुपपक्षयोः क्रमनियमायोगात्। वापयत इत्यत्र स्वार्थे णिच्। तेनाध्वर्युरेव वपेत्, नतु तेन वापयेदिति। कृते नापितकृत्य इति यजमानसूत्रमस्मिन्नर्थे लिङ्गम्। लोकविद्विष्टत्वाच्छिक्षाया अभावाच्च मन्त्रेण किंचिद्वपनं कृत्वा नापितेनावशिष्टं कृत्स्नं वपनं कारयेत्। एतेन रथकारवन्मन्त्रपाठकल्पनाऽपि निरस्ता।

श्मश्रूण्यग्रे वापयतेऽथोपपक्षावथ केशान्।

अत्र पुनर्वापयत इति वचनं दैवं वपनमपि पक्षेऽत्र भवतीतिज्ञापनार्थम्। उक्तं चैतत्स्पष्टमापस्तम्बेन—उत्तरेण बर्हिः प्राग्वंशं परिश्रिते यजमानः केशश्मश्रूणि वापयत उपपक्षावग्रेऽथ श्मश्रूण्यथ केशानपि वा श्मश्रूण्युपपक्षावथ केशानिति। प्रयोजकत्वार्थक एवात्र णिच्, नतु स्वार्थ इत्येतादृशनियमज्ञापनार्थं वा। गोदानोन्दनं तु अध्वर्युकर्तृकमेव। युक्तं चैतदध्वर्युकर्तृकत्वं समन्त्रककर्मत्वात्, णिजभावाच्च। नखनिकृन्तनमप्यध्वर्युकर्तृकमेव। णिजभावात्कृते नापितकृत्य इति पूर्वोक्तलिङ्गाच्च। वपनमन्त्राणां वपनकरणत्वादेव मध्ये मन्त्रपाठो न दोषायेत्येवमेव कल्प्यं शिष्टसमाचारानुरोधात्। लिङ्गमप्यत्रास्ति केशेषूप्यमानेषु जपतीति। मुखगताः केशाः श्मश्रूणि। उपपक्षो बाहुमूलम्। नापितोऽलोपपक्षां मे निकृत्तनखां प्रब्रूतादिति बौधायनोक्तप्रैष उपपक्षशब्दस्यात्रैव रूढिदर्शनात्। कपोलभाग इति केचित्। शिरोगताः केशाः केशा एव संज्ञान्तराभावात्। अग्रग्रहणं नियमार्थम्। अग्र आदावेव श्मश्रूणि वापयत इत्यर्थः। तेन मध्यश्मश्रुवपनस्याऽऽसुरवपनस्य व्यावृत्तिः। यद्यपि मध्यश्मश्रुवपनत्वाद्दैवस्यापि निवृत्तिः सिद्धा तथाऽपि अनन्तरोक्तज्ञापकबलात्तस्य न निवृत्तिः। अथोपपक्षावथ केशानित्युभयत्राथशब्दो ब्राह्मणानुकरणार्थः। अथवाऽथोपपक्षावित्यत्राथशब्द उभयाधिकारप्रदर्शनार्थः। तेन पत्न्या अप्युपपक्षवापनं सिद्धं भवति। उक्तं च बौधायनेन—नापितालोपपक्षामित्यादिना प्रैषेण। अथ केशानित्यत्राथशब्द उभयाधिकारव्यावृत्त्यर्थः। तेन केशवापनं यजमानस्यैव न पत्न्याः। एवं पत्नी केशवर्जमित्यापस्तम्बोऽपि।

१ क. 'न के'।

अथ वपनविधिमाह—

आप उन्दन्तु जीवस इति दक्षिणं गोदानमुनत्ति ।

गवि पृथिव्यां दीयते स्नापार्थं यत्तद्गोदानं श्रोत्रसमीपवर्तिप्रदेशः । तच्च दक्षिणं तदुनत्ति क्लेदयति आर्द्रीं करोतीति यावत् । उष्णोदकमिश्रणं कृताकृतम् । लक्षणया गोदानाख्यप्रदेशस्थाः केशा गृह्यन्ते । यद्यपि केशोन्दनविधेरपेक्षा तथाऽपि केशमूलानां गोदानप्रदेशसंबद्धत्वात्तदुन्दनं विना मूलोन्दनासंभवाद्गोदानोन्दनविधिरिति द्रष्टव्यम् । गोशब्दस्य पृथिवीवाचित्वं निघण्टौ गौर्ग्मेति पृथिवीनामसु पाठात् ।

ओषधे त्रायस्वैनमित्यूर्ध्वाग्रामोषधिमन्तर्दधाति ।

ऊर्ध्वाग्रामोषधिमूर्ध्वाग्रं दर्भं गोदानाख्यप्रदेशस्योपरि स्थापयति । ओषधिशब्दस्य दर्भे प्रवृत्तिर्या जाता ओषधयो देवेभ्यस्त्रियुगं पुरेति बर्हिरभिमन्त्रणमन्त्रे दृष्टाऽस्ति । दर्भमन्तर्धायेत्येवाऽऽपस्तम्बः । दर्भपुञ्जीलं वौषधिशब्देन ग्राह्यम् । तथा च कर्मान्ते बौधायनः 'सदर्भपुञ्जीलमुद्वृह्येति कतरत्तु खल्विदं दर्भपुञ्जीलं भवतीति यदेवैतद्गोदानयोर्निदधाति' इति ।

स्वधिते मैन७ं हि७ंसीरिति क्षुरेणाभिनिदधाति ।

स्वधितिशब्दस्य पशुविशसनशस्त्रपरत्वं नात्राभिप्रेतं प्रकृतेऽनुपयोगादित्यभिप्रेत्याऽऽह क्षुरेणेति । क्षुरेणेति तृतीया द्वितीयार्थे । तेन क्षुरमित्येवं प्रयोगो भवति । अभिनिधानं दर्भस्योपरि स्थापनम् ।

देवश्रूरेतानि प्रवप इति प्रवपति ॥ १ ॥

दक्षिणं गोदानमिति शेषः । दक्षिणगोदानस्थान्केशानिति तदर्थः । मञ्चाः क्रोशन्तीतिवल्लक्षणा । सदर्भाणां केशानां वपनमेतानीति लिङ्गात् । सामान्ये नपुंसकमिति नपुंसकलिङ्गता । दक्षिणं गोदानमारभ्य प्रदक्षिणं सर्वान्केशान्वपतीत्यर्थसिद्धम् । एतदभिप्रायेणैवोत्तरगोदानावचनम् । उन्दनादिसंस्कारा दक्षिणगोदानप्रदेश एव कार्या इति दर्शयितुं दक्षिणगोदानवचनं नत्वितरकेशवपननिवृत्तिरनेन क्रियते । अत एव पूर्वत्र सामान्यतः केशवपनप्रतिज्ञानं कृतं श्मश्रूण्यग्रे वापयतेऽथोपपक्षावथ केशानिति । श्रुतावपि श्रुतं मृता वा एषा त्वगमेध्या यत्केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैतीति । तूष्णीं वोत्तरं गोदानं पारिशेष्यात् । शिखायास्तु नैव वपनम् । सत्रेषु तु वचनाद्वपनं शिखाया इति धर्मसूत्रात् ।

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥ इतिस्मृतेश्च ।

---

१ क. °मू । य° ।

भ्रुवौ प्रकोष्ठे उपस्थं च वर्जयित्वा लोम्नां वपनम् ।

उपपक्षश्मश्रुकेशान्वापयीत क्रमात्सदा ।
शिखाप्रकोष्ठभ्रूपस्थान्वर्जयित्वा द्विजोत्तमः ॥ इति स्मृतौ निषेधात् ।

उपस्थग्रहणं गुदोपलक्षणम् । इदं वपनं जीवत्पितृकस्यापि भवति ।

गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥ इति निगमोक्तेः ।
विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं विना ।
यो वापयति लोमानि स पुत्रः पितृघातकः ॥ इति प्रचेतोवचनाच्च ।

तत्रापि पितरि कृतदीक्ष एव पुत्रस्याधिकारः । अन्यथा कृते परिवेत्तृत्वादिदोषापत्तेः । विस्तरस्तु मत्कृतस्मार्तसंस्काररत्नमालायामवगन्तव्यः । पौर्णमास्यां दीक्षायां कृतवपनश्चेद्वपनं न भवति अर्थलोपात् । तथा सोमाधाने चेति केचित् । केशश्मश्रुवृद्ध्यभावेऽपि वपनं राजक्रयवत्संस्कार इति तदानीं मन्त्रजपः, छिन्ने लून इति भारद्वाजवचनादित्यन्ये । अस्मिन्पक्षे दक्षिणोत्तरभागभेदेन वपनम् । अवचनादेवं ज्ञायत एवमुत्तरं गोदानमित्यापस्तम्बोक्तं नाभिमतमिति । तथाच बौधायनः—एतयैवाऽऽवृतोत्तरं गोदानमद्भिरुनत्ति यजुषा वा तूष्णीं वेति ।

अभ्यन्तरं नखानि निकृन्तते हस्त्यान्यग्रेऽथ
पद्यानि सव्यस्याग्रे कनिष्ठिकातोऽथ दक्षिणस्य ।

यथाऽङ्गुल्यग्रेभ्योऽभ्यन्तरं भवति तथा नखानि निकृन्तते छिनत्ति अध्वर्युरेव । शिक्षाया अभावाद्गर्हितत्वाच्च नापितः । निकृन्तत इत्यत्र नीत्युपसर्गो नितरां छेदनार्थः । अध्वर्योरपि वपनकर्तृत्वात्स्नानं तूष्णीमेव शुद्ध्यर्थम् । हस्त्यानि हस्तसंबन्धीनि अग्र आदौ निकृन्तते छिनत्ति । अथानन्तरं पद्यानि पादसंबन्धीनि । पादार्घाभ्यां चेति यत्प्रत्ययः । पद्यत्यतदर्थे इति पादशब्दस्य पदादेशः । हस्त्यान्यग्र इत्येतावतैवार्थादनन्तरं पद्यनिकृन्तने सिद्धेऽथ पद्यानीति वचनं कालाव्यवधानार्थम् । सव्यस्य वामस्य हस्तस्याग्रे प्रथमं कनिष्ठिकात आरभ्येति शेषः । अथानन्तरं दक्षिणस्य हस्तस्य । सव्यस्याग्रे कनिष्ठिकात इत्यनेनैव दक्षिणस्य हस्तस्यानन्तरं नखनिकृन्तने सिद्ध इदं वचनं दक्षिणस्य हस्तस्याप्यभ्यन्तरमेव कनिष्ठिकात आरभ्यैव नखनिकृन्तनं नत्वेतद्व्यतिरिक्तलोकप्रसिद्धप्रकारेणेत्येतदर्थम् । एवं सव्यस्य पादस्याग्रेऽनन्तरं दक्षिणस्य कनिष्ठिकात आरभ्यैव । पूर्वत्र हस्त्यान्यग्रेऽथ पद्यानीत्युभयोपक्रमात् । सव्यस्याग्रे कनिष्ठिकातोऽथ दक्षिणस्येत्यत्र सव्यदक्षिणशब्दाभ्यां सव्यहस्तपादयोर्दक्षिणहस्तपादयोर्यथाक्रमं ग्रहणम् । सव्यस्य दक्षिणस्येति सामान्यतो निर्देशाद्धस्तनखनिकृन्तनवत्पादनखनिकृन्तनेऽप्ययमेव प्रकारः । अभ्यन्तरं नखानि निकृन्तते सव्यानि हस्त्यान्यग्रे कनि-

ष्ठिकातोऽथ दक्षिणान्येवं पश्चानीत्येकान्वयेनैव सिद्धौ भेदेन सूत्रकरणं सव्यस्याग्रे कनिष्ठिकातोऽथ दक्षिणस्येत्यस्य क्रमस्यानित्यतां ज्ञापयति । नखनिकृन्तनं पत्न्या अपि यजमानपदाश्रवणात् । आपस्तम्बेनैवं पत्नीकेशवर्जमित्यनेन नखनिकृन्तनकर्तव्यताया बोधनात्, बौधायनेन स्पष्टतयाऽभिधानाच्च ।

स यदाऽक्ताक्षो भवत्यथैनमेकविंशत्या दर्भपुञ्जीलै-
स्त्रेधा विभक्तैस्त्रिः सप्तभिः सप्तभिः पावयति चित्प-
तिस्त्वा पुनात्वित्येतैर्मन्त्रैर्द्विरूर्ध्वं नाभेरुन्मार्ष्टि सकृद-
*र्वागुन्माष्टर्यच्छिद्रेण पवित्रेणेति सर्वत्रानुषजति ।

स यदाऽक्ताक्षो भवत्यथेत्यन्तं सूत्रमञ्जनपावनयोः कालाव्यवधानार्थं न तु प्रयोगक्रमज्ञानार्थं सूत्रस्य कनीनिकाऽसीत्यारभ्य न पुनर्निवेचयतीत्यन्तेन याजमानप्रकरणस्थेन सूत्रेण विधास्यमानादञ्जनादनन्तरं तस्य ते पवित्रपत इत्यारभ्य पवमानः सुवर्जन इति चैतमनुवाकमित्यन्तेन सूत्रेण पाठ्यमानस्य जपं विधास्यमानेनाऽऽचार्येण याजमानप्रकरणस्थेन सूत्रेणैव तस्य ज्ञापयिष्यमाणत्वात् । सोऽभ्यक्तः । इदं च तच्छब्दोपादानं पावनविषय एनमित्येतच्छब्दोपादानं चाभ्यञ्जनाञ्जनपावनानां संयुक्तत्वख्यापनार्थम् । तेन संयुक्तानि त्वेकापवर्गाणीति परिभाषयैतत्त्रितयं यजमानस्य कृत्वाऽनन्तरं पत्न्या न तु एकैकमेकैकस्येति । तेनास्मत्सूत्रादपीदमपि ज्ञातं भवति पत्न्या अप्येतत्त्रितयमस्तीति । यदा यस्मिन्कालेऽक्ते अक्षिणी येनैतादृशो भवति अथ तस्मिन्कालेऽनन्तरमेवैनमक्ताक्षमेकविंशत्यैकविंशतिसंख्याकैर्दर्भपुञ्जीलैस्त्रेधा विभक्तैस्त्रेधाविभागवद्भिः सप्तभिः सप्तभिस्त्रिः पावयतीत्यर्थः । विंशत्याद्याः सदैकत्व इति कोशादेकविंशत्येत्यत्रैकवचनम् । ननु त्रेधा विभक्तैरित्येतावदेवास्तु किमर्थं सप्तभिरिति चेन्न । त्रेधा विभक्तैरित्यनेन विभागमात्रे प्रापिते कृतविभागैः पृथग्भूतैरमिलितैः सर्वैरपि त्रिवारं पावनमित्येतादृशार्थनिवारणार्थत्वात्समं स्यादश्रुतत्वादिति न्यायज्ञापनार्थत्वाद्वा । दर्भपुञ्जीलं दर्भकाण्डं सप्त दर्भा इति केचित् । बह्वृचब्राह्मणे तु पिञ्जूलैरित्युक्तम् । पिञ्जूलं विशाखो दर्भ इति केचित् । पिञ्जूलपुञ्जीलशब्दौ पर्यायावित्यन्ये । स यदाऽक्ताक्षो भवत्यथैनमित्यत्र पुंस्त्वमुद्देश्यगतत्वादविवक्षितं ज्ञेयं ब्राह्मणोऽग्नीनादधीतेतिवत् । नच क्षौमे वसानौ जायापती अग्नीनादधीयातामिति श्रुतौ सहाधिकारश्रवणाद्ब्राह्मण इत्यत्र पुंस्त्वस्याविवक्षितत्वं प्रकृते सहाधिकारबोधकश्रुतेरभावात्कथं पुंस्त्वस्याविवक्षितत्वमिति शङ्क्यम् । पूतौ जायापती दीक्षेते इत्यत्रापि सहाधिकारश्रुतिश्रवणात्पुंस्त्वाविवक्षाया अनपायात् । चित्पतिस्त्वा पुनात्वित्येतैर्मन्त्रैरित्यत्रैतैरिति वचनं चित्पतिस्त्वा

---

* अवागवमार्ष्टीति टीकानुसारी पाठः ।

पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वित्येतेषामन्यतमेन सकृन्मन्त्रेण द्विस्तूष्णीमिति स्यादितरयोर्विकल्पार्थत्वं स्यात्तन्मा भूत्किंतु सर्वेषां पावनकरणत्वं यथा स्यादित्येतदर्थम् । एकैकां क्रियां प्रति एकैकस्य मन्त्रस्य करणता समं स्यादश्रुतत्वादितिन्यायसिद्धेति ज्ञापयितुं मन्त्रैरिति वचनम् । तेन सर्वैराद्यं पावनं तूष्णीमितरे इति निरस्तं भवति । पूर्वं पवित्रैः पावयतीत्युक्तं तस्यायं विशेषविधिर्द्विरूर्ध्वमित्यादिकः । नाभेरुर्ध्वं द्विरुन्मार्ष्टि । उच्छ्रकरादूर्ध्वमेव मार्ष्टि । सकृदेकवारम् । अत एवाविच्छिन्नैव पावनम् । अन्यथा सकृत्त्वं भज्येत । अवाक्, अवाधोऽञ्चति गच्छति समासा भवतीत्यवाक् । नाभेरित्यनुवर्तते । नाभिमारभ्य पादपर्यन्तं मार्ष्टीत्यर्थः । अवाक्त्रिरयपपाठः । वस्त्रान्तर्हितानां पावने वचनाभावेऽपि वस्त्रशिथिलीकरणस्यापि विगर्हितत्वाद्वस्त्रान्तर्हितानामेव पावनं कुर्वन्ति शिष्टाः । नग्नत्वापत्तेर्विगानापत्तेश्चेदानीम् । अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति सर्वत्र मन्त्रेष्वनुषजति । अच्छिद्रेण पवित्रेणेत्यनुषजतीत्येतावतैवेतरयोर्मन्त्रयोरर्थादनुषङ्गसिद्धौ सर्वत्रेति वचनं चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्विति त्रिषु याजमानमन्त्रेष्वप्यनुषङ्गलाभार्थम् । आध्वर्यवमन्त्रान्त्यमन्त्रे तु श्रुतौ पठित एवास्ति । अतो नात्रानुषङ्गः । एतद्दर्भपुञ्जीलनिरसने विशेषमाह द्वैधे बौधायनः—अथैनान्यद्भिः प्रोक्ष्योदञ्चच्यवक्षिरदेदिति । अथैनान्यद्भिरभ्युक्ष्योदञ्च्युत्खिदेदिति शालीकिमतम् । उत्तानेन हस्तेन कर्तव्यं सेचनं प्रोक्षणम् । मुष्टीकृतेन हस्तेन कर्तव्यं सेचनमभ्युक्षणमित्यनयोर्भेदः । खेदनं निरसनम् । अवेत्युपसर्गादधः कर्तव्यम् । उदित्युपसर्गादूर्ध्वमिति निरसने भेदो द्रष्टव्यः ।

तं प्राग्वꣳशं प्रपाद्यात्र दीक्षणीयामेके समामनन्ति ।

बहिर्गतस्य यजमानस्य प्राग्वंशप्रवेशं विना दीक्षणीयाया असिद्धेरर्थतः सिद्ध इदं वचनमध्वर्योः प्रयोजककर्तृत्वार्थम् । तेनोपवेशनान्तं यजमानस्य हस्तं धृत्वा तेन कारणीयम् । समन्त्रका क्रिया तु यजमानस्यैव । इदं च प्रयोजककर्तृत्वं बौधायनेनाप्युक्तं सविशेषम्—अथैनꣳ सव्ये पाणावभिपाद्य शालामानयत्या वो देवास ईमहे सत्यधर्माणो अध्वरे यद्वो देवास आगुरे यज्ञियासो हवामह इतीति । द्वैधे—अथैनꣳ सव्ये पाणावभिपाद्येति दक्षिण इति पूर्वः कल्पो बौधायनस्योत्तरतः शालीकेरिति । अथैनꣳ सव्ये पाणावभिपाद्येत्ययं विशेषोऽत्र तं प्राग्वंशं प्रपाद्य दीक्षणीयामेके समामनन्त्यत्रेत्यन्वयः । अत्रास्मिन्काले पूर्वत्र दीक्षणीया योक्ता साऽत्र कर्तव्या न पूर्वत्रेत्यर्थः । अत्रेतिवचनाभावे प्राग्वंशप्रपादनोत्तरं वैकल्पिकी द्वितीया दीक्षणीयेत्यर्थः स्यात्तस्य निवृत्त्यर्थमत्रेतिवचनमावश्यकम् । अत्रेष्टिशब्दप्रयोगाभावादैष्टꣳ हविरिदमेषां मयीत्य-

१ क. °त्र संयम° । २ ङ. ज. झ. ञ. °यामिष्टिमे° ।

न्वाधानमन्त्रे न प्रयोज्यम् । प्रपाद्येति ल्यप्प्रत्ययप्रयोगः प्रपादनदीक्षणीयेष्ट्योरव्यवधा-
नार्थः । तेनाऽऽहवनीयाभिमन्त्रणं दीक्षणीयेष्ट्युत्तरमेव भवति न तु तत्पूर्वमिति सिद्धं भवति ।
अत्र प्रपादनमुपवेशनमेव । गृहे दीक्षापक्षे प्राग्वंशासंभवे दीक्षणीयार्थविहारं प्रपाद-
यति । अत्र दीक्षणीयापक्षे व्रतोपायनपत्नीसंनहनादीन्यत्रापि न भवन्ति सिद्धार्थत्वात् ।
अत्र प्राग्वंशप्रपादनविधानात्पावनान्तं प्राग्वंशाद्बहिरेवेति अर्थत एव सिद्धम् ।

ध्रुवाशेषादाकूत्यै प्रयुजेऽग्नये स्वाहेति
स्रुवेण चतस्रो दीक्षाहुतीर्जुहोति ।

प्रतिग्रहणं मन्त्रेण ध्रुवाप्यायनं प्राकृतम् । ऐष्टिकव्यतिरिक्ते समन्त्रमाप्यायनं नेति
केचित् । यमनियमपरिग्रहानुकूल्ययोग्यतारूपा दीक्षा तदर्था आहुतयो दीक्षाहुतयस्ता
दीक्षाहुतीर्भोवाद्दीक्षाहुतीर्यजमानसंस्कारार्थाः । तेन सत्रे प्रतियजमानमेता भवन्ति ।
यज्ञस्योद्यत्या इति श्रुतेर्यज्ञस्योद्यमनार्थाश्च । अतः सर्वतोमुखे प्रतिविहारमेता भवन्ति ।
एवमस्थियज्ञे यजमानाभावेऽपि च । एकैकेन मन्त्रेणैकैकाऽऽहुतिः । अग्नये स्वाहेत्यन्ता
मन्त्राः । एतेषु पठित एव स्वाहाकारः । तेनैव प्रदानं नान्यः स्वाहाकारः प्रयोज्यः ।
देवतापदाव्यवहितोत्तरस्वाहाकारस्यैव दानार्थत्वस्य निर्णीतत्वेन प्रकृते तथाभूतस्वाहा-
कारस्य सत्त्वेन तेनैव दानसिद्धेः । एकस्वाहाकारसत्त्वे द्वितीयस्वाहाकारप्रयोगो मान्त्रि-
काणामेव न वैदिकानाम् । वैदिकेषु कर्मसु वेदोक्तस्यैव प्रबलत्वात् ।

आपो देवीरिति स्रुचा पञ्चमीम् ।

जुहोतीत्यनुवर्तते । स्रुग्ग्रहणं स्रुवनिवृत्त्यर्थम् । जुहूभिन्नलौकिकस्रुक्प्राप्त्यर्थं वा ।
पञ्चमीमितिवचनमेतस्या अपि दीक्षाहुतित्वसाधनार्थम् । तेन ध्रुवाशेषादेव होमः सर्वतो-
मुखे प्रतिविहारमनुष्ठानं च सिध्यति । वृधातु स्वाहेत्यन्तो मन्त्रः ।

विश्वे देवस्य नेतुरिति षष्ठीं द्वादशगृहीतेन स्रुचं पूरयित्वा
बिलावकाशां वा कृत्वोत्तमस्रुवेऽभिपूरयत्युपोत्तमे वा ।

द्वादशगृहीतेन स्रुचं पूरयित्वा विश्वे देवस्य नेतुरिति षष्ठीमित्यन्वयः । जुहोतीत्यनु-
वर्तते । अत्रापि पठित एव स्वाहाकारस्तेनैव प्रदानं नान्यः स्वाहाकारः प्रयोज्यः ।
अत्र दशकृत्व आप्यायनम् । अन्तिमे ध्रौवसमाप्तिः । षष्ठीवचनप्रयोजनं पञ्चमीवत् ।
पुष्यसे स्वाहेत्यन्तो मन्त्रः । बिलेऽवकाशो यस्याः सा, एतादृशीं स्रुचं कृत्वा तया वा
जुहुयात् । अनेन न्यूनया जुहोतीति पक्षः प्रदर्शितो भवति । द्वादशगृहीतेन ध्रौवाज्ये-
नाभिपूरणं यदि न जायते तदा बिलावकाशां वा कृत्वेति पक्षः । पूर्णत्वपक्षनिर्वाहार्थ-
मुपायमाह—उत्तमस्रुव इत्यादि । उत्तमस्रुवेऽन्तिमस्रुवे गृहीते सति अभिपूरयत्याज्य-

१ ख. ग. ङ. 'वेणाभि' ।

स्थाल्याज्येन स्थाल्याः स्रुवेण वा । उपोत्तमेऽन्तिमपूर्ववर्तिनि स्रुवे गृहीते सति एकस्रुवग्रहणपर्याप्तमवकाशमवशेष्याभिपूर्यावशिष्टस्रुवपरिमितमाज्यं गृह्णीयादित्यर्थः । इष्टिशेषद्रव्यत्वात्समिदाधानपरिक्रमणे न स्त इति केचित् । एतस्या एवौद्ग्रहणसंज्ञा । तथाच श्रुतिः—प्रजापतिर्यज्ञमसृजत सोऽस्मात्सृष्टः पराङैत्स प्र यजुरव्लीनात्प्र साम तमृगुदयच्छद्यदृगुदयच्छत्तदौद्ग्रहणस्यौद्ग्रहणत्वमिति । अस्या अयमर्थः—पलायमानं यज्ञपुरुषं अर्हीतुं प्रजापतिना प्रेरितानां त्रिविधमन्त्राभिमानिपुरुषाणां मध्ये यजुरभिमानिनं पुरुषं सामाभिमानिनं पुरुषं च स यज्ञः प्रकर्षेणाव्लीनादावृणोत् । ऋगभिमानी पुरुषस्तं यज्ञमुदगृह्णात् । यद्यस्मादृगुदयच्छत्तत्तस्मादेतदौद्ग्रहणसंज्ञकं भवति एतदेवौद्ग्रहणस्यौद्ग्रहणत्वमिति ।

कृष्णाजिनस्य दक्षिणं पूर्वपादमन्तर्मा१ंसं परिषीव्यति ।

कृष्णो मृगस्तस्याजिनं चर्म कृष्णाजिनम् । कृष्णग्रहणं व्याघ्रादिनिवृत्त्यर्थं तेन व्याघ्राजिने परिषीवणं न भवति । व्याघ्राजिनस्य प्राप्तिरभिचारकर्मणीत्यत्र ज्ञापकमग्रे वक्ष्यते । सूत्रान्तरे दृष्टं चास्ति । दक्षिणं पूर्वपादमित्यनेनात्र साङ्गमजिनं गम्यते । अन्तर्मांसमन्तर्विशसनम् । परिषीव्यति सूच्या दर्भेणेन वा सूत्रेण ।

द्वे वा विषूची मा१ंससं१ंहिते करोति ।

द्वे कृष्णाजिने विषूची विपर्यस्तशिरःपुच्छे मांससंहते मांसप्रदेशे संहते परस्परं सूच्या दर्भेणेन वा सूत्रेण परिषूते करोत्यवियोगायेत्यर्थः ।

इन्द्रशाकर गायत्रीं प्रपद्ये तां ते युनज्मीन्द्रशाकर त्रिष्टुभं प्रपद्ये तां ते युनज्मीन्द्रशाकर जगतीं प्रपद्ये तां ते युनज्मीन्द्रशाकरानुष्टुभं प्रपद्ये तां ते युनज्मीन्द्रशाकर पङ्क्तिं प्रपद्ये तां ते युनज्मीत्यन्तर्वेदि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृणाति ।

अन्तर्वेदि कृष्णाजिनमास्तृणातीत्यत्र पुनः कृष्णाजिनग्रहणाद्यत्राभिचारादौ वैयाघ्रादिभिर्दीक्षा यदा वा कृष्णाजिनप्रतिनिधिस्तस्य नान्तर्वेदिस्तरणं किंतु यजमानायतन एवेति द्रष्टव्यम् । अन्तर्वेदि वेदेर्मध्ये, उत्तरलोमोपरिष्टाल्लोम । अनेन लोमसत्त्वस्याऽऽवश्यकत्वं गम्यते । पञ्चैते मन्त्रा विभागमन्त्रवद्विकल्पार्था इत्येके । इन्द्रशाकरशब्दाभिधेयस्य कृष्णाजिनस्य गायत्र्यादिच्छन्दोविशेषयोगसंकीर्तनात्रानार्थत्वात्समुच्चय इत्यपरे । कृत्स्नपाठादिदमेव युक्तम् ।

---

१ क. ख. ग. °सम्हते ।

तदारूढे यजमाने पत्न्याः शिरसि जालं प्रतिमुञ्चति ।

तस्मिन्नारूढे तदारूढे तस्मिन्कृष्णाजिन आरूढे कृतारोहणे यजमाने सतीत्यर्थः। प्रतिमुञ्चति प्रक्षिपति।.आऽहं दीक्षामिति जपस्याऽऽरोहणाङ्गताया वक्ष्यमाणत्वेनैतज्जपानन्तरमेव जालप्रतिमोचनादि । यजमानग्रहणं पत्नीव्यावृत्त्यर्थम् । अनेन कृष्णाजिनं यजमानस्यैव न पत्न्या इति सिद्धं भवति । आरोहणमपि तस्यैव । पत्नीग्रहणं यजमानव्यावृत्त्यर्थम् । तेन जालप्रतिमोचनं पत्नीशिरस्येव न यजमानशिरसीति सिध्यति । जालं पट्टसूत्रैर्विरलैर्निर्मितम् । भाषया जाली, इत्युच्यते । जीवतो मेषस्योर्णाभिरिति सूत्रान्तरे । अभावे दर्भमयमित्यपि शास्त्रान्तरे । तच्च वैदलैर्वलये बद्धम् । यथाऽऽह बौधायनः—विरलं कुम्बं भवति जालं कुरीरमिति ।

तामहतेन क्षौमेण वाससोर्ध्ववास्येन दीक्षयति ।

तां पत्नीम् ।

ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ।
अहतं तद्विजानीयात्सर्वकर्मसु पावनम् ॥

इति लक्षणलक्षितेनाहतेन । बौधायनेन प्रक्षालितान्यक्लिष्टानि सदशान्यनुपयुक्तान्यहतानि वासांसीति धर्मसूत्रे श्वेतत्वस्याहतलक्षणेऽनुपादानान्नाऽऽवश्यकता । तेन रक्तपीतादिकमपि वस्त्रमहतं भवति । नीलस्य स्मृतौ सर्वथा निषेधान्नैव तस्य कुत्रापि ग्रहणम् । क्लिष्टानि पुराणानि तद्भिन्नानि अक्लिष्टानि नूतनानीत्यर्थः । क्षौमेण क्षुमाऽतसी तत्त्वचा निर्मितेन वाससा । अर्थात्प्रावरणपर्याप्तेन । अनेन कार्पासादि व्यावर्त्यते। सर्वथैतदलाभे तदपि । ऊर्ध्ववास्यं प्राचीनाभिर्दशाभिर्वसनीयमूर्ध्वाभिर्दशाभिर्वसनीयमिति यावत् । तथाचाऽऽपस्तम्बः—प्राचीनमात्रा वाससा पत्नीं दीक्षयत्यूर्ध्ववास्यं भुवत इति । अत्र मात्राशब्दो दशारूपावयववाची । प्राचीनमात्रा प्राचीनमात्रेणेत्यर्थः। अथवोर्ध्ववास्यमुत्तरीयम् । एतच्च पत्न्यायतन एव कृतत्वात् । दीक्षापदार्थविषये केचिद्यावदुक्तं पत्न्या दीक्षितव्यञ्जनानीत्यापस्तम्बसूत्रानुरोधेन तामहतेन क्षौमेण वाससोर्ध्ववास्येन दीक्षयतीति सूत्रादेतस्मादन्येषां दीक्षासंबन्धिपदार्थानां पत्न्यां निवृत्तिं कल्पयन्ति तदन्याय्यम् । तस्यैष एव संचर आ सुत्याया इति याजमानसूत्रे तच्छब्देनदीक्षासंबन्धिपदार्थानां पत्न्यामपि प्रवृत्तेर्ज्ञापयिष्यमाणत्वात्, न्यायविरोधात्, बौधायनेन स्पष्टोक्तेश्च । जालमुभयतःपाशं पत्न्याः शिरस्यामुच्येति मानवसूत्रे ।

शरमुञ्जानां मेखला त्रिवृद्वेणी कार्या ।

शरा मुञ्जा एवेति शरमुञ्जाः । या मुञ्जैर्मेखला कृता सा शरैरेव कृता भवति । शरमुञ्जानामित्यत्र शरग्रहणं शरभावना मुञ्जेषु कर्तव्येति । अथवा शरा इव मुञ्जाः शरमुञ्जा इति समासः । ऊर्वै मुञ्जा इतिश्रुत्यन्तरानुरोधेन शरमयी मेखला भवतीति

श्रुतावूर्जमेवावरुन्ध इत्यूर्ग्वृद्धिफलबलाच्छरशब्देन मुञ्जा एव ग्राह्या इति भावः । शराश्च मुञ्जाश्चेतेषां समाहारः शरमुञ्जाः । दधिपयआदित्वाच्छान्दसत्वाद्वैकवद्भावाभाव इति केचित् । शरमुञ्जयोर्विकल्पः । मौञ्ज्या मेखलाया अन्यत्र दर्शनाच्छराभाव एषा भवतीत्यर्थः । समुच्चयो वा । अत्रापि शरमयत्वस्याबाधादित्यन्ये । विकल्पपक्षे शरमयी मेखला भवतीति विकारार्थे मयट् । समुच्चयपक्षे प्राचुर्यार्थे मयट् । एतत्पक्षद्वयमप्ययुक्तं शरमयं बर्हिः शृणात्येवैनमिति शरमयत्वस्य शत्रुविशरणफलकत्वेनाऽऽभिचारिककर्मण्येव प्रवृत्त्या तद्व्यतिरिक्तकर्मणि शत्रुविशरणफलकस्य शरमयत्वस्य प्रवृत्तेरनुचितत्वात् । तस्माच्छरशब्देन मुञ्जा एव ग्राह्या नतु शराख्यतृणानीति ज्ञेयम् । त्रिवृच्च वेणी च त्रिवृद्वेणी त्रिवृत्त्रिगुणा वेणी वेण्याकारा । एतादृशी मौञ्जी मेखला कार्येत्यर्थः । त्रिवृत्, वेणी यस्याः सेति बहुव्रीहिर्वा । इयं विस्तीर्णा च कार्या । पृथ्वी भवतीति श्रुतेः । अथवा त्रिवृद्वेणीका, आर्या, इति पदच्छेदः । त्रिवृद्वेणीकेति स्वार्थे कप्रत्ययः । आर्यशब्दः श्रेष्ठ्यवाची । श्रेष्ठ्यमत्र विस्तीर्णत्वरूपम् । तथाच पृथ्वी भवतीति सूत्रादेव श्रुत्यर्थः सिद्धो भवति । आर्येत्यनन्तरं भवतीति शेषः । एवं च रज्जुसदृशी मेखलेति अवगतं भवति । योक्त्रं तु जटासदृशम् ।

ऊर्गसीति तया यजमानं नाभिदेशे त्रिः प्रदक्षिणं परिव्ययति द्विरित्येके पूषा ते ग्रन्थिं ग्रथ्नात्वित्युत्तरतो नाभेर्निष्ठर्वं ग्रन्थिं कृत्वा स ते मा स्थादिति दक्षिणतो नाभेः परिकर्षति यं द्विष्यात्तं ध्यायेत्।

ननूर्गसीति त्रिवृद्वेण्या शरमुञ्जानां मेखलया यजमानं नाभिदेशे त्रिः प्रदक्षिणं परिव्ययतीत्येतावतैव सिद्धे शरमुञ्जानां मेखला त्रिवृद्वेणी कार्येति भिन्नं सूत्रं कृत्वोत्तरत्र तच्छब्देन परामर्शो व्यर्थ इति चेन्न । तच्छब्दस्य मेखलायाः पूर्वमेवोपकल्पनं कर्तव्यमित्येतादृशार्थज्ञापनार्थत्वेन वैयर्थ्याभावात् । तया, उपकल्पितया । यजमानग्रहणं पत्नीव्यावृत्त्यर्थम् । नाभिदेशे नाभिमध्ये । नाभाविरत्युच्यमाने सप्तम्याः सामीप्यार्थकत्वशङ्का स्यात्सा मा भूत्किंतु तस्या अधिकरणार्थकत्वमादाय नाभिमध्य एव यथा स्यादित्येतदर्थं देशपदप्रयोगो वाससाऽन्तरितत्वेऽपि नाभिमनुलक्षीकृत्य यो देशस्तस्मिन्परिव्ययणमित्यपि बोधयति । एतेनोर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चैवास्यामेध्यं च व्यावर्तयतीति श्रुतिर्व्याख्याता भवति । नाभ्यै नाभ्याः । पुरुषस्येति स्त्र्युपलक्षणम् । तेन योक्त्रेणापि नाभ्या मध्य एव संनहनम् । परिभाषया सकृन्मन्त्रेण द्विस्तूष्णीम् । अत्र प्रदक्षिणशब्दः प्रादक्षिण्यवाची न भवति तस्य प्रदक्षिणं यज्ञे कर्माणि करोतीति परिभाषयैव सिद्धेः किंत्वानुकूल्यवाची ।

चन्द्रसेने महीपाले राज्ञि राज्यं प्रशासति।
ववौ प्रदक्षिणो वायुः प्रजा आसन्प्रदक्षिणाः॥
आसन्सदाऽपि सामन्ता यस्य सर्वे प्रदक्षिणाः।

इत्यत्र प्रदक्षिणशब्दस्याऽऽनुकूल्यार्थकत्वदर्शनात्। तेन दृढं शिथिलं वा यजमानानुकूल्येन परिव्ययणमिति सिद्धं भवति। मा मा हिꣳसीरित्यन्तः प्रथमो मन्त्रः। निष्टक्र्यं शिखाबन्धनवत्। दक्षिणतो नाभेः परिकर्षति उत्तरप्रदेशादानीय नाभेर्दक्षिणतो ग्रन्थि निदधाति यथा नान्यदेशं गच्छतीत्यर्थः। मेखलया परिव्ययणे क्रियमाणे यजमानो यं पुरुषं द्विष्यात्तं ध्यायेत्। यजमानद्वेष्यं ध्यायेदिति स्पष्टोऽर्थः। ध्यानेन द्वेष्यस्यानिष्टं भवति। परिकर्षणसमये वा द्वेष्यस्य ध्यानम्। द्वेष्यः शत्रुः पाप्मा च। ग्रन्थिकरणपरिकर्षणे दर्शपूर्णमासवदित्येतावतैव सिद्धे उभयोः क्रिययोः पुनर्विधानं व्यर्थं सञ्ज्ञापयति शाखान्तरेऽत्रापि मन्त्रयोस्तयोः क्रिययोश्च पाठ एवा-स्तीति। फलं तु ज्ञानावश्यकतासिद्धिः। ज्ञानाभावे यजुर्भ्रेषप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ।

सं त्वा नह्यामीति पत्नीꣳ संनह्यति यथा दर्शपूर्णमासयोः।

आशासानेति मन्त्रं बाधित्वा सं त्वा नह्यामीति तस्य स्थाने मन्त्रोऽयं विधीयते। वाजमस्मे इत्यन्तो मन्त्रः। पत्नीग्रहणं यजमानव्यावृत्त्यर्थम्। अध्वर्युकर्तृकमेव संन-हनम्। त्वेति लिङ्गात्। संनह्यति बध्नाति। यथा दर्शपूर्णमासयोरित्यनेन संनहनकर-णत्वेन योक्त्रस्योर्ध्वज्ञुरासीना तिष्ठन्ती वेत्यस्य पूषा त इति ग्रन्थिकरणस्य स ते मा स्थादिति परिकर्षणस्य च प्राप्तिः। सोमार्थं योक्त्रमावभृथाद्धार्यम्। तस्य प्रसङ्गोऽग्रे वक्ष्यते।

इन्द्रस्य योनिरसीति त्रिवलिं पञ्चवलिं वा कृष्ण-विषाणां यजमानाय प्रयच्छत्याबध्नाति वा।

तिस्रो वलयो यस्याः सा त्रिवलिः। पञ्च वलयो यस्याः सा पञ्चवलिः। वलयः कृष्णवृषाणागता उच्चप्रदेशाः। कृष्णविषाणा कृष्णमृगशृङ्गम्। सकलैवैषा स्यादित्यौ-पमन्यव इति द्वैधसूत्रात्कृत्स्नैव मुख्या। तदभावे छिन्ना। पञ्चवलितोऽधिकवलिकाया लाभे पञ्चवलितोऽधिकां वलिं छित्त्वैव ग्राह्या। तस्या एव ग्राह्यत्वोक्तेः। तत्राप्यग्रभाग एव ग्राह्यः। तस्यैव कण्डूत्यपनयनसाधनत्वात्। यजमानग्रहणं पत्नीव्यावृत्त्यर्थम्। प्रयच्छति बध्नाति वा। दानपक्षे हस्ते दानम्। आङ्ग्रहणं बन्धने विशेषं द्योतयति। तं चाऽऽह कात्यायनः—वसनस्य दशायां बध्नीतेति। बौधायनः—वसनस्यान्ति-मायां दशायां बद्ध्वा तयाऽन्तर्वेदि लोष्टमुद्धन्तीति। कृष्णविषाणायां विशेषमाहाऽऽ-पस्तम्बः—त्रिवलिः पञ्चवलिर्वा दक्षिणावृद्भवति सव्यावृदित्येक इति। भरद्वाजोऽपि—

अथास्मै त्रिवलिं पञ्चवलिं वा कृष्णविषाणां प्रदक्षिणावर्तां प्रयच्छतीति । शाण्या रज्ज्वा परितृण्णेति बौधायनः । मा मा हिꣳसीरित्यन्तो मन्त्रः । कृष्यै त्वा सुसस्याया इति याजमानसूत्रे दीक्षामन्त्रसंदर्भपठितोत्तरमन्त्रादिदर्शनबलात् । इदं च कृष्णविषाणाप्रदानं यजमानस्य शिरसो वेष्टनोत्तरमेव । याजमानसूत्रे प्रत्तया कृष्णविषाणयेत्युक्त्या कृष्णविषाणाप्रदानकृष्णविषाणाकरणकलोष्टोद्धननादिरूपकर्मणोः कार्यकारणभावापन्नयोरव्यवधानस्य सूत्रकृता दर्शयिष्यमाणत्वात् । पत्न्यै कण्डूयनार्थं शङ्कुर्देयः । बौधायनेनोक्तत्वात् । तत्र शङ्कुस्वरूपं कात्यायन आह—पृथुमुखो यज्ञियवृक्षशङ्कुरिति ।

पत्न्याः शिरसि जालं यथा सुष्ठु कल्पयति ॥ २ ॥

पत्न्याः शिरसि यज्जालं प्रतिमुक्तं तदत्र यथा सुष्ठु यथा दृढं भवति तथा कल्पयति । यथा पत्न्याः शिरसो न पतति तथा गुल्फयति दार्ढ्येन तस्याः शिरसि विद्लेन सह योजयतीत्यर्थः । एतेन पूर्वत्र प्रतिमोचनमात्रं कर्तव्यमिति सिद्धं भवति ।

औदुम्बरो दीक्षितदण्डो यो वा कश्चन वृक्षः फलग्रहिस्तस्य ।

औदुम्बर उदुम्बरवृक्षजो दीक्षितस्य दण्डः । यो वा कश्चन वृक्षः फलग्रहिः । यज्ञिय इत्यापस्तम्बोक्तेर्यज्ञियवृक्षलाभे स एव मुख्यः । तदलाभे यज्ञियव्यतिरिक्तोऽपि । आचार्येण सामान्यतो यो वा कश्चनेत्युक्तेः । फलं गृह्णाति न वन्ध्यो बालो वा । अथवा य उदुम्बरादिवत्फलमेव गृह्णाति न पुष्पमपीत्यर्थः । तस्य फलग्रहेर्वृक्षस्य ।

तत्प्रमाणमाह—

मुष्टिमात्रो मुखेन संमितश्चुबुकदघ्नो वा ।

दीक्षितदण्ड इत्यनुषज्यते । मुष्टिमात्रो मुष्टिप्रमाणः । प्रमाणे द्वयसज्दघ्नञ्मात्रच इत्यनेन मात्रच्प्रत्ययः । अनेन दीक्षितदण्डस्य परिणाह उच्यते । मुखेन संमित ऊर्ध्वोष्ठपर्यन्तं मुखं तेन संमितस्तत्प्रमाणः । मुखदघ्न इति परित्यज्य मुखेन संमित इत्येतादृशं वचनं श्रुत्यनुकरणाय । चुबुकं हनुस्तत्प्रमाणश्चुबुकदघ्नः । प्रमाणे द्वयसज्दघ्नञिति दघ्नच्प्रत्ययः । एकपदार्थविषयकतिर्यगूर्ध्वप्रमाणयोर्युगपदुपस्थितौ तिर्यक्प्रमाणे मात्रच्, ऊर्ध्वप्रमाणे दघ्नजित्याचार्यस्य प्रायशः शैली ।

ऊर्ध्वसूरसि वानस्पत्यः सुयुम्नो युम्नं यजमा-
नाय धेहीति तं यजमानाय प्रदाय संभारय-
जूꣳषि वाचयति जुहोति चैतैर्मन्त्रैः ।

तं दण्डम् । तच्छब्दः पूर्वमेवोपकल्पनं दण्डस्य सूचयति । यजमानग्रहणं पत्नीव्यावृत्त्यर्थम् । न च मन्त्रगतं यजमानपदं पत्नीव्यावर्तकं भवितुमर्हति । तत्र समन्त्रकत्वपक्षेऽपि यजमानायै धेहीत्यूहेन यजमानपदलोपेन वा पत्न्या अपि दण्डदानप्रवृत्ति-

संभवात् । अतस्तद्व्यावर्तनाय यजमानग्रहणमावश्यकमेव । न च याजमानसूत्रे पठितस्य दण्डप्रतिग्रहस्य यजमानकर्तृकत्वावगतौ दण्डप्रदानस्यापि यजमानसंप्रदानकत्वावगतेः किमर्थं यजमानग्रहणमिति वाच्यम् । तत्र विहितानां दीक्षासंस्काराणां यजमानसंबन्धिनां स्नानादीनां ज्ञापकबलेन पत्न्यां प्राप्तिर्यथा तथा दण्डप्रतिग्रहस्यापि ज्ञापकबलात्प्राप्तौ तन्निवृत्त्यर्थं यजमानग्रहणस्याऽऽवश्यकत्वात्, ज्ञापकस्य सजातीयापेक्षत्वात् । अस्ति च दण्डप्रतिग्रहस्य संस्कारत्वेन सजातीयत्वम् । न च दण्डस्यैकत्वश्रवणादेव यजमानस्यैव दण्डप्रतिग्रहणं भविष्यति दानं चापि यजमानायैव न तु पत्न्या इति वाच्यम् । एकवचनस्य जात्यभिप्रायपरत्वकल्पनेन दण्डद्वयस्य प्राप्तौ पत्न्या अपि दण्डप्रदानसंभावनायां यजमानग्रहणस्य तन्निवृत्त्यर्थमत्यन्तावश्यकत्वात् । प्रदायेति ल्यप्, दण्डप्रदानसंभारयजुर्वाचनाव्यवधानार्थः । न च दण्डप्रदानसंभारयजुर्वाचनयोर्मध्ये यजमानकर्तृकप्रतिग्रहेण व्यवधानात्कथमेतदिति वाच्यम् । दण्डप्रदानप्रतिग्रहयोः समकालत्वेन व्यवधानस्यैवासंभवात् । समकालत्वोपपादनं तु सूपस्था देवो वनस्पतिरूर्ध्वो मा पाह्यो दृच इति दण्डं प्रतिगृह्णातीति याजमानसूत्रे करिष्यामः । एवं च दण्डप्रदानसंभारयजुर्वाचनयोरव्यवहितानन्तर्यं सूपपादं भवति । तेन संभारयजुर्होमोत्तरमेव केशिनीदीक्षादि वाग्यमनान्तं भवति । संभारयजूंषि पूर्वमेव प्रदर्शितानि तानि वाचयति । उत्तरत्रानुवृत्त्यर्थं च । तेन संभारयजुर्वाचनस्य पत्न्यां निवृत्तिः सिध्यति । दानवाचनान्वारम्भवरवरणव्रतप्रमाणेषु यजमानं प्रतीयादिति कात्यायनोक्तपरिभाषासूत्रमप्यत्र प्रमाणम् । ननु जुहोति चेत्येतावदेव वक्तव्यं प्रतिमन्त्रं होमस्तु यत्र मन्त्रगणेन कर्म चोदयेत्प्रतिमन्त्रं तत्र जुहुयादिति परिभाषयैव सिध्यति किमर्थमेतैर्मन्त्रैरिति वचनमिति चेत्सत्यम् । तस्य पूर्वं पूर्वमनुद्रुत्योत्तरेणोत्तरेण संभारयजुषा जुहोति व्याहृतिभिश्चेतिवासिष्ठमतनिरासार्थत्वात् । एतैरिति व्याहृतिनिरासार्थम् । मन्त्रैरिति वचनं नियमार्थं केवलमन्त्रैरेव होमो नतूद्द्रवणविशिष्टमन्त्रैरिति । जुहोति चेत्ययं चकारो वाचनसमुच्चयार्थः । जुहोतिचोदितत्वादेतेषु स्वाहाकारः । अत्राऽऽज्यमाज्यस्थालीगतमेव । तदभावे गृह्योक्तप्रकारेणाऽऽज्यं संस्कृत्य तेन होमः । अत्र पूर्ववद्वाग्दत्तेतिवचनाभावाद्वाचनहोमयोः सर्वेषां संभारयजुषां विनियोगः । अत्र पृथिवीदीक्षा तयाऽग्निर्दीक्षया दीक्षित इत्यारभ्य तास्त्वा दीक्षमाणमनु दीक्षन्तामित्यन्त आच्छिद्रिको मन्त्रो दीक्षालिङ्गकत्वाद्युष्मच्छब्दलिङ्गकत्वाच्चाध्वर्युणा प्रयोक्तव्यः केशिनीदीक्षाजपात्पूर्वमेव । यथारूपमितर इत्यनेन सूत्रकृताऽपि विनियोग उक्तोऽस्ति परं तु स्पष्टतयाऽनुक्तत्वात्कृताकृतः ।

---

१ ख, ग. °रस्य स° ।

तं वाग्यतमदीक्षिष्टायं ब्राह्मणोऽसावामुष्यायणोऽमुष्य पुत्रोऽमुष्य पौत्रोऽमुष्य नप्ताऽमुष्याः पुत्रोऽमुष्याः पौत्रोऽमुष्या नप्तेति त्रिरुपांश्वावेदयति त्रिरुच्चैः ।

तं वाग्यतमित्यनेन केशिनीदीक्षाजपादि वाग्यमनान्तं संभारयजुर्होमानन्तरं कर्तव्यमिति गम्यते । वाग्यतमित्येतावतैव क्रमे लब्धे तच्छब्देन परामर्शो नियमार्थः । तथाच वाग्यमनं तस्यैव नतु पत्न्या अपीति वाग्यमनाभावादेवाऽऽवेदनाभावः । पत्न्यावेदनं सूत्रान्तरेष्वपि नैव दृश्यते । केशिनीदीक्षाजपमुष्टिकरणाङ्गुल्युत्सर्गा अपि पत्न्या न भवन्ति । वाग्यमनस्य केशिनीदीक्षाजपादीनां च परस्परसंबन्धेनैकस्य निवृत्तावपरनिवृत्तेरर्थसिद्धत्वात् । परस्परसंबन्धित्वं तु ताभिर्यथासुखं चरति वाचं च यच्छतीतिवक्ष्यमाणयाजमानसूत्रस्थचकाराल्लिङ्गात् । वाग्यतमित्यस्याऽऽवेदयतीत्यत्रान्वयः । आवेदनं कथनम् । त्रिरुपांश्वावेदयतीत्यत्र देवेभ्य इति शेषः । त्रिरुच्चैरित्यत्राऽऽवेदयतीत्यनुषज्यते । अत्र देवेभ्यो मनुष्येभ्यश्चेति शेषः । तथाच श्रुतिः—अदीक्षिष्टायं ब्राह्मण इति त्रिरुपांश्वाह देवेभ्य एवैनं प्राह त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राहेति । देवमनुष्येभ्य इत्यत्र देवाश्च मनुष्याश्चेति द्वंद्व उभयेभ्य इत्युक्तेः । उपांशुलक्षणं प्रातिशाख्ये—करणवदशब्दममनःप्रयोग उपांश्विति । द्विपितुरार्षेयन्यायेन वंशद्वयकीर्तनम् । तथा मात्रादिसपत्नीनामित्येके ।

असाविति नाम गृह्णात्यामुष्यायण इति पितुर्नामधेयेन ।

असाविति प्रथमान्तं व्यावहारिकं नाम यजमानस्य गृह्णाति यथाऽमुक इति तच्च शर्मान्तम् । शर्मान्तं ब्राह्मणस्येति बौधायनोक्तेः शर्मान्तं ब्राह्मणस्य येन व्यवह्रियत इतिवासिष्ठसूत्राच्च । येन व्यवह्रियत इति नाक्षत्रादिनाम्नां शर्मान्तताया व्यावृत्त्यर्थम् । तच्चात्र व्यावहारिकं गुप्तं न भवति किंतु प्रसिद्धव्यवहारार्थं यत्कृतं तज्ज्ञेयम् । एवं पित्रादीनामपि नामानि शर्मान्तानि । स्त्रीणां तु दान्तानि । दान्तं नाम स्त्रीणामिति स्मृतेः । स्मृत्यन्तरे तु देवीशब्दान्तं नाम स्त्रीणामित्युक्तम् । अनयोर्विकल्पः । केचित्तु समुच्चयमाहुः । एतच्च सार्वत्रिकं ज्ञेयम् । यत्र यत्रासौशब्दस्तत्र प्रथमान्तस्य व्यावहारिकनाम्नो ग्रहणमिति । आमुष्यायण इति पितुर्यद्गोत्रप्रयुक्तं नामधेयं तत्परम् । तेन नामधेयेनाऽऽवेदयति तं दीक्षितं वाग्यतं प्रथमान्तेन व्यावहारिकेण नाम्ना गोत्रप्रयुक्तेन तादृशेन नाम्ना चाऽऽवेदयतीत्यर्थः । यथाऽदीक्षिष्टायं ब्राह्मणो गोपीनाथशर्मा वासिष्ठो गणेशशर्मणः पुत्रः केशवशर्मणः पौत्रः कृष्णशर्मणो नप्ता यमुनादायाः पुत्रो लक्ष्मीदायाः पौत्रो रुक्मिणीदाया नप्तेति । देवीशब्दान्तत्वपक्षे यमुनादेव्याः पुत्रो लक्ष्मी-

---

१ ख. ग. °काराल्लिङ्गा° ।

देव्याः पौत्रो रुक्मिणीदेव्या नप्तेत्येवं प्रयोगः । पितुर्यद्गोत्रप्रयुक्तं नामधेयं तेन नामधेयेन नाम्नेत्यर्थः । भागरूपनामभ्यो धेय इति स्वार्थे धेयप्रत्ययः । असाविति नाम गृह्णाति आमुष्यायणं इति गोत्रमिति मानवसूत्रे । यत्र यत्राऽऽमुष्यायणशब्दस्तत्र तद्गोत्रनाम ग्राह्यमित्येतत्सार्वत्रिकं ज्ञेयम् । पित्रादीनां नामाज्ञाने देवतानामभिरन्यैर्यैः कैश्चिद्व्यवहारः । एवं मात्रादीनां नामाज्ञानेऽपि नामाज्ञाने देवतानां नामभिः परिकीर्तयेदिति श्राद्धादिषु स्मृतिदर्शनात् । अन्यैर्देवतानामभिरित्यर्थः । गोत्राज्ञाने काश्यपगोत्रम् ।

गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते । इति स्मृतेः ।

सर्वाः काश्यप्यः प्रजा इति श्रुतेश्च ।

यः कश्चिद्दीक्षते ब्राह्मण इत्येवाऽऽवेदयेत् ।

यः कश्चिद्राजन्यो वैश्यो वा दीक्षते दीक्षां गृह्णाति तं ब्राह्मण इत्येवाऽऽवेदयति—अदीक्षिष्टायं ब्राह्मण इत्यत्र ब्राह्मणशब्द ऊहो न कार्य इत्यर्थः । यथावर्णमावेदयेदिति । बौधायनमतनिरसनार्थ एवकारः । अत्र हेतुमाहाऽऽपस्तम्बः—ब्रह्मणो वा एष जायते यो दीक्षते तस्माद्राजन्यवैश्यावपि ब्राह्मण इत्येवाऽऽवेदयतीति । यतो ब्रह्मणो वेदाद्वै, एवैष दीक्षितः पुनर्जायते, एष क इत्याशङ्कायां यो दीक्षत इति,

यथाऽऽह मनुः—मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धने ।

तृतीयं यज्ञदीक्षायामिति ।

तस्माद्राजन्यवैश्यावपि ब्राह्मण इत्येवाऽऽवेदयति नतूह इति । कात्यायनोऽपि—ब्राह्मण इत्येव वैश्यराजन्ययोरपि श्रुतेरिति । अत्र यद्यपि ब्राह्मणशब्देनैवाऽऽवेदनं तथाऽपि शर्मान्तता नैव किंतु वर्मान्तत्वगुप्तान्तत्वे एव क्षत्रियवैश्ययोर्यथाक्रमम् । शर्मान्तताविषये जातिवाचिब्राह्मणशब्दस्यैव ग्रहणात् । एतदन्तमपराह्ण एव भवति । अपराह्णे दीक्षित इति वक्ष्यमाणसूत्रात् । कृष्णाजिनदीक्षामात्रमन्तर्वेदि मेखलाप्रदानादिकमन्तर्वेद्यन्यत्र वेति केचित् । कृष्णाजिनदीक्षाद्यावेदनान्तमन्तर्वेद्येवेत्यन्ये । आस्तरणमात्रस्यान्तर्वेदिविधानात्तावदेवान्तर्वेदिनियतमिति पूर्वमताशयः । अपराह्णे दीक्षत इति कृष्णाजिनदीक्षाद्यावेदनान्तस्य समानकालत्वदर्शनाद्देशान्तराविधानाच्च देशोऽपि समान एवेत्युत्तरमताशयः । ज्ञापकसिद्धा दीक्षार्थाः पत्नीसंस्काराः समन्त्राः । अस्मिन्पक्षे पुतैमीत्यूहः । तूष्णीं वा । तूष्णीकं सर्वमिति बौधायनः । प्रवर्ग्यसंभरणं पूर्वत्राकृतं चेदत्र कुर्यात् । यजमानस्य दीक्षितत्वान्न होमः किंतु जप एव ।

---

१ ख. ग. °णमिति । २ ख. ग. °ष्णीकमि° ।

देवाञ्जनमगन्यज्ञस्ततो मा यज्ञस्याऽऽशीरागच्छतु गन्धर्वा-ञ्जनमगन्यज्ञस्ततो मा यज्ञस्याऽऽशीरागच्छतु पितॄञ्जन-मगन्यज्ञस्ततो मा यज्ञस्याऽऽशीरागच्छत्वप ओषधीर्वनस्प-तीञ्जनमगन्यज्ञस्ततो मा यज्ञस्याऽऽशीरागच्छतु पञ्चजना-ञ्जनमगन्यज्ञस्ततो मा यज्ञस्याऽऽशीरागच्छतु वर्धतां भूतिर्दध्ना घृतेन मुञ्चतु यज्ञो यज्ञपतिमꣳहसो भूपतये स्वाहेत्यभिमन्त्रयते यद्यन्यत्र कृष्णाजिनादासीत नित्यवृत्तावत ऊर्ध्वम् ।

पञ्चैते मन्त्रा एतेषामन्यतमेनाभिमन्त्रणम् । अवशिष्टा विकल्पार्थाः । समुच्चयो वा कृष्णाजिनास्तरणमन्त्रवत् । विकल्पपक्षे वर्धतां भूतिरित्यादि सर्वेष्वनुषञ्जनीयम् । समुच्चयपक्षे न । अप ओषधीर्वनस्पतीनित्येक एव मन्त्रः, नतु सानुषङ्गास्त्रयो मन्त्राः । अन्यथा देवाञ्जनमगन्यज्ञ इत्येकत्रैव पाठेन गन्धर्वानित्यादिष्वनुषङ्गः सिध्यत्येव पुनर्गन्धर्वान्पितॄन्पञ्चजनानित्येतेषु पाठो व्यर्थः स्यात् । अतो देवानित्येतन्मन्त्रव्यतिरि-क्तेषु गन्धर्वान्पितॄन्पञ्चजनानित्येतेषु पाठोऽवादिषु त्रिषु प्रत्येकमनुषङ्गव्यावृत्त्यर्थ एवेति द्रष्टव्यम् । अध्वर्युकर्तृकमिदं यजमानाभिमन्त्रणम् । न च मन्त्रलिङ्गविरोधाद्यजमानक-र्तृकमेव स्वसंस्कारार्थमात्मार्थप्रैषवदिति वाच्यम् । मन्त्रलिङ्गविरोधस्यैवाभावात् । तथाहि देवान्देवान्प्रति अगन्यज्ञस्ततस्तेभ्य इति ततः । जनशब्देन यजमान एव गृह्यते । देवसकाशाद्यजमानं प्रति आगच्छतु । आगतस्य यज्ञस्याऽऽशीः, आ ईषदपि यजमानादन्यत्र मा गच्छत्वित्यर्थः । निष्फलो यज्ञो मा भवत्विति तात्पर्यार्थः । अथवा देवान्प्रति अगन्यज्ञस्ततो मां स आगच्छतु मत्प्रवर्तितो यज्ञो मां प्रति देवेभ्य आगच्छतु । यज्ञसंबन्धिन्याशीर्जनं यजमानं प्रत्यागच्छतु इत्यर्थः । एवमितरेषामपि । देवादिभ्यः सकाशान्मां प्रत्यागतेन यज्ञेन मे भूतिरैश्वर्यं वर्धतां स च यज्ञो दध्ना घृतेन च वर्धतां दध्ना घृतेन च प्रवर्धितो यज्ञो यज्ञपतिं यजमानमंहसः पापान्मुञ्चतु । भूपतये भूपतिनामकाय देवाय स्वाहा सुष्ठु एतत्सर्वं कथयामीत्यर्थः । स्वाहेत्येतत्सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वेति निरुक्तकृता स्वाहाशब्दस्य चत्वारोऽर्थाः कृताः । निपातानामनेकार्थत्वादित्येतदाशयः । तत्र प्रथ-मार्थानुसारेण सुष्ठु एतत्सर्वं कथयामीत्यर्थो वर्णितः । एतेन यजमानाभिमन्त्रणस्याध्वर्यु-कर्तृकता मन्त्रलिङ्गविरोधात्कथमिति शङ्का निरस्ता । अभिमन्त्रयते यजमानमित्येव शेषो मन्त्रलिङ्गान्नतु कृष्णाजिनमिति । यद्यन्यत्र कृष्णाजिनादासीत तदा देवाञ्जनम-गन्नित्यभिमन्त्रयत इत्यन्वयः । यदीत्यनेनाभिमन्त्रणस्य नैमित्तिकत्वं प्रदर्शितं भवति । कृष्णाजिनादन्यत्राऽऽसीत कृष्णाजिनं परित्यज्याऽऽसीत । आसनं शयनोपलक्षणम् । नान्यत्र कृष्णाजिनादास्ते शेते वेति सूत्रात् । अत्र मानवसूत्रे विशेषः—लोमतः

कृष्णाजिनस्य शय्याऽऽसनमाच्छादनं च प्रतिषिद्धमिति । लोमतो लोमवति प्रदेश इत्यर्थः । नित्यवृत्तिर्याजमानसूत्रे स्पष्टी भविष्यति दीक्षणीयाप्रभृतीयं वृत्तिरित्यादिना । अत ऊर्ध्वमितिवचनमावेदनोत्तरमेव कृष्णाजिनव्यवच्छेदनिमित्तकमभिमन्त्रणं न पूर्वमिति गमयति । पूर्वत्र व्यवच्छेदेऽनाज्ञातत्रयजप एवेति । नित्यवृत्ताविति वचनं समाप्तायामप्यवान्तरदीक्षायामेतदाऽवभृथादनुवर्तत एवेत्येतदर्थम् ।

अग्नीञ्ज्योतिष्मतः कुरुत दीक्षित वाचं यच्छ पत्नि वाचं यच्छेति पुरोदयमधिवृक्षसूर्ये च व्रतमदः संप्रेष्यति ।

उत्तरेणाऽऽहवनीयं तिष्ठन्संप्रैषमाहाग्नीञ्ज्योतिष्मतः कुरुत दीक्षित वाचं यच्छ पत्नि वाचं यच्छेति बौधायनः । अग्नीनिति बहुवचनात्सर्वानग्नीन् । सभ्यावसथ्यसत्त्वे तावपि । औपासनस्य न श्रौतसंबन्धाभावात् । एतेन गार्हपत्यदक्षिणाग्न्योरेव व्रतश्रपणरूपप्रयोजनसत्त्वात्प्रज्वलनमिति शङ्का परास्ता । ज्योतिष्मतः प्रज्वलितान्कुर्वित्यर्थः । दीक्षा संजाता यस्य स दीक्षितः । दीक्षाशब्दार्थः प्रागेवोक्तः । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेष्विति धातुसूत्रादपि नियमविशेषपर एव दीक्षाशब्दः । उदयात्पुरेति पुरोदयम् । पुराशब्दः पुरोर्थक उदयात्पूर्वमित्यर्थः । वृक्षानधिक्रम्य वर्तते सूर्योऽधिवृक्षसूर्यः । सूर्यशब्देन लक्षणया तद्रश्मय उच्यन्ते । प्रैषे कुरुतेति बहुवचनं पारिकर्म्यृत्विजामन्यतमप्राप्त्यर्थम् । व्रतप्रद इति सामान्योक्त्याऽध्वर्यूणां मध्ये यः कश्चन व्रतप्रदाता । यो व्रतप्रदः स एव संप्रैषकर्ता । पुरोदयमधिवृक्षसूर्ये चेतिक्रमश्रवणात्प्रथमदिने न प्रैषः । याजमानसूत्रेऽपि वक्ष्यति—तदहर्दीक्षितो रात्रिं जागर्ति न व्रतं भवति नक्षत्रं दृष्ट्वा तूष्णीमेव वाचं विसृजते यत्रैनं व्रतप्रदः संप्रेष्यति तस्मिन्काले वाचं यच्छतीति । अस्मिन्सूत्रे व्रताभावस्योक्तत्वेन प्रैषाभावोऽपि सिद्ध एव । अग्नीञ्ज्योतिष्मतः कुरुतेति आहवनीयविषये ज्योतिष्मत्करणस्यादृष्टार्थत्वेनेतरयोरप्यग्न्योर्ज्योतिष्मत्करणस्याप्यदृष्टार्थतैव । व्रतश्रपणरूपप्रयोजनसिद्धिः प्रसङ्गतः । तथाच ज्योतिष्मत्करणविषयकप्रैषो भवत्येवेति यद्यपि प्राप्तं तथाऽपि पुरोदयमधिवृक्षसूर्ये चेतिक्रमश्रवणादग्नीञ्ज्योतिष्मतः कुरुतेत्येतावन्मात्रप्रैषोऽपि न भवतीति हृदयम् ।

उदितेऽस्तमिते च व्रतं दोहयति वत्सस्यैकꣳ स्तनमवशेष्य ।

अवशेष्य दोहयतीत्यन्वयः । व्रतमित्येकवचनं द्विवचनार्थकम् । नचैकस्या एव गोर्दोहेन निष्पन्नं पय उभयोर्व्रतमेकवचनादिति वाच्यम् । या यजमानस्य व्रतधुक्ताꣳशिरे दुहत या पत्न्यास्तां दधिग्रहायेत्यत्र प्रैषे पत्नीव्रतार्थं पृथग्गोर्विहितत्वादेतत्कल्पनाया असंभवात् । यजमानस्य पत्न्याश्चेति शेषः । वत्सस्य तत्तद्गोर्वत्सस्य तस्यास्तस्या गोरेकमेकं स्तनमवशेष्येत्यर्थः । वत्सस्येति चतुर्थ्यर्थे षष्ठी वत्सार्थमित्यर्थः । उदित उदयं प्राप्तेऽस्तमितेऽस्तमदर्शनं प्राप्ते सूर्ये सति व्रतं दोहयतीत्यर्थः । दोग्ध्रेति

शेषः। दोहयतीति णिजन्तम्। अग्निहोत्रमेव न दुह्याच्छूद्र इत्यग्निहोत्रसंबन्धिदोहने शूद्रनिषेधादन्यत्रानियमः। स च शूद्रो गोप एव। एतद्वृत्तित्वात्स्मृतौ सच्छूद्रौ गोपनापिताविति तस्य समीचीनत्वोक्तेश्च। विप्रो दोहनकर्ता चेदधिकम्।

गार्हपत्ये दीक्षितस्य व्रतꣳ श्रपयति पत्न्या दक्षिणाग्नौ।

व्रतयतीति व्रतम्। व्रतार्थं पय इत्यर्थः। पयो ब्राह्मणस्य व्रतमित्यत्रापि व्रतशब्दस्यायमेवार्थः। अत्र विशेषमाह बौधायनः—अग्निहोत्रविधिं चेष्टित्वा तप्त्वोद्गुह्यास्य शीतीकृत्वाऽऽतच्य वाऽनातच्य वोत्तरे शालाखण्डे शिक्य आसजतीति। दक्षिणे शालाखण्डे शिक्यआसजतीति पत्न्या व्रते विशेषः। अन्यत्समानम्। चेष्टित्वेतिपदस्वारस्याच्चेष्टामात्रं कर्तव्यं नतु समन्त्रकाश्चेष्टा इति सूचयति। अग्निहोत्रस्कन्दनस्य यत्प्रायश्चित्तं तद्वदेवैतस्य स्कन्दनेऽपि। तथा चाऽऽपस्तम्बः—याऽग्निहोत्रस्य स्कन्नस्य प्रायश्चित्तिः सा व्रतस्येति। अत्राग्निहोत्रप्रायश्चित्तातिदेशात्तदीयाः श्रपणधर्मा अपि आपस्तम्बेन सूचिता भवन्ति। प्रायश्चित्तं तु समन्त्रकमेव यथाविहितस्यैव विनष्टसंधानकरणे सामर्थ्यात्।

व्रतप्रदाने विशेषमाह—

अपरेणाऽऽहवनीयं व्रतमत्याहृत्य दीक्षिताय प्रयच्छति।

व्रतप्रद इति शेषः। अपरेणेत्येनबन्तम्। एनपा द्वितीयेति द्वितीया। अतिरत्याक्रमणार्थः। तेनैव यथेतं प्रत्येति। पत्न्या दक्षिणाग्निसमीप एवोपविष्टत्वान्नापरेणाऽऽहवनीयमत्याहृत्य तस्यै प्रदानं किं तु तत्रैव प्रदानम्। एतस्यार्थत एव सिद्धत्वान्न तत्प्रयुक्तविधानं कृतम्। इदं सूत्रं स्वायतन उपविष्टायैव दीक्षिताय व्रतं प्रदेयं न व्रतसमीप आगतायेत्येतदर्थं, कात्यायनेन स्वासने ये देवा इति व्रतयतीति स्पष्टमेवोक्तम्। आहवनीयग्रहणं दक्षिणाग्निव्यावृत्त्यर्थम्। अपरशब्दोऽग्रभागव्यावृत्त्यर्थः। एनबदूरत्वार्थः। अग्निहोत्रवत्तूष्णीमुन्नीयेत्यापस्तम्बः। चतुरवत्तिपञ्चावत्तिव्यवस्थया चतुः पञ्च चोन्नयनानि। अन्तिमे यावन्मात्रम्।

भद्रादभि श्रेयः प्रेहीति दीक्षितं प्रयातमनुमन्त्रयते।

प्रयातं देवयजनं प्रति पत्न्याऽरणीभ्यां पात्रैश्च सह प्रयाणधर्मेण प्राप्तमनुमन्त्रयते। परिभाषयाऽध्वर्युर्मन्त्रप्रतिपाद्यं पदार्थं ध्यायंस्तं पदार्थमनुलक्षीकुर्वंस्तं संस्तुवन्मन्त्रं पठेदित्येतदनुमन्त्रणम्। अभिमन्त्रणेऽनुमन्त्रणत आभिमुख्येक्षणे अधिके अन्यत्समानम्। प्रयान्तमिति पाठे प्रयाणसमय एवानुमन्त्रणम्। उद्देश्यगतत्वात्पुंस्त्वमविवक्षितं ब्राह्मणोऽग्नीनादधीतेतिवत्। तेन पत्न्या अप्यनुमन्त्रणम्। एकत्वमप्यविवक्षितं ग्रहं संमार्ष्टीतिवत्। तेन सत्रे सर्वेषां दीक्षितानामप्यनुमन्त्रणमध्वर्युणा कर्तव्यम्। आत्मनश्चेति द्रष्टव्यम्।

दीक्षितस्य यूपं छिनत्ति यथा निरूढपशुबन्धे ।

अर्थादेव दीक्षितस्य सिद्धौ दीक्षितस्येतिवचनं दीक्षाणां बहुत्वे यस्मिन्कस्मिंश्चिद्दीक्षादिवसे यूपच्छेदनं कर्तव्यं न प्रथमदिन एवेत्येतदर्थम् । एतदर्थमेव शाखान्तरे बहुवचनं श्रूयते-दीक्षासु यूपं छिनत्तीति । सर्वपशूनामेष कल्प इत्यनेनैव सिद्धे यथा निरूढपशुबन्ध इति वचनं त्र्यरत्निर्वा चतुररत्निर्वा पालाशो निरूढपशुबन्धस्य यूपोऽतोऽन्ये सौम्यस्याध्वरस्येत्यनेन सौम्याध्वरसंबन्धिमानं प्राप्तं तद्दीक्षासु यूपच्छेदने निवारयितुं सर्वेषु कल्पेषु विकल्पं बोधयितुं वा । तथा चाऽऽपस्तम्बेन त्र्यरत्निश्चतुररत्निर्वा पालाशो निरूढपशुबन्धस्यातोऽन्ये सौम्यस्याध्वरस्येति वाजसनेयकमिति वाजसनेयकग्रहणं विकल्पार्थं कृतम् ।

न यूपाहुतिं जुहोति होमार्थामृचं जपित्वाऽभिप्रव्रजति ।

यूपप्रकरणादेव सिद्धे यूपनिमित्तकाहुतित्वे यूपवचनं(नेन) यूपच्छेदनमात्राङ्गमेवेयमाहुतिर्भवति न केवलयूपनिमित्तकाहुतिस्तेन खलेवाल्यादौ छेदनाभावादियं यूपाहुतिर्न भवतीति साधितं भवति । यूपाहुतेः क्रतुसंयुक्तत्वेऽपि निषेधोऽनेन क्रियते । न यूपाहुतिं जुहोतीत्येतस्यानुपपत्तौ होमजपयोः समुच्चयः स्यात्स मा भूदित्येतदर्थमिदं वचनमावश्यकम् । नहि दीक्षितस्याग्नौ जुह्वति वैष्णवीमृचमनूच्याच्छैतीति शाखान्तरीयोऽयं होमाभावपक्षः । अच्छैति यूपं प्राप्तुमभिमुखं गच्छतीति श्रुतिगतस्याच्छैतीत्यस्यार्थः । होमार्थामृचमित्यादेरनुक्तौ जपाभावोऽपि स्यादविधानात्स मा भूदित्येतदर्थं जपित्वाऽभिप्रव्रजतीतिवचनम् । होमार्थामितिवचनं स्थानापत्तिलाभार्थम् । तेनाऽऽहवनीयसमीप एव जपित्वाऽभिप्रव्रजतीति सिध्यति । ऋचमितिवचनमृक्त्वज्ञानावश्यकत्वार्थम् । तेन ज्ञानाभावे भ्रेषप्रायश्चित्तं कृत्वैवाग्रिमं कर्म कार्यम् । तच्चाध्वर्युसंबन्धित्वाद्यजुर्भ्रेषनिमित्तकमेव ।

अपि वाऽऽज्यमरणी चाऽऽदाय यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुति हुत्वा यूपं छिनत्ति ।

शाखान्तरीयमेतत्प्रकारान्तरं होमसत्त्वेनाऽऽज्यस्यार्थादादाने सिद्धेऽत्र वचनमरणीसहभावार्थम् । तेनाध्वर्युणैवारणी आज्यं च गृहीत्वा यूपसमीपे गन्तव्यमिति । आदानवचनं परिकर्मिकर्तृकतां व्यावर्तयितुम् । तेनान्यत्राऽऽदानवचनाभावे परिकर्मिकर्तृकताऽप्यस्ति पक्ष इति ज्ञातं भवति । अरणीवचनं यत्किंचिदरणीलक्षणरहितकाष्ठव्यावृत्त्यर्थम् । यूपस्यान्तिके यूपस्य समीपे संस्पृष्टत्वरूपं परमं सामीप्यमत्रान्तिकपदार्थो न भवति दाहप्रसङ्गात्किं तु यावता सामीप्येन यूपदेशमहं प्राप्तोऽस्मीति व्यवहारस्तावदेव सामीप्यमन्तिकपदेन विवक्षितम् । तस्य चैकत्वे यूपैकादशिन्यां तन्त्रमेव भेदे तु

भेद इति द्रष्टव्यम् । यूपस्येतिशब्दप्रवृत्तिर्माविनीं संज्ञामादाय यदाहवनीये जुह्वतीत्याहवनीयशब्दप्रवृत्तिवत् । चकारोऽनुक्तस्रुवादिसमुच्चयार्थः । यूपस्येतिवचनमाहवनीयप्राग्वंशदेवयजनव्यावृत्त्यर्थम् । अन्तिक इतिवचनं दूरदेशव्यावृत्त्यर्थम् । अग्निं मथित्वेतिवचनं यूपस्यान्तिकेऽरण्योरेव कदाचिद्धोमः स्यात्स्थाण्वाहुतिवत्स मा भूदित्येतदर्थम् । अरणी आदाय मथित्वेत्येतावत्युच्यमानेऽप्यर्थादग्निलाभेऽग्निग्रहणमिदं मन्थनं निर्धर्मकमपूर्वमिति द्योतयितुम् । तेनारण्योर्लौकिकत्वं तूष्णीमेव मन्थनमिति च सिध्यति । अग्न्यर्थमायतनं कृत्वोद्धत्यावोक्ष्याग्निं निधाय होमः । मथित्वेति क्त्वाप्रत्ययेन यूपाहुतावव्यवहितोत्तरत्वमेवोच्यत इत्युक्तावपि प्रोक्षणीसंस्कारस्रुवसंमार्गाज्यसंस्कारैर्मध्ये कृतैरप्यव्यवहितोत्तरत्वं बाधितं न भवति तदङ्गत्वेन तदनुगुणत्वात्, येन नाव्यवधानं तेन व्यवहितेऽप्यव्यवहितत्वस्याबाधात् । यूपाहुतिं हुत्वेतिवचनमेतद्वचनाभावे न यूपाहुतिं जुहोतीति पूर्वसूत्रान्निषेधः प्राप्नुयात्तत्प्राप्तौ सत्यां मन्थनस्यादृष्टार्थत्वं च स्यात्तन्मा भूदित्येतदर्थम् । यूपच्छेदनमात्राङ्गभूताऽऽहुतिर्यूपाहुतिः । यूपग्रहणं विस्पष्टार्थम् । जुहोतीति परित्यज्य हुत्वेत्येवं वचनं यूपं छिनत्तीत्यस्य सप्रयोजनस्याऽऽकाङ्क्षाया उत्थापनार्थम् । यूपं छिनत्ति स्वरुचषालकरणान्तेन प्रकारेणेत्यर्थः । यूपं छिनत्तीतिवचनं प्रायश्चित्तपशुसहभावेऽप्येक एव यूप इति प्रदर्शयितुम् । एकयूप आलभत इति श्रुतिरपि अत्र साधिका । पाक्षिक एकादशयूपपक्षस्तु वाचनिक एकादशिन्याम् ।

क्रीते वा राजन्याहवनीये यूपाहुति९ हुत्वा यूपं छिनत्ति ।

दण्डप्रदानानन्तरमिति केचित् । स्वजा असीत्यन्त इत्यन्ये । उदु त्यं जातवेदसमिति कृत इति परे । अग्नि९ राजानमितिप्रैषानन्तरमित्यपरे । वस्तुतः क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति क्रयाव्यवहितोत्तरं दण्डप्रदानं विहितं क्रीते वा राजनीति क्रयाव्यवहितोत्तरं यूपाहुत्यादि विहितं तत्रोभयोः कर्तृभेदात्समकालत्वसंभवेन यजमानेन दण्डप्रदाने क्रियमाणे तत्समय एव यूपाहुतिरध्वर्युणा होतव्येत्येव युक्तम् । यथा दण्डप्रदानयूपाहुतिक्रिययोः समाप्तिः समकाले भविष्यति तथा यतितव्यं द्रव्यत्यागानुरोधेन त्यागस्तु क्रयप्रदेशोपविष्टेनैव कर्तव्यः । आहवनीयग्रहणमपि वाऽऽज्यमरणी चाऽऽदाय यूपस्यान्तिकेऽग्निं मथित्वेत्येतत्प्रकारव्यावृत्त्यर्थम् । यूपाहुतिं हुत्वेतिवचनं न यूपाहुतिं जुहोति होमार्थामृचं जपित्वाऽभिप्रव्रजतीत्येतस्य कल्पस्य व्यावृत्त्यर्थम् । नन्विदमाहवनीयस्याधिकरणत्वविधानबलादेव सेत्स्यति यूपाहुतिं हुत्वेत्याकाङ्क्षापूरणमात्रार्थोऽनुवाद इति चेन्न । क्रीते वा राजन्याहवनीय इत्येतावत्युच्यमाने सप्तम्याः सामीप्यार्थकत्वमादायाऽऽहवनीयसमीपे जपं कृत्वाऽभिप्रव्रजतीति आहवनीयं यूपसमीपं नीत्वा तत्समीप एव छिनत्तीत्येतादृशमर्थद्वयं संभाव्येत तन्मा भूदित्येतादृशार्थव्यावृ-

त्तिरूपेऽनुवादप्रयोजने संभवति आकाङ्क्षापूरणमात्रार्थकत्वकल्पनाया अगतिकाया अन्याय्यत्वात् ।

अग्नीषोमीयसवनीययोरनुबन्ध्यायाश्च ॥ ३ ॥
समानो यूपः स्वरुराहवनीयो हृदयशूलश्च ।

अग्नीषोमौ देवता यस्य पशोः सोऽग्नीषोमीयः । सवने सुत्यायां भवः पशुः सवनीयः । प्रातःसवने वपायागः, माध्यंदिने सवने छिद्रापिधायिपुरोडाशयागः, तृतीयसवनेऽङ्गयाग इति भवति सवनीयत्वम् । एतानि प्रधानहवींषि । वपा पुरोडाशोऽङ्गानि हवींषीत्याश्वलायनः । अग्नीषोमीयश्च सवनीयश्चेति द्वंद्वः । अनूबन्ध्याऽनूबन्ध्याख्यः पशुः । अनु प्रधानानन्तरं बध्यत इत्यनूबन्ध्या तत्संज्ञकस्य पशोश्च यूपादीनि समानानि अभिन्नानि भवन्तीत्यर्थः । वशाऽनूबन्ध्या सो इति श्रुतावावन्ततया एव दर्शनात्सूत्रकृताऽपि तथैव निर्देशः कृतः । अग्नीषोमीयसवनीययोरेव समासेन निर्देशोऽनूबन्ध्यातोऽनयोर्द्व्यक्तं वैलक्षण्यमस्तीति । तेनानूबन्ध्यायां गोपशुनियमवदनयोर्गोनियमो न भवति किंतु च्छागोऽपि पक्षेऽनयोरिति । एतेषां पशूनां यूपादयश्चत्वारः साधारणा भवन्ति । सोमप्रकरणे विधानात्त्रयाणामर्थित्वादग्नीषोमीयसवनीयानूबन्ध्याख्यकर्मकालेऽनुस्पत्त्याऽमुष्येत्यवधारणाभावाच्च । एकादशाध्याये तृतीयपाद उक्तं जैमिनिना यूपश्चाकर्मकालत्वादितिसूत्रेण । सूत्रार्थस्तु दीक्षादिवसानां दीक्षासु यूपं छिनत्तीत्यनेन यूपच्छेदनाधिकरणत्वेन विहितानां ज्योतिष्टोमापूर्वप्रयुक्तानां साधारण्यात्सर्वपशुसाधारण्यं यूपस्येति । यूपश्चेत्यनन्तरं तन्त्रमिति शेषः । कर्मणः पाशुककर्मणः काल एव कालो यस्य तस्य भावस्तत्त्वम् । न कर्मकालत्वमकर्मकालत्वं कर्मकालत्वाभावस्तस्मादित्यर्थः । दीक्षादिवसात्मके काले हि पाशुककर्मकालसंबद्धत्वाभाव एवास्ति तस्य ज्योतिष्टोमकर्मकालसंबद्धत्वात्, दीक्षायाश्च साधारण्यात्तद्दिवसकर्तव्यस्य यूपस्य सर्वपशुसाधारण्यं युक्तम् । दीक्षाकालत्वं हि न दैक्षापूर्वप्रयुक्तं तदुपस्थापकानुष्ठानसादेश्याभावात् । अपि तु प्रकरणाज्ज्योतिष्टोमापूर्वप्रयुक्तं सत्तस्मिन्साक्षान्निवेशायोगात्तदङ्गभूतपशुद्वारा तदीययूपे निविशते । तदङ्गभूतत्वं च सर्वेषामविशिष्टमिति सर्वार्थत्वसिद्धिः । वस्तुतो दैक्ष एवोपदेशेऽपि सवनीयादावपि पाक्षिकाग्नीषोमीयातिदेशेन तत्प्राप्तिसंभवात्कालतन्त्रत्वादेव यूपतन्त्रत्वम् । एतेनैकस्मिन्नपि काले यूपत्रयापत्तिः परिहृता भवति । यूपतन्त्रत्वात्तत्संस्काराणां जोषणतक्षणादीनामपि तन्त्रत्वम् । ननु दीक्षासु यूपं छिनत्तीत्यनेन च्छेदनमात्रस्यैवापकर्षविधानाज्जोषणतक्षणादीनामग्नीषोमीयकाल एव करणेनानुष्ठानसादेश्यात्तन्मात्रार्थत्वप्रतीतेर्गृह्यमाणविशेषत्वेन तदपवर्गेऽपवर्गादावृत्तिरिति वाच्यम् । यूपच्छेदनोद्देशे विशिष्टोद्देशापत्तेः । छेदनमात्रोद्देशेऽतिप्रसङ्गाद्यूपोद्देशेनैव कालविधिः । छिनत्तिस्तु तदुत्पादकसंस्कारमात्रोपलक्षणम् । तदुत्पादकाश्च संस्कारा यूपाहुत्याद्यङ्क-

च्छेदनाद्यष्टाश्रिकरणान्ता एवाग्नेरिवाऽऽधानादयो न तु प्रोक्षणाञ्जनादयोऽपि। ते तु संमार्गादिवदुत्पन्ने यूपे संस्काराधायकाः। तदेवं व्यवस्थायामपि ये तावदुत्पादकास्तेषां कर्मकालभिन्नकालत्वेनागृह्यमाणविशेषत्वादेव तन्त्रत्वं यूपवत्। ये तु प्रोक्षणाद्य उत्पन्नयूपसंस्कारकास्तेषामपकर्षकवचनाभावेन कर्मकाल एवानुष्ठेयत्वेन गृह्यमाणविशेषत्वेऽपि आतिथ्यावर्हिःप्रोक्षणन्यायेन यूपव्यक्तेरेकत्वात्तत्र कृतानां प्रोक्षणादीनां प्रसङ्गेनोपकारकत्वोपपत्तेस्तेषामपि नाऽऽवृत्तिः। केचित्तु तक्षणादिसंस्कारसंग्रहार्थं यूपं कर्तुं खदिरं छिनत्तीति पदद्वयाध्याहारं स्वी कुर्वन्ति। तन्न। तदपेक्षया लक्षणाया लघुत्वात्। एकादशाध्याये तृतीयपादे तस्य न्यायस्य मूलभूतसूत्रेऽपि जैमिनेः संस्कारास्त्वावर्तेरन्नर्थकालत्वात्। संस्कारास्तक्षणादयो यूपसंस्काराः। तुशब्दो यूपश्चाकर्मकालत्वादितिपूर्वाधिकरणतोऽत्र वैपरीत्यद्योतनाय। यूपस्यार्थः प्रयोजनं प्रधानीभूतं पशुबन्धनरूपं तत्कालत्वादावर्तेरन्नित्यर्थः। अयं पूर्वसूत्रार्थः। तत्कालः संस्कारकालः पशुबन्धनरूपप्रयोजनीभूतप्रधानकालस्तु यूपसंबद्धकर्मत्वात्तस्य यूपसंबद्धकर्मणः क्रतुधर्मविधानात्, दीक्षासु यूपं छिनत्तीतिदीक्षादिवसरूपाधिकरणकक्रतुप्रयुक्तो धर्मः। अनेन पशुबन्धनकालिकसंस्कारकरणं व्यावर्तते। सर्वार्थानां साधारणानां तक्षणादिसंस्काराणां, वाशब्दोऽवधारणे वचनादन्यकालत्वमे(?)तत्कालस्तु यूपकर्मत्वात्तस्य क्रतुधर्मत्विधानात्सर्वार्थानां वा वचनादन्यकालत्वं सकृन्मानं च दर्शयतीति चेति द्वितीयसूत्रार्थः (?)। दीक्षासु यूपं मिनोतीतिश्रुतिर्दीक्षादिवसकाले सकृदेव मानं संस्काराणामपि दीक्षादिवसकालत्वं दर्शयतीति तृतीयसूत्रार्थः (?)। तत्कालस्तु यूपकर्मत्वात्तस्य क्रतुधर्मविधानात्सर्वार्थानां वा वचनादन्यकालत्वम्। सकृन्मानं च दर्शयति। अर्थः प्रयोजनं पशुबन्धनरूपं यूपस्य पशुबन्धनरूपकालत्वे संस्काराणामावृत्तिर्भवेत्, तदेव नास्ति तस्य दीक्षाकालत्वादिति सूत्रार्थः(?)। यूपच्छेदनकाल एव व्यामोहनिवृत्त्यर्थं नाशापहारनिवृत्त्यर्थं च स्वरोरुपादानं कर्तव्यमित्यगृह्यमाणविशेषत्वात्तन्त्रं स्वरुः। अत एव संस्थिते सोमे प्र प्रस्तरं हरति जुहोति स्वरुमित्यन्ते प्रतिपत्तिविधानमपि संगच्छते। सोमे प्र प्रस्तरं हरतीति श्रुतौ प्रस्तरं प्रहरतीत्यन्वयः। श्रुतित्वादुपसर्गक्रिययोर्मध्ये पदान्तरं न विरुध्यते। नचायमनूबन्ध्याङ्गभूतस्य कालविधिः। न्यायेन स्वरुतन्त्रत्वावगतौ संकोचे प्रमाणाभावात्। अत एव यत्र न्यायेनैव भेदावगतिर्यथा प्रस्तरे तत्र संकोच इष्ट एव। इदं जैमिनिनाऽपि एकादशाध्याये तृतीयपादे स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वादित्यनेन सूत्रेणोक्तम्। अस्वकालत्वात्, न विद्यते स्वस्मै कालो यस्य सोऽस्वकालस्तस्य भावस्तत्त्वं तस्माद्यूपवद्दीक्षादिनात्मकः कालः स्वार्थं विहितो नास्ति। अतोऽस्वकालत्वं

---

१ ख. म. °त्कालाः सं°। २ ख. ग. °कालाः प°। ३ स. ग. घ।

स्वरोः । अस्माद्धेतोः पाशुककर्ममध्य एवार्थतः स्वरोरनुनिष्पादनमार्थिकस्तन्त्रेणैवापवर्गस्तन्त्रहेतुक एवापवर्गस्तस्य स्वरोरपवर्गो लौकिकत्वं स्यात् । तेन सवनीयाद्यर्थं भिन्नो भिन्नस्वरुरिति पूर्वपक्षः । सिद्धान्तस्तु अस्वकालत्वहेतुसिद्धावेव तन्त्रापवर्गता वक्तव्या सैव न संभवति । स्वरोर्यूपानुनिष्पन्नत्वेन यूपोत्पत्तिसमनन्तरमेव तस्योत्पादने सिद्धे यूपवद्दीक्षादिनात्मककालस्य स्वार्थत्वमपि भवति । अतस्तन्त्रापवर्गताऽपि न । एवं च यूपवदकर्मकालत्वात्स्वरुरपि तन्त्रमिति जैमिनिसूत्रार्थः । आहवनीय औत्तरवेदिकः । तस्यैव यागाधिकरणत्वात् । अत एव भव्ये वचनम् । औत्तरवेदिकप्रणयनं प्रतिपशु प्राप्तं तन्निषेधार्थमाहवनीयग्रहणम् । औत्तरवेदिकाग्नेरधिकरणीभूताया उत्तरवेदेर्ज्योतिष्टोमापूर्वप्रयुक्तत्वेन सर्वार्थत्वसिद्धौ तदाधेयस्यौत्तरवेदिकस्यापि सर्वार्थत्वस्य निर्विवादात् । हृदयशूलस्यैकत्वविधानाद्धृदयशूलस्याप्यकर्मकालत्वं बोध्यते । तेन यूपवृक्षजन्य एव हृदयशूलः । स च यूपाहरणसमय एव संपादनीय इति सिद्धं भवति । यूपैकादशिनीपक्षे प्रथमोपस्थितत्वादग्निष्ठस्यैवाग्नीषोमीयानूबन्ध्यार्थत्वम् । यद्यपि यत्रिषु यूपेष्वालभेत बहिर्धोऽस्मादिन्द्रियं वीर्यं दध्यात्, भ्रातृव्यमस्मै जनयेदित्यनेन प्रतिपशु यूपो निषिद्धस्तथाऽपि वचनबलात्पश्वेकादशिन्यां भविष्यतीति ज्ञेयम् ।

अप्रवृत्ते दीक्षापरिमाणे ।

अवधारितैकद्विन्याद्यन्यतमदीक्षापरिमाणेऽप्रवृत्ते समाप्ते सति । एतेनोत्तरवेदिदेश इत्यादेः प्रायणीयादिवसेऽनुष्ठानं बोध्यते ।

उत्तरवेदिदेश उपरवाणां वा लोहितमानडुहं
चर्म प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य तस्य
दक्षिणे पक्षे राजानं न्युप्योत्तरत उदकुम्भं
निधाय सर्वतः परिश्रित्योदीचीं द्वारं कृत्वा
सोमविक्रयिणं प्रपादयति कौत्सः शूद्रं वा ।

उत्तरवेदिदेशौपरवदेशौ मानेन ज्ञातव्यौ । उपरवाणामित्यत्र समासैकदेशस्य देशशब्दस्यान्वयः । अङ्गीकृतश्च पाणिनिनाऽप्येकदेशान्वयोऽनुस्वारस्य यथि परसवर्ण इतिसूत्रस्थसमासैकदेशसवर्णशब्दस्योदस्थास्तम्भोः पूर्वस्येत्येतत्सूत्रगतपूर्वशब्दे । लोहितं रक्तवर्णं लोहिताभावे स्वलोहितमपि । एतदुक्तं द्वैधे रोहिते चर्मणीति सूत्रं बौधायनस्याप्यरोहितं स्यादिति शालीकिरिति । अनः शकटं तद्वाहो बलीवर्दस्तस्येदमानडुहं चर्म त्वक् । प्राचीनग्रीवं प्राग्दिक्स्थग्रीवमुत्तरलोमोपरिष्टाल्लोम । तैलेन चर्मणां शुद्धिरिति विहितां शुद्धिं कृत्वोपयोक्तव्यम् । विहितचर्मणो ह्यलाभे कृष्णाजिनं सर्वेषां प्रतिनिधित्वेन ग्राह्यम् ।

कृष्णाजिनं प्रतिनिधिरलाभे चर्मणां भवेत् ।
तदलाभे तु मेध्यस्य चर्मान्यस्य पशोर्भवेत् ॥

इति प्रतिनिधिप्रकरणे संग्रहोक्तेः ।

गृहप्रवेशेऽनडुहश्चर्माऽऽस्तरणमिष्यते ।
तस्याभावे तु तार्णस्य तल्पस्याऽऽस्तरणं भवेत् ॥

इत्याश्वलायनस्मृतौ तार्णतल्पस्याऽऽनडुहचर्मप्रतिनिधित्वेन ग्रहणात्सर्वथा चर्मालाभे तार्णस्तल्पो ग्राह्यः । कृष्णाजिनाभावे तु कृष्णवर्णरहितमृगाजिनं प्रतिनिधिः । तस्याप्यभावे रौरवादीन्यजिनानि । अनन्तरोक्तरीत्या तार्णस्तल्पो वा । आश्वलायनस्मृतावनडुद्ग्रहणस्य चर्ममात्रोपलक्षणार्थत्वादिति द्रष्टव्यम् । तस्याऽऽस्तृतस्य चर्मणो दक्षिणे पक्षे दक्षिणे भागे चर्मण उत्तरो भागो राज्ञो विवेचनायावशेषितो भवतीत्यार्थिकम् । उत्तरत इत्यत्र तस्येत्यनुवर्तते । चर्मण उत्तरे भाग उदकुम्भनिधानमिति शङ्कामपाकर्तुमेवोत्तर इति पूर्वसजातीयशब्दं परित्यज्योत्तरत इति शब्दान्तरग्रहणं कृतम् । उदकेन पूर्णः कुम्भ उदकुम्भः । उदकस्योदः संज्ञायामित्युदकशब्दस्योदादेशः । सर्वतः सर्वासु दिक्षु परिश्रित्य कटादिभिः परित आच्छाद्य । उदीचीमुत्तरादिगभिमुखाम् । द्वाःशब्दो रेफान्तस्तस्य द्वितीयैकवचनम् । अयं च शब्दः स्त्रियाम् । देवीर्द्वाराविति लिङ्गात् । द्वारविधानात्तद्वर्जं परिश्रयणम् । सोमविक्रयिणं सोमविक्रेतारं प्रपादयति परिश्रितं प्रवेशयति सोमविवेचनार्थम् । स च ब्राह्मणः कौत्सः कुत्सगोत्रः कुत्सितकर्मा वा । अत्राऽऽपस्तम्बः कौत्साद्राजानं क्रीणीयादन्यस्माद्वा ब्राह्मणादित्युक्त्वाऽऽहाप्यब्राह्मणादिति । शूद्रः सच्छूद्रो गोपो नापितो वा । सच्छूद्रौ गोपनापिताविति स्मृतेः । शाखान्तरे शमितृसोमविक्रयिणौ कुलालावित्याम्नानात्कुलालोऽपि पक्षे । निषादरथकारवद्यावदर्थमध्ययनमेतेषाम् । अयं च शूद्रो विप्राभावे द्रष्टव्यः । एतस्मादेव सूत्रादन्य एवेति गम्यते । यस्य कस्यचिदृत्विज एव सोमविक्रयित्वे क्रयजन्यदोषविशिष्टस्य स्वकर्मण्यनधिकारादन्य एव युक्त इति भावः । तृतीयाध्याये सप्तमे पादे विक्रयी त्वन्यः कर्मणोऽचोदित्वादिति जैमिनिरप्येवमाह । सूत्रार्थस्तु विक्रयी सोमविक्रयी तु अन्य ऋत्विग्भ्योऽन्यः । कुतः कर्मणो विक्रयकर्मणोऽचोदितत्वादविहितत्वादक्रत्वर्थत्वान्निन्दितत्वादिति यावत् । प्रवृत्तिस्तु द्रव्यलोभवशेन द्रष्टव्या । वरणाभावाद्यथा शमित्रुपगातार ऋत्विज एव तथा विक्रयी न भवतीति वैलक्षण्यद्योतनाय तुशब्द इति । कात्यायनोऽप्येवम् । सोमविक्रयी, उपपातकी । सोमः क्रेतव्य इत्यविधानात्

आममांससुरासोमलाक्षालवणसार्पिषाम् ।
विक्रये सर्वपण्यानां द्विजश्चान्द्रायणं चरेत् ॥

इत्युपपातकप्रकरणे शातातपेन चान्द्रायणस्योक्तत्वाच्च सोमविक्रये दोषः । यत्तु चतुर्विंशतिमते—

सुराया विक्रयं कृत्वा चरेत्सौम्यचतुष्टयम् ।
लाक्षालवणमांसानां चरेच्चान्द्रायणत्रयम् ॥
मध्वाज्यतैलसोमानां चरेच्चान्द्रायणद्वयम् । इति,

यच्च विष्णुवचनम्—रक्तवस्त्रमधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत् । प्राणिसोमविक्रयी तप्तकृच्छ्रं कुर्यात्तं च भूयश्चोपनयेदिति, यच्च शङ्खलिखितवचनम्—न विक्रीणीयादविक्रेयाणि तिलतैलदधिक्षौद्रलवणलाक्षामद्यमांसकृतान्नस्त्रीपुरुषहस्त्यश्वगन्धरसक्षौमकृष्णाजिनसोमोदकनीलीविक्रयात्सद्यः पतति ब्राह्मण इत्युपक्रम्य संवत्सरं तप्तकृच्छ्रमाचरेदिति, यच्च पैठीनसिवचनम्—आरामतडागोदपानपुष्करिणीसुकृतसोमविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारो दशसहस्रं गायत्रीं जपन्संवत्सरेण पूतो भवतीति तन्न्यायोऽभ्यासशक्ताशक्तपरत्वेन व्यवस्थापनीयम् । सुकृतं पुण्यं, कृतान्नं पक्वान्नम् । सोमविक्रयिणः स्पर्शे प्रायश्चित्तमुक्तं पराशरेण—

चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी ।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत् । इति ।

जलमाविशेत्स्नानं कुर्यादित्यर्थः । निषिद्धेऽपि कर्मणि प्रवृत्तिस्तु लोभवशात् । सोमविक्रयीत्यत्र कर्मणीनि विक्रिय इति सूत्रेण कर्मणि विपूर्वात्क्रीणातेरिनिः । कुत्सितग्रहणं कर्तव्यमिति वार्तिकात्स च कुत्सितेऽर्थे भवति ।

सोमविक्रयिन्सोमꣳ शोधयेति संप्रेष्यति शुन्ध सोममापन्नं निरस्येति वा शुन्ध सोममापन्नं निरस्त इति वा ।

निरस्त इति सप्तम्यन्तम् । हे सोमविक्रयकर्तः सोमं समीचीनकाण्डात्मकं राशीभूतात्सोमात्तृणादिभ्यश्च शोधय विवेचय चर्मण उत्तरभागे पृथक्कुर्वित्यर्थः । शुन्ध सोममापन्नं निरस्येति शुन्ध सोममापन्नं निरस्त इत्येतौ पूर्वेण सह विकल्पितौ शाखान्तरीयौ । आपन्नं सोमे पतितं तृणादिकं निरस्य दूरीकृत्य सर्वं सोमं शुन्ध समीचीनकाण्डभूतं विवेचयेत्यर्थः । निरस्ते तृणादिके बहिर्निरस्ते सति य आपन्नो लब्धः सोमस्तं शुन्ध पुनस्तमपि समीचीनकाण्डभूतं विवेचय पृथक्कुर्वित्यर्थः । वाशब्दद्वयमेकशाखागतावेतौ प्रैषौ नतु भिन्नशाखागताविति बोधयितुम् ।

शोधनप्रकारमाह—

यदन्यदꣳशुभ्यस्तदपोद्धरति ।

अंशुभ्यो यत्किंचिदन्यत्तृणादिकं तदपोद्धरति बहिर्निष्काशयतीत्यर्थः । उत्तरप्रैषानुगुण्येनेदानीं व्याख्यायते—अंशुभ्यः समीचीनांशुभ्योऽन्यदसमीचीनकाण्डजातं तृणादिकं च तदपोद्धरति बहिर्निष्काशयतीत्यर्थः । यथा घटमानयेत्युक्ते कार्यक्षम एव घट आनीयते तथेति ।

नाध्वर्युः सोमं विचिनुयान्नास्य पुरुषो
न यजमानो न यजमानस्यामात्या
न विचीयमानस्योपद्रष्टारो भवन्ति ।

अध्वरं युनक्तीत्यध्वर्युः, अध्वरं नयतीति वाऽध्वर्युः, अध्वरं कामयत इति वाऽध्वर्युः । तथाच निरुक्तम्—अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताऽध्वरं कामयत इति वेति । क्षोधुकोऽध्वर्युः स्यादितिदोषश्रवणान्नाध्वर्युः सोमविवेचनं कुर्यात् । अस्याध्वर्योः पुरुषोऽपि विवेचनं न कुर्यात् । तत्पुरुषाणामप्यध्वर्युत्वात्क्षोधुकोऽध्वर्युः स्यादिति श्रुतो दोषस्तेषामप्यस्तीति भावः । नन्वेवं नाध्वर्यवः सोमं विचिनुयुरित्येवमेव वक्तव्यं तथाचैतावतैवाध्वर्युपुरुषाणामपि निषेधे सिद्धे पृथक्सूत्रकरणं व्यर्थमिति चेत्सत्यम् । नास्य पुरुष इत्ययं निषेधः शाखान्तरीयः स्वतन्त्र एव न तु स्वशाखागतस्याध्वर्युपदगतैकवचनस्य जात्यभिप्रायकत्वं कल्पयित्वा सर्वाध्वर्युपरत्वं, सर्वत्रातिप्रसक्तत्वेन वक्तुमशक्यत्वादित्येतादृशार्थज्ञापनार्थत्वेन वैयर्थ्याभावात् । तेन नासःस्थिते सोमेऽध्वर्युः प्रत्यङ्सदोऽतीयादित्यादावध्वर्योरेव निषेधो न तत्पुरुषाणामिति सिद्धं भवति । क्षोधुको यजमान इति दोषश्रवणाद्यजमानोऽपि विवेचनं न कुर्यात् । शाखान्तरीयमन्येषामपि विवेचननिषेधमाह—न यजमानस्यामात्या इति । अमात्याः पुत्रपौत्रादयः । विचीयमानस्य पुरुषस्योप समीप उक्ता अनुक्ताश्च द्रष्टारोऽपि न भवन्ति किमु वक्तव्यं विवेचनं न कर्तव्यमिति । एतेनाध्वर्युतत्पुरुषव्यतिरिक्तानामृत्विजामपि विवेचननिषेधो यजमानामात्यव्यतिरिक्तानामन्येषां च । नन्वेवं न विचीयमानस्योपद्रष्टारो भवन्ति किं वक्तव्यं विवेचनं न कर्तव्यमिति कैमुतिकन्यायेनैवाध्वर्य्वादीनामपि विवेचननिषेधसिद्धौ नाध्वर्युः सोमं विचिनुयादित्यादिनाऽध्वर्य्वादीनां पृथङ्निषेधो व्यर्थ इति चेन्न । तस्य दोषाधिक्यप्रदर्शनार्थत्वेन वैयर्थ्याभावात् । अध्वर्योर्यथा दोषस्तथैव तदीयपुरुषस्यापीति दर्शयितुं नास्य पुरुष इति । यथा यजमानस्य दोषस्तथा तदीयामात्यानामिति दर्शयितुं न यजमानस्यामात्या इति । सोमविक्रयिकर्तृकविवेचनसमये निषेधादेव विवेचननिषेधस्यापि सिद्धौ पृथग्विवेचननिषेधो दोषाधिक्यार्थः । दोषाधिक्याच्छ्रौतस्मार्तप्रायश्चित्तयोः समुच्चयः । द्रष्टृत्वे श्रौतमेव दोषाधिक्याभावात् । तत्र श्रौतं प्रायश्चित्तं सर्वप्रायश्चित्तमेव विशेषानुक्तेः । अनाज्ञातत्रयजपो वैष्णव्यृग्व्याहृतिजपश्च । स्मार्तमपि साधारणमेव ।

तथ—हिरण्यदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥ इति संवर्तोक्तम् ॥
वाङ्मनःकायजान्दोषान्प्राणायामो विनाशयेत् ।
वेदमातृजपो वाऽपि प्रणवस्य जपोऽपि वा ॥ इत्याङ्गिरसोक्तम् ॥
लघुदोषे त्वनादिष्टे प्राजापत्यं समाचरेत् ।

इति चतुर्विंशतिमतोक्तं वा दोषतारतम्येन प्रायश्चित्तं द्रष्टव्यम् । विचीयमाने सोमे तस्य समीपे द्रष्टारोऽपि न भवन्तीत्यर्थः । उपेति ग्रहणाद्दूरतो दर्शने दोषो नैवेति । सोमविक्रयिणो यदि अलाभस्तदोपायमाह कर्मान्ते बौधायनः—अथ यदि न सोमविक्रयी स्यात्क्रमेण यूपावटकाले पलाशशाखां निहत्य समुपनह्य राजानं पलाशशाखायां समासज्योपासीताथ यदि कश्चित्प्रसवयुक्तं व्याहरेत्क्षिप्रमिति वा त्वरध्वमिति वा कुरुतेति वेति तद्राजानमाददीत न संवादा आवर्तेरन्स सोमविक्रयी स्यादिति ।

प्रायणीयाप्रभृतिष्ववभृथान्तेष्विष्टिपशुबन्धेषु व्रतोपायनं जागरणं पत्नीसंनहनमारण्याशनं च न विद्यते ।

सोमाङ्गैरेव सिद्धार्थत्वादिति भावः । अन्तशब्दोऽवध्यर्थे । अवभृथान्ताश्चावभृथान्ताश्चावभृथान्तास्तेष्वित्येकशेषः । अवभृथावधिकासु इष्टिषु अवभृथावधिकेषु पशुषु चेत्यर्थः । यद्यपि पशुबन्धद्वयमेव तथाऽपि प्रायश्चित्तपशुद्वयमादाय बहुवचनम् । प्रायणीयाप्रभृतिष्वित्यनेन दीक्षणीयाव्यावृत्तिः । अवभृथान्तेष्वित्यनेनोदयनीयादिव्यावृत्तिः । सर्वेषु सौमिकेष्विष्टिपशुबन्धेष्विति सूत्रे यथादर्शितं प्रयोजनमिष्टिपशुबन्धग्रहणस्य तद्वदत्रापि द्रष्टव्यम् । अवभृथान्तेष्वित्यनेनैवायं हेतुर्लभ्यते । व्रतोपायनादीनां सिद्धार्थत्वं नियमेन प्रायणीयाप्रभृतिष्ववभृथान्तेष्वेवास्तीति हेतोस्तत्प्रभृतित्वं तदन्तत्वं चोक्तम् । प्रायणीयाप्रभृतिष्वित्यनेन दीक्षणीयाव्यावृत्तिः । ननु तदहर्दीक्षितो रात्रिं जागर्तीति याजमानसूत्रे दीक्षाकाले जागरणस्य विधास्यमानत्वादन्यस्य च सद्यस्कालतया प्राप्तेरेवाभावात्किमत्र निषिध्यत इति चेत्सत्यम् । आनर्थक्यप्रतिहतस्य निषेधस्य विपरीतं बलाबलमिति न्यायेन लक्षणया च जागरणशब्देन जागरणाभावसंपादकनिद्रास्थानिकक्षणिकनेत्रनिमीलनाकरणमभिधीयते तस्य निषेधोऽत्र क्रियते । एवं च परिस्तरणोत्तरकालं नेत्रनिमीलनरूपपदार्थोऽस्तीति गमयति । नेत्रनिमीलनाकरणरूपजागरणेनैव सिद्धेरिति भावः । सवनीयोपवसथीभूतायां रात्रौ यज्जागरणं तन्मुख्यम् । इष्ट्याद्यन्तःपातित्वेन तदभावस्तु क्षणिक एव स्वीकार्योऽन्यस्यासंभवात् । स च पदार्थः परिस्तरणोत्तरमेव परिस्तरणोत्तरकालस्यैव तदधिकरणत्वेन प्रकृतित उपस्थितत्वात् । अथवाऽयमर्थः—यज्ञसाधनरक्षणद्वारा जागरणस्याप्रमादार्थस्य नानेन निषेधः क्रियते

अन्यकालिकेष्टिष्वङ्गभूतपदार्थरक्षणासंभवात् । नहि काऽपि सोमाङ्गभूतेष्टिर्दीक्षा रात्रावस्ति । दीक्षणीयायाः सद्यस्कालाया दिन एव सत्त्वात् । प्रायणीयादौ त भिन्नकालता स्पष्टैव । किंतु अथ दीक्षित एतां रात्रिं जागर्ति तथा स्वप्नेन व्यावर्त्येत इत्यर्थवादानुसारात्स्वप्नव्यावृत्तिफलकजागरणस्यादृष्टार्थत्वप्रतीतेस्तस्य निषेधोऽत्र क्रियते । दतदृष्टस्य ज्योतिष्टोमपरमापूर्वोत्पत्त्यवधिस्थायित्वात्प्रसङ्गतस्तत्सिद्धेरिति भाव इति । व्रतोपायनस्य प्रसङ्गसिद्धिं द्वादशाध्याये प्रथमे पादे जैमिनिरपि तथा व्रतमुपेतत्वादित्यनेन सूत्रेणाङ्गीकृतवान् । सूत्रार्थस्तु धारणार्थत्वात्सोमेऽन्यन्वाधानं न विद्यत इति पूर्वसूत्रे यथाऽन्यन्वाधानं प्रसङ्गसिद्धत्वान्न विद्यते तथा व्रतं व्रतस्वीकारोऽपि न विद्यते । उपेतत्वात् । सोमार्थव्रतोपेतत्वात् । तस्य चासमाप्त्यविसृष्टत्वात्प्रसङ्गसिद्धिरिति । जागरणस्य प्रसङ्गसिद्धिस्तु जैमिनिमते नास्ति । तथा च द्वादशाध्याये प्रथमे पादे तत्सूत्रं तद्युक्तं च कालभेदादिति । सूत्रार्थस्तु तद्युक्तं दीक्षायुक्तं दीक्षाकालयुक्तं जागरणमपि कालभेदान्न प्रसज्येतेति । सौमिकेन जागरणेनैष्टिकजागरणजन्यादृष्टसिद्धौ प्रमाणाभाव इति भावः । पत्नीसंनहनमपि न दीक्षार्थेन संनहनेनैव सिद्धत्वात् । द्वादशाध्याये प्रथमे पादे जैमिनिरपि संनहनं च प्रवृत्तत्वादिति । सूत्रार्थस्तु संनहनं च न कर्तव्यं सोमे तस्य प्रवृत्तत्वादिति । संनद्धैव कर्माणि कार्याणीत्येवमर्थं संनहनं नादृष्टार्थं तथा सोमार्थसंनहनेनैव संनद्धत्वसिद्धेरदृष्टार्थत्वाभावाच्च न पृथक्संनहनमिति भावः । आरण्याशनस्यापि पयोव्रतेन प्रसङ्गसिद्धिर्जैमिनिनाऽपि स्वीकृता—अन्यविधानादारण्यभोजनं न स्यादुभयं हि वृत्त्यर्थमिति । अन्यस्य पयोव्रतस्य विशेषस्य विधानात्प्राकृतस्याऽऽरण्यभोजनस्य निवृत्तिः । कुतः, हि यस्मादुभयं पयोव्रतमारण्याशनं चेत्येतदुभयं वृत्त्यर्थं तृप्त्यर्थं, तथाच व्रतजन्यतृप्त्यैवाऽऽरण्याशनजन्यतृप्तिसिद्धेर्न तदर्थमारण्याशनमिति । न च पयोव्रतारण्याशनयोर्विजातीयतृप्तिरूपकार्यभेदात्कथं प्रसङ्गसिद्धिरिति वाच्यम् । आनुषङ्गिकत्वेन तृप्तेर्गुणीभूतायाः प्राणधारणस्यैव क्रतूपयोगितायां मुख्यत्वेन प्रसङ्गसिद्धेः संभवादिति भावः । सद्यस्कालत्वेनैवाऽऽरण्याशनाभावे सिद्धेऽयं निषेधो ज्ञापयति सद्यस्कालास्वपीष्टिषु स्वतन्त्रास्वपि स्वस्थान आरण्याशनमस्तीति । शुक्रादीक्षायै तपसो विमोचनीरितिमन्त्रलिङ्गादवभृथस्य दीक्षाविमोचनार्थत्वात्तावत्पर्यन्तं व्रतोपायनादीनां निषेधः । अवभृथोत्तरं त्वेतानि भवन्त्येव । तत्र तेषां विमुक्तत्वात् । पत्नीसंनहनमपि भवत्येव योक्त्रस्य त्यक्तत्वात् । याजमानसूत्रे त्यागं वदिष्यति योक्त्रस्य । एतेन दीक्षणीयाप्रभृति योक्त्रमावभृथाद्धार्यमिति सिद्धं भवति । आह च बौधायनः—संनद्धा पत्नी यज्ञपुच्छमन्वास्त इति ।

सर्वाण्युत्तरासु क्रियन्ते ।

सर्वाण्येतानि उत्तरासु क्रियन्ते कर्तव्यानीत्यर्थः । उत्तरा च, उत्तरश्च, उत्तरा चेत्येक-

---

१ ख. ग. °ष्टार्थतया सो° ।

शेषः । परवल्लिङ्गमित्यनेन स्त्रीलिङ्गान्ततैव । तल्लक्षणविशेषस्याभावात् । प्रायणीयाप्रभृतिष्वित्यनेन यथा दीक्षणीयाया निषेधविषये व्यावृत्तिस्तद्वत्करणविषयेऽपि व्यावृत्तिरित्यर्थं बोधयितुमिदं सूत्रम् । अत एवेतरासु क्रियन्त इति परित्यज्योत्तरासु क्रियन्त इत्युत्तरशब्दग्रहणं कृतम् । एवं चोभयत्रापि दीक्षणीयायाः परित्यागाद्विकल्पः सिध्यति । स च व्यवस्थितः पूर्वत्र दीक्षणीयायामसिद्धार्थत्वात्सर्वाणि एतानि भवन्ति उत्तरत्र दीक्षणीयायां सिद्धार्थत्वान्नैतानीति द्रष्टव्यम् । ब्रह्मवरणमपि सोमार्थवरणेनैव सिद्धत्वान्न भवतीत्युक्तमेव प्राक् । न चैवं प्राकृतहोतृवरणस्यापि समन्त्रकहोतृवरणेन सोमार्थेन सिद्धिरस्त्विति वाच्यम् । अदृष्टार्थस्य प्राकृतवरणस्य दृष्टार्थेन सौमिकेन वरणेन प्रसङ्गसिद्धेरभावात् । प्रवृत्तेषु हि केषुचित्पदार्थेषु पश्चादग्निर्देवो होता देवान्यक्षद्विद्वाꣳश्चिकित्वदित्यादिना प्रकृतौ होतृवरणमाम्नातमतस्तस्य प्रवृत्तत्वेन दृष्टार्थत्वानुपपत्तेरदृष्टार्थत्वम् । सौमिकस्य तु अप्रवृत्ताभ्यर्थनरूपत्वाद्दृष्टार्थत्वमेवेति । तथा च द्वादशाध्याये प्रथमपादे जैमिनिः—प्रवृत्तवरणत्वात्प्रतितन्त्रं वरणं होतुः क्रियेतेति । सूत्रार्थस्तु प्रवृत्तस्य कर्मणि प्रवृत्तस्य होतुर्वरणत्वात्प्रवृत्तहोतृसंबन्धिवरणत्वात्प्रवृत्तं होतृसंबन्धि अग्निर्देवो होतेत्येतद्वरणम् । एतेनाऽऽनतिरूपदृष्टार्थत्वं व्यावर्त्यते । तथाचेदं वरणमदृष्टार्थमित्युक्तं भवति । एवं च दृष्टार्थवरणेनादृष्टार्थवरणप्रसङ्गसिद्धेरभावात् । दीक्षणीयादि कर्मेष्टिकं पाशुकं च तन्त्रशब्देनोच्यते । तत्र सर्वत्र होतुर्वरणं क्रियेत कर्तव्यमेवेति ।

सवनीये पशौ सवनीयेषु च पुरोडाशेषु
नाग्न्यन्वाधानं विद्यते ॥ ४ ॥

दीक्षणीयया प्रधानार्थयाऽऽरादुपकारिण्या यजमानसंस्कारिण्या चार्थवादबलेन याज्यालिङ्गेन च सोमदेवतापरिग्रहोऽपि कार्य इति सूचयितुमेव निषेधः । दीक्षणीयया सोमदेवतापरिग्रहासिद्धौ तु तत्कालपातिसवनीयपशुसवनीयपशुपुरोडाशदेवतानामपरिग्रहासिद्धौ सूचीसूत्रन्यायेन तत्पृष्ठलग्नायां निषेधस्यासंगत्यापत्तेः । तस्मादेतन्निषेधबलाद्दीक्षणीयया सोमदेवतापरिग्रहः क्रियत इत्येवाङ्गीकर्तव्यम् । अन्वाधानं द्विविधम् । प्रत्यक्षाग्निग्रहणं प्रथममङ्गम् । तच्च विहरणाभिः साध्यम् । देवतारूपाग्निग्रहणं द्वितीयम् । एवं हीष्टं सूत्रकारस्य देवतारूपाग्नेः परिग्रहणेन देवतापरिग्रहो भवति नतु प्रत्यक्षाग्निधारणेन विहव्यान्वाधानेनेत्यत्रेदमेव लिङ्गम् । आग्नावैष्णवमेकादशकपालं निर्वपेदित्युपक्रम्याऽऽहाग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता एवोभयतः परिगृह्य यजमानोऽवरुन्ध इति देवताया अग्नेर्विष्णोश्च परिग्रहेण प्रधानदेवतापरिग्रह एवोक्तः । प्रधानं सुत्या तदर्था दीक्षा । उक्तं च तृतीया-

ध्याये सप्तमपादे जैमिनिना दीक्षादक्षिणं तु वचनात्प्रधानस्येति सूत्रेणेति । न च दीक्षा सोमस्येति श्रुतेर्दीक्षायाः प्रधानमात्रार्थत्वेऽपि तज्जनकीभूतदीक्षणीयाया आर्थवादिकदेवतापदस्य प्रधानदेवतामात्रपरत्वे प्रमाणाभावेनाङ्गप्रधानसाधारणदेवतापरिग्रहार्थत्वमस्त्विति वाच्यम् । दीक्षा सोमस्येति श्रुत्या दीक्षायाः प्रधानमात्रार्थत्वे सिद्धे तज्जनकीभूताया दीक्षणीयाया अपि प्रधानमात्रपरत्वस्यार्थतः सिद्धिमि(द्धावि)व प्रधानदेवतामात्रपरत्वसिद्धावेतस्या एव श्रुतेः प्रमाणत्वेनाङ्गदेवतापरिग्रहस्यासिद्धत्वेन तदर्थं तत्तदिष्टिपशुषु अग्न्यन्वाधानविधानस्यात्यन्तं युक्तत्वात् । जैमिनिसूत्रार्थस्तु दीक्षा च दक्षिणा चानयोः समाहारो दीक्षादक्षिणम् । गवाश्वप्रभृतीनि चेत्यनेन समाहारद्वंद्वः । दीक्षा च दक्षिणा च दीक्षा सोमस्य दक्षिणा सोमस्येतिवचनात्प्रधानस्य स्यातामिति । अग्नीषोमीयविकारेऽतिदेशानतिदेशरूपमेतत्प्रयोजनम् । विस्तरस्त्वाकरे द्रष्टव्यः । याज्यानुवाक्ये अपि प्रधानदेवतापरिग्रहमेव वदतः । तत्राग्निश्च विष्णो तप इति याज्यायां विश्वैर्देवैर्यज्ञियैः संविदानौ दीक्षामस्मै यजमानाय धत्तमिति पठ्यते । तत्र विश्वदेवशब्दस्य

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥

इतिकोशाद्गणविशेषरूढत्वावगतौ तत्र वसूनां प्रातःसवनदेवताभूतानां रुद्राणां माध्यंदिनसवनदेवताभूतानामादित्यानां विश्वेषां देवानां च तृतीयसवनभूतानां चैव प्रकृते गणदेवतात्वेन तेषामेव प्रकृते प्रधानदेवतात्वमवगम्यते । एतादृशदेवतापरिग्रहमेव याज्या वदति । दीक्षापालशब्देन सर्वाः सोमेज्यदेवता इन्द्रादयोऽपि गृह्यन्ते । स्वानुकूलस्य भृत्यस्य यथा स्वाम्येव पालकस्तथा सुत्यादेवतानामेव मुख्यत्वेन स्वामित्वात्स्वानुकूलदीक्षापालकत्वम् । विश्वैर्देवैर्युक्तावस्मै यजमानाय दीक्षां धत्तमिति । दीक्षा च प्रधानार्था । अतो देवताः प्रधानार्था एव दीक्षासंपाद(दि)काः । तथाऽग्निरग्रे प्रथमो देवतानामितिपुरोनुवाक्यागतदेवताशब्दोऽपि प्रधानदेवतापर एव याज्यानुरोधात् । एतेनावमपदं यथा निकृष्टार्थकं तथा प्राथम्यार्थकमपि । तथा परमपदापरपर्यायमुत्तमपदमुत्कृष्टार्थकं सचरमार्थकमपि । तथाचाग्निरग्रे प्रथमो देवतानां संयातानामुत्तमो विष्णुरासीदिति सर्वदेवताप्रथमचरमभूतयोरग्नाविष्ण्वोर्ग्रहणे प्रत्याहारन्यायेन मध्यमस्थानां प्रधानदेवतानामिवाङ्गदेवतानामपि ग्रहणमितीयमपि शङ्का निरस्ता भवति । तथाच प्रधानार्थया दीक्षणीययाऽग्निविष्णुयागद्वारेण प्रधानदेवतापरिग्रह एव युक्तो नतु साङ्गप्रधानार्थानां परिग्रहः । यतो वदिष्यति प्रायणीयादिषु पुनर्देवतापरिग्रहार्थमन्वाधाने चोदकप्राप्तेऽपि अग्न्यन्वाधानं यत्परैः प्रतिषिद्धं तदेव पुनर्विहितम् । ननु अत्राप्यग्निः सर्वा देवता इति देवतारूपाग्नेरारम्भेण साङ्गप्रधानार्थेन साङ्गप्रधानदेवतापरिग्रहसिद्धौ कथमग्न्यन्वाधानं विहितमिति चेत्, सत्यम् । देवतारूपाग्नेरारम्भेण देवतारम्भमात्रस्यैव सिद्धेर्नैतदन्वाधानस्य तस्य शब्दान्तरत्वेन कर्मान्तरत्वात् । अत

एवाङ्गभूतेषु पशुष्वन्वारम्भणीयां प्रतिषेधति सवनीयमात्रे चान्वाधानप्रतिषेधात्प्रायणीयादिष्वग्नीषोमीयानूबन्ध्ययोश्चानुजानाति। अत एव निरूढेऽपि धारयत्याहवनीयमित्यन्वारम्भणीयानन्तरमुक्त्वाऽग्नीनन्वादधातीत्याह । ततो ज्ञायत आरम्भे सिद्धेऽपि नान्वाधानं सिध्यतीति। तस्माद्दीक्षणीयया प्रधानदेवतानामेव परिग्रह इति सिद्धम्। ननु सवनीये पशौ सवनीयेषु च पुरोडाशेषु नाग्न्यन्वाधानं विद्यत इति प्रतिषेधादेवेतरत्रान्वाधानसिद्धौ पुनर्विधानं परमतप्रतिषिद्धान्वाधानस्य पुनः प्राप्त्यर्थं यथा कृतं तथा दीक्षणीयायामपि परमतप्रतिषिद्धान्वाधानस्य पुनःप्राप्त्यर्थं कुतो न कृतमिति चेन्न। दीक्षणीयायां तद्विरहेऽपि तत्सिद्धेः। कथमिति चेत्। उच्यते—दीक्षणीयायां जातायां सत्यामेव तस्या देवतापरिग्राहकत्वम् । तस्याश्च ग्रहणार्थं च पूर्वमिष्टेस्तदर्थत्वादिति जैमिनिमते दर्शपूर्णमासप्रकृतीनां सोमेऽग्न्यन्वाधानं व्रतोपायनमारण्याशनं जागरणमन्वाहार्यस्य च दानं पत्न्याश्च संनहनं विमोचनमिति न विद्यन्त इति आपस्तम्बमते प्रायणीयायास्तन्त्रं प्रक्रमयति तत्रैतानि न क्रियन्तेऽग्न्यन्वाधानं व्रतोपायनं पत्नीसंनहनमन्वाहार्य इति ये के च सोम इष्टिपशुबन्धाः सर्वेष्वेवैतानि न क्रियन्त इति भारद्वाजमते च साङ्गप्रधानदेवतापरिग्रहार्थत्वं तत्स्पष्टतया खण्डयितुं तत्र तत्रान्वाधानविधानम्। अन्यथा सवनीये पशौ सवनीयेषु च पुरोडाशेषु नाग्न्यन्वाधानं विद्यत इत्यनेनैव सिद्धेस्तत्र तत्र विधानमपार्थकं स्यात्। अनिष्पन्नाया दीक्षणीयायाः स्वीयदेवतापरिग्रहे सामर्थ्याभावात्। अङ्गदेवतानामपि परिग्रहार्था दीक्षणीयेति वदताऽऽपस्तम्बेनाप्यग्न्यन्वाधानं दीक्षणीयादेवतापरिग्रहार्थमवश्यमङ्गीकरणीयमेव। एवं च परमतस्यापि स्वतुल्यत्वसाधनेन भगवताऽऽचार्येण दूषितप्रायत्वात्तन्मतखण्डनार्थान्वाधानविधानक्लेशो न कृतः। प्रायणीयाया अपूर्वत्वपक्षेऽन्वाधानस्याप्यपूर्वविधानं तत्रेति द्रष्टव्यमिति सुस्थम् । ग्रहणार्थं च पूर्वमिष्टेस्तदर्थत्वादित्युदाहृतजैमिनिसूत्रार्थस्तु पूर्वमन्वाधानं ग्रहणार्थमपि निवर्तेत, इष्टेर्दीक्षणीयाया अपि तदर्थत्वादन्वाधानार्थत्वादिति।

इत्योकोपाह्वश्रीमदग्निष्टोमसाहस्राग्निचयनसहितवाजपेयसर्वतोमुखद्विसाहस्राग्निचयनसहितपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य प्रथमः पटलः ॥ १ ॥

---

१ ख. ग. °नि क्रि°। २ ख. ग. °नि क्रि°।

अथ सप्तमप्रश्ने द्वितीयः पटलः ।

प्रायणीयायास्तन्त्रं प्रक्रमयति ।

प्रपद्यतेऽनया यज्ञं दीक्षित इति प्रायणीया तत्संबन्धितन्त्रं कर्मकलापस्तं प्रक्रमयति आरभत इत्यर्थः । स्वार्थे णिजयम् । अथवा परार्थ एव णिच् । तत्र प्रयोजको यजमानः प्रयोज्योऽध्वर्युरिति । अनेनेदं ज्ञाप्यते प्रायणीयायास्तन्त्रस्य प्रक्रमं कुर्विति प्रेरणावाक्यं प्रयोक्तव्यमिति । एतच्च प्रायणीयायामेवादृष्टार्थमिति ज्ञेयम् ।

तत्र यावत्क्रियते तद्व्याख्यास्यामः ।

तत्र प्रायणीयासंबन्धिनि तन्त्रे यावत्कर्तव्यं तन्त्रं तद्व्याख्यास्यामो नानाश्रुतिभ्य उपसंहृत्य कथयिष्याम इत्यर्थः । अपूर्वत्वमेतस्या इष्टेर्द्योतयितुमेवैतत्सूत्रम् । अथ प्रायणीया तत्र यावत्क्रियते तद्व्याख्यास्याम इत्येतावत्येव लाघवाद्वक्तव्ये प्रायणीयायास्तन्त्रं प्रक्रमयतीति गुरुसूत्रकरणमध्वर्युतन्त्रविषय एवापूर्वत्वं न हौत्रादितन्त्रविषय इति । तेन देवा यो इत्यादि वाचस्पत इत्यादि च प्रकृतिवत्सर्वमत्र भवत्येव । अत्र यत्प्रापणे तत्संबद्धत्वेनान्यान्यपि कर्माणि प्राप्नुवन्ति तत्परो यावच्छब्दः । तेनेध्माबर्हिराहरतीत्युक्तौ न केवलमाहरणमात्रं किंत्वसिदादानादिकः सर्वोऽपि विधिर्भवति बर्हिषः प्रोक्षणादिकं च । एवमन्येष्वपि द्रष्टव्यम् । एतादृशकर्मभिन्नचोदकपरिलोपकत्वादपूर्वत्वम् । तच्च चोदकप्राज्यभागप्राशित्रहरणादि । अपूर्वत्वमूलीभूता श्रुतिः साक्षाद्यद्यपि नास्ति तथाऽपि भगवदाचार्यवचनबलादनुमीयत इति ज्ञेयम् ।

अग्नीनन्वाधायेध्माबर्हिराहरति ।

अपूर्वत्वादप्राप्तमन्वाधानं विधीयते । इष्टेः कृत्स्नत्वपक्षे त्वपूर्वत्वाभावेऽपि परैः प्रतिषिद्धत्वाद्विधानम् । ननु अग्नीनन्वाधाय बर्हिराहरतीत्येतावदेव वक्तव्यमिध्माहरणं तु सप्तदश सामिधेन्य इत्यादिविधानादेव सिध्यतीति चेन्न । तस्याऽऽधारसमित्परिधिसहितेध्माहरणप्रापणार्थत्वात् । तेनाऽऽधारपरिधिपरिधानं च सिद्धं भवति । क्रमप्राप्तानुवाद इष्टेः कृत्स्नत्वपक्षे पौर्णमासतन्त्रत्वख्यापनार्थः ।

सप्तदश सामिधेन्यो नानूयाजसमिधमुपसंनह्यति यद्यनूयाजा न भवन्ति ।

नानूयाजसमिधमुपसंनह्यतीत्येतावदुच्यमानेऽनूयाजसत्त्वेऽपि अपूर्वत्वादनूयाजसमिदभावः स्यात्तद्वारणार्थं यद्यनूयाजा न भवन्तीति । अनूयाजा न वा भवन्तीत्यनूयाजाभावविधानादेवानूयाजसमिधस्तत्संबन्धित्वादभावसिद्धौ नानूयाजसमिधमुपसंनह्यति यद्यनूयाजा न भवन्तीति विशिष्टं वचनं कृत्स्नत्वपक्षेऽनूयाजानां विकल्पो न भवति किं तु नियता एवेतिज्ञापनार्थम् । आतिथ्यायामनूयाजाभावेऽपि अनूयाजसमिदस्ति । सा च

समिधो अग्न आहुतेत्यस्यां प्रक्षेपणीयदारुभिः सहैव प्रक्षेपणीयेतिज्ञापनार्थम् । सूत्रार्थस्तु स्पष्ट एव ।

वेदं कृत्वाऽग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीꣳ स्तीर्त्वा यथार्थं पात्राणि प्रयुनक्ति स्थालीं कपालानाꣳ स्थाने प्रयुनक्ति ।

वेदं कृत्वेत्यनेन वेदसंबद्धकर्मणां सत्त्वं सूच्यते । अन्यथा वेदकरणस्य निरर्थकत्वापत्तेः । वेदसंबद्धकर्माणि वेदिसंमार्जनं वेदेनोपयम्योपबिलं स्थाल्या जुहूं धारयमाण इति वेदेनोपवाज्येति । वेद्याच्छादनस्य बर्हिष्प्रयोजनत्वेन वेदिकरणं विना वेद्यसंभवेन बर्हिराहरणविधिबलाद्वेदिकरणमपि सूचितं भवति । वेदं कृत्वेति क्त्वाप्रत्ययान्तोऽनुवादो वेदकर्ताऽध्वर्युः स एवात्राग्निपरिस्तरणकर्तेति समानकर्तृकत्वार्थः । अनेनाऽऽग्नीध्रादीनां निवृत्तिरत्र । अग्नीन्परिस्तीर्येति ल्यप्प्रत्ययान्तोऽनुवादः समानकर्तृकत्वार्थः । तेन पाणिप्रक्षालनकर्ता यः स एवाग्निपरिस्तरणकर्तेति । तेन पाक्षिकान्यकर्तृकत्वव्यावृत्तिः । प्रैषस्य त्वात्मार्थताया अपि सत्त्वान्न निवृत्तिः । प्रकृतौ ल्यप्प्रत्ययान्तप्रयोगादेव पाणी प्रक्षाल्येत्यपेक्षितम् । अन्यथाऽग्नीन्परिस्तीर्योलपराजीꣳ स्तीर्त्वेत्येवमुच्यमाने पाणिप्रक्षालनस्य निवृत्तिरेव स्यात् । अतः पाणिप्रक्षालनानिवृत्त्यर्थमिदं वचनम् । पाणी प्रक्षाल्येत्ययं ल्यप्प्रत्ययान्तोऽनुवादः । प्रकृतावेवैवमस्तीति हेतोः । सभ्यावसथ्यपक्षे तयोरपि परिस्तरणम् । उलपाः शुष्कदर्भाः । बल्वजतृणानीति केचित् । उशीरतृणानीत्यन्ये । ऊर्ध्वतृणानीति परे । तेषां राजी पङ्क्तिस्तां स्तीर्त्वा विस्तारयित्वा यथार्थं यथाप्रयोजनं पात्राणि प्रयुनक्तीत्यर्थः । यथार्थमितिवचनं प्रयोजनाभाववतां शम्यादृषदुपलाकुटरुपिष्टमर्जनार्थमेक्षणान्वाहार्यस्थालीमदन्तीपात्रयोक्त्राणां निवृत्तिं प्रदर्शयितुम् । अपूर्वत्वपक्षे प्राशित्रहरणस्यापि । स्थालीं कपालानाꣳ स्थाने प्रयुनक्तीति वक्ष्यमाणसूत्रादेव कपालानां निवृत्तिः । नच दृषदुपलयोः कुटरोश्च शम्यया समाहननपक्षे शम्याया वा समाहननार्थमासादनमस्तु इति वाच्यम् । चरौ समाहननस्य दृषदुपलसंस्कारार्थत्वेन प्रकृते दृषदुपलयोः प्रयोजनाभावेन तदभावे तत्संस्कारस्य समाहननस्याप्यभावात् । समाहननाभावादेव तत्करणस्य कुटरोः शम्याया वाऽपि निवृत्तिः । स्पष्टं सर्वमेतदाह भरद्वाजः—असति द्रव्ये कर्मलोपो यथा चरौ समाहननमाप्येभ्यो निनयनमिति । तत्र द्वंद्वत्वसंपत्तिरेवम्—स्फ्यः समेक्षणस्थाली चेति द्वंद्वम् । कृष्णाजिनं तृणं चेति द्वंद्वम् । सूत्रान्तरे द्वंद्वतार्थं तृणप्रयोगस्य विहितत्वात् । आज्यस्थाली तृणं चेति द्वंद्वम् । पात्री तृणं चेति द्वंद्वम् । प्राशित्रहरणाभावे वेदं तृणं चेति द्वंद्वम् । स्तीर्त्वेति क्त्वाप्रत्ययेन तूष्णीं दक्षिणां तूष्णीमुत्तरामिति ब्रह्मयजमानसदनकरणं च व्यावर्त्यते । अथवा राजीमिति जातावेकवचनम् । तेन तूष्णीं दक्षिणां तूष्णीमुत्तरामिति भवत्येव । ब्रह्मयजमानसदनकरणं त्वत्र व्यावृत्तत्वात् तयोरुपवेशनकाल एवाध्वर्युणा कर्तव्यम् ।

दर्भास्तरणपात्रप्रक्षालने तु भवत एव । तयोरङ्गत्वेनाव्यवधायकत्वात् । स्थाली लोकप्रसिद्धा तां कपालानां स्थाने कपालानामतिदेशप्राप्तानां चरुपाकासमर्थानां स्थाने तत्प्रयोजन उद्देश्ये पात्रप्रयोगकाले प्रयुनक्ति । उत्तरसंस्कारानपि तुल्यान्कपालवदित्यर्थोऽन्यस्मिंश्च द्रव्य इति सूत्र उदाहृत एव । चरुकल्पान्व्याख्यास्यामः स्थालीं कपालानाᳪ स्थाने प्रयुनक्तीत्यादिनैवात्र सिद्धेरत्र पुनर्वचनमपूर्वत्वेन कपालधर्माणामप्राप्तिः स्यात्तां वारयितुम् । स्थालीं कपालानाᳪ स्थाने प्रयुनक्तीतीतरचरुधर्मप्रदर्शनार्थम् ।

निर्वपणकालेऽदित्यै प्रायणीयं चरुं निर्वपति पयसि श्रपयति ।

प्रकृष्टमयनं गमनं यज्ञं प्रति यज्ञेन सह संबन्ध इति यावत् । तत्प्रायणं तदर्हतीति प्रायणीयः । प्रधानस्य दूरत्वेऽपीत आरभ्य प्रधानकालपर्यन्तं वर्तमानत्वमेवात्र प्रकर्षः । तत्र प्रधानकालवर्तमानत्वं निष्कासद्वारा । अयधातोर्गत्यर्थकत्वेऽपि प्रकृते संबन्धार्थकत्वं स्वी क्रियते । दृष्टं ह्यन्यत्र धातूनामनेकार्थत्वम् । निर्वपणकाल इति वचनं पवित्रकरणादिसूचनार्थम् । अन्यथाऽपूर्वत्वेनाप्राप्तिः स्यात् । प्रायणीयमिति ब्राह्मणव्याचिख्यासयेति द्रष्टव्यम् । पयसि प्रणीतावत्प्रणीते पयसि नतु वत्सापाकरणादिभिर्धर्मैरुत्पादिते पयसि । तथाच नवमाध्याये चतुर्थपादे जैमिनिः—प्रदानदर्शनं श्रपणे तद्धर्म भोजनार्थत्वात्संसर्गाच्च मधूदकवत् । अधर्म त्वप्रदानात्प्रणीतार्थे विधानादतुल्यत्वादसंसर्ग इति । आदित्यः प्रायणीयः पयसि चरुरित्यत्र चरोर्देवतासंबन्धस्य पयसश्चरुसंबन्धस्य च विधौ वाक्यभेदापत्तेर्द्रव्यद्वयविशिष्टदेवतासंबन्धविधिः । आधारत्वं तु पयसः सहश्रपणादर्थसिद्धमिति प्राप्ते पयस्यादित्यश्चरुरित्यधिकरणद्रव्योभयविशिष्टदेवतासंबन्धविधौ वाक्यभेदाभावात्पयसो न प्रदेयत्वम् । अतो न वत्सापाकरणादिभिः पयः संबध्यते किंतु प्रणीताधर्मैरेवेति सिद्धान्तः । सूत्रार्थस्तु—श्रपणे सहश्रपणे प्रदानमपि सह दृश्यते चरोः पयसा सह त्यज्यमानत्वानुभवात् । अतस्तद्धर्मै तस्य प्रदेयस्य धर्मा यस्मिंस्तथाभूतं भोजनार्थत्वाद्यागार्थत्वान्मधूदकवत्संसर्गाच्चित्रेष्टिवदिति पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु—अधर्म न विद्यन्ते धर्माः प्रदेयधर्मा यस्य तदधर्म । मधूदकदृष्टान्तवैलक्षण्यद्योतनाय तुशब्दः । अप्रदानात्प्रदानाभावात् । दधि मधु घृतमापो धानास्तत्संसृष्टमितिवदत्र सह श्रपणं नास्ति उभयोरत्र समप्रधानत्वाभावात् । तर्हि पयसो विधानं किमर्थमिति चेदित्यत आह—प्रणीतार्थे विधानादिति । अतश्चरुवत्प्रथमानिर्देशो नास्ति किंतु सप्तमीनिर्देशः । सप्तम्या चाऽऽधारभूतत्वम् । अत एवातुल्यत्वादित्युक्तम् । अतो न प्रदेयधर्मा इति । असंसर्गः, मधूदकवत्संसर्गो न भवति । तुल्यद्रव्यसंसर्गो न भवति किंत्वाधिकः संसर्ग इति । यजुरुत्पूते वा श्रपयति ।

---

१ क. ख. ग. °त्वमप्र° ।

चतुर्गृहीतान्याज्यानि गृह्णाति यद्यनूयाजा न भवन्ति ।

प्रथमगणस्य प्रयाजार्थत्वात्तमेव गृह्णाति । द्वितीयगणस्य त्वनूयाजार्थत्वान्न तं गृह्णाति अनूयाजाभावपक्षे । अनूयाजसत्त्वे तु तमपि गृह्णातीत्यर्थः । चतुर्गृहीतमेवोपभृति यद्यनूयाजा न भवन्तीत्येवं वक्तव्यं तावतैवाष्टगृहीतव्यावृत्तौ चतुर्गृहीतान्याज्यानि गृह्णातीत्येवं वचनं प्राकृतं पाक्षिकं पञ्चगृहीतं व्यावर्तयितुम् । यद्यनूयाजा न भवन्तीति वचनमेतद्वचनाभावेऽनूयाजसत्त्वेऽपि उपभृति चतुर्गृहीतमेव स्यान्नाष्टगृहीतमिति तद्व्यावर्तयितुम् । आज्यपदग्रहणेनेदं ज्ञाप्यते पदार्थाभावाधीन एव विशेषो निर्वपणोत्तरं नत्वपूर्वकृतो विशेष इति । तेनैतदुत्तरं प्राकृतं सर्वं तन्त्रं भवति ।

षड्ढोत्रा प्रायणीयमासादयति ।

चरुमिति शेषः । तस्याः प्रायणीयया कल्पो व्याख्यात इति वक्ष्यमाणसूत्रादुदयनीयायां चरोरासादने षड्ढोतुः प्राप्तिः स्यात्तां वारयितुं प्रायणीयमिति वचनम् । अहोमार्थत्वादग्रहोऽस्वाहाकारः षड्ढोता । अत्र सूर्यं ते चक्षुरित्येव षड्ढोता नतु वाग्घोतेति प्रायश्चित्ती वाग्घोतेति श्रुतौ सूत्रे च प्रायश्चित्तीति श्रवणात्तस्य प्रायश्चित्त एवोपयोगात् ।

सर्वमिध्ममादधाति सर्वमौपभृतꣳ
समानयते यद्यनूयाजा न भवन्ति ।

सर्वमौपभृतं समानयतेऽनूयाजाभावपक्षे । अनूयाजसत्त्वे तु तदर्थं द्वितीयगणस्य गृहीतत्वान्न सर्वस्यौपभृतस्य समानयनम् । अनूयाजसमिधं नावशेषयति औपभृतमाज्यं च । अनूयाजाभावादिति भावः । सर्वमिध्ममादधातीतिवचनं प्रतिसामिधेनि वेतिप्राकृतपक्षान्तरनिवृत्त्यर्थम् । सर्वमौपभृतꣳ समानयत इतिवचनं प्रयाजार्थाज्यस्यैकप्रयत्नेनैवाऽऽनयनं विधातुम् । एतेन ज्ञायते पशुबन्धे चातुर्मास्येषु च सोमे च विगृह्य विगृह्यैवाऽऽनयनमिति ।

आज्यभागाश्चतुरो यजति पथ्याꣳ स्वस्तिं पुरस्ता-
दग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतोऽदितिं मध्ये
हविषा स्थालीं निष्कासं मेक्षणं च निदधाति ।

आज्यं भागो येषां त आज्यभागा आज्यहविष इत्यर्थः । तांश्चतुरो यजति । कथमित्याकाङ्क्षायां पथ्याꣳ स्वस्तिमित्यादि । हविषा चरुणेत्यर्थः । आज्यभागाश्चतुरो यजतीति सामान्यप्रतिज्ञा । उत्तरत्र चतुर्णां संकीर्तनादेव चतुष्ट्वे सिद्धे चतुरो यजतीत्यत्र चतुर्ग्रहणं चतुर्णामेको गणो गणत्वादव्ययः स्यादव्यो भूयासं पाप्मानं दभेयमित्यूहेन चतुर्णामन्त एवानुमन्त्रणं भवतीतिज्ञापनार्थम् । पथ्याꣳ स्वस्तिमित्यादि सवितार-

मुत्तरत इत्यन्तं [1]देवतादिग्विधानार्थम् । ननु पथ्याꣳ स्वस्तिमग्निं सोमं सवितारमित्येकैकां प्रतिदिशं यजतीत्येतावतैव प्रतिदिशं यागस्य सिद्धौ पुरस्तादित्यादिदिग्वचनं पथ्याꣳ स्वस्तिमयजन्प्राचीमेव तया दिशं प्राजानन्नित्याद्यर्थवादज्ञानावश्यकत्वद्योतनार्थम् । पथ्यास्वस्त्यादीनां ध्रौवमाज्यं तस्य सर्वार्थत्वात् । नन्वदितिं मध्य इत्येतावदेवास्तु चरुलाभस्तु पूर्वानुवृत्त्यैव सिध्यति, एवं च हविषेति वचनं व्यर्थमिति चेन्न । तस्य पञ्चानामपि तुल्यत्वख्यापनार्थत्वेन सार्थक्यात् । पञ्चानां प्राधान्यं श्रुतावप्युक्तं पञ्च देवता यजतीति । तेनाऽऽज्यहविष्काणां पथ्यास्वस्त्यादीनां प्रधानहविष्ट्वादुपांशुयाजविकारत्वं सिद्धं भवति । नन्वेवं पञ्चानां तुल्यत्वख्यापनार्थं चरुणेत्येव वक्तव्यं किमर्थं हविषेतिवचनमुपात्तमिति चेन्न । तस्य श्रपणोत्तरभाविनामुद्वासनान्तानां हविःसंबन्धिधर्माणामपूर्वत्वेनाप्राप्तानां प्राप्तिं द्योतयितुमुपात्तत्वात् । आज्यभागशब्दः प्रकृते कर्मनामधेयम् । आज्यभागाभ्यामाज्यहविर्भ्यां प्रचरतीति निर्देशात् । आज्यं च निर्दिष्टमस्ति सर्वार्थत्वात्तच्च ध्रौवं हविर्भवति । एवं च नैषां प्राकृताज्यभागकार्यभाक्त्वं तेन प्रधानहवींष्यैवैतानि । सूत्र आज्यभागशब्दश्च यौगिकत्वादाज्यहविष्कत्वमेषामनुवदति सरस्वत्याज्यभागा वायव्य आज्यभाग इतिवत् । उदयनीये पथ्याꣳ स्वस्तिमुत्तमामाज्येन देवतां यजतीतिवचनादप्येषां प्रधानत्वमवगम्यते । यत्र द्विवचनेन निर्देशो यथाऽनुपदावाज्यभागौ जीववन्तावाज्यभागावित्यादिस्तत्रैव प्राकृताज्यभागयोः संप्रत्ययो नान्यत्र । अतः पृथगाज्यभागावपि चोदकप्राप्तौ कर्तव्यौ । आश्वलायनीयहौत्रे पौर्णमासेनेष्टिपशुसोमा उपदिष्टा इति सूत्राद्धार्त्रघ्नौ । याजुषहौत्रेऽपि पौर्णमासतन्त्रत्वाद्वार्त्रघ्नावेव । प्रधानदेवतायाज्यानुवाक्यास्त्वाश्वलायनोक्ता एव । नचाग्निसोमसवित्रदितिदेवतालिङ्गकानां बह्वीनां याज्यानुवाक्यानां स्वशाखायां सत्त्वात्स्वशाखास्थानामेव यासां कासांचिद्ग्रहणम् । पथ्यास्वस्तिदेवतालिङ्गकयाज्यानुवाक्ययोरभावात्तावतो(त्यो)राश्वलायनोक्तयोरेव ग्रहणमिति वाच्यम् । स्वसूत्रे प्रायणीयाप्रयुक्तयाज्यानुवाक्यानामविहितत्वेनाऽऽश्वलायनेन विहितत्वेनाविहितविहितानां मध्ये विहितानामेव ग्रहणस्य युक्तत्वात् । हौत्रशास्त्रविषये स्वसूत्रे वचनाभाव आश्वलायनोक्तस्यैव प्रबलत्वाच्च । नचैवमाश्वलायनोक्तानामेव ग्रहणमस्तु माऽस्तु यासां कासांचित्तथाऽपि पाठस्तु स्वशाखारीत्यैव भवत्विति वाच्यम् । एतस्य मन्त्रपाठस्यात्र सावकाशत्वेनाविधानानुरोधेन तत्पाठस्यैव ग्रहीतुमुचितत्वात् । सवितृदेवताविषयकयाज्यायाः स्वशाखायामभावेन तदुक्तयाज्याग्रहणं तदनुरोधेन तदुक्तानामेव चाऽऽश्वलायनपाठस्यैव ग्रहीतुमुचितत्वात् । विना निर्वाहासंभवेनैतस्या ग्रहण इतरासामपि तच्छाखागतानामेव ग्रहणं प्रकरणनियमितत्वात् । शाखापठितमन्त्रैर्निर्वाहासंभवेनाऽऽग्वेदीनामेवात्र ग्रहणात् । एताभ्यामिष्टोपांशुयाजधर्मे-

---

१ क. °दिग्विधा° ।

भेताश्चतस्रो देवता यष्टव्याः । आज्यभागाविष्ट्वाऽऽज्येन देवताश्चतस्रो यजतीति कात्याय-
नः । कल्पकारश्च संस्रावेण पञ्चकृत्वो ध्रुवामभिघारयतीति ब्रुवन्नाज्यभागयोः सत्त्वं
प्रदर्शयति । तत्र प्राकृताज्यभागार्थमेकमभिघारणं दृष्टम् । उपांशुयाजचतुष्टयार्थं
चत्वारि । प्राकृताज्यभागयोः सत्त्व एवैतद्वचनमुपपद्यते नान्यथा । तस्माद्विद्येते
एवाऽऽज्यभागाविति । अन्यत्तु मतम्—अस्त्वेतेषां प्रधानहविष्ट्वमिहाऽऽज्यभागयोरनुप-
देशात् । आतिथ्यायामुपदेशाच्चक्षुषी वा एते यज्ञस्येत्याज्यभागकार्यस्य चक्षुषः । चक्षुषी
वा एते यज्ञस्य यदग्नीषोमावित्यत्राग्नीषोमयोर्दर्शनात् । सूत्रस्थस्याऽऽज्यभागशब्दस्याऽऽ-
ज्यभागनिवृत्त्यर्थत्वाच्च प्राकृतावाज्यभागौ न भवत इति । आज्यभागाविष्ट्वा यजेते-
त्याश्मरथ्यस्तावेतौ न भवत इत्यालेखन इति भरद्वाजः । शंय्वन्ते यमनाज्यभागेत्याश्वला-
यनः । मेक्षणेन चरूणामिति परिभाषया मेक्षणेनावदानम् । अदितियागानन्तरं मारुती-
मृचमनुब्रूयात् । अदितिमिष्ट्वा मारुतीमृचमन्वाहेति श्रुतेः । तत्र प्रक्षेपानन्तरमेवेति
केचित् । अनुमन्त्रणान्त इत्यन्ये । प्रत्याक्रमणानन्तरमिति परे । इष्ट्वेति क्त्वाप्रत्ययात्प्रक्षे-
पानन्तरमेवेति युक्तम् । मन्त्रसमाम्नाये सूत्रे चानुक्तत्वात्कृताकृतं मारुत्यनुवचनम् । सा
च मरुतो यद्ध व इत्युक्ता बौधायनेन । समाख्यावशादध्वर्युकर्तृकं मारुत्यनुवचनम् ।
नात्राऽऽधानीयादित्यचरुधर्माः । प्रापकाभावात् । स्थाली चरुस्थाली । निष्कासः
स्थालीमेक्षणसंलग्नो लेपः । पर्यालोडनार्था दर्वी मेक्षणम् । निष्कासस्य स्वतन्त्रतयोपा-
दानात्स्थालीतः पृथक्कृत्यैव प्रज्ञातं निदधाति शिक्यादौ । एवं स्थालीमेक्षणे अपि
प्रज्ञाते स्थापयितव्ये । निधानवचनादेव मेक्षणानुप्रहरणं न निष्कासनिधानबलादितरस्य
हविःशेषस्य कृत्स्नस्य स्विष्टकृदादिचतुर्धाकरणान्ता कृत्स्नाऽपि प्रतिपत्तिरस्तीति गम्यते ।
अन्यथा स्थालीं चरुशेषं मेक्षणं च निदधातीत्येव ब्रूयात् । तस्माल्लेपमात्रं निधातव्यं
तद्व्यतिरिक्तस्य सर्वाः स्विष्टकृदादयो यथायथं प्रतिपत्तयः कर्तव्या एवेति । अपूर्वत्वा-
त्प्राशित्रनिवृत्तिः प्राशित्रमपि प्रतिपत्तिरिति केषांचिन्मतम् । अस्मिन्पक्षे प्राशित्रमपि
भवत्येव । चातुर्धाकरणिकब्रह्मभागं ब्रह्माऽपि सर्वैः सहैव भक्षयति । शंयुवाकान्तत्वा-
दिष्टेः शंयुवाकान्ते वा । एतच्चावशिष्टप्रतिपत्तिकर्मणामननुष्ठानपक्षे । अनुष्ठानपक्षे तु
क्रमप्राप्ते स्थाने शेषकरणात्प्राङ्निधानमुत्सर्गकाले वा । अनेन त्यागो व्यावर्त्यते ।
चकारः साहित्यार्थः । तेन त्रयाणामेकत्रैव निधानं भवति ।

ध्रुवायाः शेषं करोति ।

पूर्ववद्व्याख्येयं, प्रयोजनं च पूर्ववत् ।

शंय्वन्ता कृत्स्ना वा ।

भवतीत्येव शेषः । कृत्स्ना भवति न यजमानभागमवद्यति । यदि शंय्वन्तेत्येतावतैव
पाक्षिकशंय्वन्तत्वलाभे शंय्वन्तेतिवचनं शंय्वन्तत्वपक्ष एवायमपूर्वत्वप्रकारो न कृत्स्नत्व-

पक्ष इतिद्योतनार्थम् । तेनान्वाधानप्रभृति कृत्स्नमपि कर्म भवति नतु शंय्वन्तत्वमात्र-निवृत्तिः । शंय्विडान्तत्वे विकल्पः स्यात्परेषु पत्न्यनूयाजस्य प्रतिषेधोऽनर्थकः स्यात्, नित्यानुवादो वा कर्मणः स्यादश(शा)ब्दत्वादिति जैमिनिन्यायानुगुणत्वात्स्वशाखानुगुणत्वाच्च पूर्वः पक्षो मुख्य उत्तरो दुर्बलः । स च न्यायो दशमाध्याये सप्तमे पादे वर्तते । सूत्रार्थस्तु शंय्विडान्तत्वविधानादेव तदुत्तरकर्मनिषेधः सिद्धस्तेनैव पत्नीसंयाजानूयाजनिषेधसिद्धौ पुनरुभयोर्निषेधोऽनर्थको व्यर्थः स्यात् । अत उभयोर्निषेधोऽङ्गान्तराणामकर्तव्यताप्रतिषेधेन कर्तव्यताविधानार्थ इत्यवश्यं वक्तव्यम् । पत्नीसंयाजानेव न कुर्यात्, अन्यानि तु कुर्यादेव । अनूयाजानेव न कुर्यात्, अन्यानि तु कुर्यादेवेति । तेन पत्नीसंयाजानूयाजप्रतिषेधेन कृत्स्नसंस्थाविधानाच्छंय्विडान्तवचनेन तत्संस्थाविधानाद्द्वयोः संस्थयोर्विरोधाद्विकल्पो भवेदिति पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु नित्यानुवादो नित्यत्वाय शंय्विडान्तविधेर्नित्यत्वाय । अयमेव विधिर्नित्यो न कृत्स्नसंस्था । तस्मात्प्रशस्तोऽयमेव विधिरिति प्राशस्त्यायानुवादो नित्यानुवादः । वाशब्दः पूर्वपक्षव्यावर्तकः । नित्यानुवादो निषेधो नतु पत्नीसंयाजानूयाजेतरकृत्स्नकर्मविधायक इति । कुतः, कर्मणः पत्नीसंयाजानूयाजातिरिक्तकर्मणोऽश(शा)ब्दत्वाच्छब्देन विधिना गम्यः शाब्दो न शाब्दोऽशाब्दस्तस्य भावस्तत्त्वं तस्मात् । कृत्स्नसंस्थापरतायां स्पष्टो विधिर्नास्ति येन विकल्पो वक्तव्यः । नित्यानुवादत्वेनोपपत्तेर्विधिपर्यवसानकल्पनमयुक्तम् । तथाच नैव कृत्स्नसंस्थेति संस्थाप्यपक्षे पत्नीसंयाजानां विकल्पः । तथाचाऽऽपस्तम्बः—शंय्वन्ता सꣳस्थाप्या वा पत्नीस्तु न संयाजयेत्ता उदयनीये संयाजयेत्समे वा कार्ये इति । समे उभे अपि पत्नीसंयाजवत्याविल्यर्थः । ननु प्रकृतौ द्वौ शंयू पत्नीसंयाजानां पुरस्तादेकः पश्चादन्यः । तत्रोत्तरेणैव शंयुना तदन्तताविधिः । एवं च शाखान्तरीयः पत्नीसंयाजनिषेधोऽप्यर्थवान् । अन्यथाऽनुवादमात्रत्वापत्तेः । अतः पत्नीसंयाजवर्जमुत्तरशंय्वन्तं सर्वं कार्यमिति चेन्न । प्रयोगोपरमस्यैव शंय्वन्तत्वे निमित्ते विधानात्पूर्वस्मिन्नपि शंयौ कृते निमित्तस्य संजातत्वेन तत्रैवोपरमस्य युक्तत्वात् । पत्नीसंयाजप्रतिषेधस्तु नित्यानुवादत्वेनार्थवादमात्रमौचित्येन शंय्वन्तत्वस्तुत्यर्थं न विरुध्यते । तथाच दशमेऽध्याये षष्ठे पादे जैमिनिः—'प्रतिषेधार्थवत्त्वाच्चोत्तरस्य परस्तात्प्रतिषेधः स्यात्, प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात्' इति । सूत्रार्थस्तु पत्नीसंयाजानूयाजप्रतिषेधार्थवत्त्वादुत्तरस्य शंय्विडस्य परस्ताद्यत्कर्तव्यं तस्य प्रतिषेधः स्यादिति । तथाचानुवादो न भवति निषेधे किंतु इतरकर्तव्यताबोधक एवेति । तथाच पूर्वाधिकरणसिद्धान्तोपरि आक्षेपकमिदमधिकरणमिति पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु पूर्वस्य शंय्विडस्य प्राप्तेरतिक्रमो वचनात्स्पष्टवचनात्स्यात् । उपस्थितपरित्यागे स्पष्टवचनाभावात्पूर्वत्रैवोपरम इति ।

न यजमानभागमवद्यति यदि शंय्वन्ता ।

शंयुनाऽन्तो यस्याः सा शंय्वन्ता । शंयुवन्तेति पाठोऽपपाठ एव । न यजमानभागमवद्यति सर्वेषु सौमिकेष्विष्टिपशुबन्धेष्वित्यनेनैव निषेधसिद्धाविदं वचनं कृत्स्नायां यजमानभागनिषेधो नात्र प्रवर्तत इति बोधयितुम् । कृत्स्नायां यजमानभागसत्त्वमनेन गम्यते । ध्रुवाशेषस्याग्रे कार्यान्तरविधानात्संस्थाप्यपक्षेऽपि न समिष्टयजुः । नच यज्ञविमोकः । संस्थाप्यपक्षेऽन्तिमप्रायश्चित्ताहुत्यर्थग्रहणयोर्नाऽऽप्यायनम् । स्विष्टकृदभिघारणद्वये त्वाप्यायनं भवत्येव । दक्षिणादानवर्जं ब्राह्मणभोजनान्तमितरत्सर्वं भवति ।

अत्र राज्ञो निवपनमेके समामनन्ति ।

राज्ञो निवपनमुत्तरवेदिदेश इत्यारभ्य प्रैषान्तं कर्म प्रागुक्तं तत्तत्र न कर्तव्यं किंत्वत्रास्मिन्काले कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः ।

ध्रुवाशेषाच्चतुर्गृहीतं पञ्चगृहीतं वा गृहीत्वेयं ते शुक्रतनूरिति दर्भेण हिरण्यं निष्टर्क्यं बद्ध्वाऽऽज्येऽवदधाति ।

चतुरवत्तिनश्चतुर्गृहीतं पञ्चावत्तिनः पञ्चगृहीतमिति व्यवस्थितविकल्प इति केचित् । प्राकृतं ध्रुवाप्यायनम् । निष्टर्क्यं शिखाबन्धनवद्दर्भेण हिरण्यं वलयाकृति बद्ध्वा जुह्वां गृहीत आज्येऽवदधाति येन हिरण्यं बद्धं तं दर्भं धृत्वा दर्भबद्धं तद्धिरण्यं जुह्वां गृहीत आज्येऽवनतः सन्क्षिपतीत्यर्थः । निष्टर्क्यशब्दश्छन्दसि निष्टर्क्यदेवहूयेति सूत्रेण निपातनात्साधुः । गच्छेत्यन्तो मन्त्रः । प्रसूनरहिता दीर्घा दर्भाः । कुशास्तु ह्रस्वाः सप्रसूनाः । यत्परुषि दिनं तद्देवानामिति श्रुतेर्दैवकार्येष्वेते दर्भाः पर्वच्छिन्ना एव । यत्समूलं तत्पितृणामिति श्रुत्या पितृकार्येषु समूलत्वोक्तेरर्थाद्दैवकार्येषु अमूलत्वं दर्भेषूक्तं भवति । तृणं तु च्छिन्नाग्रो दर्भ इति सार्वत्रिकम् । रजतसुवर्णयोर्हिरण्यत्वाविशेषेऽपि तस्मात्सुवर्णꣳ हिरण्यं भार्यमित्यादिना सुवर्णरूपहिरण्यस्यैव सर्वदा भार्यत्वोक्त्या पवित्रत्वोक्ते रजतस्य दुर्वर्णत्वेनामङ्गलत्वात् ।

अमङ्गलं तद्यत्नेन देवकार्ये विवर्जयेत् ।

इति स्मृतौ देवकार्ये तन्निषेधादश्रुजत्वेन निन्दितत्वाच्च सर्वत्र देवकार्ये सुवर्णात्मकहिरण्यस्यैव ग्रहणं नतु दुर्वर्णरजतात्मकस्य । तत्र हिरण्यस्य मानमैच्छिकम् । तस्मिन्नवदधातीत्येतावतैव सिद्ध आज्यग्रहणं श्रुतौ घृतशब्द आज्यमात्रमाचष्टे नतु यदध्रियत तद्घृतमभवदितिश्रुतिसिद्धघनीभूतमेवाऽऽज्यमाचष्ट इति दर्शयितुम् । अतो घनीभूतत्वस्यावधानसमये न नियमः ।

उपकृता सोमक्रयणी समङ्गा बन्धुमती यथाऽग्नीषोमीयो बभ्रुररुणा रोहिणी वोपध्वस्ता अपीनाऽथ त्रा

रोहिणी पिङ्गाक्षी बभ्रुलोम्नी श्वित्रोपकाशा पृश्निवाला पृश्निशफैकहायनी द्विहायनी त्रिहायणी वा जूरसीति तामीक्षमाण एतच्चतुर्गृहीतं जुहोति ।

अन्वारब्धे यजमान इति बौधायनः । सोमः क्रीयते यया गवा सा सोमक्रयणी सोपकृप्ता भवति । उपकृप्तेति भूतनिर्देशादेतद्दिवसानुष्ठानारम्भात्पूर्वमेवोपकल्पनं कर्तव्यमित्यवगतं भवति । समङ्गा संपूर्णाङ्गा । बन्धुमती, अत्र बन्धुशब्देन स्वहिता मातृपितृभ्रातृसखायो गृह्यन्ते । तेन मातृपितृभ्रातृसखिमतीत्यर्थो भवति । अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्य इति मन्त्रवर्णादयमर्थो लभ्यते । यथाऽग्नीषोमीय इत्यनेन वक्ष्यमाणे स्थूलत्वपीवत्वे अतिदिश्येते । यथा निरूढपशुबन्ध इत्यग्नीषोमीये वचनादुपकृतः पशुरकूट इत्यादीनि पशुसूत्रोक्तानि लक्षणान्यप्यतिदिश्यन्ते । उपकृप्ता सोमक्रयणी यथाऽग्नीषोमीय इत्येतावतैव समङ्गत्वबन्धुमत्त्वसिद्धौ पुनर्वचनं समङ्गत्वबन्धुमत्त्वे एवाऽऽवश्यके न यमान्यतरत्वं स्थूलत्वं पीवत्वं चापीति । कृष्णश्वेतत्वं तु बभ्रुत्वादिविशेषविधानादेव निवृत्तं भवति । बभ्रुः पिङ्गला । अरुणा कपिशवर्णा । रोहिणी सत्युपध्वस्ता, उपध्वस्ताऽन्येन वर्णेनाभिभूतो यो वर्णः स उपध्वस्तस्तद्वती क्वचित्प्रदेशे केवलरोहिणी क्वचित्प्रदेशे मिश्रितवर्णा, एतादृशवर्णद्वयविशिष्टेत्यर्थः । बभ्रुवर्णा, अरुणवर्णा, लोहितमिश्रितवर्णात्मकवर्णद्वयवतीति त्रितयान्यतमा सोमक्रयणीत्यर्थः । रोहिणी, उपध्वस्तेति द्वयोः पृथक्पदार्थत्वेऽग्रे रोहिणीपदवैयर्थ्यापत्तिरतो विशिष्ट एव पदार्थः । न चैवमपि तद्दोषतादवस्थ्यं शङ्क्यम् । तस्य केवलरोहितवर्णपरत्वेन तदभावात् । प्रपीना मांसला । केचित्तु अप्रपीनेतिपदच्छेदं कृत्वा प्रपीनोष्ट्ररोमसदृशवर्णा तदन्येति व्याचक्षते । मध्येऽथशब्दो भिन्नक्रमार्थः । तेनेत उत्तरं सर्वं समुच्चितमेव विकल्पते । अत्राऽऽपस्तम्बो विशेषमाह—द्विरूपया राजन्यस्येति । द्विरूपा श्वेतकृष्णा । यच्छ्वेतया क्रीणीयाद्दुश्चर्मा यजमानः स्याद्यत्कृष्णयाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्यादिति पूर्वत्र तयोरेव वर्णयोरुपक्रान्तत्वात् । षोडश्यादौ विशेषो वक्ष्यते । रोहिणी केवलरक्तवर्णा । पिङ्गाक्षी पिङ्गनेत्रा । बभ्रुलोम्नी प्ररूढकपिलवर्णलोम्नी नानाजातीयवर्णैर्लोमभिः क्वचित्क्वचिदुपेता वा । श्वित्रोपकाशा श्वित्रं चित्रं कुष्ठं तत्समानवर्णा । बाला अक्ष्णोर्यस्याः सा पृश्निवाला श्वेतपृषत्कवाला । पृश्निशफा श्वेतपृषत्कखुरा । एकं हायनं यस्याः सैकहायनी । एवं द्विहायनी त्रिहायणीत्यत्रापि, हायनशब्दो वर्षवाची, एकवर्षा द्विवर्षा त्रिवर्षा वेत्यर्थः । दामहायनान्ताच्चेत्यनेन सूत्रेण ङीप् । त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यमिति त्रिहायणीत्यत्र णत्वं, वयोवाचकत्वान्ङीब्णत्वे युक्ते एवात्र । एतच्चैकहायनीत्वादिकं साधारणं ज्ञेयम् । नचारुणयैकहायन्या सोमं क्रीणातीत्यत्रारुणगुणस्यामूर्तत्वेन क्रयसाधनत्वासंभवात्तदी-

यद्द्रव्येषु वासःप्रभृतिषु सर्वेषु निवेश इति वाच्यम्। अमूर्तस्यापि द्रव्यपरिच्छेदद्वारा साधनत्वसंभवेन द्वारापेक्षायां च स्ववाक्योपात्तैकहायनीसंबन्धस्य कल्पनेनैकहायन्यामेव निवेशस्य मीमांसकैरङ्गीकारात्। तथा च तृतीयाध्याये प्रथमे पादे जैमिनिः—अर्थैकयत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादिति। सूत्रार्थस्तु—अर्थैकयत्वे तत्प्रयुक्तैकवाक्यत्वे द्रव्यगुणयोरैककर्म्यादेकक्रयरूपकर्मार्थत्वान्नियमः परस्परान्वयरूपः स्यादिति। तां सोमक्रयणीं गामीक्षमाणः पश्यन्नूरसीति मन्त्रेणैतत्पूर्वगृहीतं चतुर्गृहीतं जुहोति। ईक्षमाण इति वर्तमानशानचेक्षणहोमयोः समकालत्वम्। प्राग्वंशाभ्यन्तर एव पुरस्तादाहवनीयस्य प्राङ्मुखी सोमक्रयणी गौः स्थाप्या। कामादेकद्वारे सर्वतः परिश्रिते बहिःस्थिताया ईक्षणानुपपत्तेः प्राग्वंशाभ्यन्तरे स्थापनम्। एतच्चतुर्गृहीतमिति विशिष्टैकवचनेनोभयोर्विनियोगादिदं ज्ञायते यत्र यत्रैतच्छब्दपूर्वकचतुर्गृहीतविनियोगविधिस्तत्र पञ्चगृहीतविधिर्विकल्पते। शते पञ्चाशदिति न्यायेन पञ्चसंख्यायामपि चतुःसंख्याया अनुप्रवेशाच्चतुर्गृहीतहोम एव सः। अधिकं प्रविष्टं नतु तद्धानिरिति न्यायादधिकसंख्याप्रवेशेऽपि चतुःसंख्याया हानिर्नास्ति। नचैवं षड्गृहीताद्यतिप्रसङ्गस्तत्रापि चतुःसंख्यानुप्रवेशसत्त्वादिति वाच्यम्। चतुर्गृहीतहोमसंबन्ध्यर्थवादस्य चतुष्पादः पशवः पशूनेवावरुन्धे चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठतीत्यस्य पञ्चगृहीतं भवति पाङ्क्ता हि पशवः पञ्च देवता यजति पञ्च दिशो दिक्ष्वेव प्रतितिष्ठतीत्युभयवाक्यगतपञ्चसंबन्ध्यर्थवादस्य च समत्वेन षट्संख्यादिषु तदभावेनातिप्रसङ्गवारणात्। न्यूनसंख्यावारणं तु चतुःसंख्याया अनुप्रवेशाभावादेव सिध्यति। अत इदं सिद्धमेतच्छब्दपूर्वकचतुर्गृहीतविनियोगविधौ पञ्चगृहीतमपि विकल्पत एव तेनापि चतुर्गृहीतहोमविधिसिद्धिरिति। नच चतुर्गृहीतवचनस्य हिरण्यव्यावृत्त्यर्थत्वमेवास्तु इति वाच्यम्। हिरण्यव्यावृत्तेस्तु घृतादुद्धरतीत्यग्रे विधानादेव तत्सिद्धत्वेनैतस्य तद्व्यावृत्त्यर्थत्वानुपपत्तेः, चतुर्गृहीतवचनवत्पञ्चगृहीतवचनस्यापि कर्तव्यतापत्तेश्च।

अपरं चतुर्गृहीतं गृहीत्वा शुक्रमस्य-
मृतमसीति हिरण्यं घृतादुद्धरति।

अपरमिति वचनं पूर्वेण संबन्धार्थम्। तेनेयमपि ध्रुवाशेषादेव होतव्या। अपरमित्येतावत्येवोच्यमाने पञ्चगृहीतस्यापि पक्षे प्राप्तिः स्यात्सा मा भूदित्येतदर्थं चतुर्गृहीतवचनम्। प्रथमयोर्ध्रुवाप्यायनं ध्रौवसमाप्तिः। घृतवचनमाज्यस्य द्रवीभूतत्वं सूचयितुम्। घृ क्षरणदीप्त्योरित्यस्माद्धातोरञ्जिघृसिभ्यः क्त इत्युणादिसूत्रेण क्तः। एतेन घृतस्यापादानत्वमपि निर्वोढुं शक्यं भवति।

वैश्वदेवꣳ हविरित्यभिमन्त्रयते।

आज्यमित्येव शेषो नतु हिरण्यं मन्त्रे हविरिति श्रवणात्, आपस्तम्बेन स्पष्टतयाऽभिधानाच्च।

हविरसि वैश्वदेवमित्यवेक्षते ।

अवनतो भूत्वेक्षत इत्यर्थः । अत्राप्याज्यमित्येव शेषः । मन्त्रे हविरिति श्रवणात् । एतदन्तमासीनतैव ।

सूर्यस्य चक्षुरारुहमिति सहिरण्येन
पाणिनाऽऽदित्यमुपतिष्ठते ॥ ९ ॥

सहिरण्येनेति पाणिविशेषणम् । पाणिनेतितृतीयेत्थंभूतलक्षणे । तेन पूर्वमेवावश्यं हिरण्यं पाणौ भवति ।

अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः ।

इति स्मृत्या पवित्रत्वेन सर्वदाऽङ्गुलिषु हिरण्यधारणं विहितं ततो भिन्नं पाणितले हिरण्यधारणमपूर्वमनेन विधीयते । स्मृतिसिद्धं यदङ्गुलिषु हिरण्यधारणं तस्यैव कर्माङ्गत्वमनेन विधीयत इति वा । तेन श्रौतमपि प्रायश्चित्तं कर्तव्यं भवति । अङ्गुलिषु हिरण्यधारणेनापि पाणौ हिरण्यधारणं भवत्येव । अङ्गुलीनामपि पाणित्वात् । अन्यथाऽशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति करस्य सुवर्णरजतकुशसंबन्धविधानेनाङ्गुलीनां तद्भिन्नत्वेन तत्र धारणस्य स्मृतिविरुद्धत्वापत्तेः । करपाणिशब्दौ हि पर्यायभूतौ । उपस्थाने तिष्ठत्ताऽऽसीनता वा । नचोपतिष्ठत इत्यत एव तिष्ठत्ता सिद्धेति वाच्यम् । उपान्मन्त्रकरण इत्यात्मनेपदविधानान्नात्र तिष्ठत्ता धातुप्रत्यययोरर्थः किंतु मन्त्रकरणमञ्जलिकरणपूर्वकं विनयेनाऽऽशीर्याच्ञा । तदुक्तमाहिताग्नेराशीर्यदाग्निमुपतिष्ठत इति । तस्मादुपस्थानादन्यैव तिष्ठत्ता । यदि उपस्थानान्तर्गतैव तिष्ठत्ता स्यात्तदा तिष्ठन्ती गार्हपत्यमुपतिष्ठते, उत्तरामाहुतिमुपोत्थाय कवातिर्यङ्ङिवाऽऽहवनीयमुपतिष्ठत इत्यत्र यथायथं तिष्ठत्तोपोत्थानविधानं न कृतं स्यात् । अतो यत्र यत्र विधानं तत्रैव, अन्यत्र त्वनियम इति सिद्धम् । तथाच मन्त्रप्रतिपाद्यं पदार्थं ध्यायन्नतिमुद्रायुत आशीः(शिषं) प्रार्थयन्मन्त्रं पठेदित्येष उपस्थानशब्दार्थो भवति । अत्र पाणिनेति वचनादञ्जलिना नोपस्थानं किंतु पाणिनैवेति । यत्र यत्र दक्षिणग्रहणं क्रियते तत्रैव दक्षिणाङ्गस्य ग्रहणमन्यत्रानियम इति तत्र तत्र दक्षिणग्रहणेन ज्ञाप्यते । प्रकृते दक्षिणग्रहणाभावादनियम एव । एवमन्यत्रापि । एतच्च निर्दिष्टाङ्गविषयम् । अनिर्दिष्टाङ्गविषये तु दक्षिणस्यैव ग्रहणं नियतम् । अत्र ज्ञापकं याजुषदर्शपूर्णमासहौत्रसूत्रे सव्येन तूष्णीमाग्नीध्रमित्युत्तरसूत्रात्पूर्वत्र दक्षिणस्य प्राप्तौ दक्षिणग्रहणमनिर्दिष्टस्थले दक्षिणस्यैव ग्रहणमिति । विपश्चितेत्यन्तो मन्त्रः ।

चिदसीति सोमक्रयणीᳪ᳭ सᳪ᳭शास्ति ।

आसीन एव । संशब्दो मन्त्रस्य स्पष्टोच्चारणं गमयति । तेनोपांशुता निवृत्ता भवति । अवेक्षणविशिष्टं मन्त्रोच्चारणं संशासनम् । संशासनवाच्यस्य शिक्षणस्य

पत्न्यामेव संभवात्तस्या एव ग्रहणं स्यात्तद्व्यावृत्त्यर्थं सोमक्रयणीमितिवचनम् । नन्वेवं तां संज्ञास्तीति तच्छब्देनापि तद्ग्रहणं संभवति किमर्थं सोमक्रयणीमिति वचनमिति चेत्सत्यम् । तच्छब्दस्य प्रसिद्धिवाचकत्वस्यैव संज्ञिशिक्षणानुरोधेनावश्यं स्वीकर्तव्यतया तद्दोषतादवस्थ्यापत्तेः ।

मित्रस्त्वा पदि बध्नात्विति दक्षिणे पूर्वपादे बध्नाति ।

आसीन एव । सोमक्रयणीमिति पूर्वसूत्रादनुवर्तते । ग्रीवाव्यावृत्त्यर्थं पादग्रहणम् । एतावानेव मन्त्रः ।

पूषाऽध्वनः पात्विति नयति यत्र सोमोऽबद्धामकर्णगृहीतां बद्धां वा कर्णगृहीताम् ।

पूषाऽध्वनः पात्विति मन्त्रेणाबद्धामकर्णगृहीतां बद्धां कर्णगृहीतां वा नयति यत्र सोम इत्यन्वयः । अत्रापि सोमक्रयणीमित्यनुवर्तते । अबद्धामित्यादीनि सोमक्रयणीविशेषणानि । यत्र सोम इत्यत्र न्युप्तो भवतीति शेषः । अबद्धामकर्णगृहीतामिति पक्षः स्वशाखास्थः । बद्धां कर्णगृहीतामिति पक्षः शाखान्तरीयः । अबद्धां पदि अबद्धां बद्धां पदि बद्धाम् । यदबद्धा स्यादयता स्याद्यत्पदि बद्धाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्याद्यत्कर्णगृहीता वार्त्रघ्नी स्यात्स वाऽन्यं जिनीयात्तं वाऽन्यो जिनीयान्मित्रस्त्वा पदि बध्नात्वित्याह मित्रो वै शिवो देवानां तेनैवैनां पदि बध्नातीति श्रुतौ यदबद्धा स्यादयता स्यादित्यनेन बन्धनं प्राप्यते तच्चाग्रे पदबन्धननिषेधाद्ग्रीवाबन्धनविषये पर्यवस्यति । अयताऽनियमिता गमने । अनुस्तरणी मृतसंबन्धिनी गौरिव । प्रमायुकः शीघ्रमरणः । वार्त्रघ्नी शत्रुघ्नी, अथवाऽबद्धां ग्रीवायामपि अबद्धाम् । अनियमितत्वं तु हस्ताभ्यां दाढर्येन धारणेन संपादनीयम् । बद्धां ग्रीवायां बद्धाम् । पदि बन्धनं तु उभयपक्षेऽपि निषिद्धमिति । मन्त्रपाठमात्रेण मित्रकर्तृकपद्बन्धनं भवति । मित्रस्य कल्याणरूपत्वादनुस्तरणीत्वं तत्प्रयुक्तं यजमाने प्रमायुकत्वं च न । स्वकर्तृकपद्बन्धने हि स दोष इति । एतदर्थकं लिङ्गं स्पष्टं प्रदर्शयितुमेव मित्रस्त्वा पदि बध्नात्विति कृत्स्नः पाठः । उत्तरस्य मन्त्रस्येन्द्राय सोममित्यन्तः ।

तस्या वस्व्यसीत्येतैर्मन्त्रैर्दक्षिणेन पूर्वपादेन षट्पदान्यनुनिक्रामति ।

अत्रापि सोमक्रयणीशब्दानुवृत्त्यैव सोमक्रयण्या लाभे तच्छब्दः संज्ञासनबन्धननयनान्यतरस्य लोपे विस्मृत्याऽनुनिक्रामणे कृते प्रायश्चित्तेन न चारितार्थ्यं किंतु लुप्तं कृत्वा पुनः षट्पदानुनिक्रामणस्यापि करणमितिज्ञापनार्थः । नचाध्वर्युव्यावृत्त्यर्थत्वं तस्य स्त्रीलिङ्गेनासीति शब्देन च सिद्धेः । नच पत्नीव्यावृत्त्यर्थत्वं तस्या अनु-

पस्थितत्वादेव प्राप्त्यभावसिद्धेः । तस्या उदक्प्राच्या नीयमानाया वस्व्यसीत्यारभ्या-स्यन्ताः षण्मन्त्राः । एतैरितिवचनं प्रतीकोपात्त एक एव मन्त्र इत्येतादृशमर्थं व्यावर्त-यितुम् । मन्त्रैरितिवचनमेकैकेन मन्त्रेणैकैकं क्रमणमिति ज्ञापयितुम् । अनु आनुपूर्व्येण निक्रामति निगृह्य क्रामति क्रामयतीत्यर्थः । अन्तर्भावितोऽत्र णिच् । अथवा तस्या दक्षिणेन पूर्वपादेन यानि षट्पदानि क्रम्यन्ते तान्यध्वर्युरनु पश्चान्नितरां क्रामति आक्रामति उपर्युपरि निदधातीति तात्पर्यार्थः । दक्षिण एव पादोऽत्राधिकारात् । अस्मिन्पक्षे णिज्ञाऽऽश्रयणीयो भवति । अत्र यजमानः पत्नी चापि गच्छतः । अध्वर्युमनु यजमानस्तमनु पत्नी । तथाच बौधायनः—अन्वग्यजमानोऽनूची पत्नी स्थालीं पद्धरणीमादायेति । गच्छतीति शेष उभयत्र । पदं ह्रियतेऽनयेति पद्ध-रणी तां स्थालीमादाय गच्छतीत्यर्थः । अन्यच्चाप्याह—अथैनाꣳ सोमक्रयणीमग्रेण शालामुदीचीमतिविस्त(वास?)यन्तीति[1] ।

बृहस्पतिस्त्वा सुम्ने रण्वत्विति सप्तमं पदमभिगृह्णाति ।

सप्तमपदानुनिक्रमणं तूष्णीमेव मन्त्रानुपदेशात् । अभिगृह्णाति च्छादयति । अञ्जलिनेति शेषः । उत्करमभिगृह्णात्यञ्जलिनेति प्रकृतौ दर्शनात्, आपस्तम्बेन स्पष्टो-क्तत्वाच्च । एतेन वस्त्राच्छादनं व्यावर्त्यते । चिकेत्विति मन्त्रान्तः ।

तस्मिन्हिरण्यं निधाय पृथिव्यास्त्वा
मूर्धन्नाजिघर्मीत्येतच्चतुर्गृहीतं जुहोति ।

अत्रापि पूर्ववत्पञ्चगृहीतेन विकल्पः । तस्मिन्पदे हिरण्यं निधाय पृथिव्यास्त्वेति मन्त्रेण चतुर्गृहीतं हिरण्यमनुपदे जुहोति । इष्टिशेषद्रव्यत्वात्परिक्रमणं नेति केचित् । घृतवति स्वाहेत्यन्तो मन्त्रः । अत्र बौधायनः कर्मान्ते—किंदेवत्या उ खलु पदाहुति-र्भवतीति प्रकृत्याऽऽग्नेयीत्येके वैष्णवीत्येके प्राजापत्येत्येके वाग्देवत्येत्येव ब्रूयादिति । तेनात्र वाग्देवता वाग्वा एषा यत्सोमक्रयणीत्यर्थवादाद्वाचे सोमक्रयण्या इदमिति त्याग इति केचित् । हिरण्यस्योपर्येव होमः । यदध्वर्युरनग्नाविति श्रुतेः । ध्रुवाशेषनाशे पूर्व-वद्ध्रौवैर्मन्त्रैर्गृहीत्वा तेन जूरसीति होमश्च । भ्रान्त्या कदाचित्स्विष्टकृदभिघारणद्वयेऽन्ति-मप्रायश्चित्ताहुत्यर्थग्रहणद्वये वाऽऽप्यायनं कृतं चेत्तदा तेनैवैतौ जुहुयात् । उभयत्रापि सर्वप्रायश्चित्तहोमोऽनाज्ञातजपादि च । यदि एकहायनत्वादिगुणाविशिष्टायां गवि क्रयार्थं नीयमानायां दैवाद्भावणि सप्तमपदपातस्तदा होमस्याऽऽरादुपकारकत्वाद्ग्रावण्येव । अक्षाभ्यञ्जनं तु यैः कैश्चिदपि पांसुभिः कार्यम् । गुणलोपे मुख्यलोपानुपपत्तेः । नच वाजिनयागवल्लोप एवास्त्विति वाच्यम् । एतस्य परप्रयुक्तद्रव्योपजीवित्वाभावेन लोपस्य

---

[1] ख. घ. 'तिवत्स'।

वक्तुमशक्यत्वात् । वाजिनयागः परप्रयुक्तद्रव्योपजीवी । इह तु न द्रव्यं परप्रयुक्तं किंतु पांसुरूपस्य द्रव्यस्य यः संस्कार एकहायन्याः सप्तमपदनिधानात्मकः स एव परप्रयुक्त इति वैषम्याल्लोप एवात्र युक्तः । तथा च चतुर्थाध्याये प्रथमपादे जैमिनिः— पदकर्माप्रयोजकं नयनस्य परार्थत्वादिति । सूत्रार्थस्तु पदकर्म सप्तमं पदमभिगृह्णातीत्यादि नयनस्य सोमक्रयण्या नयनस्य प्रयोजकं न भवति परार्थत्वादन्यार्थत्वात्, अन्योऽर्थः क्रयस्तदर्थत्वात् । नच शाखान्तरे तस्याः सप्तमं पदमितिश्रवणात्तत्र च तस्या इत्यनेनैकहायन्याः परामर्शादेकहायन्याः सप्तमपदग्रहणार्थत्वे सति विनिगमनाविरहान्नयनस्योभयमपि प्रयोजकमेवेति वाच्यम् । तत्रापि ह्येकहायनी न स्वरूपेण प्रकृता किंत्वेकहायन्या क्रीणातीति क्रयार्थत्वेनैवेति परप्रयुक्तत्वेन निर्ज्ञाताया एव विनियोगादिति विनिगमनाविरहासिद्धेः । तदयं निर्गलितोऽर्थः—याऽसौ क्रयार्थैकहायनी क्रयसिध्यर्थं नीयते तस्याः सप्तमं पदं गृह्णातीति क्रयार्थाया एवैकहायन्या बुद्धौ विपरिवर्तमानायाः प्रसङ्गात्पांसुग्रहणोपकारतामात्रेण संबन्धेऽपि सप्तमपदवाक्यस्य निराकाङ्क्षतया तदर्थस्वावेदकप्रमाणाभावात् क्रयार्थैवैकहायनी नतु पदपांसुग्रहणार्थेति ।

अपादाय हिरण्यं परिलिखितमिति स्फ्येन पदं परिलिखति यावद्घृतमनु विसृतं भवति तूष्णीं विषाणया चानुपरिलिख्यास्मे राय इति स्थाल्यां पदं निवपति ।

अपादाय गृहीत्वा । स्फ्योऽत्रैष्टिको लौकिको वा । पदं पदसंबन्धिप्रदेशं परितो लिखति । कदाचित्पदप्रदेशाद्बहिरन्तरेव वा घृतं विसृतं प्रसृतं भवति तावत्परिमितमेव पदमनुलक्षीकृत्य परितो लिखतीत्यर्थः । अनेन केवलपदपरिमितप्रदेशस्यैव परितो लेखनं व्यावर्त्यते । प्रादक्षिण्यं परिभाषासिद्धम् । पुरस्तादुपक्रमस्तथाऽपवर्गः । त्रिः परिलिखतीत्यापस्तम्बः । अस्मिन्पक्षे सकृन्मन्त्रेण द्विस्तूष्णीमिति ज्ञेयम् । परिलेखनार्थं स्फ्यादानं तूष्णीमेव मन्त्रानुपदेशात् । आपस्तम्बस्तु सावित्रेण स्फ्यादानमाह । अस्य ग्रीवा अपि कृन्तामीत्यन्तो मन्त्रः । विषाणया यजमानसंबन्धिन्या कृष्णविषाणया तस्या एवोपस्थितत्वात् । चकारो यावद्घृतमनु विसृतं भवतीत्येतस्यानुकर्षणार्थः । एवं चात्रापि न ततो न्यूनं नाप्यधिकं परिलेखनमिति सिद्धं भवति । अथवा स्फ्येन सह कृष्णविषाणायाः साहित्यार्थः । तेनोभाभ्यां मिलिताभ्यां परिलेखनमिति सिद्धं भवति । पूर्वसूत्रान्मन्त्रस्यापि प्राप्तिर्भविष्यति तां वारयितुं तूष्णीमितिवचनम् । स्थालीशब्द आकारविशिष्टधातुमृन्मयान्यतरपात्रमाचष्टे । तेनैतदितरपात्रं भूमौ निवपनं चापि व्यावृत्तं भवति । पदं पादपांसून् । स्थाल्यां निवपतीत्यत्रोपक्रान्तत्वादर्थात्पदलाभे पदग्रहणं कृष्णविषाणानिवृत्त्यर्थम् । ननु एतत्तच्छब्देनैव सिध्यति किमर्थं पदग्रहण-

---

१ ख. ग. 'तच्छ' ।

मिति चेत् । तर्हि कृष्णविषाणासाहित्यव्यावृत्त्यर्थं तद्ग्रहणमिति द्रष्टव्यम् । यावत्सूतमिति श्रुतेर्यावद्घृतमित्यर्थो द्रष्टव्यः ।

पदायतने सहिरण्यौ पाणी प्रक्षाल्य त्वे
राय इति पदं यजमानाय प्रयच्छति ।

पदायतने पदस्थाने । आयतनग्रहणं स्थाल्यां निक्षिप्ते पदे पाणिप्रक्षालनं व्यावर्तयितुम् । सहिरण्यौ हिरण्यसहितौ । अनेन हिरण्यस्यापि प्रक्षालनम् । अनेन पाणिप्रक्षालनेनेदं ज्ञायते पदपांसवः स्थाल्यां हस्तेनैव न्युप्या नतु स्फ्येन पात्रान्तर आनीय तेन न्युप्या इति । एवं च दृष्टार्थत्वमेवैतस्य हिरणस्य घृतलिप्तत्वात्प्रक्षालनं हिरण्यस्य पाणिसाहित्येनैव प्रक्षालनम् । सहिरण्याविति वचनात् ।

तोते राय इति यजमानः पत्नियै ।

प्रयच्छतीति शेषः । पत्न्यनेकत्वे तु महिष्या एव प्रयच्छति निधानार्थत्वात्, असंस्कारकर्मत्वाच्च । आध्वर्यवसूत्रे वचनमवसरज्ञापनार्थम् ।

माऽहꣳ रायस्पोषेण वियोषमिति पत्नी प्रदीयमानं प्रतीक्षते ।

प्रदीयमानं पदं प्रतीक्षते, अभिमुखी भूत्वेक्षत इत्यर्थः । सर्वाभिरपीक्षणं कार्यं संस्कारकर्मत्वात् ।

सं देवि देव्योर्वश्या पश्यस्वेति सोम-
क्रयण्या पत्नीꣳ संख्यापयति ।

संख्यापनानुकूलव्यापारां करोतीत्यर्थः । एतत्करणीभूतोऽयं मन्त्रः । तस्मादध्वर्योरेव मन्त्रः । संख्यापनं प्रदर्शनम् । अत्रानेकासामपि तन्त्रेणैव संख्यापनं विभवात् । मन्त्रगतमेकवचनं तु जात्यभिप्रायेण समर्थनीयं न प्रकृतावूह इत्यूहनिषेधात्पत्नीꣳ संनह्येतिवत् । संदृशीत्यन्तो मन्त्रः ।

उन्नम्भय पृथिवीमिति पद उदपात्रे निनीय
त्रैधं पदं प्रतिविभज्य गार्हपत्यस्य शीते
भस्मनि तृतीयमुपवपत्याहवनीये तृतीयम् ।

पदे स्थाल्यां निक्षिप्तेषु पदपांसुषु पात्रस्योदकमुदपात्रं पात्रसंबन्धि उदकं पात्रस्थितमुदकमिति यावत् । पात्र उदकमुदपात्रमिति वा । तात्पर्यार्थः पूर्ववदेव । राजदन्तादिशब्दवदयं समासः । उदकस्योदः संज्ञायामित्युदादेशः । निनीयेतिपदयोगादयमेव समासोऽत्र नतूदकेन पूर्णं पात्रमुदपात्रमिति पात्रस्य निनयनासंभवात् । सामर्थ्यात्पदपांसुमिश्रणपर्याप्तं जलं यावति पात्रे संमाति तावत्परिमितम् । विसृजाद्धतिमित्युदकनिनयनरूपार्थानुगुणलिङ्गादुन्नम्भय पृथिवीं भिन्धीत्यादिरन्यत्र दृष्ट एव

मन्त्रोऽत्र ग्राह्यः । त्रैधं संख्याया विधार्थे धा इति सूत्रेण क्रियाप्रकारे वर्तमाने संख्या-शब्दाद्धाप्रत्ययः । द्वित्र्योश्च धमुञ् इति धाप्रत्ययस्य धमुञादेश ञकारस्योपदेशेऽजनुनासिक इदितीत्संज्ञायां हलन्त्यमिति ञकारस्येत्संज्ञायां तस्य लोप इतीतोर्लोपे तद्धितेष्वचामादेरित्यादिवृद्धौ त्रैधमिति रूपं भवति । पदं पदपांसून् । प्रतिविभज्य प्रतीत्युपसर्गो विभजनमाभिमुख्येनैव कर्तव्यमित्येतादृशार्थद्योतनाय । विशब्दो विभागरूपार्थलाभाय । शीतग्रहणमुष्णव्यावृत्त्यर्थम् । उष्णभस्मन्यग्निसत्तासंभवात्तत्र सोदकपदोपवपनेऽग्न्युपघातप्रायश्चित्तं प्रसज्येतेति भावः । परस्परापेक्षया सर्वेषु तृतीयत्वम् ।

प्रतिषिद्धमेकेषामाहवनीये ।

शाखान्तरीयोऽयं प्रतिषेधः । अस्मिन्पक्षे द्विधैव विभागः ।

तृतीयं पत्नियै प्रयच्छति तत्सा गृहेषु निधत्ते ।

तत्तृतीयं पदं सा पत्नी गृहेषु शालासु । बहुवचनं प्राग्वंशशाला पत्नीशाला बाह्यशालेत्येतात्रितयान्यतमशालामध्ये निधानं कर्तव्यं नतु पत्नीशालायामेव निधानमिति नियम इति प्रदर्शयितुम् । शब्दस्वाभाव्यादेव वा बहुवचनम् । दृष्टं चैतत्—अनश्या अतृष्या गृहा माऽस्मद्बिभीतनेतिमन्त्रे । अस्मिन्पक्षे पत्नीशालायामेव निधानं तस्या एव पत्नीसंबन्धित्वेन मुख्यत्वात् । तृतीयं पत्नियै प्रयच्छतीत्येतदनन्तरं तस्याः सकाशात्पुनरादाय तोते राय इति यजमानः पुनः पत्नियै प्रयच्छति तव ते राय इति वा । अस्मिन्प्रदाने वैकल्पिकः सौत्रोऽयं मन्त्रः । वक्ष्यति च याजमानसूत्रे प्रत्तं पदं तोते राय इति पत्नियै प्रयच्छति तव ते राय इति वेति । नचैतत्पूर्वप्रदानस्यैव शेष इति वाच्यम् । उभयत्रोपादानस्य व्यर्थत्वापत्तेः । प्रत्तं पदमध्वर्युणा पत्निया इत्येव । प्रत्तमित्यत्रापिशब्दोऽध्याहार्यः । पत्निया इत्यनन्तरं पुनःशब्दश्च । अनयैव रीत्या सूत्रसंगतिर्भवति नान्यथेति द्रष्टव्यम् । अत्र प्रदर्शनं प्रयोगसंगत्या । प्राञ्चि सप्तमपाते पदपरिलेखनादि पत्नीकर्तृकप्रतीक्षणान्तं पद उदपात्रनिनयनादि गृहे पदनिधानान्तं च पदसंबन्धित्वाल्लुप्यते । पदायतने सहिरण्यपाणिप्रक्षालनं तु दृष्टार्थत्वाद्भवत्येव । सं देवि देव्योर्वश्या पश्यस्वेति सोमक्रयण्या पत्नीं९ संख्यापयतीत्येतस्यापि पदसंबन्धित्वाभावाद्भवत्येवानुष्ठानम् । लोपनिमित्तं सर्वप्रायश्चित्तहोमोऽनाज्ञातजपो विष्णुस्मरणं च । बहुपत्नीकत्वे मुख्याया एव प्रदानं पदसंस्कारत्वात् । इत उत्तरं न पत्न्याः साहित्यम् । प्रयोजनाभावात् । अत एव बौधायनो नयन्ति पत्नीमित्याह ।

सूर्यस्य चक्षुरारुहमित्यत्राऽऽदित्योपस्थानमेके समामनन्ति ।

पूर्वत्रोक्तमादित्योपस्थानं यत्तत्र न कर्तव्यं किंत्वत्रास्मिन्काले कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः । सूर्यस्य चक्षुरारुहमितिवचनमुत्तरोपस्थानस्यात्र क्रियाया व्यावृत्त्यर्थम् ।

अपि पन्थामगस्महीति परिश्रितेन शकटेन च्छ-
दिष्मतोद्धृतपूर्वफलकेन राजानमच्छ याति ।

परिश्रितेन सुगन्धितृणकटादिना । छदिष्मता तथाभूततृणनिर्मितच्छदिषोपर्याच्छादनात् । उद्धृतानि पूर्वाणि पुराणानि पूर्वभागस्थानि वा फलकानि यस्य । अनेन नूतनफलकानां योजनं सूच्यते । शकटं प्रसिद्धम् । एतादृशेन शकटेन सह राजानं सोममच्छ याति अभिमुखो यातीत्यर्थः । सोमशब्दं परित्यज्य राजशब्दप्रयोगो राजभावनयाऽभिमुखगमनार्थः । गिरौ क्रीते विशेषः श्रुतौ—तस्माच्छीर्षहार्यं गिरौ जीवनमिति । आपस्तम्बोऽपि—शीर्ष्णा गिरौ क्रीतꣳ हरन्तीति । अस्मिन्पक्ष आनडुहचर्मास्तरणादिकं सर्वं गिरावेव शकटाभावः । अपि पन्थामगस्महीति मन्त्रस्तु भवत्येव गमनाभिधानादिति केचित् । येन विश्वाः परिद्विषो वृणक्तीति शकटाभिधानाल्लोपो मन्त्रस्येत्यन्ये । पायसौदनेन पूजनं तत्र गत्वैव ।

उत्तरेण राजानꣳ शकटं मुखेन प्रतिष्ठाप्यैा-
मात्योऽसीत्यभिमन्त्रयत आस्माकोऽसीति वा ।

उत्तरेणेत्येनपा राज्ञः समीपे । तेन सर्वतः परिश्रित्य तस्योदीचीं द्वारं कृत्वेत्यत्र तथा कटादिभिः परिश्रयणं द्वारं च कर्तव्यं यथा शकटं परिश्रिते द्वारेण गच्छतीति द्रष्टव्यम् । शकटमपरेणैव राज्ञः समीपं गच्छति प्राङ्मुखत्वानुगुण्यात् । मुखेनाग्रभागेन(ण) । अनेनोपस्तम्भनं व्यावर्त्यते । उत्तरेण तं तन्मुखेन प्रतिष्ठाप्येति तत्तद्विभक्त्यन्ततत्तल्लिङ्गकतच्छब्देनैवोभयोः परामर्शसिद्धौ राजानमितिपुनर्वचनं सर्वत्राभिमन्त्रणं राजभावनापूर्वकमेव कर्तव्यमितिसूचनार्थम् । शकटस्य पुनर्वचनं शकटस्यैव मुखेन प्रतिष्ठापनं न रथस्येतिनियमसूचनार्थम् । तेन रथपक्षोऽप्यस्तीति गम्यते । रथश्चतुश्चक्रः । अभिमन्त्रणं राज्ञ एव नतु शकटस्य मन्त्रे पुंलिङ्गश्रवणात्, आपस्तम्बेन स्पष्टमभिहितत्वाच्च । उत्तरस्याऽऽदिनेति परिभाषया ग्रह इति मन्त्रान्तः । आस्माकोऽसीत्ययं शाखान्तरीयो मन्त्रांशोऽमात्योऽसीत्यस्य स्थाने विकल्पते नतु कृत्स्नस्यामात्योऽसि शुक्रस्ते ग्रह इत्यस्य स्थान आस्माकोऽसीत्येतावानेव विकल्पेन भवति । तथाच शुक्रस्ते ग्रह इत्यत्रापि अनुषञ्जनीयमेव । अथवाऽमात्योऽसीत्येतावानेव मन्त्रो निराकाङ्क्षत्वात् । अस्मिन्पक्ष आस्माकोऽसीति सुतरां तावानेव । एतादृशव्याख्यायामꣳशुना ते अꣳशुरित्ययं मन्त्रो ग्रह इत्यन्तो द्रष्टव्यः । शकटप्रतिष्ठापने विशेषमाहाऽऽपस्तम्बः—प्रागीषमुदगीषं वा नद्धयुगꣳ शकटं चुबुकप्रतिष्ठितमिति ।

अꣳशुना ते अꣳशुः पृच्यतामित्यꣳशून्समुद्वपति ।

एकत्र राशीभूतान्करोति । अंशवः काण्डानि । शुद्धभूमाविति शेषः । चर्मण उत्तरत्रोपादानात् । यदि चर्मणि समुद्वपनमिष्टं भवेत्तदाऽत्रापि ब्रूयादेव । अच्युत इति मन्त्रान्तः । ग्रह इति मन्त्रान्तो वा ।

उत्तरेण राजानं चर्मणि क्षौमं वासोऽहतं महद्द्विगुणं चतुर्गुणं वा प्राचीनदशमुपरिष्टाद्दशमास्तीर्याभित्यं देवमिति तस्मिन्सहिरण्येन पाणिनाऽतिच्छन्दस- र्चा राजानं मिमीत एकैकयाऽङ्गुल्या प्रसारितया।

अत्र ब्राह्मणे विशेषः—यं कामयेतापशुः स्यादित्यृक्षतस्तस्य मिमीतर्क्षं वा अपशव्य- मपशुरेव भवति यं कामयेत पशुमान्स्यादिति लोमतस्तस्य मिमीतैतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशूनवरुन्धे पशुमानेव भवतीति । ऋक्षं चर्मणो विशस्तदेशस्तस्मिन्राजानं मिमीत इत्यर्थः । लोमतो लोमवति प्रदेशे । लोमशब्दादर्शआदित्वादज्मत्वर्थे । उभयत्र सप्तम्यास्तसिः । नहि निन्दा निन्दितुं प्रवर्ततेऽपि तु स्तुत्यं स्तोतुमितिन्यायेनोत्तरपक्षस्य प्राशस्त्यं कथयितुं पूर्वस्य निन्दा । एनपाद्(पो)त्तराज्ञः समीपे चर्मणि आस्तृते चर्मणि । अत्र सामान्यतश्चर्मणीत्युक्त्या यस्य कस्यचिन्मेध्यस्य पशोश्चर्मात्र ग्राह्यम् । क्षुमाऽ- तसीवृक्षत्वक् । तन्निर्मितं क्षौमम् । एतदभावे प्रतिनिधिभूतं कौशेयादि । पूर्वोदाहृते- षद्धौतत्वादिलक्षणलक्षितमहतम् । महत्सोमबन्धनपर्याप्तं, श्रौतप्रायश्चित्तप्राप्त्यर्थमेतत् । द्विगुणत्वचतुर्गुणत्वयोरैच्छिको विकल्पः । अतिरात्राप्तोर्यामयोरहर्गणेषु च सोमबाहुल्या- द्द्विगुणम् । अग्निष्टोमाद्येकाहेषु सोमाल्पत्वाच्चतुर्गुणमिति व्यवस्थितविकल्पो वा । प्राचीनोपरिष्टाद्दशमित्येकपदकरणे प्राचीनत्वमुपरिष्टाद्दशानां विशेषणम् । तथाचोपरि- ष्टाद्दशा एव प्राचीना नाधस्तनाः । तास्तु प्रतीचीना इत्यप्यर्थः संभाव्येत स मा भूदि- त्येतदर्थं पदद्वयकरणम् । तस्मिन्नास्तृते वाससि सहिरण्येनेति पूर्ववद्व्याख्येयम् । अतिच्छन्दसेति ज्ञानार्थं, ज्ञानाभावे दक्षिणाग्नौ भुव इति यजुर्भेषप्रायश्चित्तम् । अत्रर्चा मानमुक्तम् । तस्याङ्गत्वेन वक्ष्यमाणं पञ्चेतिसंख्याविधानम् । ऋचेतिवचनं यद्दचोऽधीत इत्यदृष्टप्रतिपत्त्यर्थम् । अन्यत्रापि यत्र यत्रर्चेति वदति तत्रापीदमेव प्रयोजनं ज्ञेयम् । एकैकया, एकयैकयाऽङ्गुल्या प्रसारितया यावद्ग्रहीतुं शक्यते तावन्मिमीत इत्यर्थः । उत्सर्गमिति शेषः । एकयैकयोत्सर्गं मिमीत इति श्रुतेः । उत्सर्गमुत्सृज्योत्सृज्य पूर्वां पूर्वामङ्गुलिं क्रमादुत्तरयोत्तरया चैकयैकया, एवं मिमीत इत्यर्थः । सुवरिति मन्त्रान्तः ।

सर्वास्वङ्गुष्ठमुपनिगृह्णाति ।

सर्वास्वङ्गुलीषु मानकालेऽङ्गुष्ठं योजयेदित्यर्थः ।

यया प्रथमं न तया पञ्चमं तयैव दशमम् ।

न तया पञ्चममित्यस्यायं भावः—कनिष्ठिकादिभिश्चतसृभिः क्रमेण माने कृते पुनः कनिष्ठिकादिक्रमस्वीकारे मध्यमानामिकयोर्द्वयोः परित्यागः स्यात् । तथाचैकयैकयोत्सर्गं मिमीत इत्यनया श्रुत्या विरोध आपद्येतेति । कनिष्ठिकादिभिश्चतसृभिः क्रमेण मानच- तुष्टयं कृत्वा मध्यमानामिकाकनिष्ठिकाभिः क्रमेण मानत्रयं कृत्वा पुनर्मध्यमानामिका-

कनिष्ठिकाभिः क्रमेण मानत्रयमित्ययमेव मानक्रमो युक्तः पुनस्तर्जन्यादिक्रमस्त्वीकार एकयैकयोत्सर्गं मिमीत इत्येतच्छ्रुतिविरोधापत्तेः । एवं चायातयाम्निया ऽयातयाम्नियैवैनं मिमीत इत्यनया श्रुत्यैकयैकयोत्सृष्टया माने कृतेऽयातयाम्नियाऽयातयाम्नियैव मानं कृतं भवति । सकृत्प्रवृत्ताया अनन्तरमेव प्रवृत्त्यभावात् । यातयामत्वं गतरसत्वं न भविष्यतीति तात्पर्यार्थः । अथवा कनिष्ठिका मध्यमोपकनिष्ठिका तर्जन्युपकनिष्ठिका तर्जनी कनिष्ठिका तर्जन्युपकनिष्ठिका कनिष्ठिकेत्येवं क्रमेण वा । एतेन कनिष्ठिकादिभिश्चतसृभिः क्रमेण तर्जन्यादिभिर्व्युत्क्रमेणोपकनिष्ठिकया कनिष्ठिकया चेति । अथवा कनिष्ठिकादिभिश्चतसृभिः क्रमेण (*तर्जन्यादिभिर्व्युत्क्रमेण तर्जन्या कनिष्ठिकया चेति । अथवा कनिष्ठिकादिभिश्चतसृभिः क्रमेण) तर्जन्या पुनः कनिष्ठिकादिभिश्चतसृभिः क्रमेण कनिष्ठिकया चेति, एते क्रमा निरस्ता भवन्ति । तयैव यया प्रथमं मानं कृतं तयैवाङ्गुल्या दशमं मानं कर्तव्यम् । आद्यान्त्ययोर्मानयोरैकरूप्यसंपत्तेरिति भावः ।

पञ्चकृत्वो यजुषा मिमीते पञ्चकृत्वस्तूष्णीम् ।

ननु यजुषेति वचनमनुपपन्नं पादबद्धत्वेनाभित्यमित्यस्यर्क्त्वादिति चेत्सत्यम् । नैष दोषः । कुतः, ब्राह्मणानुसारित्वान्निर्देशस्य । यजुर्वेदसमाम्नातानामाध्वर्यवोपयुक्तानामृचामपि गौणं यजुष्ट्वमिति । तासां भ्रेषप्रायश्चित्तमेव कर्तव्यम् । ऋचेति वचनस्य प्रयोजनं तु यदृचोऽधीत इत्यदृष्टप्रतिपत्त्यर्थमित्युक्तमेव प्राक् । एतेनैव दर्शनेनर्ग्वेदस्थयजुषां हौत्रोपयुक्तानामृग्भ्रेषप्रायश्चित्तमेव । अदृष्टं तु लक्षणानुगत्या वेदाधिकारात्स्ववेदोक्तमप्यस्यैवेति । यदि त्वतिरात्रादिकं महत्कर्म तत्र दीर्घत्रिपर्वविशिष्टांशुसमुदायात्मकजूटिका मातव्याः ।

प्रजाभ्यस्त्वेति परिशिष्टानꣳशूनुपसमूहति ।

मानतः परिशिष्टानंशून्दशकृत्वो मिमानो राज्ञोऽर्धं मातव्यम् । तथाच बौधायनः—दशकृत्वो मिमानोऽर्धवेलं राज्ञो मिमीत इति । वेला मर्यादा । परीत्युपसर्गः समन्तभागस्थानामेवावशेषस्तेषामेवात्र ग्रहणमिति द्योतयति । एतेन दशकृत्वो माने मध्यगतानामेव ग्रहणं सिद्धं भवति । उपोपर्येव समूहति मिते राज्ञि यावदर्थं प्रक्षिपति नैतेषां परिमाणम् । श्रूयते च—यद्वै तावानेव सोमः स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नापि सदस्यानां प्रजाभ्यस्त्वेत्युपसमूहति सदस्यानेवान्वाभजतीति । तस्मात्प्रदेयविवृद्धिरर्थात्संस्थासु । कात्यायनेनोक्तं च—अर्थात्परिमाणमिति सूत्रेणाऽऽर्थिकं परिमाणम् । यदि दशमुष्टिपरिमित एव सोमः स्यात्तदा स यजमानस्यैव स्यान्नतु सदसि विद्यमाना-

---

* धनुश्चिह्नान्तर्गतं ख. ग. पुस्तकयोर्न विद्यते ।

नामृत्विजां स्यात् । अतः प्रजाभ्यस्त्वेति मन्त्रेणावशिष्टानपि सोमांशूनुपसमूहति दश- मुष्टिपरिमितसोमेन संयोजयेदिति यावत् । तथा सति सदस्याननुगृहीतवान्भवत्यध्वर्युरिति श्रुतेरर्थो द्रष्टव्यः ।

समुद्गृह्य वाससोऽन्तान्प्राणाय त्वेति क्षौमेणोष्णीषेणोपनह्यति ।

समुद्गृह्य वाससोऽन्तान्सम्यगुद्गृह्योर्ध्वं गृहीत्वा सोमांशूनामेकीकरणार्थं तूष्णीमेव वाससोऽन्तान्वाससः प्रान्तान्क्षौमेणोष्णीषेण दीर्घशाटकेन वाससोपनह्यति दृढं बध्नाति । एतच्च वासः परिधानयोग्यं, सोमोपहृतं वासो यजमानः परिधत्त इत्यग्रेऽवभृथे वक्ष्यमाणत्वात् । प्रादक्षिण्यं परिभाषासिद्धम् ।

व्यानाय त्वेत्यनुशृन्थति ।

अनुशृन्थति शिथिली करोति । किंचिदवेक्षणार्थं क्वचित्प्रदेशे तूष्णीमेव विस्रंस्ये- त्यर्थः । मन्त्रानुपदेशात् । एतच्चावेक्षणाङ्गम् । नच विस्रंसनं विनेक्षणानुपपत्तेरर्थत एव सिद्धौ वचनं व्यर्थमिति वाच्यम् । बद्धस्यैव राज्ञ ईक्षणं वारयितुं तद्वचनस्याऽऽ- वश्यकत्वेन वैयर्थ्याभावात् । सोमविक्रयिणे राजानं प्रदाय तं पृच्छतीत्येतत्प्रभृतिक- र्मार्थतां बोधयितुं वा । अत्र नियममाह बौधायनः—अधोपरिष्टादङ्गुल्याऽवकाशं कृत्वेति ।

प्रजास्त्वमनुप्राणिहि प्रजास्त्वामनुप्राणन्त्वित्यवेक्ष्यैष ते गायत्रो भाग इत्येतैर्मन्त्रैरभिमन्त्रयते ॥ ६ ॥

पूर्वत्र प्रजाकर्मकमनुप्राणनमुत्तरत्र प्रजाकर्तृकमनुप्राणनमित्येतादृशार्थभेदान्मन्त्रद्वि- त्वमिति शङ्कां द्वितीयाध्यायप्रथमपादगतेनार्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादित्यनेन सूत्रेण भगो वामित्यस्मिन्मन्त्रेऽर्थैक्येऽपि आकाङ्क्षाया अभावादनेके मन्त्रा इति यथा प्रतिपादितं जैमिनिना तथाऽनुप्राणनरूपार्थैक्येऽपि आकाङ्क्षाया अभावान्मन्त्रद्वित्वमिति शङ्कां च दूरीकर्तुं कृत्स्नः पाठः । अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादित्येतत्सूत्रार्थस्तु—अर्थशब्दोऽत्र नाभिधेयवाची किंतु प्रयोज- नवचनः । तथाच प्रयोजनैकत्वादित्यर्थो भवति । नह्येकं यजुरित्येव वक्तव्ये यजुष्परिमा- णविचार एकवाक्यलक्षणमसंगतमित्याशङ्क्य नात्र लौकिकवाक्यसाधारण्येनैकवाक्यल- क्षणमुच्यते किंतु तावदेकं यजुरित्येकयजुष एवेत्याशयेन सूत्रे वाक्यशब्दस्य यजुष्परत्वम् । ननु वाक्यशब्दयजुःशब्दयोः कथमेकार्थत्वमिति चेत् । उच्यते— यागसाधनत्वाद्यजुः, यागप्रयोगे वक्तव्यत्वाच्च वाक्यम् । तथाचैकार्थत्वं वाक्ययजुः शब्दयोः सिद्धं भवति । ततश्चेदमपि यागसाधनत्वे पर्यवसितमिति भावः । वक्तव्यत्वादित्यनेनैव यावदेकं यजुस्तावत्प्रयोगसमये प्रयोक्तव्यं नतु तदेकदेश इति प्रयोजनमपि सूचितम् । एवं च तत्प्रयोजनसूचनायैव सूत्रे यजुःशब्दे

प्रयोक्तव्येऽपि वाक्यशब्दप्रयोग इति नाकौशलं सूत्रकारस्येति द्रष्टव्यम् । एकप्रयोजनत्वमात्रे कृते भगो वां विभजत्वित्यादीनां पुरोडाशविभागप्रकाशनरूपैकप्रयोजनत्वादेकयजुष्ट्वं स्यात्तद्व्यावृत्त्यर्थं विभागे सति साकाङ्क्षत्वमिति । तावत्युक्ते स्योनं ते सदनं करोमीत्यस्य कृत्स्नस्यैकयजुष्ट्वं स्यात्तस्मिन्सीदेति तच्छब्दबलेन विभागे साकाङ्क्षत्वादत एकप्रयोजनत्वमिति । तत्र पूर्वभागस्य सदनकरणप्रकाशनमुत्तरभागस्य प्रतिष्ठापनप्रज्ञानं प्रयोजनमिति नातिप्रसङ्गः । अवेक्ष्येत्यत्र सोममिति शेषः । अवनतो भूत्वोपरीक्षित्वेत्यवेक्ष्येत्यस्यार्थः । एतैरिति वचनमेष ते त्रैष्टुभ इत्यादीनामवशिष्टानां वैकल्पिकत्वव्यावृत्त्यर्थम् । मन्त्रैरिति वचनं त्रैष्टुभ इत्यत्रोत्तरानुषङ्गलाभार्थं जागत इत्यत्र पूर्वानुषङ्गलाभार्थं च । पूर्वोऽनुषङ्ग एष इति पदद्वयात्मकः । उत्तरोऽनुषङ्गः पदपञ्चकात्मकः । तथाच—एष ते गायत्रो भाग इति मे सोमाय ब्रूतात्, एष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतात् । एष ते जागतो भाग इति मे सोमाय ब्रूतात्, छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादित्येवं मन्त्राणां पाठो भवति । बौधायनोऽप्येवमाह कल्पसूत्रे, एष ते त्रैष्टुभो जागतो भाग इति मे सोमाय ब्रूतादित्येक एव वा मन्त्रः । अनुषङ्गवचनाभावात् । नच गायत्रं छन्दोऽनुप्रजायस्वेत्येतैस्त्रिः प्रदक्षिणं यथासुखमत ऊर्ध्वं मन्थतीत्यत्रानुषङ्गवचनाभावेऽपि यथाऽनुषङ्गस्तद्वदत्राप्यस्त्विति वाच्यम् । एतस्य दृष्टान्तस्य विषमत्वेनासंगतत्वात् । तथाहि मन्थने त्रैष्टुभमित्यत्रानुषङ्गं विना मन्त्रबहुत्वासंभवेन बहुवचनस्यासंगतत्वापत्त्या तत्सिद्धेः । प्रकृते त्रैष्टुभ इत्यत्रानुषङ्गं विनाऽपि बहुवचनं संगतमेव । अस्मिन्कल्पे प्रतिमन्त्रं विच्छेदार्थं मन्त्रग्रहणं द्रष्टव्यम् । अभिमन्त्रणस्य बाह्यक्रियत्वाभावात् । अविच्छेदेन मन्त्राणां पाठेऽप्यभिमन्त्रणे विरोधो न कोऽपीत्यविच्छेदेनापि मन्त्राणां पाठः स्यात्तं निवारयितुं मन्त्रग्रहणं युक्तमेवात्र । एतन्मन्त्रित्वं द्वैधसूत्रे बोधायनोऽप्याह ।

देव सूर्य सोमं क्रेष्यामस्तं ते प्रब्रूमस्त्वं
त्वं विश्वेभ्यो देवेभ्य ऋतून्कल्पय
दक्षिणाः कल्पय यथर्तु यथादेवतमिति
सहिरण्येन पाणिनाऽऽदित्यमुपतिष्ठते ।

पूर्ववद्व्याख्येयम् ।

सोमविक्रयिणे राजानं प्रदाय तं पृच्छति
सोमविक्रयिन्क्रय्यस्ते सोमा ३ इति ।

उपनद्धमेनं राजानं सोमविक्रयिणे दत्त्वा तं सोमविक्रयिणं पृच्छति सोमविक्रयिन् क्रय्यस्ते सोमा ३ इति । उपोत्थाय पृच्छतीति बौधायनः । हे सोमविक्रयिंस्ते तवायं

सोमः क्रय्यो विक्रेतव्य एवायमिति निश्चयेन प्रसारितोऽस्त्यास्मिन्देशे किमिति प्रश्न- वाक्यस्यार्थः। प्रश्ने प्लुतिः। अद्भिरभ्युक्ष्य चर्मोद्गृह्णातीति बौधायनः।

क्रय्य इति स प्रत्याह।

स सोमविक्रयी क्रय्य इति प्रतिब्रूयात्।

दशभिः क्रीणाति।

दशभिरित्यत्र व्यक्तिभिरित्येव शेषो नतु द्रव्यैरिति। गोधेनुतद्वत्सर्षभानडुन्मिथुन- गवां सप्तत्वेऽपि गोत्वावच्छिन्नपदार्थस्यैकत्वेन दशभिः क्रीणातीतिदशसंख्यानुपपत्तेः। नच गोत्ववद्धेनुत्वतद्वत्सत्वर्षभत्वानडुत्वमिथुनगोत्वजातिरूपधर्मभेदमादाय द्रव्यभेद इति वाच्यम्। गोत्वादिना सांकर्येण धेनुत्वादीनां जातित्वासंभवात्। सप्त गाव इति गोजातीयत्वेनैवैतेषां सूत्रकृत्कृतनिर्देशानुपपत्तेश्च। एतानीतिवक्ष्यमाणसूत्रस्थपदानन्तरं क्रयणानीति पदं देयम्। तावतैव दशसंख्यालाभो भविष्यतीति चेत्। न भविष्यति। कुतः। विकल्पस्यापि संभवात्। अतः समुच्चयसिद्ध्यर्थमिदं सूत्रमावश्यकमेव। अय- मर्थ उक्तो द्वादशाध्याये चतुर्थे पादे—क्रयणेषु तु विकल्पः स्यादेकार्थत्वात्। समुच्च- यो वा प्रयोगे द्रव्यसमवायादिति सूत्राभ्यां जैमिनिना। सूत्रार्थस्तु क्रीयते सोमो यैस्तानि क्रयणानि द्रव्याणि तेषु क्रयणेषु। तुशब्दो याजमानमन्त्रजपसमुच्चयवदत्र समुच्चयो न भवति किंतु विकल्प इति वैलक्षण्यद्योतनाय। एकार्थत्वादानति- रूपकार्यैक्याद्विकल्पः स्यादिति। यद्यपि तत्तद्द्रव्यसाधनक्रयादानतिर्विलक्षणैव जायत इति द्वारकार्यभेदान्न विकल्पसंभवस्तथाऽप्यानतिसामान्यैक्याद्द्वारकार्यमप्येकमिति भावः। इति पूर्वसूत्रार्थः। द्रव्यसमवायाद्दशभिः क्रीणातीतिवचनप्रतिपादितादिति शेषः। अन्यत्स्पष्टम्। [इति] उत्तरसूत्रार्थः।

ता व्यक्तीराह—

सप्त गावो हिरण्यं वासोऽजा च त्रीण्येतानि।

सप्तसु गोषु एक आद्यो गोपदार्थ उपक्लृप्ता सोमक्रयणी समङ्गा बन्धुमतीत्यादिल- क्षणलक्षितः। द्वितीयो धेनुरूपः। धेनुर्नवप्रसूता। तृतीयो धेनुवत्सरूपः। चतुर्थ ऋषभरूपः। पञ्चमः शकटवाहिबलीवर्दरूपः। षष्ठसप्तमौ मिथुनगोरूपौ। एताः सप्त गावः। एतानि हिरण्यवासोजात्मकानि त्रीणि द्रव्याणि चैवं दश व्यक्तय इत्यर्थः। चकारः परस्परसमुच्चयार्थः। त्रीणीतिवचनं सप्तगवां क्रयप्रदेशे सहैव संनिधापनमिवै- तेषां त्रयाणामपि सहैव संनिधापनं कर्तव्यमितिज्ञापनार्थम्। त्रीणीत्येतावतैव सिद्ध एता- नीतिवचनं हिरण्यवासोजानां जातयोऽपि कदाचित्संख्यासंपादिका नतु व्यक्तय एवेति नियम इतिज्ञापनार्थम्। तेन षोडशमाषात्मकसुवर्णरूपहिरण्यद्वयं त्रयमितोऽप्यधिकं वाऽपि शक्त्यनुसारेण देयम्। एवं वासोद्वयं त्रयमधिकं वाऽपि तथाऽजाद्वयं त्रयम-

धिकं वाऽपि । मन्त्रास्तु न प्रकृतावूह इतिनिषेधादेकवचनान्ता एव वक्तव्याः पत्नीᳬ संनह्येतिवत् । तथोत्तरस्यां तताविति ऊहनिषेधकात्सूत्राद्विकृतावपि । एकवचनं जात्यभिप्रायपरतया समर्थनीयम् । द्रव्यत्रयस्य प्रदानं हिरण्यमजा वास इत्येवं क्रमेण विधास्यति । तत्क्रमेणैवात्र निर्देशे कर्तव्ये वासोनिर्देशानन्तरमजानिर्देशो व्युत्क्रमेण यः कृतः स ज्ञापयति द्रव्यत्रयप्रदानक्रमविषयेऽयमपि पक्षे क्रमोऽस्तीति ।

दश गावो भवन्त्यथैतानि त्रीणीत्येकेषाम् ।

दश गावः, त्रीण्येतानि एवं मिलित्वा त्रयोदश व्यक्तय इत्यर्थः । अस्मिन्पक्षे चतस्रो गाः(गावो) धेनुस्तद्वत्स ऋषभोऽनड्वान्मिथुनौ गावौ । एता दश गावो हिरण्यं वासोऽजा चेत्येतानि त्रीणि द्रव्याणि चेत्येवं त्रयोदशेत्येकेषामाचार्याणां मतम् । अयं च पक्षः शाखान्तरीयः । अथशब्दो दशगोव्यक्तिप्रदानानन्तरमेव वा हिरण्यवासोजानां प्रदानमिति पाक्षिकं क्रमान्तरं प्रदर्शयितुम् । एतेनेदमपि ज्ञायते केषांचिन्मते दशानां गवां प्रदानात्पूर्वमपि एतेषां त्रयाणां दानमस्तीति ।

अपि वा चतुर्भिरेव ।

अप्राढ्यस्य दशव्यक्त्यभावे चतुर्भिरेव द्रव्यैः क्रयः ।

तान्याह—

गवा चैतैश्च त्रिभिः ।

एतैरनन्तरोक्तैर्हिरण्यवासोजात्मकैर्द्रव्यैः । गवा चेत्यत्र चकारो मतान्तरसमुच्चयार्थः । एवं च चतस्रो गावो हिरण्यं वासोऽजा चेति सप्तभिरपि पक्षे क्रयः सिध्यति । एतेषां पक्षाणां शक्ताशक्तपरत्वेन व्यवस्था ।

गवैकविंशतिदक्षिणस्य ।

नियमार्थमिदं सूत्रम् । एकविंशतिदक्षिणस्यैकया गवैव क्रय इत्यर्थः । एतैश्च त्रिभिरित्येतस्य नानुवृत्तिः । यद्येतैश्च त्रिभिरित्येतस्यानुवृत्तिरिष्टा स्यात्तदैकविंशतिदक्षिणस्य चेत्येवं ब्रूयात् । यतो नैवमुक्तवानतो नानुवृत्तिः । अस्मिन्पक्षे हिरण्यप्रत्यादानं लुप्यते । एकविंशतिदक्षिणस्य गवेत्युक्त्या षष्टिदक्षिणस्याधिकसंख्याऽर्थादवगम्यते । तां स्पष्टमाहाऽऽपस्तम्बः—तिसृभिः षष्टिदक्षिणस्येति । अपरिमितदक्षिणापक्षे विशेषमाह स एव—अपरिमिताभिरपरिमितदक्षिणस्येति ।

त्रिंशता सहस्रदक्षिणस्य ।

स्पष्टम् । सर्वस्वदक्षिणे क्रतौ चतुर्विंशत्या क्रयः । तथाचाऽऽपस्तम्बः—चतुर्विंशत्या सहस्रे सर्ववेदसे वेति ।

ता व्यक्तीराह—

सप्तविꣳशतिर्गावो हिरण्यं वासोऽजा च त्रीण्येतानि ।

एकविंशतिर्गावः । धेनुस्तद्वत्स ऋषभोऽनड्वान्मिथुनौ गावौ । एवं सप्तविंशतिर्गावः । हिरण्यं वासोऽजा चेत्येतानि त्रीणि द्रव्याणि । एतत्सर्वं मिलित्वा त्रिंशद्व्यक्तयो भवन्तीत्यर्थः । त्रीण्येतानीति प्रयोजनं पूर्ववदत्रापि ज्ञेयम् ।

त्रिꣳशद्गावो भवन्त्यथैतानि त्रीणीत्येकेषाम् ।

सहस्रदक्षिणस्येत्यत्रानुवर्तते । अथशब्दप्रयोजनं पूर्ववत् । अन्यत्पूर्ववद्व्याख्येयम् ।

शतेन वाजपेये द्वाभ्याꣳ राजसूये सहस्रेणाश्वमेधे ।

शतेनेति पूर्वत्रोपक्रमाच्छतशब्दस्य वचनविपरिणामेन द्वाभ्यामित्यत्रानुषङ्गः । तेन द्वाभ्यां शताभ्यामित्यर्थो भवति । शतेनेत्येतत्पूर्वं व्यक्तीनामिति योग्यतया शेषो द्रष्टव्यः । एवमुत्तरत्रापि । सप्तनवतिर्गावो हिरण्यादित्रयं च शतं गाव एतानि त्रीणि चेत्येवं पक्षद्वयं त्रिष्वपि ज्ञेयम् ।

सोमं ते क्रीणामीति क्रीणाति ।

सोमं ते क्रीणामीतिमन्त्रमभिमातिषाहमित्यन्तमुक्त्वा वक्ष्यमाणैस्तत्तन्मन्त्रैस्तत्तत्क्रयद्रव्यं निर्दिश्य प्रयच्छतीत्यर्थः ।

सोमं महान्तं बह्वर्धꣳ शोभमानमिति वोक्त्वैकैकमनुदिशति ।

सोमं ते क्रीणामीत्यस्य मन्त्रस्य स्थान इमं मन्त्रमुक्त्वा वैकैकं द्रव्यमनुदिशति निर्दिश्य प्रयच्छतीत्यर्थः । अथवा सोमं महान्तं बह्वर्वꣳ शोभमानमिति वोक्त्वेति, यथाश्रुत एवान्वयः । पूर्वकल्पे सोमं ते क्रीणामि सोमं महान्तं बह्वर्वꣳ शोभमानमित्यनयोर्विकल्पः । उत्तरकल्पे सोमं ते क्रीणामीत्येतदनन्तरमेतस्यापि पाठो वैकल्पिक इति द्रष्टव्यम् । यथा सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहꣳ सोमं महान्तं बह्वर्वꣳ शोभमानमित्येवमुभौ मन्त्रावुक्त्वा वक्ष्यमाणैस्तत्तन्मन्त्रैस्तत्तत्क्रयद्रव्यं निर्दिश्य प्रयच्छतीत्यर्थः ।

कलया ते क्रीणानि कुष्ठया ते क्रीणानि शफेन ते क्रीणानि पदा ते क्रीणानीति गोस्त्रीन्पादान्प्रसंख्याय गवा ते क्रीणानीति गाम् ।

कला जङ्घाया अधोभागः । कुष्ठा कलाया अधोभागः । शफः खुरः । पत्पादः । एतैर्मन्त्रैः प्रतिपादमावृत्तैर्गोस्त्रीन्पादांस्तत्तद्देशे स्पृशन्प्रसंख्याय निर्दिश्येत्यर्थः । पश्चिमपादद्वयं दक्षिणः पूर्वपादश्चेति क्रमः । चतुर्थपादं यत्र कुत्रचित्स्पृशन्गवा ते क्रीणानीति गां निर्दिशतीत्यर्थः । तस्यास्त्रीन्पादान्प्रसंख्यायेति तच्छब्देन गवा ते क्रीणानीतिमन्त्र-

समभिव्याहाराद्गोपरामर्शसिद्धौ गोरितिग्रहणमनित्योऽयमवयवशः क्रय इतिज्ञापनार्थम् । यत्कलया ते शफेन ते क्रीणानीति पणेतेति कलाशफाभ्यामवयवक्रयं निन्दित्वा गवा ते क्रीणानीत्येव ब्रूयादितिसमुदायक्रय एव ब्राह्मणे प्रस्तुतः । अवयवक्रयस्तु शाखान्तरीय उक्तः । ब्राह्मणे कलाशफयोर्ग्रहणं कुष्ठ(ष्ठा)पादयोरुपलक्षणम् ।

भूयो वाऽतः सोमो राजाऽर्हतीति सोमविक्रय्या संपदः प्रत्याह ।

मन्त्रे वाशब्दोऽवधारणे । भूयो वाऽत इति याच्ञारूपं वाक्यम् । आ क्रयसंपदः सोमविक्रयी प्रति अध्वर्युमभिमुखो भूत्वाऽऽह । संपद इति पञ्चम्येकवचनम् । आ संपद इति वचनाद्दशभिः क्रीणातीति पक्षे दशम्यां व्यक्तौ नैतत् । त्रयोदशपक्षे त्रयोदश्याम् । एवमन्यसंख्यास्वपि द्रष्टव्यम् ।

भूय एवार्हतीत्यध्वर्युः ।

प्रतिब्रूयादिति शेषः ।

शुक्रं ते शुक्रेण क्रीणामीति हिरण्यम् ।

सोमं ते क्रीणामीति मन्त्रमभिमातिषाहमित्यन्तमुक्त्वा शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेनेति हिरण्यं प्रयच्छतीत्यर्थः । केचित्तु अमृतेनेत्यन्ते हिरण्येन ते क्रीणामीत्यनुषजन्ति ।

तपसस्तनूरसीत्यजाम् ।

अभिमातिषाहमित्यन्ते तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणामीत्यजां प्रयच्छति । पशुना क्रीणाम्यजया ते क्रीणामीति केचिदत्रानुषजन्ति । प्रतीचीनग्रीवयाऽजया पणत इति बौधायनो द्वैधे । अजाया उपनिग्रहण इति सूत्रं बौधायनस्यानुपनिगृह्णन्नेवाजां मन्त्रं जपेदिति शालीकिरिति । उपनिग्रहणं सोमविक्रयिणः समीपे स्वकक्षाप्रदेशेन गतिरोधनार्थं तस्या दार्ढ्येन संश्लेषणविशिष्टं धारणम् । उपनिग्रहणाभावेऽपि केवलं नियमनं तु भवत्येव ।

धेन्वा ते क्रीणामीति धेनुम् ।

अभिमातिषाहमित्यन्ते वत्सेन ते क्रीणामीत्येतावता मन्त्रेण धेनुं प्रयच्छति । अभिमातिषाहमित्यन्ते वत्सेन ते क्रीणामीति वत्सम् । यद्यपि वत्सः सूत्रकृता नोक्तस्तथाऽपि गुणभूतस्यापि तस्याऽऽक्षेपाल्लाभः । अन्यथा धेनोर्वत्सस्य स्तनंधयस्य जीवनानुपपत्तेः, दश संपद्यन्त इति श्रुतिविरोधापत्तेः, दशभिः क्रीणातीति सप्त गाव इति संख्यापरिगणनाभ्यां विरोधापत्तेश्चेति । ननु विहितधेनुप्रदानानन्तरमन्या धेनुरेव दशसंख्यासंपत्त्यर्थं क्रयसाधनत्वेन देया तस्या अप्यार्थिकमेव सवत्सत्वम् । एवं च धेनोर्वत्सस्य धेनुसहभावेऽपि संख्यासंपत्तिस्तद्वत्सेन न भवति गुणभूतवत्सस्य क्रयसाधनत्वकल्पनापेक्षयाऽन्यधेन्वा एव क्रयसाधनत्वकल्पनाया युक्तत्वादिति चेन्न । तथा सत्यपि

धेन्वा ते क्रीणामीति धेनुं वत्सेन ते क्रीणामीति तस्या एव धेनोर्वत्समिति सूत्रान्तरे धेनुप्रदानानन्तरं तद्वत्सस्यैव क्रयसाधनत्वेनोपात्तत्वेन सूत्रान्तरानुरोधेन दशसंख्यासंपत्त्यर्थं क्रयसाधनत्वेन वत्सोपादानस्यैव युक्ततरत्वात् । तस्मात्सूत्रान्तरानुरोधाद्धेनोर्वत्स एव गोषु परिगणनीयः । दश संपद्यन्त इतिश्रुतितोऽप्ययमर्थो लभ्यते । कथमिति चेदुच्यते—यत्कलया त इत्यनुवाके नव द्रव्याण्युक्त्वा दश संपद्यन्त इति वचनान्नवद्रव्येष्वेवाऽऽर्थिकं दशमं द्रव्यमप्यस्तीति ज्ञायते । तच्च धेनोर्नवप्रसूतत्वेन तद्वत्सस्य जीवनान्यथानुपपत्त्या तस्यैव ग्रहणादुपस्थितत्वाच्च धेनुवत्सात्मकमेव । मिथुनगोद्वयान्तर्गतगोवत्सस्य तु स्तनंधयत्वे मातृसहभावेनैव दानं न स्वतन्त्रतयेति । अतो धेनुवत्सेनैव दशत्वसंपत्तिर्द्रष्टव्या ।

ऋषभेण ते क्रीणामीत्यृषभं वत्सतरेण साण्डेनेत्येकेषाम् ।

अभिमातिषाहमित्यन्त ऋषभेण ते क्रीणामीत्यृषभम् । एकेषामाचार्याणां मत ऋषभस्थाने साण्डेन वत्सतरेण क्रयः । स्तनपानोपरतो वत्सो वत्सतरः । साण्ड इत्यनेन बलिष्ठत्वं द्योत्यते । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्व इति ष्टरच्प्रत्ययः । अभिमातिषाहमित्यन्ते साण्डेन वत्सतरेण ते क्रीणामीति मन्त्रः ।

अनडुहा ते क्रीणामीत्यनड्वाहम् ।

अनड्वाञ्शकटवाही बलीवर्दः । अभिमातिषाहमित्यन्तेऽनडुहा ते क्रीणामीत्यनड्वाहम् ।

मिथुनाभ्यां गोभ्यां[1] क्रीणामीति मिथुनौ गावौ ।

पुंगौः स्त्रीगौश्च मिथुनौ नतु पुंगोद्वयं स्त्रीगोद्वयमिति । अन्यथा सप्त गाव इत्यनेन विरोधापत्तेः । मिथुनौ गावौ ददातीत्यत्राप्येवमेव । ब्राह्मणे मिथुनाभ्यां क्रीणातीत्यत्राप्येवमेव मिथुनशब्दार्थोऽभिप्रेतस्ताभ्यां युगपत्क्रीणातीत्यर्थः । अभिमातिषाहमित्यन्ते मिथुनाभ्यां गोभ्यां ते क्रीणामीति केचित्पठन्ति । सर्वत्र तच्छब्ददर्शनादित्याशयः । एतेषु द्रव्येषु भूयो वाऽतो भूय एवेत्यावर्तते ।

वाससा ते क्रीणामीति वासः ।

अभिमातिषाहमित्यन्ते वाससा ते क्रीणामीति वासः । अत्र न भूयो वाऽतो भूय एवेति । वासोऽत्र परिधानपर्याप्तम् । सोऽयं दशव्यक्तिविधिरविशेषचोदनात्सति वैशेषिकविधौ सर्वत्रोपतिष्ठते ।

दशभिः संपादयति भूयस एके सोमक्रयणानामनन्ति ॥ ७ ॥

दशत्वसंख्यासंपादनमात्रमेताभिर्दशभिर्व्यक्तिभिः कर्तव्यं सोमविक्रयिपरितोषार्थं भूयो बहून्सोमक्रयणानन्यानीवर्मोहिष्यश्वप्रभृतीनपि दद्यादित्येक आचार्या वदन्तीत्यर्थः ।

---

१ ड. °भ्यां ते क्रीं° ।

अथवा दशभिर्व्यक्तिभिरेव भूयसो विहितसंख्यातोऽधिकान्सोमक्रयणान्सोमविक्रयिपरितोषार्थं संपादयतीत्येके समामनन्तीत्यर्थः । शतेन वाजपेये द्वाभ्या१९ राजसूये सहस्रेणाश्वमेध इत्यत्र परितोषार्थं नाधिकसोमक्रयणदानं विहितसंख्याया एव बहुत्वेन तयैव परितोषसिद्धेः । सर्वथा तस्यापरितोष एव चेत्तदोपहरेतैवेति वक्ष्यमाण उपाय एव ।

तत्र भूयस्त्वनियममाह—

पञ्चदशभिः क्रीणाति सप्तदशभिः क्रीणाति चतुर्विंशत्या क्रीणात्यपरिमिताभिः क्रीणाति क्रीणामीत्यन्ततो वदति ।

षोडशाष्टादशाद्याश्चतुर्विंशतिसंख्याया अर्वाग्भूता मध्यतनाः संख्याः परिसंख्यायन्ते पञ्चदशसप्तदशचतुर्विंशतिसंख्यावाचकैः शब्दैः । मध्यतनसंख्याभिः परितोषेऽपि संख्याद्वयान्यतमसंख्ययैव देया इति अदृष्टार्थोऽयं नियमः । पञ्चदशभिरपरितोषे सप्तदशभिः परितोषणम् । सप्तदशभिरपरितोषे चतुर्विंशत्या परितोषणम् । चतुर्विंशत्याऽप्यपरितोषे प्रमाणतोऽप्यधिकाभिस्त्रिचतुरादिभिः परितोषणम् । सर्वथा परितोषाभावे वक्ष्यमाण उपाय एव सोमविक्रयिपरितोषार्थं भूयोदाने क्रियमाणेऽन्ततोऽन्ते पञ्चदशसप्तदशचतुर्विंशत्यपरिमितान्यतमभूयःपदवाच्यसंख्याशब्दोच्चारणानन्तरं क्रयसाधनव्यक्तीनां तूष्णींप्रदानेऽपि क्रीणामीति वदतीत्यर्थः । यथा वाससा क्रये सति पञ्चदशभिः क्रीणामि सप्तदशभिः क्रीणामि चतुर्विंशत्या क्रीणामि अपरिमिताभिः क्रीणामीति । अपरिमितशब्द उक्तप्रमाणाधिकप्रमाणवाची । अपरिमितं प्रमाणाद्भूय इति कात्यायनोक्तेः । अथवा यानि परितोषार्थं देयानि द्रव्याणि भवन्ति तान्युच्चार्यान्त एव क्रीणानीति सकृच्छब्दमुच्चारयति नतु प्रतिद्रव्यमिति । यथा गोहिरण्याजावासोभिः क्रीणामीति, यथा वा गोभिर्हिरण्येनाजया वाससा च क्रीणानीति । नच द्वादशरात्रं दीक्षितो भृतिं वन्वीतेतिश्रुतिविहितं द्रव्ययाचनमरुणया क्रीणाति हिरण्येन क्रीणातीत्यादिश्रुतिविहितोऽयं सोमक्रयश्चाविद्यमानद्रव्यसोमकस्यैव तद्वतस्तदानर्थक्यादिति वाच्यम् । अपूर्वस्य तदभावेऽनुत्पत्त्यापत्त्यैतयोर्नित्यत्वस्वीकारस्यात्यन्तावश्यकत्वात् । तथाच षष्ठेऽध्यायेऽष्टमे पादे जैमिनिः—याच्ञा क्रयणमविद्यमाने लोकवत्, नियतं वाऽर्थवत्त्वात्स्यादिति । द्रव्ये सोमे चाविद्यमान एव याच्ञा याचनं क्रयणं क्रयश्च, अन्यथा न । एतच्च सुप्रसिद्धमिति लोकवदित्यनेनोच्यत इति पूर्वसूत्रार्थः । अर्थवत्त्वात्, अपूर्वात्तस्य प्रयोजनवत्त्वान्नियतमेवेदं द्वयं विद्यमानत्वेऽप्युभयत्रेति ।

संपाद्य सम्यच्चे गोरस्मे चन्द्राणीति हिरण्यं प्रत्यादत्ते ।

संपाद्येत्यनुवादः । परितोषार्थं बहूनां सोमक्रयणानां दानेऽपि संपादनाव्यवहितोत्तरं हिरण्यप्रत्यादानमेव कर्तव्यम् । अनन्तरं परितोषार्थसोमक्रयणदानमित्यर्थं बोधयितुं प्रत्तं हिरण्यं सोमविक्रयिणो हस्तादादत्ते । येन हिरण्येन सोमं क्रीणीयात्तदभीषहा

पुनराददीत तेज एवाऽऽत्मन्धत्त इति ब्राह्मणात्प्रतिशब्दाच्च । एकया गवैव क्रये हिरण्यप्रत्यादानं लुप्यते ।

अस्मे ते बन्धुरिति शुक्लामूर्णास्तुकां यजमानाय प्रयच्छति ।

ऊर्णास्तुका छिन्नप्ररूढा स्तुका । एतादृश्यूर्णा । सा च शुक्ला तां शुक्लामूर्णास्तुकां यजमानाय प्रयच्छति सुरक्षितां स्थापयितुम् । यजमानाय प्रदानमदृष्टार्थम् । ज्योतिरित्यन्तो मन्त्रस्य ।

तां विततनकाले दशापवित्रस्य नाभिं करोति ।

तां यजमानाय दत्तां तस्मिन्नुदीचीनदशमुद्गातारो वितत्य धारयन्तीत्येतस्य कालो दशापवित्रविततनकालः । तस्मिन्काले ततो गृहीत्वा दशापवित्रस्य वितनिष्यमाणस्य मध्ये नाभिं धारास्रवणानुकूलामधोलम्बमानां नालरूपां करोति अध्वर्युरेव । अध्वर्युसूत्रे पाठात् । अत्र पाठस्तु प्रसङ्गसंगत्या । अथवा नाभिं करोतीत्यत्रान्तर्भावितो णिच् । तेन नाभिं कारयतीत्यर्थो भवति । तथाच दशापवित्रस्य नाभिं कुरु इति प्रैषः सिद्धो भवति । तस्य यजमानो नाभिं करोतीति याजमानसूत्रे नाभिकरणे यजमानकर्तृकताया वक्ष्यमाणत्वाद्यजमानं प्रत्ययं प्रैषः । अथवा तस्य यजमानो नाभिं करोतीत्यत्रैवान्तर्भावितो णिच् । तथाच पूर्ववत्प्रैषः सिद्धो भवति । स चाध्वर्युं प्रति यजमानेन देय इति ज्ञेयम् । पवित्रप्रमाणं दशाप्रमाणं च मानवसूत्रे—अरत्निमात्रं पवित्रं प्रादेशमात्री दशेति ।

शुक्लानामाविकोर्णानाममोते द्वे दशापवित्रे भवतोऽदशाकमन्यतरत् ।

शुक्लानां शुक्लवर्णानां जीवोर्णानामिति कात्यायनः । आविकोर्णानामविसंबन्धिनीनामूर्णानाममोते अमा सहोते सूत्रेण प्रोते द्वे । दशाऽञ्चलस्तद्युक्ते पवित्रे दशापवित्रे भवतः सोमरसपवनसाधनत्वात्पवित्रसंज्ञेतयोः सहार्थकेनामाशब्देनेदं गम्यतेऽध्वर्युप्रतिप्रस्थात्रोः सहत्वमत्रेति । तेनैकमध्वर्युणा प्रोतमेकं प्रतिप्रस्थात्रेति । अथवाऽमाशब्दो दशापवित्रयोः समत्वार्थः । द्विग्रहणमुभे प्रोते एकं दशापवित्रमेवमेव द्वितीयमेवं द्वे भवत । इति बोधयितुम् । तयोः[1] प्रोतयोर्द्वयोर्द्वयोर्मध्येऽदशाकं दशारहितमन्यतरदेकं भवतीत्यर्थः । एतेन प्रोतयोर्द्वयोर्द्वयोर्मध्ये द्वितीयं सदशमित्यर्थादवगतं भवति । एवं चोभयोर्दशायुक्तपवित्रत्वमपि संगतं भवति ।

उदकेन क्लेदयित्वा कृष्णामूर्णास्तुकामिदमहꣳ सर्पाणां दन्दशूकानां ग्रीवा उपग्रथ्नामीत्युपग्रथ्य सोमविक्रयिणि तम

---

१ ख. ग. °योर्भ° । ख. ग. °योर्म° ।

इति तया सोमविक्रयिण१ं रराटे विध्यति ।

कृष्णामूर्णास्तुकामुदकेन क्लेदयित्वेत्यन्वयः । उपग्रथनं गोलिकाकरणम् । तया गोलिकारूपया रराटे रलयोः सावर्ण्याल्ललाट इत्यर्थः । विध्यति प्रहरति । तयेतिवचनाभाव ऊर्णास्तुकाया उपग्रथनमात्रं वेधस्तु अन्येन येन केनचिदनुपग्रथितयोर्णास्तुकया वा स्यात्स मा भूदित्येतदर्थम् ।

स्वजा असि स्वभूरस्यस्मै कर्मणे जात ऋतेन त्वा गृह्णाम्यृतेन नः पाहीति सोमविक्रयिणो राजानमपादत्ते ।

सोमविक्रयिणः सकाशाद्राजानमपादत्ते गृह्णातीत्यर्थः । अपेत्युपसर्गो यथा हस्ताभ्यां न पतति तथा दानं कर्तव्यमित्यर्थं द्योतयति । अथवाऽत्र वाससा बन्धनं द्योतयितुम् ।

यदि कृच्छ्रायेतापैव हरेत ।

यदि तु सोमविक्रयी पुनर्लिप्सया दाने कृच्छ्रायेत दुःखायेत तदा बलादपहरेतैवेत्यर्थः । उपैव हरेतेति पाठे झटितीत्यर्थं उपेत्युपसर्गः ।

इन्द्रस्योरुमाविश दक्षिणमिति यजमानस्योरौ राजानमासादयति ।

ऊरौ दक्षिणे मन्त्रलिङ्गात् ।

नीव गृह्णीते ।

अन्तर्भावितोऽत्र णिच् । व्यत्ययो बहुलमिति सूत्रस्थेन सुप्तिङुपग्रहेत्यनेन च्छान्दसमात्मनेपदम् । उपग्रहशब्देनाऽऽत्मनेपदं गृह्यते । निग्राहयतीवेति तदर्थः । निग्रहणमाश्लेषणम् । आसादयतीत्येतस्मात्पूर्वमन्वयः । तेनाध्वर्योरेवेदम् ।

अध्वर्यवा शक्तवा इति यजमानः पृच्छत्याशकामेत्यध्वर्युः कथमाशकतेति विष्णु१ं स्तोममरुत्समहि बृहस्पतिं छन्दा१ंस्युत्थाय यजू१ंषि वि पर्वता अजिहत सुतरणा अपो अतारिषमित्यध्वर्युः ।

शक्तवै शकृ शक्तावित्यस्माद्धातोः कृत्यार्थे तवैप्रत्ययः । अध्वर्यो आ अत्यन्तं शक्तवै पर्वतात्सोमं गृहीत्वाऽवततुं शक्यं त्वया किमिति यजमानः पृच्छति । आशकामेति लुङो रूपम् । आ अशकामेति पदच्छेदः । शकृ धातोश्च्लि लुङीति च्लिः । पुषादिद्युताद्य्लृदितः परस्मैपदेष्विति च्लेरङ् । लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यडागमः । अतो दीर्घो यञीति दीर्घः । आ अशकामेत्याकाराकारयोरेकादेशः सवर्णदीर्घः । आ अत्यन्तमशकाम शक्ताः स्मेति तदर्थः । आशकामेत्यध्वर्युः प्रत्याह । कथमाशकतेति लुङो मध्यमपुरुषबहुवचनम् । तस्थस्थमिपामिति थविभक्तेस्तकारः पूजार्थं बहुवचनम् । अत्र यद्यपि कर्तृनिर्देशो नास्ति तथाऽपि संदंशपतितत्वाद्यजमानस्यैव प्रश्नकर्तृत्वं कथं केन प्रकारेण शक्ताः स्थेति । एतदुत्तरार्थकं मन्त्रमाह—विष्णुमिति । स्तोमं जनसमुदाय-

---

१ ङ. ज. झ. ञ. ढ. 'चेतोपै' ।

रूपं विष्णुमरुत्स्महि वयं संपादितवन्तः कल्पितवन्त इति यावत्। बृहस्पतिं छन्दा१ँसीत्युभयत्रापि स्तोममरुत्स्महीत्यन्वेति। व्यापनशीलो विष्णुः सामर्थ्यप्रदत्वेनास्माकमनुकूलः। बृहस्पतिर्बुद्धिप्रदातृत्वेनास्माकमनुकूलः। छन्दांसि च्छादकत्वेनास्माकमनुकूलानि। एतेष्वनुकूलेषु सत्सु शक्तत्वे किमाश्चर्यं भो यजमाना अस्मात्प्रदेशाज्झटिति उत्थाय यजूंषि पर्वता यजुर्भ्यो यजूरूपेभ्यः पर्वतेभ्यो यूयं व्यजिहत गच्छत। लकारव्यत्ययः कर्तव्यः। तेन प्रार्थनरूपो लिङर्थोऽत्र भवति गच्छतेति। पर्वतेषु यजूरूपत्वं विप्रकीर्णत्वसाम्यात्। यथा यजुःषु पादासंबद्धत्वाद्विप्रकीर्णत्वं तथा पर्वतेषु दुर्विगाह्यभूमिकत्वाद्विप्रकीर्णत्वम्। एवं च यजूरूपत्वं पर्वतेषु केनापि सादृश्येनोपपन्नं भवति। पर्वता इति पञ्चम्यर्थे प्रथमा। दुस्तरणाः सतीरव्ययः सुतरणाः सुष्ठु तर्तुं योग्या अतारिषमुत्तीर्णोऽस्मीत्यर्थः। अथवाऽतारिषमित्यस्य लकारव्यत्ययं कृत्वा तरिष्यामीत्येवमर्थः कार्योऽर्थानुरोधात्। विष्णु१ँ स्तोममित्यध्वर्युः प्रत्याह। एतान्यदृष्टार्थानि प्रश्नप्रतिवचनानि। पर्वता अजिहतेति लिङ्गात्पर्वते क्रय एतानि। एतेन गिरौ क्रयोऽनुज्ञातो भवति।

स्वानभ्राजेति सोमक्रयणाननुदिशति।

स्वानभ्राजादयः सप्त गन्धर्वास्ताननुदिश्य सोमक्रयणान्सोमक्रयसाधनीभूतान्पदार्थाननुदिशति संकल्पयतीत्यर्थः। अत्र ब्राह्मणम्—स्वानभ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरक्षन्तेभ्योऽधिसोममाहरन्यदेतेभ्यः सोमक्रयणान्नानुदिशेदक्रीतोऽस्य सोमः स्यान्नास्यैतेऽमुष्मिँल्लोके सोम१ँ रक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति क्रीतोऽस्य सोमो भवत्येतेऽस्यामुष्मिँल्लोके सोम१ँ रक्षन्तीति। दमन्नित्यन्तो मन्त्रः। तदेकया क्रयेऽप्येषा वः सोमक्रयणी ता१ँ रक्षध्वमित्यूहेनेति कश्चित्। वस्तुतः प्रकृतावूहनिषेधात्पूजार्थं बहुवचनं भविष्यति।

रुद्रस्त्वाऽऽवर्तयत्विति सोमक्रयणीमावृत्यान्यया
गवा निष्क्रीय यजमानस्य गोष्ववसृजति।

आवर्तने प्रादक्षिण्यं परिभाषासिद्धम्। सोमक्रयणीं गामावृत्य पराङ्मुखीं कृत्वाऽन्यया सोमक्रयणीव्यतिरिक्तया गवा निष्क्रीय तां गां सोमविक्रयिणे दत्त्वा यजमानस्य या गावस्तासु गोषु तां सोमक्रयणीमपिसृजति मेलयतीत्यर्थः।

पृषता वरत्राकाण्डेन सोमविक्रयिणमपक्षामं नाशयति।

पृषता बिन्दुमता वरत्राकाण्डेन चर्ममयरज्जुकाण्डेनापक्षामं परोक्षं नाशयति गमयति।

लोष्टैर्घ्नन्ति लकुटैर्घ्नन्तीत्येकेषाम् ॥ ८ ॥

इति हिरण्यकेशिसूत्रे सप्तमप्रश्ने द्वितीयः पटलः।

लोष्टैर्मृत्पिण्डैः । लकुटैः काष्ठखण्डैः । लोष्टैर्घ्नन्ति लोष्टैरादौ तस्माद्देशाद्घ्नन्ति गमयन्ति तस्मादपि देशाल्लकुटैर्घ्नन्ति गमयन्तीत्येकेषामाचार्याणां मतमित्यर्थः । अनयैव रीत्या क्रियापदद्वयं सार्थकं भवति । अत्राऽऽपस्तम्बः—यदि सोमविक्रयी प्रतिविवदेत पृषतैनं वरत्राकाण्डेनापक्षामं नाशयेयुर्लकुटैर्घ्नन्तीत्येकेषां नित्यवदेके वध५ समामनन्तीति । नित्यवत्, अविवदमानस्यापीत्यर्थः । वधः प्रहारः । स च शरीरापीडनानुगुण्येन । सर्वत्र लोष्टमित्येव पाठो युक्तः । लोष्टपलितावित्युणादिसूत्रे क्तान्तताया एव निपातनात्सिद्धत्वात् । तस्यै दिशो लोष्टमाहरेदितिश्रुतौ स्पष्ट एव क्तान्तः पाठः । तेन लोष्ठमित्यपपाठ एवेति ज्ञेयम् ।

इति श्रीमदोकोपाह्वाग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य द्वितीयः पटलः ॥ २ ॥

अथ सप्तमप्रश्ने तृतीयः पटलः ।

अदित्याः सदोऽसीति शकटस्य नीडे कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृणाति प्रत्त५ राजानमदित्याः सद आसीदेति तस्मिन्नासादयति ।

नीडं राज्ञ उपवेशनदेशः । प्रत्तवचनं स्तरणोत्तरकालं प्रदानमुत्थानगमने तु पूर्वमेवेतिख्यापनार्थम् । यजमानेन दत्तमेव गृहीत्वाऽऽसादयति नतु यजमानात्स्वयमेव गृहीत्वाऽऽसादयतीत्येतदर्थं वा । तस्मिन्नास्तृते कृष्णाजिने ।

अस्तभ्नाद्द्यामित्यासन्नमभिमन्त्रयते ।

आसन्नं राजानम् । व्रतानीत्यन्तो मन्त्रः ।

आसादयतीत्येकेषाम् ।

वारुण्यर्चाऽऽसादयतीतिश्रुतेः । अस्तभ्नाद्द्यामित्यनेन मन्त्रेणाऽऽसादनमेव कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः । एतन्मतेऽदित्याः सद आसीदेत्ययं मन्त्रः कृष्णाजिनास्तरणकरणीभूतस्यादित्याः सदोऽसीत्येतस्यैव शेषभूत इति द्रष्टव्यम् ।

वनेषु व्यन्तरिक्षं ततानेति वाससा पर्यानह्यति ।

वाससाऽन्येन महता पर्यानह्यति परि परित आ, अत्यन्तं वेष्टयतीत्यर्थः । ग्रावसंधिषु सोमस्योत्पत्तेर्ग्रावबेष्टितत्वमस्ति । प्रकृतेऽप्यनेन वाससा वेष्टनेन ग्रावभिर्वेष्टित

इव भवति । ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधातीत्यर्थवादादयमर्थो लभ्यते । शकटमिति शेषः । उपस्थितत्वात् । अद्रावित्यन्तो मन्त्रः ।

उदु त्यं जातवेदसमिति कृष्णाजिनेनोर्ध्वग्रीवेण बहिर्लोम्नाऽपिदधाति तरणिर्विश्वदर्शत इति वा ।

अपिदधातीत्यत्र द्वारमिति शेषः । सूर्यमित्यन्तो मन्त्रः । तरणिर्विश्वदर्शत इति वा । तरणिर्विश्वदर्शत इति वैकल्पिको मन्त्रो रोचनमित्यन्तः ।

उस्रावेतं धूर्षाहावित्यनड्वाहावुपासजति ।

उस्रावेतमिति मन्त्रेणानड्वाहौ शकटसमीपं प्रेरयति । ब्रह्मचोदनावित्यन्तो मन्त्रः । सकृदेव मन्त्रो द्विवचनलिङ्गाद्विभवाच्च ।

धूरसीति धुरावभिमृशति ।

द्वयोर्धुरोरावृत्तिर्मन्त्रस्य ।

वारुणमसीति शकटमुत्खिदति ।

उत्खेदनमुद्यमनम् ।

प्रागीषमवस्थाप्य वरुणस्योत्तम्भनमसीत्युपस्तभ्नोति ।

अवस्थाप्य धृत्वा । उपस्तम्भनं काष्ठेऽवस्थापनम् । वरुणस्य स्कम्भनमसीति स्वशाखोक्तेन विकल्पते ।

दक्षिणमनड्वाहं युनक्ति ।

सामान्यप्रतिज्ञेयम् ।

वारुणमसीति योक्त्रं परिकर्षति ।

शम्याछिद्रयोर्योक्त्रं बलीवर्दबन्धनरज्जुं परिकर्षति ।

वरुणस्य स्कम्भनिरसीति शम्यामवगूहति ।

अवगूहनमभिहितयोक्त्रपाशे युगच्छिद्रेऽवधानं तद्द्वितीयस्याप्यावर्तते । वरुणस्य स्कम्भसर्जनमसीति स्वशाखोक्तेनायं विकल्पते ।

प्रत्यस्तो वरुणस्य पाश इति योक्त्रपाशं प्रत्यस्यति ।

शम्यायां प्रत्यस्यति श्लेषयति ।

बलीवर्दं चाभिनिदधाति ।

बलीवर्दमप्यनेनैव मन्त्रेण शृङ्गयोरभिधान्या बध्नाति ।

एवमुत्तरमनड्वाहं युनक्ति ।

योक्त्रपरिकर्षणशम्यावगूहनयोक्त्रपाशप्रत्यसनशृङ्गबन्धनैः ।

हरिणी शाखे बिभ्रदन्तरेषाꣳ सुब्रह्मण्य उपसर्पति पलाशशाखे शमीशाखे वा ।

शकटस्य दक्षिणोत्तर ईषाद्वयं तत्र यां कांचिदीषामन्तरा यस्याः कस्याश्चिदीषाया

अन्तःप्रदेशे पादौ संस्थाप्य शाखे धारयन्नुप शकटगमनानुगुण्येन सर्पति गच्छतीत्यर्थः । अथवैषामन्तरा यस्याः कस्याश्चिदीषाया अन्तराऽन्तर्वर्ती यः प्रदेशस्तं प्रति शाखे बिभ्रद्गच्छतीति । शकटवाहनं तु लोकप्रसिद्धमेवेति । हरिणी हरिते हरिद्वर्णे । हरिणी स्यान्मृगी हेमप्रतिमा हरिता च येतिकोशात् । एतावता कोमलत्वं सिद्धं भवति । प्रथमयोः पूर्वसवर्णप्राप्तौ तं बाधित्वा नादिचीतिसूत्रस्थनकारस्य दीर्घाज्जसि चेतिसूत्रस्थचकारेणानुवृत्तौ सत्यां पूर्वसवर्णनिषेधे प्राप्ते वा छन्दसीत्यनेन विकल्पेन पूर्वसवर्णदीर्घ एव पुनः स्थाप्यते । तथा च हरिणी इति रूपं सूत्रे युक्ततरं भवति । हरिणी इति द्विवचनम् । इदं च शाखाविशेषणम् । हरिणीपदोत्तरं यच्छाखापदं तद्गोबलीवर्दन्यायेन पलाशशाखाशमीशाखातिरिक्तयज्ञियवृक्षशाखापरम् । अन्यथैतस्य शाखापदस्यानन्वयापत्तेः । नन्वेवं पलाशशाखाशमीशाखयोर्ग्रहणं व्यर्थम् । एकेनैव सामान्यशाखाशब्देन तयोर्लाभादिति चेन्न । तयोर्मुख्यत्वद्योतनार्थत्वेन सार्थक्यात् । ईषामित्यत्रान्तरान्तरेण युक्त इति द्वितीया ।

शकटमन्वारभ्य सोमाय राज्ञे क्रीताय प्रोह्यमाणायानुब्रूहि
ब्रह्मन्वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति संप्रेष्यति ।

दक्षिणामीषामन्वारभ्येति बौधायनः । अनुब्रूहीत्ययं प्रैषो होतारं प्रति । अनुब्रूहीत्येतादृशस्य प्रैषस्य बाधकं विना मुख्यहोतारं प्रत्येव दर्शनात् । आश्वलायनेन कर्मचोदनायां होतारमित्यनेन सामान्यतो होतुरेव कर्तृत्वप्रतिपादनाच्च । एवमन्यत्रापि ज्ञेयम् । अत्र प्रैषत्रयेण होतृब्रह्मसुब्रह्मण्यान्संप्रेष्यतीत्यर्थः । तेन प्रैषत्रयं पृथक्पृथगेव वक्तव्यम् । एवमन्यत्रापि ज्ञेयम् । ब्रूहीत्यत्र ब्रू इत्यस्य प्लुतो ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेरितिपाणिनिसूत्रात् । अविच्छेदेनैव पाठो वा । एकेतिकरणात् । यजुर्वेदेनाध्वर्युरिति परिभाषयाऽध्वर्युर्न होतृब्रह्मसुब्रह्मण्याः । स्वस्मै नाम्ना प्रैषायोगात् , होतृब्रह्मसुब्रह्मण्यानां परस्परनिरूपितप्रेष्यत्वायोगाच्च । सुब्रह्मण्यकर्म लाट्यायनद्राह्यायणावाहतुः–क्रीते राजनि सुब्रह्मण्य उत्तरेण सोमवहनं गत्वाऽन्तरेणेषे शमीशाखां पलाशशाखां वा सपलाशां पाणौ कृत्वाऽवतिष्ठेताध्वर्युप्रैषे सर्वत्राऽऽकाङ्क्षेत्सुब्रह्मण्याया रश्मीन्धारयञ्छाखया प्रेष्येद्गावौ दक्षिणं पूर्वं सुब्रह्मण्योमिति त्रिराह्वयेत्प्राचि वर्तमाने षट्कृत्वः प्रतीचि पूर्वेण पत्नीशालां विमुक्ते छदिषि शाखामवगूह्य तामेवेषामनूत्क्रम्य यथार्थं स्यादिति । अत्र स्वसूत्राविरुद्धं यत्तत्सर्वमप्यनुष्ठेयम् । सर्वैर्ज्योतिष्टोम इति सूत्रात्सर्वशाखाप्रत्ययमेकं कर्मेति न्यायाच्च । स्वसूत्रपरसूत्रयोर्विरोधे स्वसूत्रमेवाऽऽश्रयेत् । स्वशाखापरित्यागे दोषश्रवणात् । सूत्रस्यापि शाखात्वं चरणव्यूहशास्त्रे प्रदर्शितम् । चरणाः शाखाः सूत्राणि च तेषां व्यूहो विविच्य कथनं यस्मिन्ग्रन्थे स ग्रन्थश्चरणव्यूहाख्यः । तत्र शाखाभेदाः प्रदर्शितास्ते ततो द्रष्टव्याः ।

त्रिरनूक्तायां प्रच्यवस्य भुवस्पत इति
प्राञ्चोऽभिप्रयाय प्रदक्षिणमावर्तन्ते ।

त्रिरनूक्तायामित्यत्रोपस्थितत्वात्प्रथमायास्त्रिरनुवचनम् । अत एवावचनं प्रथमायामिति स्पष्टमेवापठदापस्तम्बः । अत्र हौत्रमाश्वलायनीयमेव याजुषस्याभावात् । प्रथमोत्तमयोस्त्रिरनुवचनं सर्वत्र याजुषहौत्ररीत्यैव शस्त्राणि विना शस्त्रविषयकविधेर्विशेषशास्त्रत्वेन प्रबलत्वात् । प्राञ्च इति आवर्तन्त इति बहुवचनादध्वर्युब्रह्मयजमानाः । एतेषामेव प्रकृतकर्मसंबन्धात् । सुब्रह्मण्यस्य तु च्छन्दोगसूत्रेऽनुक्तत्वान्न मन्त्रः । प्राञ्चः प्राङ्मुखाः । शकटेन सह पार्श्वद्वयमभितो गत्वेत्यर्थः । अभिशब्दः पार्श्वद्वयमभित इत्यर्थं बोधयति । आवर्तनेऽपि उत्तरपार्श्वेऽध्वर्युर्दक्षिणपार्श्वे ब्रह्मयजमानाविति । प्रयायेत्यत्र प्रशब्दः शकटागमनलक्षकतावैशिष्ट्यं सूचयति । प्रदक्षिणशब्दोऽत्राऽऽनुगुण्यवाची । अर्थाच्छकटावर्तनानुगुणम् । अन्यथा प्रदक्षिणं यज्ञे कर्माणि करोतीति परिभाषयैव सिद्धे प्रदक्षिणग्रहणवैयर्थ्यापत्तेः । स्वस्त्ययनमसीत्यन्तो मन्त्रः । अभिप्रयाणस्यैव मन्त्रः प्रच्यवस्वेति लिङ्गात् । च्यवनं स्वस्थानाच्चलनम् । एतस्मादेव लिङ्गाच्छकटस्थितराज्ञा सहैवाभिप्रयाणमपि ज्ञायते । ब्रह्मयजमानाध्वर्यूणां मन्त्रः । प्राञ्च इति बहुवचनेन ब्रह्माध्वर्युकर्तृत्ववद्यजमानकर्तृत्वस्याप्यभिप्रयाणक्रियायां तत्करणीभूतमन्त्रोच्चारणे चापि सिद्धिः । स्वस्मिन्यजमानप्रयोगस्तूच्छुष्मो अग्ने यजमानायैधीत्यत्र यथा तथाऽत्रेति द्रष्टव्यम् ।

अपि पन्थामगस्महीत्युत्तरेण राजानं
पूर्वावतिक्रामतो यजमानोऽध्वर्युश्च ।

उत्तरेण राजानं राज्ञ उत्तरतोऽदूरे । ब्रह्मव्यावृत्त्यर्थमुभयोर्ग्रहणम् । पूर्वौ शकटस्य प्रतीच्यां चालनात्पूर्वौ पूर्वभूतौ, अति राजानमतीत्य गच्छतः । चकार उभयोः सहभावार्थः । उभयोर्मन्त्रः । वस्वित्यन्तस्तस्य ।

प्रज्वलयन्त्यग्नीनाहवनीये वर्षिष्ठमादधाति ।

प्रज्वलयन्तीति बहुवचनं परिकर्म्यृत्विजामन्यतमप्राप्त्यर्थम् । वर्षिष्ठं स्थविष्ठम् । इध्ममिति शेषः । आदधातिसाहचर्यात् । प्रज्वलयन्ति ज्वालायुक्तान् सूक्ष्मैरिन्धनैः करोति (कुर्वन्ति) । सभ्यावसथ्यपक्षे तावपि प्रज्वलयन्ति । आहवनीये स्थविष्ठं लौकिकमिध्ममादधाति प्रक्षिपतीत्यर्थः । आहवनीयेऽयं विशेष इतराग्न्यपेक्षया द्रष्टव्यः । यावत्पर्यन्तं राजाऽऽसन्द्यामासन्नो भवति तावत्पर्यन्तमिदं प्रज्वलितत्वमग्नीनाम् । एतदतिक्रमे सर्वप्रायश्चित्तं होतव्यम् । तदूर्ध्वं तु कर्मानुगुण्येन । इदं चाध्वर्युकर्तृकमाग्नीध्रकर्तृकं वा ।

उपक्लृप्तोऽग्नीषोमीयः समङ्गो बन्धुमान्यथा निरूढपशुबन्धे लोहस्तूपरः श्मश्रुलः स्थूलः पीवा ॥ ९ ॥ कृष्णश्वेतो लोहितश्वेतो वा तेन कर्णगृहीतेन यजमानो राजानं प्रतीक्षते ।

अग्नीषोमदेवत्यः पशुरुपक्लृप्तो भवति । उपक्लृप्त इति भूतनिर्देशादेतद्दिवसानुष्ठानारम्भात्पूर्वमेवोपकल्पनं कर्तव्यमिति सिद्धं भवति । तत्स्वरूपमाह—समङ्ग इत्यादिना । समङ्गः संपूर्णाङ्गः । बन्धुमान्मातृपितृभ्रातृसखिमानित्यर्थः । अन्वेनं मातेत्यादिमन्त्रवर्णात् । यथा निरूढपशुबन्ध उपक्लृप्तः पशुरकूटोऽकर्णोऽकाण इत्यादिसूत्रेण लक्षणान्युक्तानि तथाऽग्नीषोमीयः पशुर्भवतीत्यर्थः । एतस्मादेव सूत्राच्छाग एवात्र नियतः । जैमिनिनाऽपि षष्ठेऽध्यायेऽष्टमे पादे पशुचोदनायामनियमोऽविशेषादिति सूत्रेणानियमं पूर्वपक्षीकृत्य च्छागो वा मन्त्रलिङ्गादिति सूत्रेण च्छाग एव नियत इति सिद्धान्तितम् । छागो वा मन्त्रलिङ्गादित्यत्र वाशब्दः पूर्वपक्षव्यावर्तकः । सूत्रद्वयार्थः स्पष्ट एव । सामान्यस्य विशेष उपसंहारः कार्य इति भावः । उक्तश्च स्मृतावयमुपसंहारः—

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।
स्पष्टस्य तु विधेर्नैवमुपसंहार इष्यते ॥ इति ।

उपसंहारस्तत्रैव यत्र सामान्यवचनानुष्ठानाय विशेषापेक्षा । भवति चाग्नीषोमीयं पशुमालभेतेतिसामान्यवचनानुष्ठानाय च्छागस्य वपाया मेदस इतिमन्त्रवर्णोपस्थितविशेषापेक्षा । नतु विशेषवचनत्वमात्रेण सामान्यवचनप्राप्तोपसंहारकत्वम् । तथात्वे न ब्राह्मणं हन्यादितिसामान्यवचनस्यापि नाऽऽत्रेयं हन्यादिति विशेषवचनेनोपसंहारप्रसङ्गात् । अतः पूर्वोक्तरीत्यैवोपसंहारः । सामान्यविधिरस्पष्ट इत्यत्रास्पष्टत्वमनुष्ठानाय विशेषापेक्षत्वमेवेति ज्ञेयम् । अत्रान्यमपि विशेषमाह—लोह इत्यादिना । लोहो लोहितः । तूपरः शृङ्गरहितः । श्मश्रुलः श्मश्रुणा युक्तः । श्मश्रुण इति पाठेऽप्ययमेवार्थः । अयं पाठो ब्राह्मणानुगुणः । स्थूलो मांसलः । पीवा चिक्कणाङ्गः । कृष्णश्वेतः कृष्णश्वेतवर्णः । लोहितश्वेतो लोहितश्वेतवर्णः । अतूपरोऽप्यापस्तम्बेनानुज्ञातः—लोहस्तूपरो भवत्यतूपरः कृष्णसारङ्गो लोहितसारङ्गो वेति । तेनेत्थंभूतेन कर्णगृहीतेन कर्णे धृतेन पशुना सह राज्ञोऽभिमुखं गत्वा तमीक्षते । अग्निं तु मन्थनमारभ्य प्रहरणपर्यन्तमधृतेनैव पशुना कर्णव्यतिरिक्तप्रदेशे धृतेन वा प्रतीक्षते । यदग्नावग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियत इति श्रुत्या मन्थनप्रभृतिप्रहरणान्तस्य कर्मण आतिथ्यरूपत्वस्योक्तत्वेन तदवसर एव प्रतीक्षणस्य युक्तत्वात् । अग्नीषोमदेवत्यस्य पशोरत्रोपकल्पनाद्राजातिथ्यार्थत्वमिवाग्न्यातिथ्यार्थत्वमप्यवश्यं कल्पयितव्यमेव । आध्वर्यवे याजमानविधानमध्वर्युसांनिध्यार्थम् ।

औदुम्बर्यासन्द्यरत्निमात्रशीर्षण्यानूच्या नाभि-दघ्नपादा मौञ्जविवाना तामध्वर्यव उद्गृह्णन्ति ।

औदुम्बरी, उदुम्बरवृक्षनिर्मिता । आसन्दी मञ्चविशेषः । तल्लक्षणमाह—अरत्निमात्रशीर्षण्यानूच्या शीर्षण्ये तिरश्चे(श्चीने)फलके अनूच्ये प्राच्ये । एतानि फलकानि अरत्निमात्राणि यस्याः साऽरत्निमात्रशीर्षण्यानूच्या, नाभिदघ्ना नाभिमात्राः पादा यस्याः सा, मौञ्जैस्तृणैर्विवानं यस्याः सा मौञ्जविवाना । मौञ्जीभी रज्जुभिः स्यूतेत्यर्थः । तामेवंभूतामासन्दीम् । अध्वर्यवोऽध्वर्युप्रतिप्रस्थातृनेष्टून्नेतार एत उद्गृह्णन्ति । तच्छब्द उपकल्पनार्थः । एतच्चैतद्दिवसानुष्ठानारम्भात्पूर्वमेव कर्तव्यम् । अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेतेत्यध्वर्यव इति याजमानसूत्रात्प्रतिप्रस्थात्रादीनामप्यध्वर्युत्वम् । अध्वर्युव्यतिरिक्तास्त्रय उद्गृह्णन्तीति केचित् ।

अग्रेण प्राग्वंशं वारुणमसीति शकटमाक्खिदत्युदग्गीषमवस्थाप्य ।

अग्रेण प्राग्वंशं प्राग्वंशस्यादूरे । आक्खेदनं किंचिदुद्यमनम् ।

वरुणस्त्वोत्तभ्नात्वित्युपस्तभ्नोति ।

गतार्थम् । वरुणस्य स्कम्भनमसीत्यनेन विकल्पतेऽयं मन्त्रः ।

दक्षिणमनड्वाहं विमुञ्चति ।

सामान्यप्रतिज्ञेयम् ।

वारुणमसीति योक्त्रं परिकर्षति ।

योक्त्रं परिकर्षति विसर्जनार्थम् ।

वरुणस्य स्कम्भसर्जनिरसीति शम्यां प्रवृहति ।

प्रवृहणमुत्पाटनम् । वरुणस्य स्कम्भसर्जनमसीत्यनेन विकल्पः ।

विचृत्तो वरुणस्य पाश इति योक्त्रपाशं विचृन्तति ।

विचर्तनं शिथिलीकरणम् ।

उन्मुक्तो वरुणस्य पाश इत्यभिधानीमुन्मुञ्चति ।

अभिधानी विषाणबन्धनरज्जुः ।

एवमुत्तरमनड्वाहं विमुञ्चति ।

एवं दक्षिणानडुन्मोचनकल्पेनेत्यर्थः । अत्र लाट्यायनद्राह्यायणौ विशेषमाहतुः—दक्षिणमनड्वाहं सुब्रह्मण्याय दद्यादुभाविति शाट्यायनकं विज्ञायते कर्मसंयोगादिति । सामर्थ्याद्यजमानो दानकर्ता । उभावप्यनड्वाहौ देयाविति शाट्यायनकं ब्राह्मणं विज्ञायते कर्मसंयोगात् । उभाभ्यां हि कर्म कृतम् । हेतूपादानं क्रियते कर्मसंयोगादिति । यस्य येन कर्मसंयोगः स तद्द्रव्यं लभत इत्यर्थः ।

उत्तरानडुन्मोचनावसरमाह—

अविमुच्योत्तरमातिथ्यायास्तन्त्रं प्रक्रमयति ।

विमुक्तोऽन्योऽनड्वान्भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यं गृह्णातीति स्वशालीयः कल्पः । प्रदर्श्यतेऽनेन । आतिथ्येति कर्मनाम । किमत्र प्रवृत्तिनिमित्तमिति चेत् । अग्नेरातिथ्यमसि सोमस्याऽऽतिथ्यमसि अतिथेरातिथ्यमसीति निर्वापमन्त्रेषु अग्न्यादिभ्यो देवताभ्य आतिथ्यत्वेन कीर्तनमेवेति द्रष्टव्यम् । आतिथ्यप्रयोजना वेष्टिरातिथ्या तस्यास्तन्त्रमङ्गसमुदायस्तं प्रक्रमयति आरभत इत्यर्थः । प्रक्रमयतीत्यत्र स्वार्थे णिच् । तत्र यावत्क्रियते तद्व्याख्यास्याम इत्यस्यात्रानुक्तत्वात्सर्वं प्रकृतिवद्भवत्येव ।

उभौ वा विमुच्य ।

उभौ विमुच्य वाऽऽतिथ्यायास्तन्त्रं प्रक्रमयतीत्यन्वयः । अयं शाखान्तरीयः कल्पः । उत्तरमविमुच्य तमपि विमुच्य वाऽऽतिथ्यायास्तन्त्रं प्रक्रमयतीतिसूत्रद्वयपिण्डितोऽर्थः ।

अग्नीनन्वाधायेध्माबर्हिराहरति ।

पौर्णमासतन्त्रनैयत्यख्यापनार्थोऽनुवादः । तेन नात्र कालतस्तन्त्रं भवति ।

सप्तदश सामिधेन्यः ।

स्पष्टम् ।

इक्षुशलाके विधृती ।

इक्षुशलाके इक्षुत्वगात्मिके । इक्षुवत्रात्मिके इति केचित् । काशमूलके इति मीमांसकाः । वाक्यशेषस्यात्राभावात्काशमूलपरत्वे प्रमाणाभावेन लौकिक एवार्थो ग्राह्य इति पूर्वमताशयः । आश्ववालस्य काशपरत्वे वाक्यशेषो यथा स्पष्टोऽस्ति तथैक्षवीशब्दस्य काशमूलपरत्वे नास्ति तथाऽपि अन्वेषणीय इति द्वितीयमताशयः । अत्र पाठेनेदं ज्ञायते—एतयोराहरणादयो बर्हिर्धर्मा बर्हिर्धारणवदुपसदाद्यर्थं धारणं बर्हिषः स्तीर्णत्वपक्षे विधृत्योरपि सादितत्वं च भवतीति ।

कार्ष्मर्यमयान्परिधीनिध्म उपसंनह्यत्याश्ववालं प्रस्तरं बर्हिषि ।

इध्माबर्हिराहरतीत्युक्तं तत्रेध्मे कार्ष्मर्यमयाञ्श्रीपर्णीवृक्षनिर्मितान्परिधीनुपसंनह्यति । भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हतीतिन्यायेन भाव्युपयोगिनां परिधीनामपि संस्कारार्थमिध्मे संभरणं मन्त्रेण कृत्वोपसंनहनं कार्यम् । अनियतवृक्षत्वं परिधीनां वारयितुं कार्ष्मर्यमयानिति । उपशब्द इध्मसमिधामुपर्येव संनहनमत्रेति नियमं द्योतयितुम् । बर्हिषि आश्ववालं काशमयं प्रस्तरम् । आश्ववालशब्दोऽश्वस्य वालाः केशास्तन्मयः प्रस्तर इति लोकप्रसिद्धिः । यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रामत्सोऽपः प्राविशत् ।

स वालधौ गृहीतस्तान्वालान्मुक्त्वा विवेश ह ।
ते वालाः काशतां प्राप्ताः कार्योऽतः प्रस्तरस्तु तैः ॥

इति वाक्यशेषात्तु काशास्तन्मयस्तत्र लोकप्रसिद्ध्यपेक्षया वाक्यशेषबोधितोऽर्थ एव गृह्यते । तथा च काशानामेव ग्रहणं नत्वश्वकेशानाम् । तथाच प्रथमाध्याये चतुर्थपादे संदिग्धेषु वाक्यशेषादिति सूत्रेणामुमर्थमाह जैमिनिः । सूत्रार्थस्तु संदिग्ध-विधावर्थवादरूपाद्वाक्यशेषात्तद्विषयकल्पनेति । उत्तरसूत्रगतकल्पनापदानुषङ्गेणान्वयो बोध्यः । यद्यपि विधावपि सामान्यरूपेण निश्चयान्न मुख्यः संदेहस्तथाऽपि घृततैलवसा-नामन्यतममञ्जनसाधनमित्यव्यवस्थितार्थप्रतीतिमादाय गौणसंदेहपरोऽयं शब्द इति व्याख्यातं व्याख्यातृभिः । ऐक्षवीशब्दो याज्ञिकमत इक्षुपत्रत्वगन्यतरपरः । मीमांसकमते काशमूलपरः । तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् , शास्त्रस्था वा तन्निमित्त-त्वादिति न्यायोऽप्यत्र योजयितुं शक्यः । आश्ववालं प्रस्तरमित्येतदनन्तरमुपसंनह्यतीत्य-नुषज्यते । विधृत्योराहरणमाश्ववालप्रस्तरेण सहैव । प्रजापतेर्वा एतानि पक्ष्माणि यदश्व-वाला ऐक्षवी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः संभरतीति श्रुत्योभयोरेकरूपत्वप्रतिपादनात् । पूर्वेद्युरिध्माबर्हिः करोतीतिवाक्योक्तक-माभिप्रायेण विपरीतोक्तिः । अनुष्ठानक्रमस्तु प्रकृतिवदेव न तु चोदकप्राप्तक्रमबाधः । अत्र कार्ष्मर्यमयत्वरूपपरिधिमात्रविषयकगुणमात्रस्य प्रत्याम्नानात् । तेन खादिरः पालाश एव वेध्मः । द्वाविंशतिदारुरेव च सः । अनूयाजसमिदभावात् । बर्हिस्तु दर्भमयमेव । आश्ववालत्वस्य प्रस्तरमात्र एव विधानात् । यदि समानदेशे दर्भाः काशाश्च सन्ति तदैकमेवाभिमर्शनान्तं कर्म । यदि नानादेशे तदोर्वन्तरि-क्षमित्यादीदं देवानामित्यन्तमावर्तते । आलवाभिमर्शनस्याऽऽवृत्तिर्देशभेदात् । प्रस्त-रस्यापि बर्हिःशब्दाभिधेयत्वान्न काशेष्वस्य निवृत्तिः । आलवाभिमर्शनं तु सकृदे-वान्ते । शुल्बं तु दर्भाणामेव क्रियते ।

निर्वपणकाले वैष्णवं नवकपालं पत्न्या हस्तेन निर्वपति ।

यतोऽस्मिन्निर्वापे बहवो विशेषा वक्ष्यमाणा अतः सावधानतार्थं निर्वपणकाल इति वचनम् । निर्वपणकाले निर्वपणस्थाने । कालशब्दस्य स्थानपरत्वं तु बोधानीये दृष्टं स उपरवाणां काल इति । निर्वपणकाल इत्यतः प्राक्परिगृहीत इति योज्यम् । पूर्ण-मासप्रथमप्रयोगे निर्वपणस्थानं यत्परिगृहीतं तत्रेत्यर्थः । सिद्धे सत्यारम्भो नियमार्थः । तेन निर्वपणकाल एवेति सावधारणं वाक्यं भवति । तथाचायमर्थो भवति—पूर्णमास-प्रथमप्रयोगपरिगृहीतनिर्वपणस्थान एवायं निर्वाप इति । एतेनान्यासु सर्वासु विकृ-तिष्वनियम इति विशिष्टार्थज्ञापनार्थं वा । न च वेदकरणादिकर्मसूचनार्थं तदिति वाच्यम् । तस्य प्रकृतित एव सिद्धेः । प्रायणीयायां त्वपूर्वत्वाद्वचनम् । अग्निहोत्रह-वणीप्रत्याम्नायो हस्तः । अग्निहोत्रहवणीधर्मा हस्ते कार्याः । पात्रप्रयोगका-

लेऽग्निहोत्रहवण्या सह हस्तस्य प्रयोगः । स च दक्षिणः । एकाङ्गवचने दक्षिणं प्रतीयादनादेश इत्याश्वलायनवचनात् । हस्तविषये त्वनिर्दिष्टस्थलेऽपि दक्षिणस्यैव ग्रहणमित्येतादृशार्थस्य दर्शपूर्णमासयाजुषहौत्रसूत्रे होतुरंसान्वारम्भविधायके दक्षिणग्रहणेन ज्ञापितत्वाच्च । संविशन्तामिति हस्तस्य संमर्शनम् । दक्षाय मानुष्यसि । नास्ति प्रत्युष्टम् । दक्षिणहस्ते वाममुष्ट्योद्वपनम् । यावन्त्यग्निहोत्रहवणीकार्याणि तानि हस्तेनैव कर्तव्यानि । इदं चाग्निहोत्रहवणीप्रत्याम्नायपक्षे ।

पत्न्या वा हस्तात् ।

शाकटपाय्योः प्रत्याम्नायोऽयम् । अस्मिन्पक्षे हस्त एव सर्वमन्त्राणां जपो भवति ।

अन्वारब्धायां वा स्रुचा ।

अन्वारब्धायां पत्न्यां सत्यां स्रुचैव वा निर्वापः । अस्मिन्पक्षेऽग्निहोत्रहवण्यामेव प्रोक्षणीसंस्कारादि । आद्यौ पक्षौ शाखान्तरीयौ । अन्त्यः स्वशाखागतः ।

अग्नेरातिथ्यमसीत्येतैः पञ्चभिस्त्रिषु सावित्रं जुष्टं चानुषजति ।

विष्णवे त्वेत्यन्ताः पञ्च मन्त्रास्तैः पञ्चभिः । निर्वपतीति शेषः । पञ्चकृत्वो गृह्णातीति श्रुतावप्ययमर्थः प्रतिपादितोऽस्ति । तत्र विशेषः । त्रिषूपस्थितत्वान्नोत्तमयोरित्येक इत्यापस्तम्बसूत्राच्चाऽऽद्येषु । सावित्रो देवस्य त्वेत्यादिर्हस्ताभ्यामित्यन्तो भागस्तं निर्वापमन्त्रेभ्यः पूर्वं जुष्टशब्दं चैतेभ्य उत्तरमनुषजतीत्यर्थः । त्रिष्वितिवचनादन्त्ययोर्मन्त्रयोः सावित्रजुष्टयोरनुषङ्गो नास्तीति गम्यते । यथा देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सोमस्याऽऽतिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामतिथेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि । अग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा निर्वपामि । श्येनाय त्वा सोमभृते विष्णवे त्वा निर्वपामीत्येवं प्रयोगः । एतैरिति वचनं प्रतिमन्त्रं निर्वापसिद्ध्यर्थम् । पञ्चभिरितिवचनं पञ्चैते मन्त्रा भवन्ति तैः पञ्चभिः पञ्च निर्वापा भवन्तीत्येतादृशार्थबोधनार्थम् । चकारः सावित्राख्यः कश्चन भागो जुष्टशब्दश्चेत्येतद्द्वयानुषङ्गलाभाय । न चैवं जुष्टमित्यस्य जुष्टं निर्वपामीत्येतावान्य उत्तरभागस्तत्परत्वमेव नतु जुष्टशब्दमात्रपरत्वम् । तथाच निर्वपामीत्येतस्यापि त्रिष्वेव प्रयोगो नावशिष्टयोर्द्वयोरिति वाच्यम् । जुष्टशब्दस्योत्तरभागपरत्वेऽग्नेरातिथ्यमसीत्येतैः पञ्चभिस्त्रिषु प्राकृतावनुषजतीति लाघवेनैव वक्तव्ये गुरुभूतसावित्रजुष्टशब्दोपादानस्य निरर्थकत्वापत्तेः । अतो जुष्टशब्दस्य भागपरत्वं न किंतु शब्दपरत्वमेव वक्तव्यम् । एतेनानुक्तस्य निर्वपामीत्येतस्य समुच्चयार्थश्चकार इति

शङ्का निरस्ता । नच त्रिषु मन्त्रेषु जुष्टशब्दानुषङ्गवत्सावित्रशब्दस्यैवानुषङ्गोऽस्त्विति वाच्यम् । तथा सति सावित्रं जुष्टमित्येतादृश्या आनुपूर्व्या अनुषक्तव्यतयैकपदार्थत्वेन पदार्थान्तरस्य चाभावेन चकारवैयर्थ्यापत्तेः । न चैवं मन्त्रादौ सावित्रशब्दानुषङ्गो मन्त्रान्ते जुष्टशब्दानुषङ्गस्तथा च समुच्चेतव्यपदार्थान्तरं लब्धं तथा च न वैयर्थ्यमिति वाच्यम् । सावित्रशब्दस्य शब्दमात्रपरताया याज्ञिकप्रसिद्धकर्मणि अत्यन्तानुपयोगात् । एवं च परस्परसमुच्चयार्थ एव चकारः । तथाच निर्वपामीति सर्वमन्त्रेष्वस्त्येव । अथवा जुष्टशब्दस्य भागपरत्वमेवाङ्गीकर्तव्यम् । अग्नेरातिथ्यमसीत्येतैः प्रतिमन्त्रं देवतादेशनस्य प्रत्याम्नायो भवति । पञ्चसु सावित्रं जुष्टं चानुषजति । नोत्तमयोरित्येक इत्यापस्तम्बसूत्रेऽपि स्वरसतो जुष्टशब्दस्य भागपरत्वमेव प्रतीयते । यच्छन्तामित्यप्यस्त्येव सर्वत्र । सजातीयमेव सजातीयस्थाने निविशत इति न्यायेन प्राकृतानां त्रयाणां समन्त्रकाणां निर्वापाणां स्थान एते समन्त्रकाः पञ्च निर्वापा भवन्ति । प्राकृतं तूष्णीं तु भिन्नमेव भवति तच्च षष्ठं भवति । अन्वावापः सप्तम इदं देवानामित्यादि ।

विष्णुमेवोत्तरेषु निगमेषूपलक्षयेत् ।

इत उत्तरेषु निगम्यते देवतापदं येषु ते निगमा मन्त्रा मन्त्रविशेषास्तेषु विष्णुमेवोपलक्षयेद्देवतात्वेन केवलं विष्णुमेव प्रयोजयेत् । एवकारोऽग्नये रायस्पोषदाव्ने श्येनाय सोमभृत इतिचतुर्थ्यन्तानां शब्दानां मन्त्रेषु प्रयोगो मा भूदित्येतदर्थम् । वैष्णवं नवकपालं निर्वपतीत्येतेन सूत्रेण त्वग्न्यादिदेवतात्वमात्रं निरस्यते ।

यत्प्रागुद्वपनात्तत्कृत्वोत्तरमनड्वाहं विमुञ्चति तेनैव कल्पेन यदि पुरस्तादविमुक्तो भवति ।

वर्षवृद्धाः स्थेत्यन्तं कृत्वोत्तरमनड्वाहं विमुञ्चति तेनैव कल्पेन पूर्वातिदिष्टेनैव कल्पेन तूष्णीमुत्तरमनड्वाहं विमुञ्चति । यदि पुरस्तादविमुक्तो भवतीति सूत्रान्तरोक्तकल्पव्यावृत्त्यर्थम् । अन्यत्स्पष्टम् ।

वारुणमसीति राज्ञो वासोऽपादत्ते ।

पर्यानहनीयमिति शेषः । छिरस्महीति मन्त्रान्तः ।

वरुणोऽसि धृतव्रत इति राजानम् ॥ १० ॥

अपादत्त इत्यनुवर्तते । एतावानेव मन्त्रः ।

अच्छिन्नपत्रः प्रजा उपावरोहोशन्नुशतीः स्योनः स्योना इत्युपावहरति ।

राजानं शकटद्वारेण बहिरानयतीत्यर्थः ।

अत्राऽऽसन्द्या उद्ग्रहणमेके समामनन्ति।

तामध्वर्यव उद्गृह्णन्तीति यदासन्द्या उद्ग्रहणं पूर्वत्रोक्तं तत्तत्र न कर्तव्यं किंत्वत्रास्मिन्काले कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः।

उर्वन्तरिक्षमिति गच्छति।

प्राग्वंशमिति शेषः। स्वशाखायां दृष्टत्वादन्विहीत्येव मन्त्रान्तः।

या ते धामानीति सौम्यर्चा राजानं पूर्वेण द्वारेण प्राग्वंशं प्रपादयति।

सोमो देवता यस्याः सा सौमी तया सौम्या। सोमाट्ट्यण्टित्वान्ङीप्। सौमीत्यृग्विशेषणम्। तृतीयान्तमिदं सौम्येति। * असमासे सौम्युचेति स्यादिति ज्ञेयम्। सौम्येति ज्ञानार्थम्। ज्ञानाभावे दक्षिणाग्नौ भुव इति यजुर्भ्रेषप्रायश्चित्तम्। ऋचेतिवचनप्रयोजनमतिच्छन्दसर्चेत्यत्र यथोक्तं तद्वदत्रापि ज्ञेयम्। प्रपादयति प्रवेशयति। प्रवेशनस्य द्वारं विना कदाचिदप्यसंभवेनार्थादेव विशेष्यस्य द्वारस्य लाभे द्वारग्रहणं यत्कृतं तज्ज्ञापयति अन्योऽपि पदार्थः प्रवेशने संभावितोऽस्ति सभासदां कर्मेक्षणार्थमावश्यकत्वात्। वातायनरूपः सः। अथच द्विश्यादिसभासदीक्षणानुगुण्येन महान्। तत्र प्रतिदिशं वातायनद्वयम्। तत्र वातायनस्य महत्त्वेन तेनापि कदाचित्प्रवेशसंभवात्तद्वारणार्थं द्वारग्रहणम्। एतेनाष्टौ वातायनान्यपि तथा कर्तव्यानि। यथैकैकस्मिन्वातायने द्वौ त्रयो वा चतु(त्वा)रो वोपविष्टाः सन्तः कर्मेक्षितुं शक्नुयुरिति। तथाचाधस्तनानि द्वारसाम्येनाष्टौ वातायनानि चत्वारि द्वाराणि अतीरोकशब्दवाच्यानि लघुभूतानि गवाक्षाणि पञ्चोर्ध्वतनान्येतद्वर्जं परिश्रयणं कर्तव्यमिति। एवमग्रेऽपि यत्र यत्र द्वारशब्दस्तत्रेति ज्ञेयम्। दुर्यानिति मन्त्रान्तः।

उर्वन्तरिक्षं वीहीत्यपरेणाऽऽहवनीयं दक्षिणाऽतिहरति।

दक्षिणा दक्षिणतः, अति अतिक्रम्यैव हरति नतु अग्रेणाऽऽहवनीयं स्वयं गच्छन्नपरेणाऽऽहवनीयं राजानं हरतीति।

वरुणस्यर्तसदनिरसीति दक्षिणेनाऽऽहवनीयमासन्दीं प्रतिष्ठापयति।

यथेतं प्रत्येत्याग्रेणाऽऽहवनीयमासन्दीं नीत्वा वरुणस्यर्तसदनिरसीति मन्त्रेणाऽऽहवनीयसमीपे दक्षिणत आसन्दीं स्थापयति। अन्येनाऽऽसन्द्यानयनेऽपि यथेतं प्रत्येत्यै-वाऽऽसन्दी प्रतिष्ठापनीया। प्रतीत्युपसर्गाद्यथा न चलति तथा स्थापयति।

---

* अत्र समासे सौम्यृचयेत्यपेक्षितम्।

---

१ ख. ग. °त्येवं म°।

अदित्याः सदोऽसीति तस्यां कृष्णा-
जिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृणाति ।

तस्यां प्रतिष्ठापितायामासन्द्याम् ।

प्रत्त२ राजानमदित्याः सद आसीदेति तस्मिन्नासादयति ।

प्रत्तवचनादन्यस्मै प्रदानं सिद्धं तच्चाऽऽसन्दीस्थापनात्पूर्वं तेन विना तस्य कर्तुमशक्यत्वात् । तस्मिन्नास्तृते कृष्णाजिने ।

वरुणस्यर्तसदनमासीदेति वा ।

अनेन मन्त्रेण वा कृष्णाजिन आसादनम् ।

वनेषु व्यन्तरिक्षं ततानेति वाससा परिश्रयति ।

वाससा महता प्रागारम्य परिश्रयति । प्रादक्षिण्यं परिभाषासिद्धम् ।

वरुणोऽसीति राजानमभिमन्त्रयते वरुणाय त्वेति वा ।

स्पष्टम् ।

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् । स नः शर्म त्रिवरूथं वि य१सत्पातं नो द्यावापृथिवी उपस्थ इति वारुण्यर्चा राजानं परिचरति ।

वारुण्येतिवचनमत्र क्रीत उपनद्धः सोम एव वरुणशब्दवाच्यो नतु वरुणदेवतापर इतिश्रुतिसिद्धोऽर्थ इति प्रदर्शयितुम् । सा च श्रुतिर्वारुणो वै क्रीतः सोम उपनद्ध इति । अस्यां श्रुतौ वारुण इत्ययं तद्धितः स्वार्थे द्रष्टव्यः । वरुणो वा एष यजमानमभ्यैति यत्क्रीतः सोम उपनद्ध इतिश्रुत्यन्तरानुरोधात् । वारुणीत्यत्र तस्येदमिति सूत्रादण् तदन्तत्वान्ङीप् । ऋचेतिवचनप्रयोजनमतिच्छन्दसर्चेत्यत्र यथोक्तं तद्वदत्रापि ज्ञेयम् । परिचरति गन्धपुष्पादिभिरुपचारैः पूजयति नमस्करोति च ।

यत्र क्व चाऽऽसीदेदेतयैवाऽऽसीदेत् ।

यत्र क्व च वैधे याहच्छिके वा राजानं प्रति गमन एतया वारुण्यर्चैव गच्छेत् । उपविशति चेद्राजसमीपे तदैतयैव तत्समीपमुपविशेच्च । तथा सूत्रान्तरे-वारुण्यर्चा राजानं पूजयेदेतयैव राजानमभिसर्पेदुपविशेच्चेति । अत्र यजमानो राजानं मधुपर्केण पूजयति । गोमधुपर्कार्हो वेदाध्यायाचार्य ऋत्विक् श्वशुरो राजा वा धर्मयुक्त इति धर्मसूत्रे राज्ञो मधुपर्कपूजाया विहितत्वात्सोमस्यापि राजत्वात् । अथास्मै मधुपर्कं च प्राहुरिति बौधायनसूत्राच्च मधुपर्कपूजा । तत्र प्रतिवचनानां लोपः । अध्वर्युर्वा तानि वदेत् । तामध्वर्युर्विशास्तीति बौधायनसूत्रेऽध्वर्युकर्तृकताया विशसने दर्शनात् । एतस्य कलौ निषिद्धत्वादुत्सर्ग एवेदानीम् ।

अग्नि॰ राजानं चान्तरेण मा संचारिष्टेति संप्रेष्यति ।

संप्रैषवत्सर्वे कुर्वन्ति । अग्निमित्येकवचनादेक एवाग्निः । स चाऽऽहवनीय एव संनिहितत्वान्मुख्यत्वान्मा राजानं चाऽऽहवनीयं चान्तरेण कश्चन संचारीदिति बौधायनोक्तेश्च । एतेन सोमदक्षिणाग्न्योरन्तरा गमने दोषो नास्तीति अर्थात्सूचितं भवति । अयं प्रैष आत्मार्थोऽन्यार्थश्च । तेनाध्वर्युः सर्वे ऋत्विजश्चमसाध्वर्यवः परिकर्मिणोऽन्ये च ते सर्वे प्रैषोक्तनिषेधपालकाः । परप्रत्यायनार्थत्वादुच्चैस्त्वमैकश्रुत्यं च । राजाऽन्यो वा क्षत्रियादिः सोमसमीपमागच्छति तेनाप्ययं मन्त्रो वक्तव्य एव । तत्राऽऽयुधादि धृत्वा नैव सोमसमीपे गन्तव्यम् । अमुमर्थं बौधायनः प्रैषरूपेणैवाऽऽह–मा राजानं चाऽऽहवनीयं चान्तरेण कश्चन संचारीन्मैन॰ सायुधो मा सदण्डो मा सच्छत्रो मा सोष्णीषो मा साधस्पाद्योऽनुप्रपादीदिति । अत्र निषेधार्थका माङ् एते कश्चन यःकश्चन पुरुषो राजादिः । एनं राजानम् । आयुधं शस्त्रमस्त्रं च । अनयोर्भेदो धनुर्वेदे—

धृत्वा प्रहरणं शस्त्रं मुक्त्वा ह्यस्त्रमितीरितम् । इति ।

अधस्पाद्यावुपानहौ ।

उद्वपनप्रभृतीनि कर्माणि प्रतिपद्यते ।

यथेतं प्रत्येत्य प्रति त्वा वर्षवृद्धं वेत्त्वित्यादीनि कर्माणि प्रतिपद्यते वर्षवृद्धमसीत्यादीनि वा । पुरस्ताच्छूर्पोपोहनपुरोडाशद्रव्याभिमर्शनयोरुद्वपनाङ्गत्वात् ।

गार्हपत्ये नव कपालान्युपदधाति ।

पक्षे प्राप्तस्याऽऽहवनीयस्य बाधनार्थमिदम् । तेनाऽऽहवनीयाधिश्रयणपक्षाङ्गीकर्तुरपि गार्हपत्य एवाधिश्रयणमत्रेति द्रष्टव्यम् । आतिथ्येष्टिहविरधिश्रयणकाल आतिथ्यामदन्तीरप्यधिश्रयेत् । अग्नीन्मदन्त्यापा३ इति वक्ष्यमाणप्रश्नात् । श्रपयत्येतमातिथ्यं वैष्णवं नवकपालं तेन सह मदन्तीरधिश्रयतीतिबौधायनोक्तेश्च । मदन्तीशब्दोऽपां तप्ततामाचष्टे । तेन तापार्थमिदमधिश्रयणम् । आतिथ्येन सहाधिश्रयणविधानाद्गार्हपत्य एवाधिश्रयणम् । लौकिक इति केचित् । केवलानामपामधिश्रयणासंभवात्पात्रेण सहाधिश्रयणम् । तच्च ताम्रमयं रीतिजं वा । मृन्मयं वा । एवमन्यत्रापि । गव्यक्षीरस्य दोहपाकयोस्ताम्रं नैव भवति । स्मृतौ ताम्रे गव्यस्थापनस्य निषेधात् ।

यत्तु–होमकार्ये तथा दोहे पाके च परिवेषणे ।
पञ्चगव्याशने चैव ताम्रे गव्यं न दुष्यति ।

इति स्मृतिवचनं तल्लौकिकदोहविषय एव संकटमात्राभ्यनुज्ञाविषयम् । एवं पाकपरिवेषणयोरपि । होमोऽत्र पञ्चगव्यस्यैव । अथ वाऽत्रापि संकटविषयत्वमेव । पञ्चगव्याशन इत्यनेन पञ्चगव्यग्रहणसाधनीभूतपात्रविषये प्रतिप्रसवः क्रियते ।

---

१ क. °यन्त्येत° । २ क. °श्रपय° ।

चतुर्गृहीतान्याज्यानि गृह्णाति ।

पञ्चावत्तिनोऽपि चतुर्गृहीतनियमार्थं वचनम् । अनूयाजार्थग्रहणनिवृत्तेस्त्वर्थादेव सिद्धेर्न तदर्थता ।

चतुर्होत्राऽऽतिथ्यमासादयति ।

आतिथ्यं हविः । अहोमार्थत्वादग्रहोऽस्वाहाकारोऽयम् ।

संभारयजूꣳषि व्याख्याय निर्मन्थ्यस्याऽऽवृता निर्मन्थ्येन प्रचरति ।

अग्निर्यजुर्भिरित्यादीनि अहꣳ श्रद्धयेत्यन्तानि संभारयजूंषि तानि व्याख्याय वाक्यशः पठित्वाऽग्नेर्जनित्रमसीत्यादिना निर्मन्थ्यस्याऽऽवृता प्रकारेण पशुबन्ध उक्तेनाग्नावग्निरिति प्रहरणान्तेन निर्मन्थ्येन प्रचरति ।

वेदं निधाय सामिधेनीभ्यः संप्रेष्यति ।

वेद्यन्तपरिस्तरणनिवृत्त्यर्थोऽनुवादः । होतृषदनकल्पनं तु होत्रैव स्वार्थं कल्पनीयम् । अध्वर्युणा वेदमहꣳ सप्तदशेन वज्रेणेत्येतस्माद्धोतुर्जपात्पूर्वं कल्पयितव्यं, परं त्वनुवादस्वरसादत्र नैव कल्पनीयम् । आश्वलायनीयहौत्रे त्विदमहꣳ सप्तदशेन वज्रेणेत्येतस्य जपस्याभावाद्दक्षिणोत्तरश्रोणिसमीपदेशे होतर्यागते कल्पनीयम् । एतच्च होतरेहीतिशास्त्रान्तरोक्तप्रैषाङ्गीकारपक्षे सार्थकमन्यथा नेति द्रष्टव्यम् ।

सर्वमिध्ममादधाति सर्वमौपभृतꣳ समानयते ।

अनूयाजाभावात्तदर्थसमित्तदर्थचतुर्गृहीताज्ययोरप्यभाव इति भावः । इडान्तत्वादेवानूयाजाभावे सिद्धेऽनूयाजाभावबोधकलिङ्गप्रदर्शकवचनं शाखान्तरोक्तोऽनूयाजनिषेधः स्तुत्यर्थोऽनुवाद एव नतु विधिपर इतिजैमिनीयन्यायप्रदर्शनार्थम् । स च न्यायोऽनन्तरमेव प्रदर्शयिष्यते ।

आज्यभागाभ्यां प्रचर्य विष्णुꣳ हविषा यजति ।

आज्यभागवचनमाज्यभागविशेषसंप्रत्ययार्थम् । स च विशेष आश्वलायनेनोक्तः—अतिथिमन्तौ समिधाऽग्निं दुवस्यताऽऽप्यायस्व समेतु त इति । याजुषहौत्रपक्षेऽप्येतावेव । तत्राऽऽप्यायस्वेत्यृचः पाठस्तु याजुषधर्मेणर्ग्धर्मेण वा । विष्णुं यजतीत्येतावत्येव वक्तव्ये हविर्ग्रहणमाज्यभागाभ्यां प्रचर्येतिपूर्वभागाद्वचनविपरिणामेन विभक्तिविपरिणामेन वाऽऽज्यभागशब्दस्यानुवृत्तिः स्यात्, तस्यां च सत्यां विष्णुमाज्यभागं यजतीत्यर्थः स्यात्, तथा चाऽऽज्यभागं विष्णुमिष्ट्वा वैष्णवं नवकपालं निर्वपतीतिविधिप्राप्तो निरुप्तेन हविषाऽनन्तरं याग इति शङ्काकुलं स्यात्तन्मा भूदित्येतदर्थम् । आज्यभागविशेषं विधातुं विष्णुं यजतीत्युत्तरानुवादः ।

ध्रुवायाः शेषं करोति ।

दीक्षणीयावद्व्याख्येयम् । प्रयोजनं च तद्वत् ।

इडान्ताऽऽतिथ्या संतिष्ठते ।

इडयाऽन्तः समाप्तिर्यस्याः सेडान्ता । इडान्ताऽऽतिथ्या भवतीत्येतावतैव सिद्धे संतिष्ठत इति पुनः संस्थाबोधकवचनमिडान्तत्वेऽपि पूर्वोपयुक्तपदार्थप्रतिपत्तिकर्मभिरपि संस्थापनीयेत्येतदर्थम् । तेन समन्त्रमेवात्र प्रतिपत्तिकर्माणि । वेदप्रतिपत्तिरपि समन्त्रैव। प्रकरणादेवाऽऽतिथ्यालाभे पुनर्वचनमुपसदि प्रतिपत्तिकर्मणामनावश्यकत्वार्थम् । मार्जनमपीडाङ्गत्वाद्भवति । न च शाखान्तरे नानूयाजान्यजन्तीतिनिषेधानुपपत्त्या कृत्स्नत्वमपि कल्प्यते, तथा च विकल्प इडान्तत्वस्येति वाच्यम् । शंयिवडान्तत्वे विकल्पः स्यात्परेषु पत्न्यनूयाजप्रतिषेधोऽनर्थकः स्यात्, नित्यानुवादो वा कर्मणः स्यादशब्दत्वादिति दशमाध्यायषष्ठपादान्तर्गतजैमिन्युक्तन्यायविरोधापत्तेः । तस्मान्निषेधोऽनुवादमात्रम् । पूर्वप्रतिज्ञातोऽयं न्यायः । प्रायणीयायां व्याख्याते एते सूत्रे । ननु प्रकृते द्वे इडे अनूयाजानां पुरस्तादेका पश्चादन्या तत्रोत्तरयैवेडया तदन्तताविधिः । एवं च शाखान्तरीयोऽनूयाजनिषेधोऽप्यर्थवान् । अन्यथाऽनुवादमात्रत्वापत्तेः । अतोऽनूयाजवर्जमुत्तरेडान्तं सर्वं कार्यमिति चेन्न । प्रयोगोपरमस्यैवेडान्तत्वे निमित्ते विधानात्पूर्वस्यामपीडायां कृतायां निमित्तस्य संजातत्वेन तत्रैवोपरमस्य युक्तत्वात् । अनूयाजप्रतिषेधस्तु नित्यानुवादत्वेनार्थवादमात्रमौचित्येनेडान्तत्वस्तुत्यर्थं न विरुध्यते । तथा च दशमाध्याये षष्ठे पादे जैमिनिः—प्रतिषेधादर्थवत्वाच्चोत्तरस्य परस्तात्प्रतिषेधः स्यात्, प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यादिति । प्रायणीयायां व्याख्याते एते सूत्रे ।

ध्रुवाशेषादापतये त्वा गृह्णामीति कꣳसे चमसे वा
तानूनप्त्रꣳ समवद्यति चतुरवत्तं पञ्चावत्तं वा ।

अत्र लौकिक एव चमसो न प्रणीतार्थचमसः । तस्येध्मार्थत्वात् । तानूनप्त्रग्रहणस्य चाप्राकृतकार्यत्वात् । अहोमार्थत्वादयं चमसो वारणवृक्षजः । तत्स्वरूपं वक्ष्यमाणसोमचमसवत् । जुहोमीतिलिङ्गादेतस्यापि होमार्थत्वमिति यद्युच्यते तदा वैकङ्कत एवायम् । अवघ्राणस्यापि अदनरूपत्वेन तत्साधनत्वाच्चमसशब्दार्थो बाधितो न भवति । अवघ्राणस्यादनरूपत्वमवघ्रेयमेव तन्नेव प्राशितं नेवाप्राशितमिति श्रुतितो ज्ञेयम् । चमुधात्वर्थादनपर्याय एव ह्यशधातुः । तनूनप्तृदेवतासंबन्धात्तानूनप्त्रमित्याज्यसमाख्या । येनर्त्विजः सख्यमुपगच्छन्ति । व्यवस्थितविकल्पोऽयमिति केचित् । गृह्णाम्यन्ताः पञ्च मन्त्राः । एतेषां मन्त्राणां मध्य एकैकेन मन्त्रेणैकैकं समवद्यति । पञ्चावत्तपक्षे पञ्चवारं समवद्यति चतुरवत्तपक्षे चतुर्वारम् । समवदानं ग्रहणम् । यद्यप्यत्रैतैरितिवचनं नास्ति तथाऽप्युत्तरसूत्रादयमर्थो लभ्यते ।

अवशिष्टो विकल्पार्थो यदि चतुरवत्तम् ।

अवशिष्टः शक्मन्नोजिष्ठाय त्वा गृह्णामीति मन्त्रो विकल्पार्थो भवति यदि चतुरवत्तं

तानूनप्त्रं भवति तदा । पञ्चावत्तपक्ष एव विनियोग इति न किं तु चतुरवत्तपक्षेऽपि चतुर्णां मन्त्राणामन्तिमेन विकल्पितो भवतीति निकृष्टोऽर्थः ।

तदनाधृष्टमसीति सर्वर्त्विजः समवमृशन्ति ।

तत् तानूनप्त्रं सर्वे च त ऋत्विजश्च सर्वर्त्विजः । सर्व ऋत्विज इत्यसमस्तपाठो वा । समवमृशन्ति सहैवावमृशन्ति अवनताः सन्तो मृशन्ति स्पृशन्ति । सदस्यश्चेत्सोऽपि तानूनप्त्रमवमृशति सहैव । सर्वग्रहणं सर्वे स्वयमेवाभिमृशेरन्नान्योऽन्यस्य प्रातिनिध्ये-नेत्येवमर्थम् । ऋत्विग्ग्रहणं चमसाध्वर्युव्यावृत्त्यर्थम् । याजुषहौत्रसत्त्वे तद्रीत्यैव होत्रा-दयः कुर्युः । आश्वलायनहौत्रसत्त्वे तद्रीत्या याजुषरीत्या वा । अनभिशस्तेन्यमि-न्यन्तो मन्त्रः । तस्माद्यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्छतीति ब्राह्मणम् ।

समवमृष्टं प्रजापतौ त्वा मनसि जुहोमीति त्रिरवघ्रायान्तर्वेदि निनयति ।

समवमृष्टमिति वचनं सर्वैः समवमृष्टस्यैव तानूनप्त्रस्यावघ्राणं यदि कस्यचित्प्रति-बन्धेन समवमर्शो न जायते तदा तदीयसमवमर्शार्थं प्रज्ञातं तत्स्थापयित्वा तत्समवम-र्शोत्तरमवघ्राणं कार्यम् । अग्रिमं कर्म तु कर्तव्यमेव । सर्वथा कस्यचिन्महता प्रतिबन्धेन समवमर्शो नैव जायते तदा तस्याऽऽर्त्विज्यकरण एवायोग्यत्वादन्यं वृत्त्वा तेन समव-मर्शे कृतेऽवघ्राणं कर्तव्यम् । अतानूनप्त्रिणा यजमानेनर्त्विजा वा कर्माणि क्रियमाणे यावद्भिर्दिनैः क्रतुः समापनीयो भवति तावत्संख्येषु दिवसेषूपवासः कर्मसमाप्तौ मनो ज्योतिरित्याहुतिश्चेति कौशिकसूत्र उक्तम् । सकृन्मन्त्रेण द्विस्तूष्णीमित्येवं त्रिः प्राश-नमिति केचित् । अन्ये तु न प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रतितिष्ठतीति होम-प्राशने प्रस्तुत्यावघ्राणविधानाज्जुहोमीति लिङ्गाच्च त्रिर्मन्त्रेणैवावघ्राणमित्याहुः । सर्व-स्यैवाऽऽज्यस्यावघ्राणम् ।

प्रतिषिद्धमेकेषाम् ।

अन्तर्वेदि निनयनं प्रतिषिद्धमेकेषामाचार्याणां मते । अन्तर्वेदिनिनयनप्रतिषेधाद्बहि-र्निनयनं तु भवत्येव नतु निनयनमेवानेन प्रतिषिध्यते । नचावघ्राणस्यापि प्रतिषेधोऽ-स्त्विति वाच्यम् । श्रुतौ तानूनप्त्रावघ्राणस्य तानूनप्त्रप्रतिष्ठारूपत्वेनोक्ततया तस्य प्रतिषेद्धुमयोग्यत्वात्, विगीतत्वमूलकत्वेनान्तर्वेदिनिनयनस्यैव प्रतिषेध्यत्वकल्पनाया उचितत्वाच्च ।

असंचर उत्सिञ्चतीत्येकेषाम् ।

जनानां यत्र संचरो मार्गो नास्ति तत्रोत्सिञ्चतीत्येकेषामाचार्याणां मतम् । तेन पूर्व-मतेऽप्यसंचर एव निनयनं परं तु अस्मिन्मत उत्सेचनं नास्तीत्येतावान्भेद इति द्रष्टव्यम् ।

१ ख, ग, मनसा ।

अग्नीन्मदन्त्याऽऽपा ३ इति पृच्छति ।

किमापो मदन्त्य उष्णीभूता आपः किमित्याग्नीध्रं प्रति प्रश्नः । मदन्तीशब्दोऽप्सु तप्ततामाचष्टे । मदन्त्य आपा इत्यपेक्षिते मदन्त्याऽऽपा ३ इति संधिरार्षः । प्रश्ने प्लुतिः । अत एवावगम्यते पूर्वमग्नीधाऽऽपोऽधिश्रिता इति । तत्कालस्तु प्रागेव दर्शितः । परप्रत्यायनार्थत्वादुच्चैस्त्वम् ।

मदन्ति देवीरमृता ऋतावृध इत्याग्नीध्रः प्रत्याह ।

देवीर्देव्यः स्वच्छा अमृता अमृततुल्या ऋतावृधः । ऋतं मानसिकं सत्यं तदभिवर्धयन्तीत्यृतावृधः । यत्स्पर्शोऽपि मनःशुद्धिकर एतादृश्य आपो मदन्त्यः । तप्ता इति प्रत्युत्तरवाक्यार्थः । अत्रापि पूर्ववदुच्चैस्त्वम् । अग्निमिन्ध इत्यग्नीत् । तस्य गृहमाग्नीध्रम् । अग्नीधः शरणे रणभं चेति रः । शरणं गृहं तात्स्थ्यात्सोऽप्याग्नीध्रः । ऐष्टिकपाशुकयोः सोमकर्मवद्गृहासंभवात्स्थानमात्रं लक्षणीयं तत्स्थत्वादाग्नीध्रो भवति । ऐष्टिकपाशुकयोराग्नीध्रस्थानं यत्र तिष्ठन्नाश्रावयति तत् । सौमिके तु आग्नीध्रमण्डप एव विहितोऽस्ति तदेव स्थानं तस्य । ऋत्विग्विशेषवाचकोऽयं शब्दः सूत्रकारैर्ऋत्विग्विशेषेऽप्याग्नीध्रशब्दप्रयोगात्तदनुरोधेनाग्नीधः शरणे रणभं चेति सूत्र(वार्तिक)स्थचकारोऽनुक्तसमुच्चयार्थो वक्तव्यः । तेनानुक्तस्यर्त्विग्विशेषरूपार्थस्य संग्रहः सिद्धो भवति ।

ताभिराद्रवेति संप्रेष्यति ।

ताभिरद्भिः सह, आ समीपे द्रव, एहीत्यर्थः संप्रैषस्य । अत्रापि पूर्ववदुच्चैस्त्वं, प्रश्नबलात्सांनिध्यसिद्धेर्दूराद्धानाभावान्न प्लुतिः । प्रश्नस्तु सांनिध्य एव संभवति नासांनिध्य इति ज्ञेयम् ।

मदन्तीभिः पाणीन्प्रक्षाल्यन्ते, ब्रह्मा राजानं विस्रꣳसयति ।

मदन्तीभिस्तप्ताभिरद्भिः । बहुवचनात्सर्वे तानूनप्त्रिणः । ऋत्विगपेक्षया पाणीनिति बहुवचनम् । सर्वैः पाणिप्रक्षालने कृतेऽनन्तरं ब्रह्मा राजानं विस्रंसयति । बृंहणात्कर्मसु सदसद्विवेचनाद्ब्रह्मा । ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीति निरुक्तात् । सर्वविस्त्वं सदसद्विवेचकत्वं, यः सर्ववित्स ब्रह्मा भवतीति निरुक्तार्थः । सर्वविदित्यस्य विवरणं सर्वं वेदितुमर्हतीत्यनेन क्रियते । विस्रंसनं बन्धनाद्विमोचनम् । ब्रह्मत्वविधेरवसरख्यापनार्थमत्र वचनम् ।

अꣳशुरꣳशुरिति तꣳ सर्वे सहिरण्यैः पाणिभिराप्याययन्ति ।

सर्वे तानूनप्त्रिणः । आप्यायनलिङ्गेन मन्त्रेणाऽऽमर्शनमेवाऽऽप्यायनम् । अद्भिः सेचनमित्यन्ये । वरणक्रमेण सहैव वाऽऽप्याययन्ति । सहिरण्यैः पाणिभिरित्याप्यायनाङ्गं पाणिषु हिरण्यधारणं विहितं भवति ।

प्रत्युपनद्धेऽप उपस्पृश्येष्टा राय इति प्रस्तरे निह्नुवते सव्यान्नीचः पाणीन्कृत्वा दक्षिणानुत्तानान् ॥ ११ ॥
इति हिरण्यकेशिसूत्रे सप्तमप्रश्ने तृतीयः पटलः ।

कृत्वा निह्नुवत इत्यन्वयः । सर्वैराप्यायने कृते प्रत्युपनद्धे पुनर्बद्धे राज्ञि ब्रह्मणैव परिकर्मिणेति केचित् । येन विस्रंसनं कृतं तेनैव बन्धनं कर्तव्यमिति ब्रह्मणेत्येव युक्तम् । सोमस्याऽऽप्यायितस्यान्तरिक्षदेवत्यत्वाच्छादनेन द्यावापृथिवीभ्यां सव्यान्नीचः पाणीन्कृत्वा दक्षिणानुत्तानानित्येवंरूपनमस्काराञ्जलिकरणं निह्नवः । प्र वा एतेऽस्माल्लोकाच्च्यवन्त इत्युपक्रम्य द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिँल्लोके प्रतितिष्ठन्तीति श्रुतेः । द्यावापृथिवीभ्यामेव तन्नमस्कुर्वन्त्यथो एने वर्धयन्त्येवेति बह्वृचश्रुतेः । नमो दिवे नमः पृथिव्या इति मन्त्रलिङ्गाच्च वचनात्प्रस्तरे निह्नवः । न्यक्शब्दस्य द्वितीयाबहुवचनं नीच इति । अत्र केचिदुद्गातारः सुब्रह्मण्याह्वानं कुर्वन्ति केचिन्न । स्वोद्गातृवशेन कर्तव्यम् ।

इति श्रीमदोकोपाह्वाग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य तृतीयः पटलः ॥ ३ ॥

अथ सप्तमप्रश्ने चतुर्थः पटलः ।

प्रवर्ग्येण प्रचर्योपसदा प्रचरत्युपसदा वा प्रचर्य प्रवर्ग्येण प्रचरति ।

तत्र प्रवर्ग्यो मन्त्रब्राह्मणयोरनारभ्याधीत इति सूत्रकृताऽपि स्वतन्त्र एव व्याख्यायते । तत्र प्रवर्ग्येण प्रचर्योपसदा प्रचरतीत्येकः पक्षोऽनुष्ठानक्रमे । उपसदा प्रचर्य प्रवर्ग्येण प्रचरतीत्यपरः । तत्रैतद्वा विपरीतमिति लाघवेन वक्तव्ये गुरुनिर्देशप्रयोजनं ग्रीवा उपसदः पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति यत्पुरस्तादुपसदां प्रवृज्यते तस्मादितः पराङमूँल्लोकाञ्श्लपन्नेति यदुपरिष्टादुपसदां प्रवृज्यते तस्मादमुतोऽर्वाङिमाँल्लोकाञ्श्लपन्नेतीति निन्दाप्रशंसाभ्यां प्रत्यक्षश्रुतिविरुद्धमिति नाऽऽशङ्कनीयं सोऽपि प्रत्यक्षभूत एवेतिज्ञापनम् । अधीयते हि माध्यंदिनः(नाः)—शिरो वा एतद्यज्ञस्य यत्प्रवर्ग्यो ग्रीवा उपसद उपरिष्टादुपसदां प्रवृञ्ज्यात्तस्मादुपरिष्टाद्ग्रीवायाः शिरो भवतीति ।

यदातिथ्याया बर्हिस्तदुपसदां तदग्नीषोमीयस्य तत्प्रस्तरपरिधि ।

यदातिथ्याया बर्हिस्तदुपसदामपि बर्हिर्भवति तदेवाग्नीषोमीयस्य पशोरपि । अनेनाऽऽतिथ्योपसदग्नीषोमीयाणां साधारण्येनैकं बर्हिः प्रस्तरः परिधयश्चेति प्रतिपाद्यते । नच यादृशमाश्ववालादिकमातिथ्यायां तादृगेवोपसदग्नीषोमीययोरित्यनेन प्रतिपाद्यते नतु साधारण्यमिति वाच्यम् । तथा सति विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् । अपि वोत्पत्तिसंबन्धोऽविशिष्टानां प्रयोगैकत्वे हेतुः स्यादिति जैमिनिन्यायविरोधापत्तेः । अयं च न्यायश्चतुर्थाध्याये द्वितीयपादे वर्तते । एवं चैकमेव बर्हिः प्रस्तरः परिधयश्चेति । सूत्रार्थस्तु विधेर्विधिगम्यातिथ्यासंबन्धस्य बर्हिषः कर्माऽऽतिथ्यारूपं तस्यापवर्गे समाप्तौ, अपवर्गित्वाद्बर्हिषोऽपवृक्तत्वात्, अर्थान्तरे भिन्न उपसद्बर्हिषि विधिप्रदेशो धर्मातिदेशः स्यादिति पूर्वसूत्रार्थः । अपि वेति पूर्वपक्षव्यावर्तनाय । अविशिष्टानामातिथ्योपसदग्नीषोमीयाणां त्रयाणामपि उत्पत्तिर्बर्हिष उत्पत्तिस्तत्संबन्धादातिथ्याया बर्हिस्तदुपसदां तदग्नीषोमीयस्येत्यनेन प्रदर्शितः स बर्हिष उपादानसंस्काररूपप्रयोगस्यैकत्वे हेतुर्भवतीत्युत्तरसूत्रार्थः । तथाच त्रयाणामप्यर्थे सकृदेकमेव बर्हिरुपादेयं संस्कार्यं चेति सिद्धान्तार्थो ज्ञेयः । यदातिथ्याया बर्हिरित्यस्मिन्सूत्रे बर्हिरित्युपलक्षणं विधृत्योः । अत्र ज्ञापकमातिथ्येष्टाविक्षुशलाके विधृती इत्यस्मिन्सूत्र उक्तमेव । अत्र प्रस्तरग्रहणमन्यत्र बर्हिर्ग्रहणेन प्रस्तरस्य ग्रहणं न भवतीतिज्ञापनार्थम् । तेन चातुर्मास्यादिषु प्रसूनं बर्हिस्त्रीन्कपालान्संनह्यैकध्यं पुन संनह्यतीत्यादौ न प्रस्तरस्य ग्रहणम् । शरमयं बर्हिरित्यादावपि आतिथ्याबर्हिरादीनामातिथ्यादित्रयार्थमुत्पत्तिरतस्तान्याराय तूष्णीमेव संनह्य पुनः पुनः प्रयुञ्जीत । तत्प्रस्तरपरिधीति बर्हिर्विशेषणम् । प्रस्तरश्च परिधयश्च प्रस्तरपरिधयः, त एव प्रस्तरपरिधयो यस्मिन्बर्हिषि तद्बर्हिस्तत्प्रस्तरपरिधि । अनेन प्रस्तरवत्परिधीनामपि बर्हिष्येव संनहनं भवति न त्विध्मे । तेन षोडशदारुत्वमेवेध्मस्य । अथवा तत्प्रस्तरपरिधीति क्रियाविशेषणम् । सा च क्रिया संनहनरूपा । प्रस्तरश्च परिधयश्च प्रस्तरपरिधयः स एव प्रस्तरस्त एव परिधयो ययोर्बर्हिःसंनहनेध्मसंनहनरूपक्रिययोर्यथाक्रमं यथा भवति तथोभयसंनहनत्वसाजात्येन मिलित्वा तत्प्रस्तरपरिधि संनहनं भवति । बर्हिःसंनहनं तत्प्रस्तरम्, इध्मसंनहनं तत्परिधि, तेनैव प्रस्तरेण सह बर्हिःसंनहनं, तैरेव परिधिभिः सहेध्मसंनहनं भवतीति तात्पर्यार्थः । अथवोपसदग्नीषोमीयात्मकक्रियाविशेषणम् । पुंलिङ्गप्रथमाबहुवचनविशिष्टयच्छब्दसहितं षष्ठ्यन्तमातिथ्यापदमत्रानुवर्तनीयम् । तथा चायमर्थो भवति य आतिथ्यायाः प्रस्तरो ये च परिधयस्त एवोपसत्सहिताग्नीषोमीयात्मककर्मणि भवन्तीति । समासस्तु पूर्ववदेव । संभरणं तु परिधीनां पृथगेवामन्त्रम् । सहैव संभरणे मन्त्रविरोधः स्यात् । नचैकविंशतिधेत्यूहोऽस्तु तथा च सहैव संभरणे विरोधो न । षोडशदारुमिध्मं संनह्यतीति सूत्रं तु परिधीनां परिहितत्वपक्षाभिप्रायेण योजनीयमिति

वाच्यम् । आतिथ्यायां मन्त्रेण संभृतानां पुनर्मन्त्रेण संभरणायोगात् । अन्यथाऽऽतिथ्याबर्हिषोऽपि पुनर्मन्त्रेण संभरणापत्तेः । इष्टापत्तौ जैमिनीयन्यायविरोध आपद्येत । अतः संभरणममन्त्रमेवेत्येव युक्तं, संनहनमप्यनेनैव प्रकारेण तूष्णीमेव ।

स्तीर्णे प्रस्तरबर्हिरुपसत्सु शयाः परिधयः ।

पक्षान्तराभिप्रायेणेदं सूत्रं योजनीयम् । पूर्वं सूत्रं पुनः पुनस्तान्येवोपादाय प्रयोज्यानीत्येतादृशार्थपरम् । आतिथ्यार्थं स्तीर्णं बर्हिस्तथैव स्थापनीयं तच्च प्रस्तरेण संयुक्तमेव स्थापनीयम् । अत्र प्रस्तरग्रहणाभावे प्रस्तरस्य स्थानादादाय पुनः पुनः स्थापनं स्यात्तन्मा भूदित्येतदर्थं शया आतिथ्यायां ये परिहिताः परिधयस्ते तथैव स्थापनीया इति न तु पुनः पुनरादायैतत्सर्वं प्रयोज्यमिति स्तीर्णे प्रस्तरबर्हिरित्येतस्य सूत्रस्यार्थः । यदातिथ्यायाः प्रस्तरबर्हिः स्तीर्णं शयाः परिधयस्तथैवोपसदां तदग्नीषोमीयस्य चेति लाघवादेव बर्हिषः स्तीर्णत्वसिद्धौ परिधीनां परिहितत्वसिद्धौ च यदातिथ्याया बर्हिरित्यारभ्य शयाः परिधय इत्यन्तं गुरुसूत्रकरणं व्यर्थं स्यादतोऽर्थद्वयबोधकत्वमेव वक्तव्यम् । उक्तं चार्थद्वयमापस्तम्बेन—आतिथ्याबर्हिरुपसदामग्नीषोमीयस्य च तदेव प्रस्तरपरिधि तत्स्तीर्णं बर्हिस्तत्परिधिताः परिधय इत्येक इति । तदेव प्रस्तरपरिधीत्यन्तं पुनःप्रयोगाभिप्रायेणैव तद्व्याख्यातृभिर्व्याख्यातम् । तत्स्तीर्णमित्यादिकं तु पुनःप्रयोगाभावाभिप्रायेणेति । परिधिताः परिहिता इत्यर्थः । छान्दसोऽयं प्रयोगः । स्तीर्णं प्रस्तरेण युक्तं च बर्हिरुपसत्सु भवति परिधयः शयाः परिहिता भवन्ति । अग्नीषोमीये तु देशभेदात्पुनः प्रयोगः सूत्रोक्तः । प्रयोगक्रमस्तु स्तीर्णपक्षाभिप्रायेण द्रष्टव्यो गृहमेधीयप्रयोगवत् । यदातिथ्याया बर्हिस्तदुपसदामग्नीषोमीयस्य चेत्येतावतैव सिद्धे पुनस्तच्छब्दोपादानमर्थविशेषमपि द्योतयति । अग्नीषोमीयस्याऽऽतिथ्यार्थबर्हिरेव बर्हिस्तस्य स्तरणं यत्र कर्तव्यं भवति तद्देश एव वेदिकार्यकरो न कृत्स्ना महावेदिरिति । तेनोत्तरवेदिहविर्धानयोर्मध्य एव यावत्पर्यन्तमास्तृतं पश्वर्थमातिथ्यार्बर्हिर्भवति तावति प्रदेश एव वेदिप्रयुक्तकार्याणीति । एतदभिप्रेत्यैव वक्ष्यति सूत्रकारः—अपरेणोत्तरवेदिं मन्त्रेण बर्हिः स्तृणातीति । कृत्स्नस्योत्तरवेदितः पश्चिमभूतस्य महावेदिप्रदेशस्यैतया व्यावृत्तिः क्रियते । तदग्नीषोमीयस्य चेत्यग्नीषोमीयवचनं सवनीयादिव्यावृत्त्यर्थम् । तेन सवनीयादौ वेदिप्रयुक्तकार्याणि महावेद्यामेवेति ज्ञेयम् । स्पष्टं चैतत्सूत्रान्तरे—अग्नीषोमीय उत्तरवेदिहविर्धानयोर्मध्यप्रदेशोऽसंचरो वेदिस्तत्र प्रोक्षणबर्हिःस्तरणादीति । अग्नीषोमीय इति सप्तमी । असंचर इत्यनेनोत्तरभागो द्वारं च व्यावर्त्यते । संचरोऽत्र लौकिकः । न विद्यते संचरो यस्मिन्प्रदेश इत्यसंचरः । इदं चोत्तरवेदिहविर्धानमध्यप्रदेशविशेषणम् । उपसत्स्विति वचनमुपसत्स्वेव प्रस्तरयुक्तं बर्हिः स्तीर्णं नाग्नीषोमीयेऽपि । तेनाग्नीषोमीये बर्हिरास्तरणाव्यवहितोत्तरमेव प्रस्तरयुक्तमिति बर्हिर्विशेषणसिद्धं प्रस्तरासादनं न किंतु स्वस्थान एव ।

उपसदस्तन्त्रं व्याख्यास्यामः ।

उपोपगतानि संगतानि एतादृशानि पुराणि विशीर्णानि भवन्ति यया सोपसत् । उपोपगताः स्वेन सह संगता अपि भ्रातृव्या विशीर्णा भवन्ति यजमानस्य यया सा वा । एतादृश्युपसन्नामकेष्टिस्तस्यास्तन्त्रं कर्मकलापस्तं व्याख्यास्यामः । खण्डतन्त्रत्वा-म्नानाश्रुतिभ्यः कर्तव्यत्वेनाभिमतं तन्त्रमुपसंहृत्य कथयिष्याम इत्यर्थः । तेषामसुराणां तिस्रः पुर आसन्नित्यत्रोपसद्विषयिण्याख्यायिका प्रसिद्धा । पुराणां संगतत्वं स्कान्द-पाद्मादिपुराणेषु प्रसिद्धम् ।

तस्यामाज्यं१ हविः ।

उत्तरत्र विनियोगादेवाऽऽज्यस्य हविष्ट्वे सिद्ध इदं वचनमेतस्या इष्टेरपूर्वत्वमेवेति-ज्ञापनार्थम् । तेनात्रापि यावदुच्यते तावदेव कर्तव्यमिति सिद्धं भवति । ननु तत्र याव-त्क्रियते तद्व्याख्यास्याम इति प्रायणीयावदेवात्र कुतो वचनं न कृतमिति चेन्न । हौत्र-तन्त्रविषयेऽप्यपूर्वत्वस्यात्राऽऽवश्यकत्वेन हौत्रतन्त्रविषयकापूर्वत्वनिवर्तकस्य तत्र याव-त्क्रियते तद्व्याख्यास्याम इत्यस्य वचनस्य प्रकृतेऽनिष्टत्वेन तदनुक्तेरेव युक्तिसहत्वात् । तेन देवा यो इत्यादिकं प्राकृतं हौत्रतन्त्रमपि निवर्तते । तथाचाऽऽश्वलायनः—अथो-पसत्तस्यां विज्ञया जपा इति । जैमिनिरप्येतस्या इष्टेरपूर्वत्वं दशमाध्याये षष्ठे(सप्तमे) पाद आह—उपसत्सु यावदुक्तं कर्म स्यात्, स्रौवेण वा गुणत्वाच्छेषप्रतिषेधः स्यात्, अप्रतिषेधो वा प्रतिषिध्य प्रतिप्रसवात्, अनिज्या वा शेषस्य मुख्यदेवतानभीष्टत्वादिति चतुर्भिः सूत्रैः । सूत्रार्थस्तु—उपसत्सु अप्रयाजास्ता अननूयाजास्ता इति प्रयाजानूयाज-निषेधादेतद्वर्जितं यावदुक्तं सर्वं कर्तव्यं स्यादिति प्रथमसूत्रार्थः । द्वितीयसूत्रार्थस्तु—स्रुवेणाऽऽघारमाघारयति यज्ञस्य प्रज्ञात्या इति विहितः स्रुवाघारः स्रौवः । ततः स्रौव-शब्दान्मत्वर्थीयोऽच्प्रत्ययः । तथा च स्रौववानित्यर्थो भवति । स्रौववदितिपदं योग्य-तया वाक्यविशेषणं प्रतिपाद्यतासंबन्धेन । तथा च स्रुवेणाऽऽघारमाघारयति यज्ञस्य प्रज्ञात्या इति स्रुवाघारप्रतिपादकवाक्येनेत्यर्थो भवति । अप्रतिषिद्धादाघारातिरिक्ता-विहिताच्च कर्मणोऽन्यत्कर्म शेषशब्देनोच्यते । तस्य सर्वस्य प्रतिषेधो भवतीति गुण-त्वाद्गुणवत्त्वात्, स्रौवाघारस्याऽऽख्यातसद्भावरूपप्रज्ञातिरूपगुणवत्त्वाच्चैतेन स्रुवाघार-प्रतिपादकवाक्येन शेषकर्मणां प्रतिषेध इति । आघारवचनं नान्यामाहुतिं पुरस्तादिति प्रतिषिद्धस्य प्रतिप्रसवार्थमस्त्वित्याशङ्कते तृतीयेन सूत्रेण प्रतिषिद्धस्य प्रतिप्रसवार्थ-त्वान्न शेषप्रतिषेध इति । तत्राऽऽग्नेयी सौमी वैष्णवी चेति तिस्रः प्रधानाहुतयो या ते अग्न इत्यौपसदाहुतयश्चाऽऽम्नाता नत्वाघारादय इत्यनाम्नानादभावशङ्कायां सत्यां प्रति-

१ ख. ग. °ते । अ° ।

षेधः प्रसक्तस्तत्प्रतिप्रसवार्थं वचनम्। एवं चाऽऽश्रावयतीति सर्वप्राकृतोपलक्षणार्थमित्यर्थः। चतुर्थसूत्रार्थस्तु-शेषस्य प्रधानाघाराहुतिव्यतिरिक्तास्वा (क्तस्याऽऽ)हुतिसमुदायरूपस्यानिज्या न होमो यागश्च। मुख्यास्तिस्रो देवतास्तासां फलप्रदाने नान्यामाहुतिमितिनिषेधेनेतराहुतीनां मुख्यदेवतानभीष्टत्वात्फलप्रदानाननुगुणत्वात्। निषिद्धानुष्ठाने प्रकृतफलं नैवोत्पद्यते मुख्यदेवतानां फलप्रदानविषयेऽभीष्टफलप्रदातृत्वानुगुण्यं न भवतीति।

अग्निः सोमो विष्णुर्देवताः।

उत्तरत्र विधिदर्शनादेवैतासां देवतात्वसिद्धाविदं वचनं तिसृणामपि देवतानां प्रधानत्वख्यापनार्थम्। तेनाग्नेः सोमस्य चाऽऽज्यभागदेवतात्वशङ्का परिहृता भवति। फलं दब्धिरसीत्येव सर्वानुमन्त्रणम्।

उपांशुयाजेन कल्पो व्याख्यातः।

कल्पः प्रकारः। सादृश्याद्विकारः, विप्रतिषेधे हविःसामान्यं बलीय इति सूत्राभ्यामेवोपांशुयाजविकारत्वसिद्धौ परप्रत्यायनार्थत्वेनाऽऽश्रावणप्रत्याश्रावणसंप्रैषवषट्कारागूःप्रणवानामुच्चैस्त्वे प्राप्त उपसदि सर्वस्याप्युपांशुताया उपांशूपसदा चरामेति श्रुत्या विहितत्वेन तदुच्चैस्त्वं बाधित्वोपांशुत्वं प्राप्तमाज्यहविषोपांशुयाजेन प्रचरति तस्योच्चैराश्रुतप्रत्याश्रुते याज्यापुरोनुवाक्यासंप्रैषो वषट्कारश्चोपांशु देवतादेशनमित्युपांशुयाजधर्मः पुनस्तदपि बाधितुमिदं वचनम्। वषट्कारश्चेत्यत्रत्यचकारेणाऽऽगूःप्रणवयोः संग्रहः। तथाचाऽऽश्वलायनः—आगूःप्रणववषट्कारा उच्चैः सर्वत्रेति। उच्चैस्त्वेऽन्यं च विशेषमाह स एव-तन्त्रस्वराण्युपांशोरुच्चानि मन्द्राण्युपांशुतन्त्राणामिति। एतेनोपसदामुपांशुतन्त्रत्वादेतेषामुच्चैस्त्वं मन्द्रस्वरात्मकं भवति। नचोपांशूपसदा चरामेत्येतस्याः श्रुतेः प्रधानमात्रपरत्वमिति वाच्यम्। तस्य चोपांशुयाजविकारत्वेनैव सिद्धौ श्रुतेर्निष्प्रयोजनत्वापत्तेः। एवं च साङ्गप्रधानपरतायां सिद्धायामाश्रावणादिविषयकं श्रुतिसिद्धमुपांशुत्वं बाधितुमपेक्षितमेवेदं सूत्रमिति ज्ञेयम्। प्रणवः पुरोनुवाक्यायाः। सामिधेनीप्रैषादिषु तु संज्ञयैव परप्रत्यायनं राजसूयान्तर्गतमारुत्याश्रावणप्रत्याश्रावणवत्। सा च संज्ञा हस्तमध्यमाङ्गुल्यङ्गुष्ठसंस्फोटनेनैव। अथवाऽत्र प्रैषविषये परप्रत्यायनार्थत्वान्नोपांशुत्वमित्येव स्वीकर्तव्यम्। मारुत्याश्रावणप्रत्याश्रावणयोस्तु वचनात्परप्रत्यायनार्थत्वेऽप्युपांशुत्वमेव। परप्रत्यायनं तु संज्ञयैव सामिधेनीविषय उपांशूपसदा चरामेति श्रुत्याऽङ्गानामप्युपांशुत्वस्योक्तत्वात्। विशेषोपसदः सतन्त्रा इत्याश्वलायनसूत्राच्चोपांशुत्वमेव। प्रणवपरिज्ञानार्थं मध्यमाङ्गुल्यङ्गुष्ठसंस्फोटनमत्रापि। आश्वलायनोक्तमुमन्द्रस्वपक्षस्तु श्रुतिविरुद्धत्वान्नात्र भवति।

अग्नीनन्वाधाय षोडशदारुमिध्मꣳ संनह्यति ।

अग्न्यन्वाधानवचनप्रयोजनं प्रायणीयावज्ज्ञेयम् । संनहनं संभरणोपलक्षणम् । इदं च षोडशदारुत्वमातिथ्यायां परिहिताः परिधयस्ते तथैवोपसत्सु भवन्तीति पक्षे । अग्नीनन्वाधायेति ल्यबिध्माहरणाव्यवधानार्थः । तेन परिस्तरणाद्यर्थदर्भच्छेदनमिध्माहरणानन्तरमेव भवति नात्रेति । नतु पौर्णमासतन्त्रत्वख्यापनार्थः । तस्य सादृश्याद्विकारः स लिङ्गेन गम्येतेति सूत्रादुपांशुयाजसत्त्वरूपलिङ्गेनैव सिद्धेः । इध्मसंभरणमन्त्र एवमूहः—यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन् । ततस्त्वाꣳ षोडशधा संभरामि सुसंभृता । एकाꣳ समिधं यज्ञायुरनुसंचराम् । उपवेषꣳ संभरामि सुसंभृतेति । उपवेषशब्दविवक्षयाऽनुसंचरमित्येव वा । अपरिहितत्वपक्षे तु इध्मे संभरणं परिधीनां पृथगेवामन्त्रमित्युक्तमेव प्राक् । संभृतत्वान्न मन्त्रेण संभरणम् ।

वेदं कृत्वाऽग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपरा-
जीꣳस्तीर्त्वा यथार्थमाज्यपात्राणि प्रयुनक्ति
स्फ्यꣳ स्रुवꣳ स्रुच आज्यस्थालीं येन चार्थः ।

वेदं कृत्वेति क्त्वाप्रत्ययान्तानुवादप्रयोजनं प्रायणीयावद्द्रष्टव्यम् । उपवेषस्य करणं पात्रप्रयोगकालेऽपि न तस्य प्रयोजनाभावात् । अग्नीन्परिस्तीर्येत्यादि उलपराजीꣳस्तीर्त्वेत्यन्तं कृतव्याख्यानम् । यथार्थं यथाप्रयोजनम् । अर्थं प्रयोजनमनतिक्रम्य यथार्थम् । आज्यार्थानि पात्राणि आज्यपात्राणि । आज्यवचनमाज्यार्थपात्राणामुक्तानामनुक्तस्य च प्रथमं प्रयोगस्तदनन्तरं तदितरपात्रप्रयोग इत्येवं क्रमविशेषं सूचयितुम् । आज्यपात्रेषु यथार्थशब्दोपादानं निषेचनपात्रस्यानुक्तस्यापि प्रयोगार्थम् । कपालशूर्पनिवृत्तावर्थात्स्फ्येन सहत्वमग्निहोत्रहवण्याः प्राप्तं तद्वारयितुं स्फ्यस्यानाज्यपात्रत्वेनाऽऽज्यपात्रप्रयोगानन्तरं प्रयोगं वारयितुं च स्फ्यादीनां वचनम् । नन्वेवं स्फ्यमाज्यपात्राणि येन चार्थ इत्येव लाघवेन वक्तव्यम् । तथा च पृथक्पृथगुद्देशो व्यर्थः, स्रुवस्याप्याज्यसंबन्धित्वादाज्यपात्रेषु ग्रहणं भविष्यति, निषेचनपात्रप्रयोगार्थं यथार्थग्रहणमपि न कर्तव्यं भवतीति चेत् । सत्यम् । आज्यपात्रत्वसाजात्येनाऽऽज्यपात्रसमूहात्मकमेकं पात्रं स्फ्यश्चेत्येवं द्वंद्वत्वापत्तेः(त्तिः) । अतः पृथक्पृथग्ग्रहणम् । येन चार्थ इतिवचनोपात्तपात्रत्रयस्य तु अग्निहोत्रहवणी दर्भ इत्येवं द्वंद्वम् । सूत्रान्तरे द्वंद्वतार्थं दर्भप्रयोगस्य विहितत्वात् । वेदं वेदाग्रमिति द्वंद्वम् । अथवाऽग्निहोत्रहवण्या सह वेदो वेदाग्रेण सह दर्भ इत्येवं द्वंद्वसंपत्तिः । अथवा वेदवेदाग्रे एकमेव द्रव्यं वेदाग्रस्य तज्जन्यत्वात् । तेनाग्निहोत्रहवणी वेदवेदाग्रे इत्येकमेव द्वंद्वमिति द्रष्टव्यम् । निषेचनपात्रेण सह दर्भ एव द्वंद्वतार्थं भवति । नन्वेवं स्फ्यꣳ स्रुवमाज्यपात्राणीत्येवमेवास्तु किमर्थं स्रुगादिग्रहणमिति चेत्सत्यं, स्रुचां समुदायत्वेनैकपात्रत्वं वक्तुमुपादानात् ।

तेन जुहूपभृद्ध्रुवा आज्यस्थाली चेत्येवमेवात्र द्वंद्वं भवति । आज्यस्थालीवचनं निषेचनपात्रस्य प्रथममुपयोगात्तस्यैव स्रुग्भिः प्रयोगोऽपि कदाचित्स्यात्तं वारयितुम् । अवशिष्टं निषेचनपात्रमेव तत्प्रयोगार्थं यथार्थमिति । येन चार्थ इत्याज्यपात्रव्यतिरिक्तपात्रप्रयोगार्थम् । येनेत्येकवचनं पात्रसमुदायपरम् । तेन पात्रत्रयस्य लाभः सिध्यति । एकपात्रपरत्व एकस्यैव पात्रस्य प्रयोगः स्यात् । अन्ययोः प्रयोजनवतोरपि न स्यात् ।

पवित्रे कृत्वा यजमान वाचं यच्छेति संप्रेष्यति वाग्यतः पात्राणि संमृशति प्रोक्षितेषु वाचं विसृजते ।

पवित्रे कृत्वा यजमान वाचं यच्छेति संप्रेष्यतीति वचनाददृष्टार्थत्वेऽपि प्रणीता नेष्यन्ते। कात्यायनेन त्वत्र तासामुक्तत्वात्तन्निरासार्थो वा प्रयत्नः । हविष्कृता वाचं विसृजत इति कालाभावात्प्रोक्षितेषु पात्रेष्वपि वाग्यतेन कर्तव्येषु पदार्थेषु प्राकृतेषु चोदकप्राप्तेषु मध्ये न सन्तीति प्रोक्षितेष्वित्युक्तम् । वाग्यतो वाचा यतः कृतवाग्यमनः । पाणितलेन संस्पर्शः संमर्शः । प्रोक्षितेष्वित्यनेन संगृहीताः पदार्था उच्यन्ते–दक्षाय वानस्पत्याऽसि प्रत्युष्टꣳ रक्षः, देवो वः सवितोत्पु० अच्छिद्रे० वसोः सू० आपो देवीरग्रे० शुन्धध्वं दे० । ब्रह्मन्प्रोक्षिष्यामीत्यामन्त्रणं न भवति । हविष इध्माबर्हिषश्च प्रोक्ष इति ब्रह्मत्वसूत्रे पात्रप्रोक्षणस्यानुपादानात् । प्रसवाभावेनाऽऽमन्त्रणमपि तदनुरोधित्वान्न कर्तव्यम् । अथवा चकारेण पात्रप्रोक्षणस्य संग्रहः । अस्मिन्पक्षेऽत्रापि ब्रह्मन्प्रोक्षिष्यामीत्यामन्त्रणं भवति । अत्र प्राक्प्रोक्षणात्कस्त्वेति यज्ञं युनक्ति यजमानः ।

स्फ्यमादाय स्तीर्णाया वेदेर्लोमभ्योऽधिस्तम्बयजुर्हरत्युत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यते ।

स्फ्यादानं मन्त्रेणैव स्तम्बयजुरर्थत्वात् । वेद्यभिमर्शनं वेदिसंमार्जनं च न वेदेश्छन्नत्वात् । लोमानि आस्तृतदर्भाः । तदुपरि दर्भं निधाय स्तम्बयजुर्हरति प्रकृतिवत् । तत्र वर्षतु ते द्यौरिति न भवति वेदेश्छन्नत्वादक्षतत्वाच्च । इमां नरा इति प्रैषोऽपि न वेदेः करणाभावात् । उद्धननखनने न, असंभवात् । उत्तरं परिग्राहं परिगृह्येत्यनुवादो धा असीति संमार्गस्य पुरा क्रूरस्येत्यभिमन्त्रणस्य च निवृत्त्यर्थो नतु पूर्वपरिग्राहनिवृत्त्यर्थः । ल्यपा मध्यगतोत्तरनिवर्तकत्वस्यैव बोधनात् । * (अभिमन्त्रणमात्रनिवर्तकत्वेनैवानुवादसार्थक्यसंभवे पूर्वपरिग्राहश्रोण्यंसोन्नयनरूपकर्मद्वयनिवर्तकत्वस्यानौचित्यात् ।) संप्रैषः प्रोक्षणीरासादयेति तेन प्रतिपद्यत उत्तरपरिग्राहपरिग्रहणानन्तरं संप्रैषमेव वदतीत्यर्थः ।

---

* धनुश्चिह्नान्तर्गतं क. पुस्तके नास्ति ।

यदन्यद्बर्हिषः पत्नीसंनहनाच्च तत्संप्रेष्यति ।

बर्हिषः पत्नीसंनहनाच्चान्यद्यत्कर्म तत्संप्रेष्यतीत्यर्थः । यथा प्रोक्षणीरासादयेध्ममुपसादय स्रुवं च स्रुचश्च संमृड्ढ्याऽऽज्येनोदेहीति । अस्तीर्णत्वपक्षे वेद्यभिमर्शनं वेदिसंमार्जनं च भवत्येव वेदेरच्छन्नत्वात् । लोमभ्यः स्तम्बयजुर्हरणं न । वर्षतु ते द्यौरिति भवत्येव वेदेरच्छन्नत्वात्सक्षतत्वाच्च । इमां नरा इति प्रैषोऽपि भवत्येव वेदेः करणस्य सत्त्वात् । उद्धननखनने धा असीति च भवत्येव संभवात् । पुरा क्रूरस्येत्यभिमन्त्रणं निवर्तत एव वचनबलात् । अस्तीर्णत्वपक्षेऽपि प्रैष एवमेव । नच बर्हिरुपसादनस्यापेक्षितत्वात्कथमेतादृशः प्रैषोऽत्रोपयुक्तो भवतीति वाच्यम् । उपसादनस्य प्रोक्षणार्थत्वेन बर्हिष्प्रोक्षणस्यैवाभावेनैतस्याप्यभावस्यैव सिद्धत्वेन यथापठितस्यैव प्रैषस्यात्रोपयोगसंभवात् । तथा चानुपसादितमेव बर्हिः स्थापितप्रदेशादादायाऽऽस्तरणीयम् । नच प्रोक्षणमप्यस्तीर्णत्वपक्षेऽस्तु तदर्थत्वादुपसादनमप्यस्तु तथा च प्रैषस्योक्तस्यात्रानुपयोगात्प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढ्याऽऽज्येनोदेहीति बर्हिष्पदवानेवास्तीर्णत्वपक्षे प्रैषो भवत्विति वाच्यम् । आतिथ्यायां प्रोक्षितस्य पुनःप्रोक्षणायोगाद्यावज्जीवं पात्राणि धार्यन्ते तेषां प्रतितन्त्रं संस्कारोऽभ्यावर्तत इति पात्राणामेव संस्कारावृत्तिविधानेनान्यत्र तन्निवृत्तेरुक्तप्रायत्वात् । यज्ञोत्पत्त्युपदेशे निष्ठितकर्म प्रयोगभेदात्प्रतितन्त्रं क्रियेत न वा कृतत्वात्तदुपदेशो हीति द्वादशाध्यायप्रथमपादान्तर्गतजैमिनिन्यायसिद्धत्वाच्च । सूत्रार्थस्तु यज्ञानामातिथ्योपसदग्नीषोमीयाणामुत्पत्तौ य उपदेशो यदातिथ्याया बर्हिरित्यादिस्तत्रानुष्ठितं बर्हिषि प्रोक्षणादिकं प्रयोगभेदात्प्रतितन्त्रं क्रियेतेति । निष्ठितकर्मेति पाठे साधारण्येन निश्चितं यद्बर्हिस्तत्कर्मेत्यर्थ इति पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु कृतत्वात्संस्काराणां प्रोक्षणादीनां कृतत्वान्न पुनरनुष्ठेया हि यस्मात्तदुपदेशस्तस्योपदेशस्तदुपदेशः । तच्छब्देन बर्हिःसाधारण्यं गृह्यते । तस्य बर्हिःसाधारण्यस्योपदेशो यस्मादतस्तत्संबन्धिसंस्काराणामपि साधारण्येनैवानुष्ठानं नतु प्रतिप्रयोगं पृथक्पृथगिति । द्वारसाधारण्ये सत्यातिथ्याकाल एव नियतं प्रोक्षणाद्यनुष्ठानं तु नान्तरीयकमुपसदादेस्तदानीमप्राप्तत्वादिति । अत एव प्राथमिकत्वादातिथ्यायास्तन्निमित्तत्वमितरयोः प्रसङ्गित्वमिति ज्ञेयम् । बर्हिष्प्रोक्षणस्य निवृत्तौ सिद्धायां तदर्थस्योपसादनस्यापि निवृत्तत्वेन यथापठितस्य प्रैषस्य सुतरामुपयोगसंभवात् । ननु पत्नीसंनहनस्यात्रासंभवादेवाभावे सिद्धे पर्युदासो व्यर्थ इति चेत्सत्यं, पक्षे पत्नीसंनहनमप्यत्र भवतीतिज्ञापनार्थत्वेन वैयर्थ्याभावात् ।

यत्प्रागाज्यग्रहणात्तत्कृत्वा ध्रुवायामेव गृह्णाति ।

आज्यग्रहणात्प्राग्बर्हिरुपसादनपत्नीसंनहनव्यतिरिक्तं यत्कर्म प्रोक्षण्यासादनप्रभृति

वेदेनोपयम्य भूमौ प्रतिष्ठितायां ध्रुवायामित्यन्तं तत्कृत्वा ध्रुवायामेव गृह्णाति । एव-कारेण जुहूपभृतोराज्यग्रहणं व्यवच्छिद्यते । अनेन स्रुच्याघाराद्याज्यभागान्तकर्मणो निवृत्तिरुक्ता भवति । तथा चाऽऽपस्तम्बः—नान्यामाहुतिं पुरस्ताज्जुहुयात्स्रौवमेवाऽऽ-घारयेदिति । अग्ने गृहपत उप मेत्यादिकमुभयपक्षेऽपि भवति ।

प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्येध्मं वेदिं च प्रोक्ष्य प्रोक्षण्य-वशेषं निनीय पवित्रे अपिसृज्याग्निमभिमन्त्र्य पूर्वामाघारस-मिधमाधाय ध्रुवा१ स्रुवं च सादयत्येषाऽसददिति मन्त्र१संनमति विष्ण्वसि वैष्णवं धाम प्राजापत्यमित्याज्यमभिमन्त्रयते ।

उक्तेतरपरिसंख्यार्थमनुक्रमणम् । आज्यस्थाल्यपोद्धरणं तु भवत्येव । प्रोक्षणार्थं वेदे रिक्तत्वापेक्षणात्, आज्ये प्रोक्षणबिन्दुपातापत्तेश्च । आमन्त्रणेन प्रसवोऽप्युपलक्ष्यते । अन्यथाऽऽमन्त्रणस्यैव निरर्थकत्वापत्तेः । इध्मं वेदिं चेत्यत्र चकारः परस्परसमुच्चयार्थः । वेदेश्छन्नत्वाद्वेदिप्रोक्षणलोपः शङ्क्येत तन्निवृत्त्यर्थं वेदिमितिवचनम् । नचास्तीर्णत्वपक्ष एवैतदस्तु इति वाच्यम् । अग्नीषोमीय आस्तृताया अपि वेदेः प्रोक्षणविधिदर्शनेना-त्रापि तथैव कल्पनस्य युक्तत्वेन संकोचस्यानुचितत्वात् । प्रोक्षण्यवशेषं निनीय पवित्रे अपिसृज्येत्यनेन क्रमेण प्रस्तरदानं निवर्त्यते । अस्तीर्णत्वपक्ष एतदपि भवत्येव । पवित्रे अपिसृज्याग्निमभिमन्त्र्येत्यनेन क्रमेण ब्रह्मणे प्रस्तरप्रदानमाहवनीयकल्पनं च व्यावर्त्यते । आहवनीयकल्पनकार्यमिध्माधानेनैव सिध्यति होमस्यात्र स्वल्पत्वात् । आहवनी-यस्यातीव स्वल्पत्वे तु आवश्यकत्वादाज्याभिमन्त्रणोत्तरमेतत्कर्तव्यमेव । तात्पर्यन्तं स्थातुमशक्यत्वे त्वत्रैव कर्तव्यम् । अथवाऽनूयाजार्थोल्मुकोदूहनसहचारित्वादेव निवृत्तिः । अन्तर्वेदि पुरोग्रन्थीत्यादि ग्रन्थिप्रत्युक्षणान्तमस्तीर्णत्वपक्षेऽपि न भवति । ग्रन्थेर्नूतन-त्वेऽपि समन्त्रकग्रन्थिकरणाभावान्न प्रत्युक्षणम् । यत्र लूनस्य बर्हिषो विहारदेशप्राप-णार्थं यत्संनहनं तत्रैव संनहने मन्त्रः । एवं हरणेऽपि । प्रकृते तथात्वाभावान्न संनहने हरणे च मन्त्रः । तथा च द्वादशाध्याये प्रथमे पादे जैमिनिः संनहनहरणे तथेति चेत्, नान्यार्थत्वादिति । अग्नीनन्वाधायाऽऽतिथ्यापरिवीनिध्म उपसंनह्यतीत्ये-तत्सूत्रव्याख्यानावसर एतत्सूत्रद्वयं व्याख्यास्यते । स्तीर्णत्वपक्षे तृणैर्वेदिमन्तर्धायेत्या-दिकं प्रत्यादाय प्रस्तरं परिधीन्परिदधातीत्यादिविहितं परिधिपरिधानं चार्थान्निवर्तते । अस्तीर्णत्वपक्षेऽपि बर्हिषः प्रोक्षितत्वान्न प्रोक्षणम् । अन्तर्वेदि पुरोग्रन्थीत्यादिकमपि नेत्युक्तमेव प्राक् । बर्हिर्वेद्यां तूष्णीमेव विस्रस्य समन्त्रमेव प्रस्तरं गृहीत्वा प्रस्तरे पवित्रे समन्त्रमेवापिसृज्य समन्त्रमेव ब्रह्मणे प्रदाय तृणैर्वेदिमन्तर्धायाक्षणया शुल्वं स्तीर्त्वा समन्त्रमेव क्रमेण दर्शपूर्णमासवत्स्तृणाति । आहवनीयकल्पनमप्यस्ति । अनू-

याजाभावान्नोल्मुकोद्वहनम् । प्रत्यादाय प्रस्तरं परिधीन्परिदधातीत्यादि पूर्वाघारसमि-दाधानान्तमस्ति । उत्तराघारसमिदाधानमुभयपक्षेऽपि न । परिधीनां परिहितत्वादेत-स्याभिमन्त्रणस्य न पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्तीति श्रुत्या रक्षोपहननरूपकार्यकारित्वसाम्येन परिधिरूपत्वादातिथ्यार्थपरिहिता यथाऽन्यत्रोपयु-ज्यन्ते तथाऽऽतिथ्यायां कृतमभिमन्त्रणमपि अत्रोपयोगाय भविष्यति । तथा चाभिम-न्त्रणनिवृत्तिरत्रेति शङ्कां दूरीकर्तुमग्न्यभिमन्त्रणवचनम् । अभिमन्त्र्येति ल्यप्प्रयोगः कालाव्यवधानार्थः । सूर्यस्त्वेत्यग्न्यभिमन्त्रणं कृत्वा कालाव्यवायेनैव वीतिहोत्रं त्वेति पूर्वामाघारसमिधमादधाति । आघारसमिदाधानवचनाभावेऽग्न्यभिमन्त्रणोत्तरं ध्रुवास्रुवयोः सादनमेव स्यात्, आघारसमिधोऽपीध्माधान एव विनियोगः स्याच्चैतद्वारयितुं पूर्वामा-घारसमिधमाधायेति । पूर्वामाघारसमिधमाधाय ध्रुवां स्रुवं च सादयतीत्यनेन क्रमे-णाऽऽपस्तम्बोक्तमन्तर्वेदि विधृतीनिधानं निवार्यते । विधृत्योस्तदवस्थतायामिदमपि लिङ्गम् । यदा बर्हिरस्तीर्णं तदा विधृती अपि तूष्णीं सादनीये एव परिधयोऽप्यपरि-हिता एव । यदा तु स्तीर्णं तदा विधृती अपि तदवस्थे एव परिधयः परिहिता एवेति द्रष्टव्यम् । परिधीनां पुनः पुनरादाय प्रयोगे पुनः परिधीनां परिधानं समन्त्रकमेव । पूर्वामाघारसमिधमाधायेत्यत्रत्यस्य पूर्वामिति समिधो विशेषणीभूतस्य शब्दस्य पूर्वां पूर्वदिग्गतामित्यर्थः । तेन स्रौवाघारस्यात्र प्राक्त्वमेव नियतमिति ज्ञापितं भवति । इदं चाऽऽघारसमिच्छब्दबलाल्लभ्यते । आघारसमाप्त्यवधिभूता समिदाघारसमिदिति ह्याघा-रसमिच्छब्दार्थः । तस्याः पूर्वत्वविशेषणेन पूर्वदिग्गतत्वलाभे यदर्था समित्तस्य कर्म-णोऽपि प्राक्त्वं सिध्यत्येव । पूर्वामित्यस्य प्रथमामित्यर्थस्तु न भवति स्रुवाघारसंबन्धादेव तल्लाभे प्रथमत्वविधानस्य व्यर्थत्वापत्तेः । अत एव पूर्वाघारसमिधमाधायेत्येवमपि नोक्तम् । उत्तराघारसमिन्निवृत्तिस्तु स्रुच्याघाराभावादेव । आघारवचनमूर्ध्वतयाऽभ्याधा-नार्थम् । समिद्वचनं पञ्चदशेध्मकाष्ठसजातीयत्वव्यावृत्त्यर्थम् । तेन द्विप्रादेशपरिमित-त्वाद्यत्र न भवति । ध्रुवां स्रुवं च सादयति तत्तन्मन्त्रेण । चकारादाज्यस्थालीमपि सादयति । एता असदन्निति बहुवचनान्ततैच्छब्दवन्तं मन्त्रमेषाऽसददित्येकवचनान्तैत-च्छब्दवन्तं करोतीत्यर्थः । ता विष्णो इत्यत्रापि तां विष्णो इत्येकवचनान्तः प्रयोगः कर्तव्यः । या एताः स्रुचः सुकृतस्य लोकेऽसदंस्ता विष्णो पाहीत्येकार्थकत्वेनैकत्रोहे प्रदर्शितेऽपरत्र तस्य दर्शितप्रायत्वात् । विष्णूनि स्थेत्यस्य स्थाने विष्ण्वसि वैष्णवं धाम प्राजापत्यमित्येकवचनान्तप्रयोगविशिष्टनाऽऽज्यं स्रुगतमभिमन्त्रयत इत्यर्थः । बहुवचनस्य पूजार्थत्वं स्वीकृत्य बहुवचनान्तप्रयोगविशिष्टस्यैव मन्त्रस्य विनियोगं वार-यितुमुभयत्रोहप्रदर्शनम् । सस्रुवामाज्यस्थालीमित्यादिकं तदर्थान्निवर्तते । अत एव

ल्यप्प्रत्ययो नोपात्तः । अत्रायं यज्ञः० ममाग्ने वर्चो०मापरादाः पृथिवी होता० एतैरा-सन्नमाज्यं यजमानोऽभिमृशति ।

वेदं निधाय सामिधेनीभ्यः संप्रेष्यति
नवधेध्मं प्रतिविभज्य सर्वमिध्ममादधाति ।

वेदं निधाय सामिधेनीभ्यः संप्रेष्यतीतिक्रमानुवादो वेद्यन्तपरिस्तरणनिवृत्त्यर्थः । होतृषदनकल्पनं तु होत्रैव स्वार्थं कल्पनीयम् । अथवाऽनुवादस्वरसादत्र नैव कल्पनीयं किं तु होतुरुपवेशनकाल एव कल्पनीयमध्वर्युणैव । वेदं निधाय नवधेध्मं प्रतिविभज्य सामिधेनीभ्यः संप्रेष्यतीत्यन्वयः । तत्रापि सामिधेनीभ्य इत्यस्योभयत्रान्वयः सामिधेनीभ्यो नवधेध्मं प्रतिविभज्य सामिधेनीभ्यः संप्रेष्यतीति । सामिधेनीभ्य इत्युभयत्रापि तादर्थ्य एव चतुर्थी । तेन सामिधेन्यर्थं प्रतिविभज्य सामिधेन्यर्थं संप्रेष्यतीत्यर्थो भवति । होतारमिति शेषः । सामिधेनीप्रैषात्पूर्वं विभागस्त्वदृष्टार्थः । सामिधेन्यर्थं संप्रैषोऽग्नये समिध्यमानायानुब्रूहीति । नवधेध्मं प्रतिविभज्येत्यनेन सामिधेन्योऽत्र नवैवेति गम्यते । ताश्चाग्रे प्रदर्शयिष्यन्ते । सामिधेनीभ्यः प्रतिविभज्येत्यत्र प्रतीतिवचनात्समो विभागः । तत्र समत्वं विभाग एकैककाष्ठात्मकत्वमेव । अन्यस्यासंभवात् । एवं च नवसु सामिधेनीप्रणवेषु नव काष्ठानि प्रक्षिपति । अवशिष्टानि[1] षट्काष्ठानि नवमकाष्ठप्रक्षेपेण सहैवेन्धनार्थत्वेनैव प्रक्षिपति न तु सामिधेनीसंबन्धित्वेन प्रक्षिपति । तत्र द्वे समिधाविन्धनभावनयैव प्रक्षिपति न तु सामिधेनीसंबन्धिभावनयेति तात्पर्यार्थः । अयमर्थः पुनरिध्मशब्दोपादानाल्लभ्यते । अन्यथा तस्य वैयर्थ्यापत्तेः । एतेन षट्सु प्रणवेषु द्वे द्वे काष्ठे प्रक्षेपणीये परिधानीयायां त्रीणि सह प्रक्षिपति, अथवा तृतीयषष्ठनवमेषु प्रणवेष्वेकैकं प्रक्षिपति, इतरेषु षट्सु द्वे द्वे इति केषांचित्कल्पनं निरस्तम् । प्रकृतिवद्याजमानम् । नास्ति देवाः पितरः । अत्र हौत्रे विशेषमाहाऽऽपस्तम्बः—तिस्र ऋचस्त्रिरनूक्ता भवन्ति नव वा पराचीरिति । तिस्र आद्या ऋचः प्राकृतीः, आश्वलायनोक्ता वा । पराचीरनावृत्ताः प्राकृतीरेवेति । याजुषहौत्रसत्त्व आपस्तम्बोक्तमाश्वलायनोक्तं वा ग्राह्यमिति ज्ञेयम् ।

ओढासु देवतास्वग्निमुपवाज्य स्रुवाघारमाघार्याग्नीत्परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढीति संप्रेष्यति संमृष्टे प्रवरं प्रवृणीते यथा महापितृयज्ञे सीद होतरित्युक्त्वा ॥१२॥ ध्रुवाया अष्टौ जुह्वां गृह्णाति चतुरुपभृति ।

ओढासु आवाहितासु होत्रा देवतासु अग्निमुपवाज्य वेदेनाऽऽहवनीयमग्निं त्रिरु-

---

१ क. °नि न° ।

पवाज्य । इदमुपवाजनमदृष्टार्थम् । ओढ़ासु देवतासूदकमुपवाज्येत्यवभृथ उदकोपवाजनदर्शनात् । स्रुवेण ध्रुवाया आज्यमादाय वेदेनोपयम्य प्रजापतये मनवे स्वाहेति प्राञ्चं स्रौवमाघारमाघारयति स्रौवमाघारमाघार्य संमार्गाय संप्रेष्यति । संमृड्ढि प्रवरं प्रवृणीत इत्येतावतैव संमार्गवत्तदर्थस्य प्रैषस्यापि प्राप्तौ प्रैषपाठ उत्तरत्र संमृड्ढि इत्येकवचनेनाग्नेरेव संमार्गेऽवगतेऽग्निमग्नीत्रिः संमृड्ढीत्येवं प्रैषः स्यात्स मा भूदित्येतदर्थम् । नन्वेवं संमृड्ढि इत्येकवचनं विरुध्येतेति चेन्न । तस्याग्नेरेव संमार्गो न परिधीनामितिपक्षान्तरज्ञापनार्थत्वेन विरोधाभावात् । एकवचनस्य जात्यभिप्रायकत्वकल्पना प्रैषपाठस्य व्यर्थत्वापत्तेरेव निरस्ता । एवं च प्रैषपाठः परिधीनामपि संमार्गं बोधयितुं, संमृड्ढि इत्येकवचनमग्नेरेव संमार्गो न परिधीनामिति बोधयितुमित्येवं पक्षद्वयं सिद्धं भवति । परिधीनां संमार्गाभावपक्षेऽग्निमग्नीत्रिः संमृड्ढीति प्रैषः श्रुतौ स्रुवेणाऽऽघारमाघार्य तिस्रः पराचीराहुतीर्हुत्वेत्यनुक्रमणात्संमार्गप्रवरणाविधान एतयोर्निवृत्तिः स्यात्सा मा भूदित्येतदर्थमुभयोर्विधानम् । स्रुवाघारो ध्रुवाप्यायनान्तः । प्रवरं प्रवृणीते यथा महापितृयज्ञ इत्येकं सूत्रम् । यथा महापितृयज्ञे सीद होतरित्येतावान्प्रवर इत्यत्रत्येनैतावच्छब्देन यथाऽऽर्षेयहोतृवरणनिवृत्तिः क्रियते तद्वदत्रापीत्यर्थः । सीद होतरित्युक्त्वेति पुनरनुवादो ध्रुवाया अष्टौ जुह्वां गृह्णातीत्यनेन कालाव्यवधानार्थः । ध्रुवाया इत्यनन्तरमाज्यमिति शेषः । ध्रुवासंबन्ध्याज्यमष्टौ, अष्टवारं जुह्वां गृह्णाति उपभृति चतुः, चतुर्वारं गृह्णाति । जुह्वां ग्रहणेष्वेवाऽऽप्यायनं नोपभृति ग्रहणेषु । ध्रुवायां नावशेषयेत् । पञ्चावत्तिनस्तु दशकृत्वः पञ्चकृत्वश्च यथाक्रमं स्रुचोर्गृह्णाति ।

सादयति स्रुचौ होताऽऽदापयति ।

याजुषहौत्रसत्त्वे याजुषरीत्यैव । आदापयतीति पदच्छेदः । णिजन्तमिदम् । अध्वर्युमिति शेषः । सीद होतरित्यनेन प्रवरवाक्येने(णे)दमपि ज्ञायते होतुरेतावत्पर्यन्तं तिष्ठत्त्वेव तत्र तिष्ठत एवोपवेशनमिति । स्रुचाविति देहलीदीपन्यायेनोभयत्रान्वेति । अत्र जुहूपभृतोः स्रुचोः सादनं तूष्णीमेव ध्रुवासादनोत्तरं तयोः समन्त्रकासादनस्यानुचितत्वात् ।

घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युच्यमाने जुहूपभृतावादाय सकृदतिक्रान्तस्तिस्रो देवता यजति ।

दक्षिणेति शेषः । तथैवाऽऽपस्तम्बोऽपि पठितवान् । उच्यमान इति वर्तमाननिर्देशादेतद्वाक्योच्चारणसमकालं स्रुचोरादानम् । स्रुचौ होताऽऽदापयतीत्येतावतैव प्रकृतिप्राप्ते घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युच्यमाने जुहूपभृतोरादाने सिद्धेऽत्र वचनं केवले घृतवतीशब्द एवाऽऽदानमत्राप्यापस्तम्बेनोक्तं तद्वारयितुम् । एतेन प्रयाजार्थमेव स्रुगादापन-

मित्याश्वलायनादीनां मतमपि निरस्तं भवति । प्रतियागमतिक्रमणं वारयितुं सकृदिति- वचनम् । स्पष्टोऽर्थः । अत्र पञ्चहोतारं वदेद्यजमानः ।

उत्तरतः प्रथमायाः पुरोनुवाक्याः२ संप्रेष्यति दक्षिणत इतरयोः ।

सकृदतिक्रमणं यागत्रयार्थं विहितं तत्र प्रथमयागक्रियासंबन्धिपुरोनुवाक्यासंप्रैष- स्याप्यतिक्रमणोत्तरमेव कर्तव्यताप्रसक्ताविदं वचनमुत्तरतः प्रथमायाः पुरोनुवाक्याः२ संप्रे- ष्यतीति । सकृदतिक्रान्त इति वचनात्सर्वयागोत्तरं प्रत्याक्रमणविधानाच्च सर्वयागार्थ- मतिक्रान्तस्य मध्ये प्रत्याक्रमणासंभवेनार्थादुत्तरयागद्वयार्थपुरोनुवाक्यासंप्रैषयोर्दक्षिणतः सिद्धाविदं वचनं सर्वयागार्थमतिक्रान्तस्य मध्ये प्रत्याक्रमणासंभवेऽपि अग्रेणाऽऽहवनीयं पुरोनुवाक्यासंप्रैषार्थमुत्तरत आगत्य प्रैषं दत्त्वाऽग्रेणाऽऽहवनीयं दक्षिणतो गत्वाऽऽश्राव- णादि अग्रेणाऽऽहवनीयं पुरोनुवाक्यासंप्रैषार्थमुत्तरत आगतस्यापि प्रत्याक्रमणं तत्र भवति । येन मार्गेण गतस्य तेनैव मार्गेणाऽऽगमने प्रत्याक्रमणव्यवहारात् । क्रमु पादविक्षेप इति धातोर्वेदिमुल्लङ्घ्य पादविक्षेप एव शक्तेश्च । नह्यग्रेणाऽऽह- वनीयमुत्तरतो गमनमाहवनीयाग्निमप्रदेशोल्लङ्घनविशिष्टपादविक्षेपरूपं किंतु शुद्धं गमनमेव । अतः सकृदतिक्रमणविरोधाभावादुत्तरतो दक्षिणतो वेत्यनियमः स्यात्तं वारयितुं दक्षिणत इतरयोरिति । उत्तरतो वेदेरुत्तरतः । प्रथमाया यागक्रि- याया देवताया इति वा । पुरोऽनुवक्ति देवताह्वानार्थं होतेति पुरोनुवाक्या । ह्वयति वै पुरोनुवाक्ययेति श्रुतेः । पुरो देवतायै यागं प्रवक्तीति वा पुरोनुवाक्या । प्रैवैनं पुरोनुवाक्ययाऽऽहेति श्रुतेः । प्रथमायाः पुरोनुवाक्यां प्रथमायाः पुरोनुवाक्याव- क्तारमित्यर्थः । अथवा प्रथमायाः पुरोनुवाक्यामित्यनन्तरं वक्तुं होतारमित्यध्याहारः । चतुर्थ्यर्थे वा द्वितीयाऽत्र द्रष्टव्या ।

यज्जुह्वामाज्यं तस्यार्धेनाग्निं यजत्यर्धेन सोमम् ।

स्पष्टम् ।

यदुपभृति तज्जुह्वामानीय तेन विष्णुम् ।

तज्जुह्वामानीयेति वचनं सर्वानयनार्थं बिन्दुमात्रमपि नावशेषयेदित्येतदर्थम् । यज्जुह्वामानीतं तेनेत्यर्थः । तेनेतिवचनं पूर्वसूत्रादर्धेनेत्यस्यानुवृत्त्याऽर्धेन विष्णोर्या- गोऽर्धेनोपसदाहुतिरिति शङ्का स्यात्सा मा भूत्किंतु औपभृतेन जुह्वामानीतेन सर्वेणैव विष्णोर्यागः स्यादित्येतदर्थम् । उपांशुयाजविकारत्वात्सर्वेषां दब्धिरसीत्यनुमन्त्रणम् । प्रत्यक्संस्थमेतद्यागत्रयम् । तिस्रः पराचीराहुतीर्हुत्वेति श्रुतेः । आहुतीनां होम इति सूत्रं बौधायनस्य प्रतीचीरेवैता आहुतीः संस्थापयेदिति शालीकिरिति द्वैधात् । पूर्वार्धे मध्ये पश्चादिति कल्पसूत्रे स्पष्टोक्तेश्च । संस्थापनं समापनम् । श्रुतौ द्वैधे चाऽऽहुति-

शब्देन वषट्कारकरणकक्रिया ज्ञेया । याजुषहौत्रसत्त्वेऽपि आश्वलायनीय एव पाठो याज्यानुवाक्यानाम् ।

मत्याक्रम्य या ते अग्नेऽयाशया तनूरिति स्रुवेणोपसदं जुहोति ।

उपसदमित्याहुतिसमाख्यातामाज्यस्थाल्याज्येन जुहोति या ते अग्नेऽयाशया तनूरित्यत्र तनूशब्दप्रदर्शितानुषङ्गबोधितसानुषङ्गरजाशयाहराशयात्मकं मन्त्रद्वयं मिलित्वा मन्त्रत्रयं भवति । तथा च या ते अग्नेऽयाशयेतिप्रतीकसूचितमन्त्रैरेकैकेनैकैकामुपसदं जुहोतीत्यर्थः । स्रुवग्रहणं जुहूव्यावृत्त्यर्थम् । अपावधीᳪं स्वाहेत्यन्तो मन्त्रः । अत्र पठित एव स्वाहाकारः । तनूरित्यनुषङ्गप्रदर्शनार्थं जैमिनिनाऽपि द्वितीयाध्याये प्रथमे पादेऽनुषङ्गो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वादित्यनेन सूत्रेणानुषङ्ग उक्तः सूत्रार्थस्तु वाक्यस्य परिसमाप्तिः पर्यवसानं येन सोऽनुषङ्गो भवति । सर्वेषु शेषिषु तुल्ययोगित्वादन्वयकारणसाम्यादिति । इष्टिसंबन्धित्वादैष्टिकमेवाऽऽज्यम् । अपूर्वाज्यमिति तु भाष्यकारः । तत्र मूलं चिन्त्यम् । प्रतिपत्तिकर्माणि कृताकृतानीत्युक्तमेव । अन्यत्तन्त्रं सर्वं निवर्तत एव । अननुक्रमणात् । ब्राह्मणे च तिस्र एव सामिधेनीरनूच्येत्यादिना यावदुक्तेन परिसंख्यानाच्च । अत एवाङ्गलोपनिमित्तकप्रायश्चित्तान्यप्यन्तरा पतितानि निवर्तन्ते । तथाच बौधायनः—कर्मान्ते संत्वरमाणा इवोपसद्भिः प्रचरेयुर्नाकृतमाद्रियेरन्निति । अनेन द्रुतैवात्र वृत्तिर्भवति नतु मध्यमेति प्रदर्शितं भवति । प्रधानसंबन्धिप्रायश्चित्तं तु भवत्येव । तत्संबन्ध्याहुतिस्तु आज्यस्थाल्याज्येनैव ।

मदन्तीभिः पाणीन्प्रक्षालयन्ते ब्रह्मा राजानं विस्रᳪंसयत्याप्याययन्ति निह्नुवते च यथा पुरस्ताद्दक्षिणोत्तानैः पूर्वाह्णे सव्योत्तानैरपराह्णे ।

पाणिप्रक्षालनं विस्रंसनमाप्यायनं निह्नवनं च यथा पुरस्तादित्येवं लाघवेन वक्तव्ये पाणिप्रक्षालनविस्रंसनयोः पुनर्विधानं तानूनप्त्रोत्तरकालिकं पाणिप्रक्षालनं विस्रंसने ब्रह्मकर्तृकत्वं चानित्यमितिज्ञापनार्थम् । अथवा मदन्तीभिः पाणीन्प्रक्षालयन्त इति पुनर्विधानमत्र मदन्त्यो भिन्ना एव नाऽऽतिथ्यायां याः कृतास्ता एवेति ज्ञापनार्थम् । ब्रह्मा राजानं विस्रᳪंसयतीत्येतद्वचनप्रयोजनं त्वनन्तरोक्तमेवेति । मदन्त्यस्तप्ता आपः । ब्रह्मत्वविधेरवसरख्यापनार्थमत्र वचनम् । यथा पुरस्तादितिवचनं तत्तन्मन्त्रप्राप्त्यर्थम् । दक्षिणा उत्ताना येषां सव्यानां तैः सव्या उत्ताना येषां दक्षिणानां तैः । अग्नीन्मदन्त्याऽऽपा३ इत्याद्यत्रापि । तथाचाऽऽपस्तम्बः—अग्नीन्मदन्त्याऽऽपा३ इत्येतदाद्यानिह्नवात्कृत्वेति ।

अग्नीदेवपत्नीर्व्याचक्ष्व सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति संप्रेष्यति ।

स्पष्टम् ।

अग्नीद्देवपत्नीर्व्याचक्ष्वेतिप्रैषोत्तरं देवपत्नीव्याख्यानं कर्तव्यं तत्कथमित्याकाङ्क्षायामाह—

वाग्वायोः पत्नीत्यपरेण गार्हपत्यमुपविश्याऽऽ-
ग्नीध्रो देवपत्नीर्व्याचष्टे सेनेन्द्रस्य धेनेति वा ।

अपरेण गार्हपत्यं गार्हपत्यस्य समीपेऽदूर एवोपविश्याऽऽसित्वा देवपत्नीर्देवपत्नीप्रतिपादकान्मन्त्रान्व्याचष्टे । ते च सेनेन्द्रस्येत्यनुवाकोपात्ताः । व्याख्यानं वाक्यशः पाठः । धेनेति वेत्येतदनन्तरं ब्रूयादित्येव शेषः । तथा च संततं ब्रूयाद्वेत्यर्थो भवति । व्याचष्ट इत्यस्यानुवृत्तौ तु तस्य संततपाठपरतया पक्षद्वयविरोधापत्तेः । अथ वा व्याचष्ट इत्यस्यैव संततपाठपरता लक्षणयाऽङ्गीकर्तव्या । अध्याहारापेक्षया लक्षणाया लघुत्वात् । यत्र व्याचष्ट इति उक्तिस्तत्र वाक्यशः पाठ एव । यत्र च सूत्रकृता वाक्यशः पठितस्य मन्त्रस्य सांतत्येन पाठः कृतस्तत्र सांतत्यमेव । अन्यत्र तु अनियम इत्युपोद्घातोक्तप्रकारेणात्रापि विकल्पसिद्धाविदं वचनमिदं ज्ञापयति यत्र कृत्स्नानामनुवाकोपात्तानां मन्त्राणामेकत्र विनियोगस्तत्रानियमश्चेदत्रैव नान्यत्र, पत्र मानानुवाकादिमन्त्रोपात्तविनियोगे तु वाक्यश एव पाठो नियत इति । सेनेन्द्रस्य धेना बृहस्पतेः पथ्या पूष्णो वाग्वायोर्दीक्षा सोमस्य पृथिव्यग्नेर्वसूनां गायत्री रुद्राणां त्रिष्टुगादित्यानां जगती विष्णोरनुष्टुग्वरुणस्य विराड्यज्ञस्य पङ्क्तिः प्रजापतेरनुमतिर्मित्रस्य श्रद्धा सवितुः प्रसूतिः सूर्यस्य मरीचिश्चन्द्रमसो रोहिण्यृषीणामरुन्धती पर्जन्यस्य विद्युचतस्रो दिशश्चतस्रोऽवान्तरदिशा अहश्च रात्रिश्च कृषिश्च वृष्टिश्च त्विषिश्चापचितिश्चाऽऽपश्चौषधयश्चोर्क्च सूनृता च देवानां पत्नय इत्येवं सांतत्येन वा पाठः ।

सुब्रह्मण्यस्य कर्माऽऽह—

सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति ।

सुब्रह्मण्योमितिनिगदाध्यूढसामप्रवक्ता सुब्रह्मण्यः स सुब्रह्मण्यामाह्वयति सुब्रह्मण्याख्यनिगदाध्यूढसाम्नेन्द्रमाह्वयतीत्यर्थः । सुब्रह्मण्यादिशब्दैरिन्द्रमामन्त्रयते सुत्यार्थमिति यावत् । इन्द्राह्वानार्थं सुब्रह्मण्याख्यनिगदाध्यूढं साम ब्रूयादित्यर्थो वा । सुब्रह्मण्येति सुब्रह्मण्योमित्येतन्निगदोत्पन्नसामसंज्ञेयम् । स्त्रीलिङ्गनिर्देशस्तु सुब्रह्मण्याख्यसामरूपवाग्विशेषणत्वेन । वाग्वै सुब्रह्मण्येति बह्वृचश्रुतेः । सुब्रह्मण्याह्वानदेशमाहाऽऽपस्तम्बः— उत्करे सुब्रह्मण्यामाह्वयति पूर्ववेदेनां यजमानोऽनुमन्त्रयत इति । पूर्वद्वारस्य दक्षिणद्वार्बाहोः पुरस्तात्तिष्ठन्निति लाट्यायनद्राह्यायणौ । तत्कर्म तदीयसूत्रतो ज्ञेयम् ।

अनूपसदमेतानि क्रियन्ते ।

उपसदमुपसदमनु इत्यनूपसदं प्रत्युपसदमेतानि कर्माणि कर्तव्यानीत्यर्थः ।

एवं त्रिरात्रꣳ सायंप्रातः प्रवर्ग्योपसद्भ्यां प्रचरति ।

एतावता सामान्यत उपसत्प्रयोगः कथितः। अधुना प्रवर्ग्योपसत्संख्या तद्दिवससंख्या चोच्यते—तिसृणां रात्रीणां समाहारस्त्रिरात्रम् । अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेरिति सूत्रे चकारेण तत्पुरुषस्याङ्गुलेः संख्याव्ययादेरिति पूर्वसूत्रस्थसंख्यानुवृत्तिलाभेन संख्योत्तरभूतरात्रिशब्दादच्प्रत्ययः। द्विगुरेकवचनमित्येकवद्भावः । द्विग्वर्थे समाहारे स नपुंसकमिति नपुंसकत्वम् । द्विगुस्तु संख्यापूर्वः समासः संख्यापूर्वो द्विगुरिति सूत्रात्। अत्र रात्रिशब्दो दिवसपरः सायंप्रातःशब्दसमभिव्याहारेण । नन्वेवं त्र्यहमित्येवं वक्तव्यं लाघवात् । ऋजुमार्गेण सिध्यतो वक्रणायोगाच्च, तथा च त्रिरात्रमित्येवं वचनं किमर्थमिति चेत्सत्यम् । उपसदिष्टे रात्रौ क्रियायामपि दोषाभावं ज्ञापयितुं तथोक्तेरावश्यकत्वेन वैयर्थ्याभावात् । दोषस्तु दिवाकीर्त्यो वषट्कार इत्याश्वलायनसूत्रसिद्धः । प्रवर्ग्यस्य तु अनारब्धत्वेऽपि रात्रौ प्रचार इत्ययमर्थस्तु प्रवर्ग्यसूत्रे वक्ष्यमाणेन ज्ञापकेनैव सेत्स्यति । योऽयमुक्तः प्रयोगः स उपस्थितत्वात्प्रातःकालसंबन्धी भवति । स एवेतरेष्वपि प्रयोगेषु भवति । तत्र सायंशब्दस्योक्तप्रातःकालसंबन्धिप्रयोगोत्तरं तस्यैवोपस्थितेः प्रथममुपादानम् । प्रथमेऽहनि सायं द्वितीयेऽहनि प्रातः सायं च तृतीयेऽहनि प्रातः सायं च । एवमुक्तेन प्रकारेण प्रवर्ग्यश्चोपसच्च प्रवर्ग्योपसदौ ताभ्यां प्रचरतीत्यर्थः । अध्वर्योर्मुख्यत्वात्तमभिप्रेत्यैकवचनम् ।

सुपूर्वाह्णे पौर्वाह्णिकीभ्याꣳ स्वपराह्ण आपराह्णिकीभ्याम् ।

प्रवर्ग्योपसद्भ्यां प्रचरतीत्यनुषज्यते । सुष्ठु पूर्वाह्णः सुपूर्वाह्णः । सुष्ठु अपराह्णः स्वपराह्णः । सुपूर्वाह्णशब्देन पूर्वाह्णपूर्वार्धात्मकः कालो गृह्यते । स्वपराह्णशब्देनापराह्णोत्तरार्धात्मकः कालो गृह्यते । तत्राभ्युदयोत्तरं घटिकाद्वयमस्तात्पूर्वं घटिकाद्वयं त्याज्यम् । अत्र द्वेधा त्रेधा वा विभागः । पूर्वाह्णे भवे पौर्वाह्णिक्यौ । आपराह्णे भवे आपराह्णिक्यौ ।

उपसदाहुतिव्यवस्थामाह—

या ते अग्नेऽयाशया तनूरिति प्रथमेऽहनि सायंप्रातः स्रुवप्रदानां जुहोति ।

प्रातश्च सायं चेति सायंप्रातरित्येवमेव विग्रहः । धर्मादिष्वनियम इति वार्तिकादयं साधुः । धर्मादिराकृतिगणः । उभयकालवाचिशब्दयोः सह संप्रयोगे सायंशब्दस्यैव बाहुल्येन प्रथमं प्रयोगः । तत्राग्निहोत्रहोमादौ यथास्थितमेव । तत्र सायमारभ्यैवोपक्रमो दृश्यते । वैश्वदेवे तु अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनेन सायंप्रातरित्युक्तेऽपि प्रमाणान्तरानुरोधेन प्रातरारभ्यैवोपक्रमो दृश्यते । प्रकृतेऽपि

१ ख. वक्रेणा° ।

प्रातरारभ्यैवोपक्रमात्तदनुरोधेनैव प्रातःसायं प्रवर्ग्योपसद्भ्यां प्रचरतीत्येवं वक्तव्ये सामान्यतो निर्देशो व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति परिभाषां ज्ञापयति। तेनाग्निकार्य उपस्थितिरूपव्याख्यानात्सायमुपक्रमस्यैव विशेषप्रतिपत्तिः। वैश्वदेवे दिवाचारिभ्य इति दिवा नक्तंचारिभ्य इति नक्तमिति। दिवानक्तं बलिमिच्छन्त इति प्रातःसायंपरयोर्दिवानक्तंपदयोः क्रमदर्शनरूपव्याख्यानात्प्रातरुपक्रमस्यैव विशेषप्रतिपत्तिः। अग्निहोत्रेऽग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेतिमन्त्रक्रमदर्शनरूपव्याख्यानात्सायमुपक्रमस्यैव विशेषप्रतिपत्तिः। प्रकृते *यद्यप्युभयथाऽपि क्रमो दृश्यते तत्राग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेत्येवं मन्त्रक्रमः, स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातः सꣳसादयति स्वाहा त्वा नक्षत्रेभ्य इति सायमित्येव मन्त्रविशेषविनियोगक्रमः। सुपूर्वाह्णे पौर्वाह्णिकीभ्याꣳ स्वपराह्ण आपराह्णिकीभ्यामित्येवं कालविधिक्रमः। तत्र सायमुपक्रमसाधकलिङ्गापेक्षया प्रातरुपक्रमसाधकलिङ्गाधिक्यरूपव्याख्यानाद्विशेषप्रतिपत्तिः प्रातरुपक्रमस्यैवेति परिभाषाप्रयोजनम्। तेन प्रकृते बहुदर्शनानुरोधेन सायंप्रातरिति पठितेऽपि प्रातःसायमित्येव क्रमः सिध्यति। तनूरित्यनुषङ्गप्रदर्शनार्थम्। उपसदाहुतिविधायकेन पूर्वसूत्रेण व्यवस्थाया असिद्धत्वात्तदर्थमिदं सूत्रम्। स्रुवेणैव प्रदानं यस्याः सा स्रुवप्रदाना तां स्रुवप्रदानां स्त्रीलिङ्गद्वितीयैकवचनान्तमिदं पदम्। उपसदाहुतेरियं संज्ञा, योगरूढं पदम्। स्रुवाहुतिं जुहोतीत्येव प्रसिद्धत्वाद्वक्तव्ये स्रुवप्रदानामित्येवं वचनं(ने) कश्चिदत्र विशेषोऽस्ति। स चेषुप्रक्षेपणक्रियानुकरणरूपः। तथा च सूत्रान्तरम्—इषुप्रक्षेपणमिव या ते अग्नेऽयाशया तनूरिति स्रुवेणोपसदाहुतिं जुहोतीति। प्रथमेऽहनि प्रथमोपसद्दिवसे या ते अग्नेऽयाशया तनूरिति मन्त्रेण प्रातःसायंकालिकप्रथमोपसत्प्रयोगयोः स्रुवप्रदानां जुहोतीत्यर्थः।

या ते अग्ने रजाशयेति द्वितीये।

अहनि सायंप्रातः स्रुवप्रदानां जुहोतीत्यनुवर्तते। द्वितीयेऽहनि द्वितीयोपसद्दिवसे या ते अग्ने रजाशया तनूरितिमन्त्रेण प्रातःसायंकालिकद्वितीयोपसत्प्रयोगयोः स्रुवप्रदानां जुहोतीत्यर्थः। पूर्वमन्त्रे तनूरित्यनुषङ्गप्रदर्शनादत्राप्यनुषङ्गोऽर्थाद्दर्शित एव भवति।

या ते अग्ने हराशयेति तृतीये।

अत्राप्यहनीत्यादिकमनुवर्तते। तृतीयेऽहनि तृतीयोपसद्दिवसे या ते अग्ने हराशया तनूरिति मन्त्रेण प्रातःसायंकालिकतृतीयोपसत्प्रयोगयोः स्रुवप्रदानां जुहोतीत्यर्थः। अस्मिन्मन्त्रेऽनुषङ्गः पठित एव श्रुतौ।

---

* यद्यपीत्यसंबद्धम्।

यदि पुरो युध्येयुरयः प्रथमायामवधाय जुहुयात् ।

यदि क्षत्रियस्य यजमानस्यामित्राणां पुरः पुराणि स्वेन सह युध्येयुः पुराणि शत्रवः कामयेयुर्वा तदाऽयः कालायसं प्रथमोपसदाहुत्यर्थाज्येऽवधाय प्रक्षिप्य या ते अग्नेऽयाशया तनूरित्याहुतिं जुहुयात् ।

रजतꣳ हिरण्यं मध्यमायाम् ।

* मध्यमायां मध्यमायां मध्यमोपसदाहुत्यर्थाज्ये रजतात्मकं हिरण्यमवधाय या ते अग्ने रजाशया तनूरित्याहुतिं जुहुयात् । हिरण्यपदवाच्यत्वं रजतेऽप्यस्तीति प्रदर्शयितुं हिरण्यवचनम् । सर्वꣳ हिरण्यꣳ रजतं तद्दुर्वर्णꣳ हिरण्यमभवदित्यादीनि लिङ्गान्यपि सन्ति । दुर्वर्णशब्दो रजतवाची । हिरण्यशब्दस्य हेमरजतोभयवाचित्वात्किंजातीयमत्र हिरण्यं ग्राह्यमिति शङ्का स्यात्तां दूरीकर्तुं रजतवचनम् ।

हरितमुत्तमायाम् ।

उत्तमायामुत्तमोपसदाहुत्यर्थाज्ये हरितमवधाय या ते अग्ने हराशया तनूरित्याहुतिं जुहुयात् । हरितशब्दः सुवर्णवाच्येव । सर्वꣳ सुवर्णꣳ हरितमिति मन्त्रलिङ्गात्, तेभ्यो हरिते पात्रे सोममदुहदिति लिङ्गाच्च ।

यदि सङ्ग्रामं युध्येयुरित्येकेषाम् ।

यदि क्षत्रियस्य यजमानस्य शत्रवः सङ्ग्रामं युध्येयुः सङ्ग्रामं कुर्युस्तदाऽयं विधिरित्येकेषामाचार्याणां मतमित्यर्थः ।

अयज्ञसंयुक्तः कल्पः ॥ १३ ॥

यद्युपायान्तरं नैव विद्यते तदा यज्ञसंयुक्तत्वम् । उपायान्तरसत्त्वे त्वेतस्य यज्ञसंयुक्तत्वं नैव भवतीत्यर्थः । अयमर्थः समुपसर्गबलाल्लभ्यते ।

मध्यमाभ्यां पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्याग्रेण प्राग्वꣳशं त्रीन्प्राचः प्रक्रमान्प्रक्रम्य शङ्कुं निहन्ति स पश्चार्धे वेदेः ।

प्रचर्येति ल्यपा वेदिविमानाव्यवहितोत्तरत्वं बोध्यते । तेन व्रतप्रदानमुदुम्बरशाखाभिश्छन्नां परिवासयतीत्येतदनन्तरमेव । प्राग्वंशस्य पूर्वप्रान्तभवोदक्सूत्रपृष्ठ्यासूत्रयोर्यः संपातस्तत्रस्थाच्छङ्कोस्त्रिषु प्रक्रमेष्वतीतेषु पृष्ठ्यासूत्रानुगुण्येन शङ्कुं निहन्ति, स शङ्कुर्वेदेः पश्चार्धे पश्चिमप्रान्तभवोदक्सूत्रपृष्ठ्यासूत्रयोर्यः संपातस्तत्र देयः, स मध्यमो भवति । अत्रैव वेदकरणम् । वेदिविमानात्पूर्वमेव पशौ दृष्टत्वात् ।

विमिमे त्वा पयस्वतीं देवानां धेनुꣳ
सुदुघामनपस्फुरन्तीमिन्द्रः सोमं पिबतु

---

* इदं पदमधिकम् ।

क्षेमो अस्तु न इति षट्त्रिंशत्प्राचः प्रक्रमान्प्रक्रम्य शङ्कुं निहन्ति स पूर्वार्धे ।

वेदेरित्यनुवर्तते । प्रथमनिखाताच्छङ्कोरारभ्य षट्त्रिंशत्प्राचः प्राक्संस्थान्प्रक्रमान्प्रक्रम्य वेदेः पूर्वार्धे पूर्वप्रान्तभवोदक्सूत्रप्राक्सूत्रयोर्यः संपातस्तत्र शङ्कुं निहन्ति स वेदेः पूर्वार्धे मध्यमो भवति । सकृदेव मन्त्रः ।

पश्चार्ध्याच्छङ्कोः पञ्चदश दक्षिणतः पञ्चदशोत्तरतः प्रक्रम्य शङ्कू निहन्ति ते श्रोणी पूर्वार्ध्याच्छङ्कोर्द्वादश दक्षिणतो द्वादशोत्तरतः प्रक्रम्य शङ्कू निहन्ति तावंसौ ।

प्रक्रम्येत्यतः पूर्वं प्रक्रमानिति पूर्वसूत्रादनुवर्तते । शुल्बसूत्रेणैव माने सिद्धेऽत्र वचनं श्रोण्यंसमानेष्वपि मन्त्रप्राप्त्यर्थम् । एतस्य सूत्रस्य स्वतन्त्रमानविधानार्थत्वे शुल्बसूत्रोक्तप्रकारं विनाऽऽनेवासंभवेनासंगत्यापत्तेः । तेन पञ्चदश दक्षिणत इत्यत्राऽऽदौ मन्त्रेणैकं प्रक्रमं प्रक्रम्य तूष्णीमितरान्प्रक्रामति मन्त्रजन्यादृष्टलाभाय । एवं पञ्चदशोत्तरत इत्यत्रापि द्वादश दक्षिणतो द्वादशोत्तरत इत्यत्रापि च । एवं च पृष्ठ्यां श्रोणिद्वयमंसद्वयं मिलित्वा पञ्चवारं मन्त्रावृत्तिः सिद्धा भवति । पश्चार्धे भवः पश्चार्ध्यस्तस्मात् । पूर्वार्धे भवः पूर्वार्ध्यस्तस्मात् । दिगादित्वाद्यत्प्रत्ययः । पश्चार्धात्पूर्वार्धादित्यपपाठ एव । शुल्बसूत्रे त्रिंशत्पदानि प्रक्रमा वा पश्चात्तिरश्ची भवति षट्त्रिंशत्प्राची चतुर्विंशतिः पुरस्तात्तिरश्चीति सौमिक्या वेदेर्विज्ञायत इति । एतस्मात्सूत्राद्वेदिमाने पदान्यपि प्रक्रमैर्विकल्पन्ते । तत्र पदस्यानेकविधत्वमुक्तं शुल्बसूत्रे—पदे युगेऽरत्नावियति शम्यायां च मानार्थेषु याथाकामी शब्दार्थस्य विशयित्वादिति । विशयित्वात् , अनेकविधत्वादित्यर्थः । पदं दशाङ्गुलमिति बौधायनः । दशाङ्गुलं क्षुद्रपदमित्यपि सः । द्वादशाङ्गुलं पदमिति कात्यायनः । एतानि त्रिविधानि पदानि लौकिकपदेन विकल्पन्ते । एतान्येव द्विगुणानि त्रिगुणानि वा प्रक्रमा एतेन[1] प्रक्रममानेनैव सप्तविधाग्निचित्ये सोमे मानम् । पदैर्मानं तु नात्र भवति । तत्राग्निक्षेत्रासंभवात् । एवं सप्तविधेऽग्नौ विंशत्यङ्गुलवृद्धिर्व्याख्याता । साग्निचित्ये तु सर्वेषामेव पदप्रक्रमाणामिच्छया विकल्प इति केचित् । अन्ये पुनरेवं व्यवस्थामिच्छन्ति पदैश्चतुर्विधैर्विंशत्यङ्गुलेन वा प्रक्रमेण मानमग्निचित्ये । एकविधेऽग्नौ विंशत्यङ्गुलेन द्विविधादिषु पञ्चविधपर्यन्तेषु चतुर्विंशत्यङ्गुलेन षड्विधादिषु द्वादशविधपर्यन्तेषु त्रिंशदङ्गुलेन लौकिकेन वा द्विपदेन त्रयोदशादिषु षट्त्रिंशदङ्गुलेनेत्यादिषु सर्वेषामपि पक्षे येऽग्नयः पञ्चचत्वारिंशदङ्गुलेन प्रक्रमेण संभवन्ति तत्राग्न्यनुगुणा वेदेर्वृद्धिः कार्या यूपैकादशिन्यां तस्य प्रदर्शितत्वात् । यथा पञ्चाशद्विधेऽग्नौ षट्पञ्चाशदङ्गुलो दण्डः प्रक्रमस्थानीयः,

---

[1] ख. ग. एतेन ।

एकशतविधेऽशीत्यङ्गुल इत्यादि । तां शौल्बेन विधिना मीत्वा तत्र तत्र शङ्कून्निहन्ति स्पन्द्यावेष्टनार्थम् ।

अक्ष्णया मानेन संपाद्य प्रदक्षिणꣳ स्पन्द्यया पर्यातनोति ।

अक्ष्णया कोणसाधिन्या रज्ज्वा युक्तं मानं तच्छुल्बोक्तप्रकारेणैकरज्जुसाध्यमनेकरज्जुसाध्यं वा तेन मानेन वेदिं संपाद्य स्पन्द्या रज्जुस्तया चतुर्षु कोणेषु निहितेषु शङ्कुषु प्रदक्षिणं सर्वतः पर्यातनोति परिवेष्टयतीत्यर्थः । वेदिक्षेत्रमिति शेषः । अक्ष्णयेत्यव्ययम् । अत्रापि प्रादक्षिण्यवाची न भवति तस्य परिमाषयैव सिद्धेः किंत्वानुकूल्यवाची । अस्मिन्नर्थे प्रमाणं प्राग्दर्शितमेव । तेन वेदिप्रान्तप्रदेशप्रज्ञातत्वानुकूलं यथा भवति तथा दृढं पर्यातनोतीति सिद्धं भवति ।

अन्वातनोति पृष्ठ्याम् ।

यद्यपि वेदिसाधनार्थं पूर्वमेव पृष्ठ्यासूत्रं दत्तमेव तथाऽपि तस्याः प्रयोजनसत्त्वं सूच्यते । तस्या वेदिविमानोत्तरं विनाशे पुनरपि पृष्ठ्यासूत्रं देयमेव तत्प्रयोजनं संततमनुपृष्ठ्यं बर्हिः स्तीर्त्वेति । पृष्ठशब्दो मध्यवाची । पृष्ठे भवा पृष्ठ्या रज्जुः । दिगादित्वाद्यत्प्रत्ययः । अक्ष्णया मानेन संपाद्येत्यनेन विहरणं प्रदर्शितं तत्प्रकाराः शुल्बसूत्रे त्रिकचतुष्कयोः पञ्चिकाऽक्ष्णया रज्जुस्ताभिस्त्रिरभ्यस्ताभिरंसौ चतुरभ्यस्ताभिः श्रोणी इति । त्रिकचतुष्कयोस्तिर्यक्पार्श्वमान्योस्ताभिस्त्रिकचतुष्कपञ्चिकाभिस्त्रिवारमभ्यस्ताभिरुपरि क्षिप्ताभिरंसौ भवतः । चतुर्वारमभ्यस्ताभिः श्रोणी भवतः । यथा त्रिका त्रिरभ्यस्ता द्वादशिका चतुष्का त्रिरभ्यस्ता षोडशिका पञ्चिका त्रिरभ्यस्ता विंशिका । एताभिस्त्रिभिरभ्यस्ताभिर्द्वादशिकया षोडशिकया विंशिकया चांसौ मातव्यौ । एताभिरेव चतुर्भिरभ्यस्ताभिः पञ्चदशिकया विंशिकया पञ्चविंशिकया च श्रोणी मातव्ये । एवं षड्भी रज्जुभिर्विहरणम् । प्रकारान्तरमुक्तं तत्रैव—द्वादशिकपञ्चिकयोस्त्रयोदशिकाऽक्ष्णया रज्जुस्ताभिरंसौ द्विरभ्यस्ताभिः श्रोणी इति । अन्यदपि प्रकारान्तरमुक्तं तत्रैव—पञ्चदशिकाष्टिकयोः सप्तदशिकाऽक्ष्णया रज्जुस्ताभिः श्रोणी द्वादशिकपञ्चत्रिंशिकयोः सप्तत्रिंशिकाऽक्ष्णया रज्जुस्ताभिरंसाविति । अन्यदपि प्रकारान्तरमुक्तं तत्रैव—षट्त्रिंशिकायामष्टादशोपसमस्यापरस्मादन्ताद्द्वादशसु लक्षणं पञ्चदशसु लक्षणं पृष्ठ्यान्तयोरन्तौ नियम्य पञ्चदशिकेन दक्षिणाऽऽयम्य शङ्कुं निहन्त्येवमुत्तरतस्ते श्रोणी विपर्यस्तयांऽसौ पञ्चदशिकेनैवायाम्य द्वादशिके शङ्कुं निहन्त्येवमुत्तरतस्तावंसौ तदेकरज्ज्वोक्तं विहरणमिति । इदमेकरज्ज्वा विहरणम् । यावदायाममित्युक्तस्य मानस्यैवायं प्रपञ्चः । अन्यच्च तत्रैव—एतावन्ति ज्ञेयानि वेदिविहरणानि भवन्तीति । छेदरहितानि एतावन्ति भवन्तीत्यर्थः । अन्यच्च तत्रैव—अष्टाविंशत्योनपदसहस्रं महावेदिरिति । पदग्रहणं प्रक्रमस्याप्युपलक्षणम् । संख्यानोपायोऽपि तत्रैव—दक्षिणस्मादं-

साद्द्वादशसु दक्षिणस्यां श्रोण्यां निपातयेच्छेदं विपर्यस्येतरत उपदध्यात्सा दीर्घचतुरस्रा तथा युक्तां संचक्षीतेति। दक्षिणस्मादंसादारभ्यापरान्त्यपृष्ठ्याया दक्षिणतो द्वादशसु रज्जुं निपातयेत्। दक्षिणतश्छेदं दीर्घत्रिकोणमञ्जसा विपर्यस्योत्तरपार्श्वे उपदध्यात्। सा षट्त्रिंशत्प्राचिका सप्तविंशतिव्यासा दीर्घचतुरश्रा भवति तथा भूतां गणयेत्। सप्तविंशतिषट्त्रिंशतोस्तयोः संसर्गे नव शतानि द्वासप्ततिश्च भवन्ति।

अथ याज्ञिकानां सुखबोधार्थं कारिकाः क्रियन्ते—

पदैस्तु त्रिविधैर्वेदिः प्रक्रमैर्वाऽपि मीयते।
आदौ वह्नौ सार्धवेदे सार्धवह्नौ निशाकरे॥ १॥
सार्धचन्द्रे सार्धचन्द्रेऽनलेऽर्धे चन्द्रकेऽर्धके।
कृष्णवर्त्मनि चार्धे च तथाऽर्धे सार्धचन्द्रके॥ २॥
सार्धवेदे तथाऽर्धे च चन्द्रेऽर्धे सार्धवह्निके।
अर्धे चेति तु पृष्ठ्यायामेकविंशतिशङ्कवः॥ ३॥
स्युस्तीक्ष्णाग्रा अथ भवेद्रज्जुः सूक्ष्मा दृढा तथा।
पदैर्द्वादशभिः प्रोक्ता पार्श्वमानी तु मानतः॥ ४॥
तिर्यङ्मानी षोडशभिर्विंशत्याऽक्ष्णा प्रकीर्तिता।
आदौ च पञ्चमे श्रोणिर्वेदेस्तिथिषु दक्षिणा॥ ५॥
एवमेवोत्तरा श्रोणिर्बुधैर्वेदेः प्रकीर्तिता।
अथ रज्जुं पार्श्वमानीं पुरस्तात्पश्चिमेऽक्ष्णिकाम्॥ ६॥
कृत्वा विहरणं कुर्यान्महावेद्यंसयोर्बुधः।
अन्त्ये चतुर्दशे चैव महावेदेस्तु दक्षिणः॥ ७॥
अंसो द्वादशसु प्रोक्त एवमेवोत्तरः स्मृतः।
अथ पाशौ विपर्यस्य रज्ज्वा विहृतिरुत्तरा॥ ८॥
द्वितीये सप्तमे श्रोणिः सदसो दक्षिणा मता।
दशस्वथाष्टसु श्रोणिरुत्तरा तस्य कीर्तिता॥ ९॥
तृतीये दशमे दक्षे स्यौदुम्बर्यवटः पदे।
तुर्ये द्वादशके दक्षे प्रशास्तुर्धिष्ण्यमीरितम्॥ १०॥
तदुदग्ब्रोतृधिष्ण्यार्थं दक्षिणं परिकीर्तितम्।
उत्तरे होतृधिष्ण्यार्धसंलग्नं स्यात्तथाऽर्धकम्॥ ११॥
तदुत्तरे वेदसंख्याः शंसिपोत्रादिधिष्ण्यकाः।
प्रादेशमात्राः प्रादेशान्तरालाः सर्वधिष्ण्यकाः॥ १२॥
स्यादच्छावाकधिष्ण्यस्य मानं किंचित्ततोऽधिकम्।
पञ्चमे च मनौ चैव दक्षिणः सदसोऽसकः॥ १३॥

दशस्वथाष्टसु प्रोक्तः सदसस्तूत्तरोंऽसकः ।
षष्ठे पञ्चदशे धानश्रोणिः पञ्चसु दक्षिणा ॥ १४ ॥
एवमेवोत्तरा श्रोणिर्हविर्धानस्य कीर्तिता ।
अष्टमे षोडशे चैव मार्जालीयं तु दक्षिणे ॥ १५ ॥
तथैवोत्तर आग्नीध्रधिष्ण्यं प्रोक्तं विचक्षणैः ।
प्रदर्श्यते विहरणप्रकार उभयोरथ ॥ १६ ॥
पार्श्वमानीसूत्रमहावेदिदक्षान्तसूत्रयोः ।
संपातादुत्तरे मध्योऽङ्गुलेषु रविषु स्मृतः ॥ १७ ॥
मार्जालीयस्य धिष्ण्यस्य तत्र शङ्कुं नियोजयेत् ।
महावेद्युत्तरप्रान्तपार्श्वमान्याख्यसूत्रयोः ॥ १८ ॥
संपाताद्दक्षिणे मध्योऽङ्गुलेषु रविषु स्मृतः ।
आग्नीध्रीयस्य धिष्ण्यस्य तत्र शङ्कुं नियोजयेत् ॥ १९ ॥
नवमे च सप्तदशे पदे सार्धे च दक्षिणे ।
प्रभञ्जनदिशास्थोपरवमध्यः प्रकीर्तितः ॥ २० ॥
प्रादेशद्वितये तस्मान्मध्यादुपरवस्य तु ।
रक्षोधिपतिदिक्स्थोपरवमध्यः प्रकीर्तितः ॥ २१ ॥
दशमे चाष्टादशे च पदे सार्धे च दक्षिणे ।
अपराजितदिक्स्थोपरवमध्यः प्रकीर्तितः ॥ २२ ॥
प्रादेशद्वितये तस्मान्मध्यादुपरवस्य तु ।
वीतिहोत्रदिशास्थोपरवमध्यः प्रकीर्तितः ॥ २३ ॥
प्रादेशमात्राः प्रादेशान्तराला एत ईरिताः ।
द्वादशे विंशके चैव पञ्चस्वंसस्तु दक्षिणः ॥ २४ ॥
धानस्याथोत्तरांसश्चाप्येवमेव प्रकीर्तितः ।
अथ रज्जुं पार्श्वमानीं पुरस्तात्पाश्चिमेऽक्षिणकाम् ॥ २५ ॥
कृत्वाऽग्निमं विहरणं प्रकर्तव्यं विचक्षणैः ।
विंशके द्वादशे चैव लघुवेद्यास्तु दक्षिणः ॥ २६ ॥
अंसः पञ्चसु संप्रोक्त एवमेवोत्तरः स्मृतः ।
षष्ठे पञ्चदशे चैव लघुवेद्यास्तु दक्षिणा ॥ २७ ॥
श्रोणिः पञ्चस्वथैवं स्याल्लघुवेद्यास्तथोत्तरा ।
रज्ज्वा विपर्यस्तया वाऽपि स्याद्विहरणं त्विदम् ॥ २८ ॥
अणीयसी पुर इति पक्षोऽथात्र प्रदर्श्यते ।
वेदेषु दक्षिणोंऽसः स्यात्तथैवोत्तर ईरितः ॥ २९ ॥

षट्सु श्रोणिर्दक्षिणा स्यादेवमेवोत्तरा मता ।
युगं दशपदायामं नेति केचित्समूचिरे ॥ ३० ॥
त्रिवेदेष्वङ्गुलेष्वस्मिन्मते श्रोणिस्तु दक्षिणा ।
एवमेवोत्तराऽपि स्यादसावप्येवमीरितौ ॥ ३१ ॥
सर्वतो युगमात्री वा स्यात्प्राणीयस्त्वमत्र तु ।
पूर्वार्ध्यशङ्कुस्थाने तु यूपावट उदाहृतः ॥ ३२ ॥
आग्नीध्रीयस्य धिष्ण्यस्य मण्डपोऽथ प्रदर्श्यते ।
वेदेः पदेषु पाश्चात्यशङ्कोरर्केषु तूत्तरे ॥ ३३ ॥
लक्ष्म स्याद्यन्महावेद्या उत्तरांसस्य लक्ष्म च ।
एतयोश्चिह्नयोः सूत्रं तन्मध्येऽपि च लाञ्छनम् ॥ ३४ ॥
महावेद्युत्तरप्रान्तसूत्रमध्येऽपि लाञ्छनम् ।
एतयोरपि सूत्रं स्यादथ पश्चार्ध्यशङ्कुतः ॥ ३५ ॥
कृतं रविषु यल्लक्ष्म तावन्मानं च सूत्रकम् ।
तदुत्तरे प्रदेयं तु तत्र स्पष्टं च लाञ्छनम् ॥ ३६ ॥
महावेद्युत्तरांसात्तु देयं सूत्रमुदक्तथा ।
एतयोरपि सूत्रं स्यात्ततो वेद्यन्तसूत्रके ॥ ३७ ॥
मध्ये कृतादङ्कनात्तु पुरः सार्धद्वये पदे ।
पश्चाच्च लाञ्छनं कार्यं विहृत्य चतुरश्रवत् ॥ ३८ ॥
मण्डपं तत्र संसाध्य कटाद्यैस्तं परिश्रयेत् ।
द्वारं दक्षिणतः कुर्यात्षोडशाङ्गुलविस्तृतम् ॥ ३९ ॥
अथवाऽरत्निविस्तारमथवा द्वारमेव न ।
किंतु दक्षिणतो नैव परिश्रयणमेव तु ॥ ४० ॥
मण्डपस्यर्जुतापक्षे प्रकारोऽयं प्रदर्शितः ।
मण्डपस्य प्रकारोऽथ वक्रतापक्ष ईर्यते ॥ ४१ ॥
महावेद्युत्तरप्रान्तसूत्रमध्ये तु लाञ्छनम् ।
कृत्वा सूत्रानुरोधेन तत्प्राक्सार्धपदद्वये ॥ ४२ ॥
प्रत्यक्चैवापि तद्वत्स्याच्छेषस्यायतनवत्ततः ।
वक्रता यादृशी वेद्या महत्यास्तादृशी भवेत् ॥ ४३ ॥
वक्रता मण्डपस्यापीत्येवं पक्षद्वयं स्मृतम् ।
परमानं यदा वेद्यास्तदा तु सदआदिकम् ॥ ४४ ॥
पदमानेनैव भवेदिति प्रोक्तं विचक्षणैः ।
दशाङ्गुलात्मकपदद्वयात्मा प्रक्रमो यदि ॥ ४५ ॥

पदमानेनैव तदा कर्तव्यं सदआदिकम् ।
रवितिथ्यङ्गुलात्मान्यतरात्मा प्रक्रमो यदि ॥ ४६ ॥
सदसोऽरत्निमानं स्याद्धविर्धानस्य चैव हि ।
एतदात्मप्रक्रमेण माने द्वाराणि चैव हि ॥ ४७ ॥
अरत्निमात्राण्येव स्युरित्थं विहृतिरीरिता ।
कारिकाः सुखबोधाय याज्ञिकानां समीरिताः ॥ ४८ ॥

तां करोति यथा दर्शपूर्णमासयोर्यदन्यत्संनामात् ।

तां कृतस्पन्द्यावधिकां वेदिं करोति संनमनवर्जम् । यथा दर्शपूर्णमासयोरिति वचनादुद्धननात्प्राग्यः प्रैषः स प्राकृत एव नात्राच्छिद्रप्रपाठकोक्तः प्रैष इति दार्शिकवेदिवदेव पुरस्ताद्द्वितीयदेश उदग्वेदेः स्तम्बयजुर्निवपतीत्युक्तं भवति । स्तम्बयजुरपादानदेशोऽप्यनेनैव व्याख्यातो मध्यमस्य वेदितृतीयस्य पूर्वार्धादिति । तत्रोपरवाणां कालात्स्तम्बयजुर्हरतीति बौधायनः । अत्र कालशब्दो देशवाची । उपरवदेशात्स्तम्बयजुर्हरतीति स्पष्टमाह कात्यायनः । इदं तस्मा इत्यादि संनमनवर्जं खननान्तं करोति ।

स्फ्येन विघनेन पर्श्वा परशुना च ।

वेदिं कुर्वन्तीति वचनविपरिणामेन संबन्धः । आपस्तम्बस्त्वेतत्स्पष्टमेवाऽऽह । एतस्य कर्मणो वैशेषिकत्वादत्रैव वैशेषिक आच्छिद्रिकप्रपाठकोक्तः प्रैषो भवति । स यथा— इमां नराः कृणुत वेदिमेत्य वसुमतीᳪ रुद्रवतीमादित्यवतीं वर्ष्मन्दिवो नाभा पृथिव्या यथाऽयं यजमानो न रिष्येद्देवस्य सवितुः सव इति । अत्र मन्त्रे यद्विश्वदेव्यावतीमित्याधिक्यं बौधायनेनोक्तं तन्नोपसंहर्तव्यम् । अनवस्थापत्तेः । किंतु आकाङ्क्षिताङ्गकर्मसंबन्ध्येवाऽऽधिक्यमुपसंहर्तव्यम् । एवं सर्वत्र द्रष्टव्यम् । यथारूपमितर इत्यनेन सूत्रकृता विनियोग उक्तः परं तु स्पष्टतयाऽनुक्तत्वात्कृताकृतः । कृणुतेति लिङ्गात्प्रैषत्वम् । परिकर्मिणोऽत्र प्रेष्याः । अतस्त एव कर्तारः । यथा प्रकृतौ कृणुतेति बहुवचनात्परिकर्मिकर्तृत्वं तथाऽत्र विघनादिकरणकलोष्टादिहननाद्यर्थकोऽयं प्रैषः । स्फ्योऽत्र लौकिक एव त्याज्यत्वात् । विघनो मुद्गरः । पर्शुरश्वस्यानडुहो वा पार्श्वास्थि । परशुः कुठारः । स्फ्येन मृत्तिकायाः प्रथनं, विघनेन लोष्टादिहननम् । पर्श्वा तृणच्छेदनम् । परशुना मूलच्छेदनम् । स्फ्यकार्यं विघनादित्रितयकार्यान्ते । पर्शुशब्दः स्त्रियाम् । प्रेयमगाद्धिषणा बर्हिरच्छेति मन्त्रलिङ्गात् । स्फ्यादीनि प्रज्ञातान्येव निदधाति । उत्तरत्रोपयोगसत्त्वात् । स्फ्यः खड्गाकृतिः, अहोमार्थानि तु वारणस्येति वक्ष्यमाणपरिभाषासूत्राद्वारणवृक्षजस्तदभावे यज्ञियवृक्षजः । विघनोऽप्येवम् । पर्श्वभावे तदाकारा योग्यत्वादायसी पर्शुर्ग्राह्या । इदानीं पर्श्वानयनस्यातिनिन्दितत्वात्, अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्विति याज्ञवल्क्येनास्वर्ग्यस्यातिनिन्दित-

स्याननुष्ठेयत्वोक्तेस्तत्स्थान आयसीमेव पर्शुं शिष्टा गृह्णन्ति । आयस्यां पर्श्वामपि मन्त्रे पर्शुशब्दप्रयोगो न विरुध्यते । परशुरायसमय इति लोके प्रसिद्धमेव । चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका भुवनस्य मध्ये तस्या॰ सुपर्णावधि यौ निविष्टौ तयोर्देवानामधिभागधेयमित्यभिमन्त्रणमध्वर्युणा कार्यम् । तथा चाऽऽपस्तम्बः—दर्शपूर्णमासवत्संनमनवर्जं प्रागुत्तरात्परिग्राहात्कृत्वा चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका भुवनस्य मध्ये तस्या॰ सुपर्णावधि यौ निविष्टौ तयोर्देवानामधिभागधेयमित्यभिमन्त्र्येति । वेदिं करोतीति विपरिणामेन संबन्ध इत्यापस्तम्बसूत्रसंगतिः । अनुवृत्तेन वेदिशब्देनोत्तरवेदिरेव ग्राह्या नतु महावेदिः । अन्यथाऽभिमन्त्र्यवेदिं करोतीतिल्यप्प्रत्ययबोधितसमानकर्तृकत्वानुपपत्तेः । नच स्फ्येन विघनेन पर्श्वा परशुना च वेदिं कुर्वन्तीति पूर्वसूत्रेणान्वयः, तथा च वेदिशब्देन महावेदेरेव ग्रहणमस्त्विति वाच्यम् । अभिमन्त्रणस्य समानकर्तृकत्वानुरोधेनाध्वर्युव्यतिरिक्तकर्तृकत्वापत्तेः । नचेष्टापत्तिः । मुख्यकर्तृकत्वनिर्वाहोपपत्तौ गौणबहिर्भूतकर्तृकत्वकल्पनाया अनुचितत्वात् । अत एवोत्तरसूत्र उदुम्बरशाखाभिः प्लक्षशाखाभिर्वा छन्नां परिवासयतीत्युत्तरवेदिप्रयुक्तोऽयं विधिः संगच्छत इत्यस्त्वापस्तम्बसूत्रविचारः । स्फ्येन विघनेनेति सूत्रं प्राकृतवेदिकरणशेषभूतमेव । यन्मूलमतिशेते स्फ्येन तच्छिनत्ति स्फ्येनोत्तमां त्वचमुद्धत्योत्करे निवपतीत्यादिविधितः स्फ्यस्यैव करणत्वं प्राप्तं तस्यात्र वेदेर्महत्त्वेनायोग्यत्वाद्विघनादीन्यपि तत्तत्कार्यसाधनत्वेन विधीयन्ते । स्फ्यग्रहणं लौकिकस्फ्यग्रहणार्थम् । परिकार्मिकर्तृकवेदिकरणेऽयं स्फ्यः प्राकृतकर्मसु त्वैष्टिक एव । चकारः प्राकृतवेदिकरणसमुच्चयार्थः । तेन प्राकृतं खननान्तं कृत्वेदं वैशेषिकं करोति । नचानुक्तसमुच्चयार्थत्वं चकारस्यास्त्विति वाच्यम् । स्फ्यः स्वस्तिरिति वक्ष्यमाण उपस्थानमन्त्रे चतुर्णामेवोपस्थानविधानेन चतुरतिरिक्तस्यासंभवात् ।

यत्प्रागुत्तरस्मात्परिग्राहात्तत्कृत्वोत्तरवेद्याः कल्पेन दशपदामुत्तरवेदिं करोति ।

यदित्यनुवादश्चोदकप्राप्तस्योत्तरवेदिकरणकालविधानार्थः । देवस्य सवितुः सव इति खनति व्यङ्गुलां त्र्यङ्गुलां चतुरङ्गुला॰ सीतामात्रीमित्यादि उत्करं तद्गमयतीत्यन्तं दर्शपूर्णमासवत् । आहार्यपुरीषां पशुकामस्येति काम्यपक्षः प्रकृतावेव । काम्यानां प्रकृतावेव निवेश इत्यभियुक्तोक्तेः । उत्तरपरिग्राहात्पूर्वतनं यत्कर्म तत्कृत्वोत्तरवेद्याः कल्पः प्रकारः पशुसूत्र उक्तस्तेन प्रकारेणोत्तरवेदिं करोति । अत्र ततोऽयं विशेषो दशपदामिति । एतद्विहरणप्रकारः शुल्बसूत्रे—दशपदोत्तरवेदिर्भवतीति सोमे विज्ञायते तदेकरज्ज्वोक्तं पञ्चदशिकेनैवापायम्यार्धेन ततः श्रोण्यंसान्निर्हरेत्तां युगेन यजमानस्य वा पदैर्विमाय शम्यया परिमिमीत इति । तत इति षष्ठ्यन्तात्तसिः । तस्या उत्तरवेदेरित्यर्थः । दशपदा सर्वतः क्षेत्रतो दशपदा । युगमपि दशपदायाममेव, मानं

वेणुवत् । केचित्स्वतन्त्रं प्रमाणमाहुः । तन्मते युगं षडशीत्यङ्गुलात्मकम् । षडशीतिर्युगमाहुरिति शुल्बसूत्रात् । अत्र यजमानग्रहणमध्वर्युव्यावृत्त्यर्थम् । शम्यया परिमाणमदृष्टार्थं पूर्वार्धे वेदेर्यूपावटायावकाशमवशिष्य शम्ययोत्तरवेदिं विमिमीते पुरस्तादुदीचीनकुम्बाꣳ शम्यां निधाय वित्तायनी मेऽसीत्यादि ।

उत्तरवेदिकरणे पक्षान्तरमाह—

अꣳहीयसीं पुरस्तादित्येकेषाम् ।

अंहीयसी, अणीयसी । शुल्बसूत्रे—विमितायां पुरस्तात्पार्श्वमान्यावुपसंहरेच्छ्रुतिसामर्थ्यादिति । उपसंहारो ह्रासः । अर्थात्पूर्वत्र यावतः प्रमाणस्य ह्रासस्तावता प्रमाणेन पश्चात्पार्श्वमान्यौ वर्धयेदिति सिध्यति । यथा महावेद्याः श्रोणिमानं त्रिंशत्पदात्मकं त्रिंशत्प्रक्रमात्मकं वा तत्पञ्चमांशः षट्पदात्मकः षट्प्रक्रमात्मको वा तस्य ह्रासः पुरस्तात् । पश्चात्तु त्रिंशत्पदात्मकं त्रिंशत्प्रक्रमात्मकं वा तन्न्यायेनात्र । तेन पूर्वत्राष्टापदा द्वादशपदा पश्चात्पूर्वत्रांहीयसीत्यस्मिन्पक्षे भवति ।

उत्तरेणोत्तरं वेद्यꣳसं प्रक्रमे चात्वालः
पश्चाद्द्वादशमूत्करो विद्यतेऽपरिमिते वा ।

चात्वाल इति भाविनी संज्ञा संस्कारनिमित्ता । उत्तरेणेत्येनपोत्तरवेद्यंसस्योत्तरतः संलग्नमेकं प्रक्रममानपक्ष एकं प्रक्रमं पदमानपक्ष एकं पदं मीत्वा तत्र चात्वालस्य दक्षिणांसं दक्षिणरेखामध्यं वा परिकल्प्य तदनुरोधेनोत्तरतः शम्यामात्रं चात्वालं चतुरश्रं परिकल्पयेत् । शम्यामात्रश्चात्वाल इति बौधायनः । शम्याशब्देन षट्त्रिंशदङ्गुलात्मकं मानमेव गृह्यते नतु शम्याकारोऽपि । तदाकारस्यर्जुत्वाभावेनर्जुरेखालेखनाननुकूलत्वात्, उत्तरवेद्याः कल्पेनोत्तरवेदिं करोतीति विधानेनैव तदन्तर्गतत्वात्तत्साधनत्वाच्च । उत्तरेणोत्तरं वेद्यꣳसं प्रक्रमे चात्वाल इत्यस्यापि परिलेखनादिक्रियाया इव सिद्धावत्र पुनर्वचनं शम्यया मानार्थम् । उत्तरं वेद्यंसमित्यत्र वेदिर्महावेदिरेव नतूत्तरवेदिः । अन्यथा चात्वालस्य महावेदिमध्ये समावेशापत्तेः । ननूत्करस्थानप्रदर्शनायायमनुवाद इति चेन्न । चात्वालाद्द्वादशसूत्कर इत्येतावतैव तदर्थसिद्धावनुवादवैयर्थ्यापत्तेः । चात्वालपश्चिमान्तान्मध्याद्वा द्वादश प्रक्रमान्प्रक्रम्य तत्रोत्करप्रान्तं तन्मध्यं वा कुर्यात् । उत्करः पदद्वयात्मकः । द्विपद उत्कर इति सूत्रान्तरात् । विद्यत इत्यस्य भवतीत्यर्थः । अपरिमिते वेत्यनेनाधिकमप्यनियतं प्रमाणं ग्राह्यमिति बोध्यते । अपरिमितशब्दार्थः कात्यायनेनोक्तः—अपरिमितं प्रमाणाद्भूय इति । भूयः, अधिकम् । पदमानपक्षे चात्वालमध्यादेव द्वादश पदानि मीत्वा तत्रोत्करमध्य एव कार्यः । पदमानपक्षे चात्वालपश्चिमान्ताद्द्वादश पदानि न संभवन्ति । आग्नीध्रीयमण्डपनिवेशानुपपत्तेः ।

आग्नीध्रीयमण्डपोऽपि पद्मांनपक्षे पद्मानेनैव। उत्करे वेदिधर्माः सर्वे कार्या वाजिनासादनार्थं, ते च काण्डानुसमयेनैव। अन्यस्मिंश्च द्रव्ये तेनार्थेन संयुज्यमाने धर्मावेश इति सूत्राद्वेदिधर्माणामुत्करे प्राप्तिः। अन्यस्मिन्द्रव्य उत्कररूपे द्रव्ये पदार्थे तेनार्थेन संयुज्यमाने वेदिसंबद्धासादनपदार्थेन वचनात्संबध्यमाने धर्मावेश आसादनाधिकरणधर्माणामावेशः प्राप्तिर्भवतीत्यर्थः। अस्ति चोत्करे वाजिनस्याऽऽसादनं वाचनिकं चातुर्मास्येषु। मैत्रावरुण्यामिक्षाया वैश्वदेव्यामिक्षाविकृतित्वाद्वाजिनासादनस्योत्करे कर्तव्यताया अत्रापि प्राप्तिः। उत्करे वाजिनासादनमप्येतत्सूत्रोदाहरणत्वेन सूत्रकृता संगृहीतम्—उत्करे वाजिनमासादयति परिधौ पशुं नियुञ्जन्तीति। परिधौ पशुं नियुञ्जन्तीत्युदाहरणं सौमिकचातुर्मास्येषूपयुज्यते।

तावन्तरेण वेदेः संचरः।

अन्तरेणेत्यव्ययम्। ताविति अन्तरान्तरेणयुक्त इति द्वितीया। चात्वालोत्करयोर्मध्येन वेदेर्वेदिसंबन्धी प्रवेशनिर्गमार्थः संचरो मार्गो भवतीत्यर्थः। अत्राऽऽपस्तम्बः— अन्तरा चात्वालोत्करावाग्नीध्रचात्वालौ वाऽध्वर्युर्दशीकवश्च संचरेयुः सर्वतः प्रसुते दशीकवः संचरेयुरित्येक इति। अत्राध्वर्युग्रहणं कैमुतिकन्यायेनर्त्विजामुपलक्षणं द्रष्टॄणां संचरनियमे किमु वक्तव्यमृत्विजामिति। दशीकवो द्रष्टारः। ते ये बाह्या दशीकव इत्यविवाक्यदर्शनात्ते द्विविधा बाह्या आभ्यन्तराश्च। तत्र य आभ्यन्तरा द्रष्टारस्ते नित्यमनेन यथा संचरेयुर्निष्क्रमणप्रवेशने कुर्युः। अथवा प्रसुते सोमे सुत्येऽहनि दशीकवो यथाकामं संचरेयुरित्यर्थः। सर्वत इति वचनादन्तराऽग्नी गमनेऽपि न दोष इति केचित्।

प्राचीनमाग्नीध्रात्प्रतीचीनं चात्वालादित्येकेषाम्।

अनेनोत्करपश्चिमतोऽपि संचरो भवति।

उदुम्बरशाखाभिश्छन्नां परिवासयति।

उदुम्बरस्य याः शाखाः पल्लवास्ताभिः शाखाभिर्बहुवचनात्त्रिप्रभृतिभिः। आपस्तम्बेनोदुम्बरशाखाभिः प्लक्षशाखाभिर्वा छन्नां परिवासयतीति पक्षे प्लक्षशाखाभिश्छादनं विहितं, सूत्रान्तरे दर्भैश्छादनं विहितमेतदुभयं व्यावर्तयितुमिदं वचनम्। एतदन्तं मध्यमोपसद्दिवसे। एतदर्थमेव मध्यमाभ्यां पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्याग्रेण प्राग्वंशं त्रीन्प्राचः प्रक्रमान्प्रक्रम्य शङ्कुं निहन्ति स पश्चार्धे वेदेरित्यस्मिन्सूत्रे मध्यमाभ्यामित्युक्तम्। अन्यथा प्रथमोपसद्दिवसे वेदिकरणं स्यात्। उदुम्बरशाखाभिश्छन्नां परिवासयतीत्यत्रैव श्वोभूतपदस्यान्वयेन मध्यमोपसद्दिवस उदुम्बरशाखाभि-

---

१ क. 'माने'।

श्छन्नां परिवासयतीत्येतावदेव स्यात् । उत्तमाभ्यां पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्येत्युत्तरत्रोत्तमत्वप्रयुक्तविधिबलात् । एतत्सर्वं वारयितुं मध्यमाभ्यामिति । एवं च श्वोभूत इत्युत्तरान्वय्येव । नन्वेवं श्वोभूत इति वचनं व्यर्थमुत्तमाभ्यामित्यनेनैव सिद्धेरिति चेन्न । उदुम्बरशाखाभिश्छन्नां परिवासयतीत्येतदपि मध्यमोपसद्दिवस एवेतिबोधनार्थत्वेनैव सार्थक्यात् । अन्यथोत्तरदिनेऽपि कदाचिदनुष्ठानं प्रसक्तं स्यात् । नच मध्यमोपसद्दिवसे वेदिकरणेऽपि उदुम्बरशाखाभिश्छन्नां परिवासयति श्वोभूत इत्येवमेवान्वयं स्वीकृत्य तदुत्तरदिवस उदुम्बरशाखाभिश्छन्नां परिवासयतीत्येतावन्मात्रमनुष्ठेयं तदुत्तरदीवस उत्तमपौर्वाह्णिक्यादीति वाच्यम् । उपसद्रहितदिवसस्य मध्ये कल्पनायाः सकलसूत्रविरुद्धत्वेनात्यन्तानुचितत्वात् । नच श्वोभूत इत्यत्र खण्डसमासेस्तस्य पूर्वत्रैवान्वय इति वाच्यम् । एतस्य नियमस्य यथार्थ९.हविर्धानयोः प्राग्व९शस्य सदोहविर्धानयोश्चेत्यादौ व्यभिचारेणाप्रयोजकत्वात् । खण्डव्यवहारस्य भगवदाचार्योच्छ्वासनिबन्धनत्वात् । उच्छ्वासस्य नियतप्रमाणत्वाभावात् । छन्नामाच्छादितां परिवासयति निर्व्यापारेण रात्रिं गमयति रक्षयतीति वा । परिकर्मिभिरिति शेषः । छन्नां रक्षयतीत्येनेन शाखानामपि रक्षणं गम्यते । नहि शाखानां रक्षणाभावे विशिष्टाया रक्षणं भवति । श्वोभूतपदसाहचर्यादयमर्थो लभ्यते । एतदनन्तरमापराह्णिकप्रवर्ग्योपसदौ । एवं त्रिरात्र९ सायंप्रातः प्रवर्ग्योपसद्भ्यां प्रचरतीत्यनेनैव तयोः सिद्धेरत्रानुक्तिः । अन्तरा मध्यमे प्रवर्ग्योपसदौ वेदिं कुर्वन्तीत्यापस्तम्ब एतत्स्पष्टमाह ।

श्वोभूते ॥ १४ ॥ उत्तमाभ्यां पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्यार्धव्रतं प्रदाय तदानीमेवाऽऽपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति ।

श्वोभूते मध्यमोपसद्दिवसोत्तरदिवसे श्वोभूते श्वस्तनरूपे दिवस इत्यर्थः । श्वोभूते पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्येत्येतावत्येवोच्यमाने द्वादशाहाद्यहीनानां तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति श्रुत्या द्वादशोपसत्कत्वस्योक्तत्वेन मध्यमोपसद्दिवसचतुष्टये प्रथमद्वितीयतृतीयदिवसान्यतमदिवसेऽपि वेदिमानादिच्छादनान्तकर्मणः प्राप्तत्वेन वेदिच्छादनोत्तरप्रभृतिषु दिवसेष्वपि तदानीमेवाऽऽपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्येत्यस्य प्राप्तिः स्यात्तां वारयितुमुत्तमाभ्यामिति वचनम् । तथा च मध्यमोपसद्दिवसचतुष्टये वेदिकरणेऽपि द्वादशोपसद्दिवसान्तिमोपसद्दिवस एव तदानीमेवाऽऽपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्येति विधिर्नतु वेदिकरणदिवसोत्तरप्रभृतिषु दिवसेष्विति सिध्यति । अर्धव्रतप्रदानतात्कालिकप्रवर्ग्योपसदनुष्ठानविधानार्थं उत्तमाभ्यामित्याद्यनुवादः । श्वोभूतवचनमन्तिमपौर्वाह्णिकापराह्णिकप्रवर्ग्योपसत्प्रभृति हविर्धाने यजमानो राजानं गोपायतीत्यन्तं कर्मैकदिनसाध्यमिति प्रदर्शयितुमिति द्रष्टव्यम् । अन्यथा प्रवर्ग्योपसद्द्वयमात्रं स्यव्बोधितसंबन्धाद्घर्मापाकरणान्तं चान्तिमोपसद्दिवसेऽवशिष्टमुत्तरदिवस इत्यनियमः

स्यात् । अत आवश्यकमेव श्वोभूतवचनम् । अर्धं च तद्व्रतं चार्धव्रतम् । एकस्तनमुत्तमेऽहनीति याजमानसूत्रेऽन्तिमोपसद्दिवस एकस्तनव्रतस्य विधास्यमानस्यार्धमर्धशब्देनोच्यते ।

प्रवर्ग्यमुद्वास्योपसदमुपैति यदि पूर्वो भवति ।

यदि उपसदपेक्षया पूर्वः प्रथमः प्रवर्ग्यो भवति तदा प्रवर्ग्योद्वासनोत्तरमुपसत्कर्तव्येत्यर्थः ।

अर्धव्रतं प्रदायाऽऽग्नेराव्रृताऽग्निं प्रणीयाग्न्यायतन ऊर्णास्तुकां निधायाग्निं प्रतिष्ठाप्याऽऽमिक्षायै मैत्रावरुण्यै सायंदोहाय वत्सानपाकरोति ।

अर्धव्रतमवशिष्टम् । आग्नेरिति पदच्छेदः । अग्नेरिति पदच्छेदेऽग्नेरावृताऽग्नेः प्रकारेणेत्यर्थः स्यात् । स चासंगतः स्यात् । नह्यग्नेः कश्चन प्रकारोऽत्रापेक्षितोऽस्ति । नन्वाग्नेरिति पदच्छेदेऽपि कथमर्थस्य संगतत्वमिति चेत् । उच्यते-आग्नेः, अग्नेरिदमाग्नि तस्याऽऽग्नेः, अग्निसंबन्धिप्रणयनस्येत्यर्थः । तथा चाग्निप्रणयनस्य प्रकारेणाग्निं प्रणीयेत्यर्थो भवति । स चानुष्ठानानुगुणः सन्नविरुद्धश्च भवति । नच तद्धितप्रत्ययान्तत्वाभावपुंलिङ्गविरोधः । अनुष्ठानानुगुण्येनाविरुद्धत्वेन चाऽऽग्नेरितिपदच्छेदकल्पनाया एव प्रबलत्वेनैकदेशितद्धितप्रत्ययान्तत्वाभावपुंलिङ्गयोर्दुबलत्वादेवाऽऽर्षत्वकल्पनाया उचितत्वेन विरोधाभावात् । आवृच्छब्दः प्रकारवाची । आग्नेरावृताऽग्निप्रणयनादीपनादिना पौतुद्रवपरिधिपरिधानान्तेन गुग्गुलुसुगन्धितेजनान्तेन वाऽग्निप्रणयनप्रकारेणाग्निं प्रणीयाग्निकर्मकप्रणयनविधिं कृत्वेत्यर्थः । अ(आ)ग्नेरावृता प्रणीयेत्येतावतैवार्थादग्नेः प्राप्तावत्राग्निग्रहणमिध्मे कृत्स्ने प्रज्वलित एवात्र प्रैषादि भवतीत्येतदर्थम् । अग्न्यायतन ऊर्णास्तुकां निधायेति वचनं गुग्गुलुसुगन्धितेजनव्यावृत्त्यर्थम् । शुक्लत्वं पेत्वान्तराशृङ्गभवत्वं चास्त्येव । अथवा तान्सकृदेवोत्तरनाभ्यां निवपतीति पशुसूत्रात्सकृदेव गुग्गुलुसुगन्धितेजनोर्णास्तुकानां निवपने प्राप्त ऊर्णास्तुकायाः पार्थक्येनाग्न्यायतने निवपनार्थम् । अस्मिन्पक्षे मन्त्र आवर्तनीयः । एतद्विधातुमेव पूर्वोत्तरानुवादः । एकतरानुवादे प्रयोगक्रमः संशयितः स्यात् । पेत्वो गलितपुंस्को मेषस्तच्छृङ्गद्वयान्तरालवर्तिन्यूर्णास्तुका पशुसूत्रे दृष्टा तथैवात्र ग्राह्या । अथवोर्णास्तुकाया एव निधानमितरयोर्निवपनमिति विशेषं प्रदर्शयितुमेव विधानम्[1] । अस्मिन्पक्षेऽपि क्रियाभेदादावृत्तिरपि सिद्धा भवति । ऊर्णास्तुकायां मानवसूत्रे विशेषः—वृष्णेरलूनपूर्वकस्यान्तराशृङ्गादूर्णास्तुकामिति । अस्यार्थः—पूर्वं लून इति लूनपूर्वो न लूनपूर्वोऽलूनपूर्वस्तस्य कदाऽपि

१ ख. ग. निधानम् ।

यस्य लोमकर्तनं न कृतं तस्य वृष्णेर्मेषस्य शृङ्गादन्तराऽन्तराले वर्तमानोर्णास्तुका आह्वेति । निवपनं यथा बीजं न्युप्यते क्षेत्रे तद्वत्क्रिया । निधानं तु स्थापनमेव । आयतनवचनमूर्णास्तुकानिधान उत्तरनाभिनियमो नास्ति किं तु यत्रकुत्रचित्प्रदेश आयतन इत्येतादृशार्थं बोधयितुम् । अग्निपदमग्निर्यत्र स्थाप्यते तादृश आयतनप्रदेशो ग्राह्यो न तु तदितरप्रदेशः । स चोत्तरनाभिरूपस्तदितरो मध्यप्रदेशश्च । शास्त्रान्तरे गार्ह्यकर्मणि च मध्यप्रदेशस्यैवाग्निस्थानत्वोक्तेः । अग्निप्रतिष्ठापनमग्नेः कुलायमसी-त्यादि पूर्णाहुत्यन्तम् । प्रतिष्ठापनस्यैवाङ्गान्येतानि । येन नाव्यवधानं तेन व्यवहि-तेऽपि नाव्यवहितत्वबाधः । पशुबन्धवदाग्निं प्रणयतीत्यापस्तम्बः । याजुषहौत्रसत्त्वे याजुषमेवात्र सर्वं हौत्रम् । मित्रावरुणौ देवता यस्याः सा मैत्रावरुणी तस्यै, आमि-क्षायै तादर्थ्ये चतुर्थीयम् । सायंदोहायेत्यत्रापि तादर्थ्ये चतुर्थी । आमिक्षार्थो यः सायंदोहस्तदर्थमिति वाक्यार्थः । वत्सानपाकरोति मातृभ्यः पृथक्करोति तूष्णीमेव । वत्सापाकरणस्य शाखानिष्पाद्यत्वादादौ शाखाहरणं कर्तव्यम् । मैत्रावरुण्या इत्या-मिक्षाविशेषणं देवताविधानार्थम् । शाखाहरणमन्त्रेषु यथार्थमूहः । तप्ते पयसि दध्या-नीय श्रपयित्वा घनीभूतं यद्द्रव्यं निष्पद्यते साऽऽमिक्षा । आण्डस्य वा एतद्रूपं यदा-मिक्षेति श्रुतेः । यद्द्रवीभूतं तद्वाजिनं, रेतो वै वाजिनमिति श्रुतेः ।

इन्द्राय च दधिघर्माय घर्मदुघो वत्सम् ।

इन्द्रायेन्द्रार्थं दधिघर्मो दध्ना साध्यो घर्मो दधिघर्मो दध्ना घर्म इव घर्म इति वा घर्मशब्देन रक्षणविशिष्टा क्रियोच्यते । दध्नो घर्मः क्षरणं यत्रेति वा । योगरूढं पदम् । इदं च विशे-षणं वक्ष्यमाणे दधिघर्महोमसाधनीभूते यमिन्द्रमाहुर्वरुणं यमाहुरिति मन्त्रे देवतानिश्च-यासंभवात्का देवता ग्राह्येत्याकाङ्क्षां निवर्तयितुम् । घर्मो घर्मार्थं पयो यस्या दुह्यते सा घर्मधुक्तस्या वत्समपाकरोतीत्यर्थः । इदमपि तूष्णीम् । एतदर्थं शाखाहरणं तु समन्त्रमेव वषट्कारप्रदेयत्वाद्दधिघर्मद्रव्यस्य । चकारो दधिग्रहाद्यर्थकसायंदोहार्थं सत्तद्दोग्ध्र्यस्तत्तद्वत्सापाकरणं कर्तव्यमित्यनुक्तसमुच्चयं प्रदर्शयितुम् । एतदर्थं शाखा-हरणं तूष्णीमेव वषट्कारप्रदेयत्वाभावात् । यद्यपि शृतातङ्क्यस्य वषट्कारप्रदेयत्व-मस्ति तथाऽपि तस्य मिश्रणोद्देश्यत्वमेव न यागोद्देश्यत्वमतो न दोषः ।

सर्वाण्यैन्द्राणि भवन्तीत्येकेषाम् ।

मैत्रावरुण्यामिक्षासांनिध्यात्सर्वशब्दो धानादिरूपसवनीयहविःपरः । आमिक्षायाः सवनीयाया या मित्रावरुणदेवता तामपोह्य तत्स्थान इन्द्रस्य देवतात्वं प्रसङ्गादत्रै-वाऽऽमिक्षा सहप्रदेयद्रव्याणां धानादीनां सवनीयायां या देवता इन्द्राय हरिवते धाना निर्वपतीन्द्राय पूषण्वते करम्भꣳ सरस्वत्यै भारत्यै परिवापमिन्द्राय पुरोडाशमष्टा-कपालमिति सूत्रेण विधास्यमानास्ता अपोह्य तासां स्थाने चेन्द्रस्य देवतात्वं पक्षे विधीयते । आमिक्षाया मित्रावरुणयोः स्थान इन्द्रः । धानानां हरिवद्गुणरहित

इन्द्रः। करम्भस्य पूषण्वद्गुणरहित इन्द्रः । परिवापलाजानां सरस्वतीभारतीस्थान इन्द्रः। पुरोडाशस्य त्विन्द्र एवास्ति । इन्द्राय च दधिघर्माय घर्मदुघो वत्समिति पूर्वसूत्रादिन्द्रायेत्यस्यानुवृत्त्यैवेन्द्रसंबन्धलाभ ऐन्द्रपदं किमर्थमिति चेत्सत्यम्। सर्वाणि भवन्तीत्यैन्द्रपदराहित्येन सूत्रे क्रियमाणे इन्द्रपदाकाङ्क्षाया नियतत्वाभावेन सर्वस्य संशयग्रस्तत्वानान्वितत्वापत्तेः। नचेन्द्राय च दधिघर्माय घर्मदुघो वत्समित्येतस्मात्पूर्वमेवैतत्सूत्रं कर्तव्यं तथा सत्यैवैन्द्रपदस्य सार्थक्यमिति वाच्यम् । सर्वाण्यैन्द्राणि भवन्तीत्येतस्य पूर्वं करण इन्द्राय च दधिघर्माय घर्मदुघो वत्समित्यत्रापि अपाकरोतीत्येतदुपादानस्याऽऽवश्यकत्वेन गौरवापत्तेः।

अग्निवत्युत्तरं परिग्राहं परिगृह्णाति ।

अग्निवतीति सप्तमी द्वितीयार्थे । उत्तरपरिग्राहविशेषणमग्निवदिति । अग्निवत्त्वं वसवस्त्वेत्यस्य तेऽग्निना प्राञ्चोऽजयन्, वसुभिर्दक्षिणा रुद्रैः प्रत्यञ्चः, आदित्यैरुदञ्च इत्यस्य प्रागग्निना परिग्रहस्तवनात्। एतेन वेदिकरण ऋतमसीत्यस्यार्थात्पूर्वपरिग्राहत्वं प्रदर्शितं भवति।

न परिगृहीतामप्रोक्षितामधिचरत्यास्तरणात् ।

परिगृहीतामुत्तरपरिग्राहेण परिगृहीतां वेदिमप्रोक्षितां सतीं नाधिचरति नाधितिष्ठति । आ, आस्तरणात् । परिगृहीतामिति वचनमुत्तरपरिग्राहात्पूर्वमधिचरणे निषेधो नेति प्रदर्शयितुम् । आस्तरणादिति वचनात्स्फ्येन प्रतीचीं संमार्ष्टीत्यारभ्य स्तरणान्तमप्रोक्षिताया अधिचरणनिषेध इति । तेन संमार्गार्थं प्रोक्ष्य वेदिं संमृज्य स्तरणार्थं प्रोक्ष्य स्तृणातीति सिद्धं भवति। आ, आस्तरणादित्यत्राऽऽङभिव्याप्तावेव। तेनाप्रोक्षिताया अधिचरणनिषेधः कृत्स्नस्तरणान्तं भवति । इयं शाखान्तरीया श्रुतिरेवानूद्यते।

सुत्यार्थानि काष्ठानि माहावेदिकं च बर्हिरुपक्लृप्तं भवति
तूष्णीकाभिरद्भिः काष्ठानि वेदिं बर्हिश्च त्रिस्त्रिः प्रोक्षति।

सुत्यैवार्थः प्रयोजनं येषां तानि सुत्यार्थानि। माहावेद्या इदं माहावेदिकं महावेद्यास्तरणपर्याप्तं बर्हिश्चोपक्लृप्तं भवति। सुत्यार्थानि काष्ठानीत्यत्रोपक्लृप्तशब्दस्य वचनविपरिणामेनान्वय उपक्लृप्तानीति। परिकर्मिभिरिति शेषः। सूयते कण्डयते सोम इति सुत्या, सूयते कण्ड्यते सोमो यस्मिन्कर्मणीति वा सुत्या। संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण इति सूत्रात्स्त्रीलिङ्गे वाच्ये भावादिरूपेऽर्थे क्यप्। लशक्वतद्धित इति ककारस्येत्संज्ञायां पकारस्य हलन्त्यमित्यनेनेत्संज्ञायां ह्रस्वस्य पिति

१ ख. 'स्त्वेवेन्द्र'। २ ख. ग. 'ज्य स्त'।

क्तिति तुगिति तुगागमे सुत्येति रूपम् । एवं च सुत्याशब्देन सुत्याख्यदिवससंबन्धिसकलकर्मग्रहणम् । तेनावभृथोत्तरोत्पन्नानामुदयनीयामिक्षादीनामपि तान्येव काष्ठानीति । सुत्यार्थानीति विशेषणात्काष्ठानां सुत्यार्थत्वेनैवोपकल्पनं, तेषामेवैतत्प्रकारेण प्रोक्षणम् । माहावेदिकमिति बर्हिर्विशेषणात्तत्र सुत्यार्थत्वस्य नान्वयो विरोधात् । एतेन ज्ञायतेऽग्नीषोमीयार्थं भिन्नान्येव काष्ठानि तेषां नैवैतत्प्रकारेण प्रोक्षणं किंतु नाप्रोक्षितमिन्धनमग्नावादध्यादितिधर्मसूत्रेणाप्रोक्षितेन्धनाभ्याधानस्य निषेधाच्छुद्धाभिरद्भिर्लौकिकमेव प्रोक्षणं तूष्णीमेव । उभयत्रापि चकार उपकल्पने प्रोक्षणे चानुक्ततद्दिवससंबन्धिग्रहणाद्यसमुच्चयार्थः । अपूर्वत्वेऽपि प्राकृत एव क्रम इति दर्शयितुं पदार्थकीर्तनम् । त्रिस्त्रिरिति वीप्सा प्रत्येकं त्रित्वप्राप्त्यर्था । तूष्णीकाभिरिति गृह्योक्तप्रोक्षणीसंस्कारप्राप्त्यर्थम् । प्रोक्षणसाधनत्वेनार्थादेवापां ग्रहणे सिद्धेऽद्भिरिति वचनं गृह्योक्तसंस्कारस्य पाक्षिकत्वज्ञापनार्थम् । तेन गृह्योक्तरीत्या संस्कृताभिर्लौकिकीभिरेव वा प्रोक्षणमिति पक्षद्वयं सिद्धं भवति । तूष्णीकाभिर्वेत्युच्यमाने तूष्णीकाभिरद्भिरन्येन द्रवद्रव्येण वेत्येवंरूपः प्रोक्षणं वैकल्पिकमित्येवं वाऽपि कदाचिदर्थः संभाव्येत स मा भूदित्येतदर्थं स्पष्टार्थकवाशब्दं परित्यज्य ज्ञापनसिद्धविकल्पार्थमद्भिरिति ग्रहणं कृतम् । परस्परविरोधाद्धि विकल्पोऽत्रेति ज्ञेयम् । उपक्लृप्तमिति भूतनिर्देशादग्नीषोमीयदिवससंबन्ध्यनुष्ठानारम्भात्प्रागेवोपकल्पनं परिकर्मिभिः कर्तव्यमिति गम्यते । अप्रोक्षितवेद्यधिचरणनिषेधान्महावेदिदक्षिणश्रोणिसमीपदेशं प्रोक्ष्य तं देशमधिष्ठाय तत्रस्थ एव मन्त्रेण तस्मिन्देशे बर्हिरास्तरणं कृत्वाऽग्रिमं देशं प्रोक्ष्य तं देशमधिष्ठाय मन्त्रेण तस्मिन्देशे बर्हिरास्तरणं कृत्वेत्येवं क्रमेणाऽऽन्तं कर्तव्यमिति द्रष्टव्यम् । अनेन प्रोक्षणस्याप्यत्र प्रत्यगपवर्गता भवति । तूष्णीकाभिरद्भिः काष्ठानि वेदिं बर्हिश्च त्रिस्त्रिः प्रोक्षतीत्यत्र पूर्वसूत्रात्सुत्यार्थानि माहावेदिकमित्येतत्पदद्वयमनुवर्तते ।

तूष्णीं बर्हिषा वेदिꣳ स्तृणाति यथा दर्शपूर्णमासयोः ।

तूष्णीमिति वचनं यथा दर्शपूर्णमासयोरित्यनेन देवबर्हिरूर्णाम्रदसमित्यस्य मन्त्रस्य प्राप्तिः स्यात्सा मा भूदित्येतदर्थम् । यथा दर्शपूर्णमासयोरित्यनेन तृणैरन्तर्धानं प्रत्यगपवर्गताऽग्रैर्मूलाभिच्छादनमनतिदृश्नं स्तरणमित्यादयो धर्माः प्राप्यन्ते । बौधायनेनाऽऽस्तावस्य सदोहविर्धानयोश्च बहुलं स्तरणमुक्तं तदप्यविरुद्धत्वाद्दृष्टार्थत्वाच्च स्वीकर्तव्यमेव ।

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखेति स्तरणीमेके समामनन्ति ॥ १९ ॥

इति हिरण्यकेशिसूत्रे सप्तमप्रश्ने चतुर्थः पटलः ।

वेदिर्बर्हिषा स्तीर्यतेऽनयेति स्तरणी करणे ल्युट्, युवोरनाकावित्यनादेशः। टित्वान्ङीप्। स्तरणीति स्त्रीलिङ्गनिर्देश एतस्य मन्त्रस्यर्क्त्वात्। स्तरणार्थेयमृग्भवतीत्यर्थः।

इति ओकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य चतुर्थः पटलः ॥ ४ ॥

अथ सप्तमप्रश्ने पञ्चमः पटलः।

उपक्लृप्ते शकटे मण्डलचक्रे प्रयुक्तपूर्वे तयोः पुराणान्ग्रन्थीन्विस्रस्य प्रक्षाल्य नवान्कुर्वन्ति च्छदिष्मती युग्यकृते कृत्वाऽग्रेण प्राग्वंशमवस्थाप्य युञ्जते मन इत्यौत्तरवेदिके जुहोति।

उपक्लृप्ते इति भूतनिर्देशादग्नीषोमीयदिवससंबन्धिकर्मानुष्ठानारम्भात्प्रागेवोपकल्पनीये। द्विवचनाद्द्वे शकटे अनसी मण्डलाकारे चक्रे ययोस्ते पूर्वमेवान्यकार्येषु प्रयुक्ते प्रयुक्तपूर्वे तयोः शकटयोः पुराणान्पुरातनान्पूर्वकृतान्ग्रन्थीन्विस्रस्य प्रक्षाल्य हविर्धाने प्रक्षाल्य नवान्नूतनान्दार्ढ्याय ग्रन्थीन्कुर्वन्ति। परिकर्मिण इति शेषः। छदिष्मती कटवती युग्यकृते युग्ये च ते कृते च युग्यकृते। इदं च शकटविशेषणम्। युग्ये युगार्हे खलयवमाषतिलवृषब्रह्मणश्चेतिसूत्रस्थानुक्तसमुच्चयार्थकचकारेण संगृहीताद्युगशब्दात्तदर्हतीत्यस्मिन्नर्थे यत्प्रत्ययः। कृते नूतनाक्षादियोजनेन कृते कार्यसमर्थे। एतादृशे शकटे कृत्वाऽग्रेण प्राग्वंशं प्राग्वंशस्य समीप एव प्रागीषे एव दक्षिणे दक्षिणमुत्तर उत्तरमित्येवमव्यवायेनावस्थाप्य युञ्जते मन इत्यौत्तरवेदिके जुहोति। परिष्टुतिरित्यन्तो मन्त्रः। जुहोतिचोदितत्वात्स्वाहाकारः। उपक्लृप्ते शकटे इत्येतावतैव चक्रयोः शकटाङ्गत्वात्प्रसिद्धत्वाच्च मण्डलचक्रत्वे सिद्ध इदं वचनं चक्रयोः केवलमण्डलाकारत्वं न विधीयते किंतु रविमण्डलं यथा छिद्ररहितं तद्वन्मण्डलाकारचक्रे इत्यर्थविशेषं प्रदर्शयितुम्। तेन च्छिद्रपदार्थोपलक्षितान्तरालवत्सारचक्रव्यावृत्तिर्भवति। प्रयुक्तपूर्वे इत्यनेन पुरातने प्रयाणगृहकार्यार्थनिर्मिते एव ग्राह्ये इति सूचितं भवति। असंभवे नूतने एव ग्राह्ये। प्रयुक्तपूर्वत्वे विशेषमाह—तयोः पुराणान्ग्रन्थीन्विस्रस्येति। प्रक्षाल्य नवान्कुर्वन्तीति पुरातननूतनसाधारणं नवत्वं प्रकृतकार्यक्षमत्वं लक्षयति। कृत्वेति वचनमध्वर्युकर्तृकत्वार्थम्। अत एव क्त्वाप्रत्ययस्य समानकर्तृकत्वमप्युपपद्यते। अव्यवायेनावस्थापनमाप-

स्तम्बेनोक्तम्–अग्रेण प्राग्वंशमभितः पृष्ठ्यामव्यवयन्निति । कात्यायनः—हविर्धाने स्थापयति पृष्ठ्यामुभयतो व्यरत्न्यन्तरे प्रक्षालिते प्राची उभयतः शालामावृत्य वर्षीयो दक्षिणमिति । मानवसूत्रेऽन्यो विशेषः—बहिर्वेदि चक्राण्यन्तर्वेद्युपस्तम्भयतीति । औत्तरवेदिग्रहणं बौधायनकात्यायनोक्तशालामुखीयनिरासार्थम् ।

देवश्रुताविति पदतृतीयस्यैकदेशेन पत्नी दक्षिणस्य हविर्धानस्य दक्षिणामक्षधुरं दक्षिणेनोत्तानेन त्रिः पराचीनमुपानक्त्येवमुत्तरस्य ।

गृहे स्थापितस्य पदपांसुतृतीयभागस्यैकदेशेन द्विधाविभक्तस्यैकांशेन हविःसोमाख्यं धीयते स्थाप्यते यस्मिंस्तद्धविर्धानं, तच्च दक्षिणं दक्षिणदिक्संबन्धीदमितिसंज्ञार्थं चिह्नितम् । एतादृशस्य हविर्धानस्य चक्रं निष्काश्य दक्षिणामक्षधुरं दक्षिणेन हस्तेनोत्तानेन त्रिः पराचीनमधःप्रदेशमारभ्योपरिष्टात्प्रदेशान्तं त्रिवारमुप समीप उपविश्यानक्ति । अञ्जनानन्तरं तस्य तच्चक्रं योजयति । एवमेवोत्तरस्य हविर्धानस्य कृत्वा चक्रं योजयति । द्रव्यपृथक्त्वान्मन्त्रावृत्तिः । वशील्यन्तो मन्त्रः । पत्नीग्रहणमध्वर्युव्यावृत्त्यर्थम् । दक्षिणग्रहणमुपकल्पनसमय एवेदं दक्षिणमिदमुत्तरमितिचिह्नकरणार्थं, पृष्ठ्याया दक्षिणत एकमुत्तरत एकमित्येवं विशिष्टं स्थापनं ज्ञापयितुं च ननु पृष्ठ्याया दक्षिणत एवोत्तरत एव वा । दक्षिणतः स्थापितं दक्षिणमुत्तरतः स्थापितमुत्तरमित्येवमुच्यमान उदक्संस्थत्वेनैव सिद्धेर्दक्षिणोत्तरशब्दोपादानवैयर्थ्यापत्तेः । हविर्धानग्रहणं शकटस्य प्रयोजनं प्रदर्शयितुम् । दक्षिणामित्यक्षधुरो विशेषणमुत्तराक्षधूर्व्यावृत्त्यर्थम् । ऋक्पूरब्धूःपथामानक्ष इति अकारः समासान्तो न भवति अनक्ष इति पर्युदासात्, एतस्या अक्षसंबन्धित्वात् । अक्षश्चक्रयोर्मध्यतनं तिर्यक्काष्ठं तस्मिन्यत्र चक्रं प्रोतं भवति स प्रदेशोऽक्षधूरित्युच्यते । दक्षिणेनेति हस्तविशेषणं वामव्यावृत्त्यर्थम् । अथवा दक्षिणेनेति नियमार्थं दक्षिणेनैवोपानक्ति ननु वामेनापीति । दक्षिणेनेत्यस्यानुक्तावञ्जलिनाऽपि उपाञ्जनं कदाचित्संभाव्येत तद्वारयितुं दक्षिणवचनम् । उत्तानग्रहणं न्यक्त्व[1]व्यावृत्त्यर्थम् । अञ्जनसाधनत्वस्य हस्त एव प्रसिद्धत्वाद्योग्यत्वाच्च विशेष्यभूतहस्तशब्दस्यानुक्तिः । प्राचेति बौधायनो हस्ते विशेषमाह । यत्रैकस्मिन्द्रव्य इति सूत्रात्सकृदेव मन्त्रः । हविर्धाने प्रतिगमने क्रमनियम उक्तो बौधायनेन—अन्वग्यजमानोऽनूची पत्नी पदतृतीयमादायेति ।

सर्वां उपानक्तीत्येकेषाम् ।

सर्वा अक्षधुरो ननु पत्नीपरः सर्वशब्दो बहुत्वस्यानियतत्वात् । परार्थान्येकेन क्रियेरन्निति सूत्रविरोधाच्च । तेन मुख्यैवानक्ति । अक्षसंस्कारकं हीदमुपाञ्जनम् । मुख्यत्वं

[1] क. 'शेष्यीभू'।

ज्येष्ठाया एव ज्येष्ठया न विनेतरा इति शास्त्रात् । परार्थं कर्म कर्तव्यं ज्येष्ठयैव नचान्ययेति शास्त्राच्च । तस्यामविद्यमानायां विद्यमानासु या ज्येष्ठा सा ज्ञेया । अत्र ज्येष्ठत्वं विवाहकृतं नतु वयःकृतमिति । एतन्मूलमन्यतो द्रष्टव्यम् । सर्वा अक्षधुरः समन्त्रमेवानक्तीत्यर्थः । तेन पूर्वकल्प उत्तरयोर्धुरोस्तूष्णीमुपाञ्जनं सिद्धं भवति । दृष्टार्थत्वाच्चाऽऽवश्यकं चैतत् ।

आज्येन चेत्येकेषाम् ।

चकारः पदसमुच्चयार्थः । अन्यदाज्यं तस्मिन्पद आनीय तेन मिश्रितेन धूरञ्जनं कर्तव्यमित्यर्थः । अथवाऽऽदौ पदेनैवाञ्जनं कृत्वा पुनः केवलेनाऽऽज्येनैवानक्तीत्येवं वा समुच्चयः । अस्मिन्पक्षे मन्त्रावृत्तिः । एकेषां मते समुच्चयस्य नित्यत्वमिति सूत्रतात्पर्यार्थः । तेनान्येषां मते नैमित्तिकत्वं सिद्धं भवति । पदस्य शुष्कत्व आज्येन मिश्रयित्वाऽञ्जनमवश्यं कर्तव्यं, पदनाशेऽन्यान्पांसून्छुद्धदेशस्थान्गृहीत्वाऽऽज्येन मिश्रयित्वाऽञ्जनमावश्यकमिति । अथवा लौकिकेनाऽऽज्येनान्यान्पांसून्मिश्रयित्वा तेनाञ्जनं कृत्वाऽन्येन संस्कृतेनाप्यञ्जनमवश्यं कर्तव्यमेवेति । अत्र पत्नी कृतकार्यत्वात्स्वस्थानं प्रति गच्छति । उक्तं च बौधायनेन—नयन्ति पत्नीमिति । बहुवचनं परिकर्म्यृत्विजामन्यतमप्राप्त्यर्थम् ।

हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति संप्रेष्यति प्रवर्त्यमाबाभ्यामनुब्रूहीति वा ।

होतारमिति शेषः । अत्रैवाऽऽह्वानमुक्तं बौधायनेन—ह्वयन्ति होतारमिति । बहुवचनं ब्रह्मयजमानाध्वर्य्वन्यतमप्राप्त्यर्थम् । अत्र वैशेषिकं हौत्रमाश्वलायनीयमेव ।

त्रिरनूक्तायां प्राची प्रेतमिति समुद्गृह्णन्तः प्राची प्रवर्तयन्ति ।

त्रिरनूक्तायां होत्रा । उपस्थितत्वात्प्रथमैव त्रिरनूक्ता भवति । स्पष्टमेवापठदापस्तम्बः—प्रथमायां त्रिरनूक्तायामिति । प्राची प्रेतमिति मन्त्रेण धुर्यवद्युगधुरौ दक्षिणेन हस्तेनोर्ध्वं गृह्णन्तः प्राची अनसी नयन्ति । प्रशब्दो यथा शकटनयने शकटचक्राद्यङ्गस्याऽऽघातो न भवेत्तथा नयनं द्योतयितुम् । बहुवचनोपात्ता अध्वर्यव एव नतु परिकर्मिणः । मन्त्रवत्कर्मत्वात् । समुद्गृह्णन्त इति शत्राऽनःप्रवर्तनसमकालत्वं समुद्ग्रहणस्य । तेन यावत्पर्यन्तमनःप्रवर्तनं तावत्पर्यन्तं समुद्गृहणम् । समुद्गृह्णन्त इत्यत्र संशब्दो दार्ढ्येनोद्गृहणार्थः । उच्छब्द ऊर्ध्वग्रहणार्थः । जीह्वरतमित्यन्तो मन्त्रः ।

सुवाग्देव दुर्यां२ आवदेत्यभिमन्त्रयते यद्यक्ष उत्सर्जेत्[१] ।

यदि अक्षश्चक्रसंघर्षणेनोत्सर्जेच्छब्दं कुर्यात्तदा सुवागित्यभिमन्त्रयते । अक्षशब्दमिति शेषः । अक्रन्ददग्निरित्यक्षशब्दमभिमन्त्रयत इत्यग्नौ दर्शनात् । एतच्च रक्षोपह-

१ ज्ञ. ञ. उत्सृजेत् ।

ननार्थम् । यदन उत्सर्जत्यक्रन्ददित्यन्वाह रक्षसामपहत्या इत्यग्नौ श्रुतेः । एकवचनादध्वर्युरेवात्र कर्ता नतु प्रतिप्रस्थाताऽपि ।

यत्र वेदिमवक्रामतस्तद्दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्यां वेद्यन्ते हिरण्यं निधायेदं विष्णुरिति जुहोति ।

स्फ्येनोद्धत्यावोक्ष्य हिरण्यं निधाय संपरिस्तीर्याभिजुहोतीति बौधायनः । यत्र यस्मिन्देशे वेदिमनसी अवक्रामतो वेदिमवक्रम्य गच्छतस्तत्तस्मिन्देशे दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्यामुत्तरचक्रमार्गे वेद्यन्ते महावेदिसमीप इत्यर्थः । पाश्सुर इत्यन्तो मन्त्रः । तदित्यत्र सुपां सुलुगित्यनेन सप्तम्या लुक् । अवक्रामत इति द्विवचनाद्वेद्यवक्रमणं सहैव द्वयोः । अत्र दक्षिणग्रहणमुत्तरसूत्र उत्तरग्रहणं च क्रमार्थं दक्षिणहविर्धानोत्तरवर्तन्यधिकरणको होमोऽध्वर्युणा पूर्वं कर्तव्य उत्तरहविर्धानोत्तरवर्तन्यधिकरणको होमः प्रतिप्रस्थात्राऽनन्तरं कर्तव्य इति । अन्यथाऽत्रानियतिः स्यात् । अन्तवचनं वेदिप्रान्तसंलग्नदेशग्रहणार्थम् । उत्तरत्र प्रतिप्रस्थातृग्रहणात्पूर्वत्र यजुर्वेदेनाध्वर्युरितिपरिभाषाप्राप्तोऽध्वर्युः कर्ता ।

इरावती धेनुमती इत्येवं प्रतिप्रस्थातोत्तरस्य ।

प्रतिशब्दोऽन्वर्थे । अध्वर्युमनु यागार्थं तिष्ठतीति प्रतिप्रस्थाता । प्रतिः सादृश्यार्थको वा । अध्वर्युरिव यागार्थं तिष्ठतीति प्रतिप्रस्थातेति । उत्तरस्येत्येव पाठो युक्तः सापेक्षत्वात् । उत्तरस्यामिति पाठस्त्वयुक्त एव । एवमित्यतिदेशादेवोत्तरवर्तन्याः प्राप्तौ तद्ग्रहणस्य व्यर्थत्वापत्तेः । प्रतिप्रस्थातृग्रहणमध्वर्युव्यावृत्त्यर्थम् । मयूखैरित्यन्तो मन्त्रः । उभयत्रापि दर्विहोमधर्मः । नाग्न्योरन्तरागमने दोषः । तेनैव प्रत्यागमनम् । जुहोतिचोदितत्वात्स्वाहाकारः ।

अध्वर्युर्दक्षिणस्य हविर्धानस्य कर्माणि करोति प्रतिप्रस्थातोत्तरस्य ।

यत्र द्विवचनं श्रूयते मन्त्रभेदश्च नास्ति तत्र साहित्यमेवेति बोधयितुमियं परिभाषा। एतद्व्यतिरिक्तस्थले तु एतदभावादेव साहित्यव्यावृत्तिर्भवति । एतादृशं स्थलं मेथीनिहननमेव । धर्मभेदादेतस्य पृथगुपादानम् । प्रकरणादेव विशेष्यस्य हविर्धानस्य लाभे पुनर्हविर्धानग्रहणं दक्षिणस्य हविर्धानस्य पश्चादक्षं द्रोणकलश१ सदशापवित्रं प्रयुनक्ति उत्तरस्य नीड आहवनीयं तस्यैव प्रधुरे पूतभृतं पश्चादक्षं तिस्र एकधनाः स्थालीरित्येतस्य पात्रप्रयोगस्य तत्तद्धविर्धानसंबन्धित्वादेतस्याः परिभाषाया अत्रापि प्राप्तिः स्यात्सा मा भूत्किंतु हविर्धानसंस्कारककर्मविषय एवैतस्याः परिभाषायाः प्रवृत्तिः स्यात्पात्रप्रयोगस्य तु हविर्धानसंस्कारककर्मत्वाभावान्नात्र परिभाषायाः प्रवृत्तिरित्येतदर्थम् ।

---

१ ङ. ज. झ. ञ. °णाचेचक्रम इति ।

अपजन्यं भयं नुदाप चक्राणि वर्तय गृहं
सोमस्य गच्छतमिन्द्रस्य सꣳसदमिति पश्चार्धे
वेदेर्वितृतीयदेशे मनसा होता पदा जन्यं
भयं प्रतिनुदत्यध्वर्युर्यजमानो ब्रह्मा वा ।

याजुषहौत्रसत्त्वेऽत्र होतृकर्म याजुषरीत्यैव वेदेर्महावेदेः पश्चार्धे, कथंभूते वितृतीयदेशे विगतस्तृतीयो देशः पश्चार्ध्यः पूर्वार्ध्यो वा तस्मिन्होता मनसा मन्त्रमुक्त्वा पदा पादेन जन्यं जनसंबन्धि भयं प्रतिनुदति निरसनमुद्रया पांसुप्रत्यसनेन वा दूरी करोतीत्यर्थः । मन्त्रपाठेनैवात्र दूरीकरणम् । आच्छिद्रिकप्रश्नान्तर्गतेन गच्छतमित्यन्तेन मन्त्रेणायं विकल्पः । तच्च भयं कर्मण एव नतु होत्रध्वर्युयजमानब्रह्मणाम् । विकल्पस्वरसादयमर्थो लभ्यते । अत्र पादस्यानिर्दिष्टाङ्गत्वेऽपि दक्षिणवचनाभावादनियमः । होतृशब्दार्थो बह्वृचब्राह्मणे यदेवामुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वमिति । जुहोतीति होतेति व्युत्पत्तिर्नात्रोपयुज्यते । अतिप्रसक्तत्वात् । तत्र वैकल्पिकान्कर्तॄनाह—अध्वर्युरित्यादिना । अध्वर्युशब्दव्युत्पत्तिर्नाध्वर्युः सोमं विचिनुयादित्येतत्सूत्रव्याख्यानावसर उक्ता । यजमानशब्दव्युत्पत्तिस्तु अग्निष्टोमयाजमानसूत्रे वक्ष्यते । ब्रह्मशब्दव्युत्पत्तिर्मदन्तीभिः पाणीन्प्रक्षालयन्ते ब्रह्मा राजानं विस्रꣳसयतीतिसूत्रव्याख्यानावसर उक्ता ।

अपरेणोत्तरवेदिं त्रीन्प्रतीचः प्रक्रमान्प्रतिविक्रम्यात्र
रमेथामित्यभितः पृष्ठ्यां नभ्यस्थे स्थापयतः ।

उत्तरा चासौ वेदिश्चोत्तरवेदिः । उत्तरत्वमुत्कृष्टत्वम् । स चोकर्ष ऐष्टिकपाशुकसौमिकादिबहुतन्त्रार्थकाग्न्यधिकरणत्वरूपगुणाधिक्यात् । सपत्नीबाधनार्थकसूक्तान्तर्गत उत्तराऽहमुत्तर इत्यस्मिन्मन्त्र उत्तरशब्दस्योत्कर्षार्थत्वदर्शनात् । योगरूढं पदम् । प्रतीचः प्रत्यक्संस्थान् । त्रीनिति वचनं चतुरादिव्यावृत्त्यर्थम् । प्रतिशब्द ऋजुतया प्रक्रमाः क्रमितव्या इत्यर्थं द्योतयितुम् । विशब्दो येन पदेन प्रक्रमेण वा मानं कृतं ततोऽप्यभीष्टानुरोधेन माने वृद्धिं गमयति । उत्तरवेदिपश्चार्ध्यशङ्कुमभितो दक्षिण उत्तरे चापरभागोऽत्र विवक्षितः । अभितःपरितःसमयानिकषाहाप्रतियोगेऽपीत्यनेन पृष्ठ्यामिति द्वितीया । यथोत्तरवेदेः पश्चादभीष्टवृद्धिमत्सु त्रिषु प्रक्रमेषु हविर्धानयोर्नभ्यस्थे भवतस्तथा पृष्ठ्यामभितोऽनसी स्थापयतः । दक्षिणस्योत्तरं नभ्यस्थमुत्तरस्य दक्षिणं नभ्यस्थमभितः पृष्ठ्यां भवति । नभ्यं चक्रं तस्य यन्मध्यमं फलकं यत्र नाभिः क्रियते मध्येनभ्यमिति लिङ्गात् , तत्फलकाधारफलकस्थिते चक्रे स्थापयतः । तेन चक्राधारत्वेन स्थिते भवतो न भूमिस्थिते भवत इत्यर्थः । हविर्धानयोः परिशिष्टचक-

---

१ ज. ञ ञ ढ. °न्प्रक्र° ।

द्वयस्यार्थादेतदनुरोधेनैव । उगवादिभ्यो यदिति यत्प्रत्यये नाभि नभं चेति नाभिशब्दस्य नभादेशः । नाभेर्नाकारस्य ह्रस्वः । पृथिव्या इत्यन्तो मन्त्रः ।

अन्तरालप्रमाणानियममाह—

यथार्थꣳ हविर्धानयोः ॥ १६ ॥ अन्तरालं कुरुतः ।

यथार्थं यथाप्रयोजनम् , अर्थमनतिक्रम्य यथार्थम् । पदार्थानतिवृत्तिरूपयथार्थसमासोऽयम् । प्रयोजनादधिकमुभयोर्मध्येऽन्तरालं न कर्तव्यमित्यर्थः ।

वैष्णवमसि विष्णुस्त्वोत्तभ्नात्वित्युपस्तभ्नुतः ।

उपस्तम्भनाभ्यां काष्ठाभ्यामिति शेषः ।

पुरस्तादुन्नते भवतः ।

उपस्तम्भनं तथा कर्तव्यं यथा पुरस्तादुन्नते शकटे भवत इत्यर्थः ।

दिवो वा विष्णवुत वा पृथिव्या इत्याशीर्पदयर्चा दक्षिणस्य हविर्धानस्य दक्षिणं कर्णातर्दमपरेण मेथीं निहन्ति विष्णोर्नुकमित्युत्तरस्योत्तरं कर्णातर्दमपरेण प्रतिप्रस्थाता ।

आशीः प्रार्थनार्थकानि पदानि यस्यां साऽऽशीर्पदा तयाऽऽशीर्पदया, एतादृश्यर्चेत्यर्थः । हस्तौ पृणस्व बहुभिर्वस्व्यैरराप्रयच्छ दक्षिणादोत सव्यादिति आशीः प्रार्थनार्थकानि पदानि । आशीर्पदयेति ज्ञानार्थम् । ज्ञानाभावे यजुर्भ्रेषप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ होतव्यम् । दक्षिणस्य हविर्धानस्येति वचनं ब्राह्मणानुकरणार्थम् । दक्षिणस्य हविर्धानस्येत्येतस्योत्तरत्रानुवृत्तिं वारयितुमुत्तरस्येति वचनमावश्यकमेव । दक्षिणं कर्णातर्दमित्यत्र दक्षिणग्रहणमुत्तरकर्णातर्दव्यावृत्त्यर्थम् । कर्णातर्दशब्देनेषयोः संधानकील उच्यते । कर्णातर्दमित्यत्र द्वितीया, एनपा द्वितीयेति सूत्रेण । मेथी बन्धनार्थो दृढः स्तम्भः । उत्तरं कर्णातर्दमित्यत्रोत्तरग्रहणं दक्षिणव्यावृत्त्यर्थम् । मेथीं निहन्तीत्यनुषज्यते । सव्यादित्यन्तः पूर्वो मन्त्रः । त्रेधोरुगाय इत्यन्त उत्तरः । विष्णोर्वीर्याणि प्रवोचमित्यनेन लिङ्गेनाऽऽशीर्पदसंज्ञा विष्णोर्नुकमित्येतस्या अपि । अथवा दिवो वा विष्णवित्येतस्या एवाऽऽशीर्पदसंज्ञा श्रुतावुक्ता तदनुरोधेन सूत्रेऽपि दिवो वेत्येतस्या एवेयं संज्ञा नोत्तरस्या इति । अस्मिन्पक्षे योगरूढत्वं पदस्य द्रष्टव्यम् ।

विष्णोर्ध्रुवमसीति तत्रैते निबध्नीतः ।

तत्र तयोर्मध्योरेते शकटे कर्णातर्दयोर्बध्नीतः । निशब्दो दार्ढ्यमाचष्टे । बन्धनं रज्ज्वा वेष्टनम् ।

विष्णोर्ध्रुवोऽसीति ग्रन्थी कुरुतस्तौ प्रज्ञातौ भवतः ।

वेष्टितरज्ज्वोर्ग्रन्थी कुरुतः । तौ ग्रन्थी प्रज्ञातौ दृढौ, सदोहविर्धानानां पूर्वकृतान्ग्रन्थीन्विस्रस्येत्यग्रे सूत्रकृता ग्रन्थिविस्रंसनस्य विधास्यमानत्वात्तावत्पर्यन्तं प्रज्ञातत्वम् ।

ऊर्ध्वाः शम्याः समुत्कृष्योपरिष्टात्परिवेष्टयतो यथा सुष्ठु ।

ऊर्ध्वा उत्पाट्याधःकुम्बाः प्रतिमुच्य रज्ज्वोपरिष्टात्परिवेष्टयतो यथा न पततस्तथा दृढं परिवेष्टयत इत्यर्थः । ऊर्ध्वत्वे हेतुभूतां श्रुतिमाहाऽऽपस्तम्बः—उत्ताना हि देवगवा वहन्तीति विज्ञायत इति । हिर्हेतौ ।

पर्यन्त्याः स्थूणा मिनुतः ।

पर्यन्तमर्हन्ति पर्यन्त्याः । दण्डादित्वाद्यत्प्रत्ययो नतु पर्यन्ते भवा इति । तत्र भवनाभावात् । अथवा भवनमत्र सत्तारूपं द्रष्टव्यम् । सत्ता चात्र भाविनी ज्ञेया । स्थूणा द्विशाखास्तम्भा मिनुतः खनतः । साध्यानां९ षडहेन स्वर्गकामः पृष्ठ्यः षडहो बृहद्रथंतराभ्यां यन्त्याश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतश्चक्रीवती भवत इत्यत्राश्वत्थवृक्षनियमादत्र स्थूणानां वृक्षा अनियता यज्ञिया ज्ञेयाः । अत्रापि यथा सुष्ठ्विति पदमन्वेति ।

यथाऽग्रेण खरं संचरो भवति ।

यथाऽग्रेण खरं संचरो मार्गो भवति तथा मिनुत इति पूर्वेणान्वयः ।

अग्रेण हविर्धाने स्थूणे निहत्य तयोरुदग्ग्रं वंशं निधाय प्राचो वंशानादधाति ।

अग्रेण हविर्धाने स्थूणे निहत्येत्यनेनेदं ज्ञायते हविर्धानाग्रे हविर्धानमण्डपार्धे यथा भवतस्तथा स्थापनीये तदग्रसमीपे एते स्थूणे । एते च स्थूणे मण्डपमध्यस्थे मण्डपाधारभूते भवत इति । तयोः स्थूणयोः, उदक्, अग्रं यस्य स उदगग्रस्तमुदगग्रम् । एतादृशं वंशं वेणुस्तम्भं निधाय स्थापयित्वा प्राचः प्राचीनाग्रान्वंशान्सर्वतः पर्याप्तान्निदधाति स्थापयति ।

विष्णोः पृष्ठमसीति मध्यमं छदिरधि निदधाति ।

अधि उपरि वंशेषु परिशेषादितरे तूष्णीम् । तूष्णीमितरे छदिषी अध्यूह्येत्येवाऽऽपस्तम्बः ।

विष्णो रराटमसीति पुरस्ताद्रराटीं परिश्रयति ।

पुरस्तात्पुरोभागे करिष्यमाणद्वारप्रदेशे रराटीं वक्ष्यमाणलक्षणां परिश्रयति उपरिष्टाच्छ्लेषयतीत्यर्थः ।

तस्याः स्वरूपमाह—

तेजनी रराट्यैषीकी प्राच्यणू+काण्डा मध्ये विततां तां वंशे निबध्नाति ।

तेजनी यष्टिः । यथोक्तं बाह्वृच्ये–तेजन्या उभयतोऽन्तयोरिति । चतुर्थः संधिर्हीषुरनीकं शल्यस्तेजनं पर्णानीति च । सोमः शल्यो विष्णुस्तेजनमिति च । ब्राह्म-

+ सूत्रपुस्तकेषु अणुकाण्डेति ह्रस्वपाठो लभ्यते ।

णेऽपि अग्निमनीकम् सोमम् शल्यं विष्णुं तेजनमिति । सा चैषीकी, इषीकतृणजन्ययष्टिकारूपा । प्राची प्रागायता मतूदीची । अणूकाण्डाऽस्थूलपर्वा । दीर्घश्छान्दसः । मध्ये वितता विष्यूता । क्वचित्पुस्तके तथैव पाठः । मध्ये सुषिरं कृत्वा सूत्रे प्रोता । एवंभूता तेजनीरूपा रराटी तां तोरणस्थानीययोः पूर्वद्वारस्थूणयोरुपरितनवंशे निबध्नातीत्यर्थः ।

विष्णोः श्नप्त्रे स्थ इति रराट्या अन्तौ व्यवास्यति ।

स्थूणयोर्निहिते उदगग्रे पूर्वप्रान्तस्थवंशे रराट्या रज्ज्वा अन्तौ व्यवास्यति । विशब्दो दार्ढ्यमाचष्टे । अवावनतः सन्नबध्नाति ।

कटांस्तेजनीश्च प्रवर्तं छदिषामन्तरालेष्वन्ववस्यन्ति ।

कटान्, तृणानि च्छर्दींषि तेजनीर्यष्टिकाश्च प्रवर्तं प्रवृत्य प्रवृत्य च्छदिषामन्तरालेषु अन्ववस्यन्ति तं तमन्तरालप्रदेशमनुलक्षीकृत्यावस्यन्ति अधोऽधो योजयन्तीत्यर्थः । चकारस्तृणसंग्रहार्थः । अत्र बहुवचनश्रवणात्परिकर्मिणः कर्तारः । तेजन्यो यष्टयः । पूर्ववत्काभिश्चियष्टिभिः सह कटान्बद्ध्वा बद्ध्वा तत्र च्छिद्रेषु ददतीत्यर्थः ।

तानन्तर्वर्ता इत्याचक्षते ।

य इमे तेजनीकटा बद्धा योजितास्तानन्तर्वर्ता इत्याचक्षते । अन्तर्वर्तान्करोति व्यावृत्त्या इति ब्राह्मणेऽन्तर्वर्तशब्देनाभिधीयन्त इत्यर्थः ।

परि त्वा गिर्वणो गिर इत्यभितः परिश्रयतः ।

हविर्धानमिति शेषः । द्विवचनादध्वर्युप्रतिप्रस्थातारौ । अभितः स्वं स्वं भागमभिलक्ष्य परितः श्रयत आच्छादयतः । जुष्टय इत्यन्तो मन्त्रः ।

पूर्वमपरं च द्वारे कुरुतः ।

चकारो द्वारे इत्येतदनन्तरमन्वेति । तथा चैवमर्थो भवति पूर्वमपरं द्वारे च कुरुत इति । चकारो महतां गवाक्षाणामपि करणं समुच्चेतुम् । एकं पूर्वमेकपरमिति द्वारद्वयं कुरुतः । पूर्वं पूर्वदिक्स्थमपरमपरदिक्स्थं कुरुतोऽध्वर्युप्रतिप्रस्थातारौ ।

तत्र विशेषमाह—

अध्वर्युर्दक्षिणां द्वारेयीं परिषीव्यति प्रतिप्रस्थातोत्तराम् ।

पूर्वा परिभाषा हविर्धानविषयिण्यत्र कथं प्रवर्तेतेतीदं सूत्रं कृतम् । द्वारशब्दाद्भवार्थे नद्यादित्वाड्ढक्, एयादेशः तेन द्वारे भवा द्वारेयीत्यर्थो भवति । अत्र भवनमुत्पत्तिर्न भवति असंभवात्, किंतु सत्ता । सा च भाविन्यत्र ग्राह्या । इदं च द्वारस्थूणाविशेषणम् । दक्षिणां द्वारस्थूणामध्वर्युः परिषीव्यति प्रतिप्रस्थातोत्तरां द्वारेयीमुत्तरां द्वारस्थूणाम् ।

विष्णोः स्यूरसीति सीव्यतः ।

सीवनं तु बौधायनो व्याचष्टे—अथ दक्षिणद्वार्बाहौ कुशहस्तमुपनिगृह्य दर्भेणेन प्रवयतीति । विष्णोः स्यूरसीत्यध्वर्युर्दक्षिणां द्वारेयीं परिषीव्यति प्रतिप्रस्थातोत्तरामित्ये- तावतैव सिद्धौ सीव्यति सीव्यत इति क्रियाद्वयं पक्षद्वयज्ञापनार्थम् । पूर्वसूत्रेण क्रमेण परिषीवणं विधीयत उत्तरसूत्रेण सह परिषीवणं विधीयत इति विरोधाद्विकल्पः । मन्त्रस्तु देहलीदीपन्यायेनोभयत्रान्वेति । दर्भणच्छिद्रप्रोतया रज्ज्वा कूर्चवत्कुशानुपचा- रयन्नाऽऽग्रद्विष्टयतीत्यर्थः ।

विष्णोर्ध्रुवोऽसीति ग्रन्थी कुरुतस्तौ प्रज्ञातौ भवतः ।

स्पष्टोऽर्थः । यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्रंसयेदमेहेनाध्वर्युः प्रमीयेत तस्मात्स विस्रस्य इति ब्राह्मणे प्रथमकृतग्रन्थेरविस्रंसने दोषश्रवणात्प्रज्ञातं ग्रन्थिकर- णम् । सदोहविर्धानानां पूर्वकृतान्ग्रन्थीन्विस्रस्येत्यन्ते विस्रंसनं विहितमेव सूत्रकृता । अमेहेन मूत्रनिरोधेन । तस्माद्यत्र यत्र प्रथमग्रन्थयस्तत्र तत्र ग्रथितास्ते सर्वे प्रज्ञाताः कार्याः पश्चाद्विस्रंसनीयाश्चेति भावः । विष्णोर्ध्रुवमसीत्यनेन विकल्पतेऽयं मन्त्रः । अथवा पूर्वत्र विनियोगो य उक्तः स एव वैतद्विनियोगः ।

वैष्णवमसि विष्णवे त्वेति संमितमभिमृशतः ।

संमितं विमितं हविर्धानमिति शेषः ।

प्र तद्विष्णुः स्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुव- नानि विश्वेति संमिताद्धविर्धानात्प्रागुपनिष्क्रामतः ।

संमितात्, विमितात् । हविः सोमाख्यं धीयते स्थाप्यते यस्मिंस्तस्माद्धविर्धाना- द्धविर्धानमण्डपात्प्राक्पुर उपनिष्क्रामतो गच्छतः । अध्वर्युप्रतिप्रस्थाताराविति शेषः । तयोरेवोपस्थितत्वात् । प्रागित्येव पाठः । प्राञ्चिति पाठे कर्तृविशेषणं स्यात्, तथा सति प्राञ्चाविति द्विवचनापत्तिः स्यात् । अन्यत्स्पष्टम् ।

उपनिष्क्रम्य वा जपतः ।

उपविष्टाभ्यां तिष्ठद्भ्यां वा जपः कार्यः ।

त्रीन्प्राचः प्रक्रमान्प्रक्रम्य जपत इत्येकेषाम् ॥ १७ ॥

इति हिरण्यकेशिसूत्रे सप्तमप्रश्ने पञ्चमः पटलः ।

प्रक्रममानपक्षेपि प्रक्रम्यत इति प्रक्रम इति व्युत्पत्त्या पदमेवात्र ग्राह्यम् । यस्यो- रुषु त्रिषु विक्रमणेष्विति मन्त्रवर्णात् । त्रिः प्रक्रामतीति विज्ञायत इति भरद्वाजेन

व्यक्तवचनाच्च । हविर्धानकरणे विशेषमाहाऽऽपस्तम्बः—पुरस्तादुन्नतं पश्चान्निनतꣳ हविर्धानमिति । उपरवकर्मण उपस्थितत्वादध्वर्योर्निष्क्रमणप्रयोजनाभावेऽप्यदृष्टार्थमस्मिन्नेव काले कृत्वा पुनः प्रविश्योपरवकर्म कर्तव्यमिति केचित् । अन्ये तु दृष्टार्थं मत्वाऽऽग्नीध्रीयविमानकाल एव निष्क्रामत्यध्वर्युः । इतरोऽत्रैव निष्क्रामति । यजमानस्यापि याजमानसूत्रे निष्क्रमणं वक्ष्यति । तस्याप्यध्वर्युवदेवेत्याहुः । वस्तुतोऽत्रैव वाऽऽग्नीध्रीयविमानकाल एव वोभयोर्निष्क्रमणं सहैवेत्येव युक्तम् । यजमानस्य तु धिष्णियनिवपनोत्तरमेव निष्क्रमणमित्यत्र साधकं याजमानसूत्रे वक्ष्यते ।

इति ओकोपाह्वश्रीमदग्निष्टोमयाजिसहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य पञ्चमः पटलः ॥ ५ ॥

अथ सप्तमप्रश्ने षष्ठः पटलः ।

दक्षिणस्य हविर्धानस्य पुरोक्षं चत्वार उपरवा भवन्त्यवान्तरदेशेषु प्रादेशमुखाः प्रादेशान्तराला बाहुमात्राः संतृण्णा अधस्ताद्विधृता उपरिष्टात् ।

दक्षिणग्रहणमुत्तरव्यावृत्त्यर्थम् । दक्षिणस्येत्येतावत्युच्यमाने चक्रस्यापि विशेष्यत्वसंभवात् । षष्ठ्याश्च सामीप्यार्थत्वस्यापि कदाचित्सत्त्वाद्दक्षिणचक्रसमीपवर्तिसंलग्नो योऽक्षप्रदेशस्तस्य पुर इत्यप्यर्थः स्यात्स मा भूत्किंतु मध्ये यथा स्यादित्येतादृशार्थविशेषद्योतनाय हविर्धानग्रहणम् । अक्षस्य पुरः पुरोक्षं पुरस्तादक्षस्येत्यर्थः । षष्ठ्याः सामीप्यार्थत्वकल्पनयाऽक्षस्य समीप एव । एवं चाधस्ताद्दक्षिणस्य हविर्धानस्येति फलितं भवति । स्पष्टमेवामुमर्थमाहाऽऽपस्तम्बः—दक्षिणस्य हविर्धानस्याधस्तात्पुरोक्षं चतुर उपरवानवान्तरदेशेषु प्रादेशमुखान्प्रादेशान्तरालान्करोतीति । चत्वार उपरवा भवन्तीत्येतत्सामान्यप्रतिज्ञानम् । उपोपरिष्टाद्ग्राव्णां रवः शब्दो येषु ते । अवान्तरदेशेषु आग्नेयैशाननैर्ऋत्यवायव्यकोणेषु । प्रादेशमितानि मुखानि येषां ते प्रादेशमुखाः । प्रादेशमितान्यन्तरालानि दिक्षु येषां ते प्रादेशान्तरालाः । अन्तरालमानमपि प्रादेश इत्यर्थः । बाहुरेव मात्रा प्रमाणं येषां ते बाहुमात्राः । संतृण्णाः सम्यगेकीभूताः । एतद्द्वयमधस्तात्सर्वेषां भवति । विधृताः पृथग्भूता उपरिष्टात्सर्वे भवन्ति ।

अग्नेरादानं परिलेखनं च यूपे व्याख्यातम् ।

देवस्य त्वेत्यग्नेरादानं परिलिखितमिति परिलेखनं च यूपे यूपनिमित्तके कर्मणि व्याख्यातमुक्तं यथा तथाऽत्र कर्तव्यमित्यर्थः । चकारोऽनुक्ताया अवटखननविषयकान्यकर्तृकतायाः समुच्चयार्थः ।

परिलेखनक्रममाह—

पूर्वयोर्दक्षिणं परिलिख्यापरयोरुत्तरं परिलिखत्यपरयोर्दक्षिणं पूर्वयोरुत्तरम् ।

पूर्वयोर्दक्षिण आग्नेयीस्थ उपरवः । अपरयोरुत्तरो वायवीस्थः । अपरयोर्दक्षिणो नैर्ऋतीस्थः । पूर्वयोरुत्तर ऐशानीस्थः । अनेनैवमितरान्प्रदक्षिणमुत्तरापवर्गमितिसूत्रान्तरोक्तः क्रमो बाध्यते ।

एवमनुपूर्वाण्येषां कर्माणि क्रियन्ते ।

एवं परिलेखनोक्तोऽनुपूर्वः क्रमो येषां तानि एषामुपरवाणां कर्माणि भवन्ति । बाहुमात्रा इति पूर्वत्र स्वतन्त्रतयोक्तेः परिलेखनोत्तरं तूष्णीमेव बाहुमात्रं खननम् । इदं चान्यकर्तृकमिति सूचितमेव प्राक् । संतृण्णता विधृतता च बाहुमात्रखननाव्यवहितोत्तरमेव संपादनीया । अमुमर्थं स्पष्टमाहाऽऽपस्तम्बः—अधस्तात्संतृण्णा भवन्त्युपरिष्टादसंभिन्नास्तूष्णीं बाहुमात्रान्खात्वेति । तूष्णीं बाहुमात्रान्खात्वाऽधस्तात्संतृण्णा भवन्तीत्यन्वयः । बौधायनेन तु बाहुमात्रखननार्थकप्रैषपूर्वकमुन्नेतृकर्तृकं बाहुमात्रखननादिकमुक्तम् ।

एवमनुपूर्वाण्येषां कर्माणि क्रियन्त इत्युक्तं तानि कर्माण्याह—

रक्षोहणो वलगहनो वैष्णवान्खनामीति खनति ।

उपरवान्बाहुमात्रतोऽधिकं किंचित्खनति । खनन उदकस्पर्शः स्मार्तः ।

रक्षोहणो वलगहनो वैष्णवान्निष्खिदामीति निष्खिदति ।

खानितायाः मृदः शिथिलीकरणं निष्खेदनम् । अत्रोदकस्पर्शं केचिदिच्छन्ति ।

बृहन्नसीत्यभ्रिं प्रहरति ।

शिथिलीकृतायां मृदि अभ्रिं प्रहरति उपगूहति । एतावानेव मन्त्रः । नतु बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वदेत्येतस्य मन्त्रस्य प्रतीकग्रहणं लिङ्गविरोधात् ।

विराडसीति बाहुमुपावहरति बाहू वा ।

सपत्नहेत्यन्तो मन्त्रः । उत्तरेणोत्तरेण मन्त्रेण बाहुमुपावहरतीति वक्ष्यमाणसूत्राल्लिङ्गात् । उपावहरति प्रहृताभ्रिकाया मृदः समीपे बाहुं बाहू वाऽवनतः सन्नयतीत्यर्थः ।

इदमहं तं वलगमुद्वपामीति पांसूनुद्वपति ।

अभ्र्या पांसून्पात्रान्तर उद्वपति प्रक्षिपति । बाहोरेवोपावहरणमिति पक्ष एकेनैव हस्तेन पांसूद्वपनम् । बाह्वोरुपावहरणमिति पक्षे द्वाभ्यां हस्ताभ्याम् । निचरवानेत्यन्तो मन्त्रः ।

इदमेनमधरं करोमीत्युपरवबिलेऽववाधते ।

उपरवबिलसमीपवर्तिसमन्तप्रदेशेऽववाधतेऽवनतो भूत्वा हस्तेन निपीडयतीत्यर्थः । अरातीयतीत्यन्तो मन्त्रः ।

निरस्तो वलग इति हरति ।

उदुप्तदेशाद्धरति पात्रेण ।

अववाढो दुरस्युरिति यत्र खरं
करिष्यन्भवति तस्मिन्देशे निवपति ।

खरः सोमसंबन्धिपात्रासादनार्थश्चतुरश्रोऽर्थसिद्धपरिमाणश्चत्वरः । निवपनं प्रक्षेपणम् ।

गायत्रेण छन्दसाऽववाढो वलग इत्युपरवबिलेऽभ्र्या निगृह्णाति ।

दार्ढ्यार्थमभ्र्या नितरां गृह्णाति संहन्तीत्यर्थः ।

एवमितरेषु ।

उपरवेष्विति शेषः । एवं खननादिरभ्र्या निग्रहणान्तो विधिरितरेषूपरवेष्वपि भवतीत्यर्थः ।

तत्र विशेषमाह—

उत्तरेणोत्तरेण मन्त्रेण बाहुमुपावहरत्यु-
त्तरेणोत्तरेण च छन्दसा निगृह्णाति ।

सम्राडसीत्ययं मन्त्रः पूर्वस्मादुत्तरस्तेन द्वितीये बाहुमुपावहरति । स्वराडसीत्ययं मन्त्रः सम्राडसीत्येतस्मादुत्तरस्तेन तृतीये बाहुमुपावहरति । विश्वाराडसीत्ययं मन्त्रः स्वराडसी- त्येतस्मादुत्तरस्तेन चतुर्थे बाहुमुपावहरति । इदमुपलक्षणं बाहू वेत्यस्य पक्षस्य । भ्रातृ- व्यहा, अभिमातिहा, विश्वासां नाष्ट्राणाꣳ हन्तेति मन्त्रत्रयान्ताः क्रमेण ज्ञेयाः ।

उत्तरेणोत्तरेण च छन्दसा निगृह्णातीत्युक्तं तत्र स्वशाखायां गायत्रच्छन्दस एवाऽऽम्नानादुत्तरं छन्दः किं किं ग्राह्यमित्याकाङ्क्षायामाह—

गायत्रं त्रैष्टुभं जागतमानुष्टुभमित्याम्नातानि छन्दांसि ।

भवन्तीति शेषः । आम्नातानि शाखान्तरे । शाखान्तरे चत्वार्याम्नातानि नतु केवलं गायत्रमेव च्छन्दः स्वशाखायामिवाऽऽम्नातम् । अत्र गायत्रग्रहणं शाखान्तराभिप्रायेण । अथवा गायत्रेणैव केवलेन सर्वेषां निग्रहणमित्ययमपि पक्षोऽस्तीति ज्ञापनार्थम् । तथा- चाऽऽपस्तम्बः—प्रथमं वा सर्वेष्विति । प्रथमं गायत्रं छन्दः ।

विराडसीति पूर्वयोर्दक्षिणं यजमानोऽवमृ-
शति सम्राडसीत्यपरयोरुत्तरमध्वर्युः ।

परस्परव्यावृत्त्यर्थमुभयोर्ग्रहणम् । पूर्वयोर्दक्षिण आग्नेयीस्थोपरवः । अव, उपरवाधो

मृशति । अपरयोरुत्तरो वायवीस्थोपरवः । अध्वर्युरित्यनन्तरमवमृशतीति शेषः । पूर्ववदन्त उभयोर्मन्त्रयोः ।

संमृश इमानायुषे वर्चसे च देवानां निधिरसि द्वेषो यवनो युयोध्यस्मद्द्वेषाꣳसि यानि कानि चकृम देवानामिदं निहितं यदस्त्यथाभाहि मविशश्वतस्त्वः कृण्वानो अन्याꣳ अधरान्सपत्नानित्यधस्तात्संमृशतः ।

अधस्तात्सम्यक्परस्परं मृशतः । संमृशतीमानायुष इति अपपाठ एव । एतादृशो पाठ एकत्रावमृशति एकत्र संमृशतीत्युपसर्गकृतं क्रिययोर्वैरूप्यं स्यात् । अतः संमृश इमानायुष इत्येव पाठो युक्तः । आपस्तम्बेनापि तथैव पाठ उक्तः । संमृश इति मन्त्रावयव एव । इमानिति द्वितीयान्तस्य पदस्य क्रियापदं विनाऽऽकाङ्क्षाशान्तेरभावात् ।

किमत्रेत्यध्वर्युः पृच्छति भद्रमिति यजमानः प्रत्याह तन्नौ सहेत्यध्वर्युः ।

किमत्रेत्यत्र यजमानः संबोध्यः । यजमानाध्वर्य्वोरधस्तात्स्थितहस्तयोरेव प्रश्नप्रतिवचने । भद्रमित्यत्राध्वर्युः संबोध्यः । तन्नौ सहेत्यत्र यजमानः संबोध्यः । तन्नौ सहेतिद्विवचनलिङ्गादध्वर्युनिष्ठमपि फलं तृतीयाध्यायेऽष्टमे पादे व्यपदेशाच्चेति सूत्रेण जैमिनिरपि अध्वर्युनिष्ठत्वमपि फलस्याऽऽह । सूत्रार्थस्तु यत्र व्यपदेशो भवति तन्नौ सहेति तत्रापि द्विवचनस्यानुपपत्तेर्ऋत्विग्गामित्वमेव फलस्येति । चकारः कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात्स्यादिति ऋत्विग्गामित्वमेव फलस्योक्तं तदनुकर्षणार्थः ।

स्वराडसीत्यपरयोर्दक्षिणं यजमानोऽवमृशति विश्वाराडसीति पूर्वयोरुत्तरमध्वर्युः ।

अपरयोर्दक्षिणो नैर्ऋतीस्थ उपरवः । पूर्वयोरुत्तर ऐशानीस्थ उपरवः । अन्यत्पूर्ववद्व्याख्येयम् । पूर्ववदन्तोऽनयोर्मन्त्रयोः ।

संमृशतो यथा पुरस्तात् ।

यथा पुरस्तादित्यनेन संमृश इमानायुष इति मन्त्रोऽधस्तात्प्रदेशश्च प्राप्यते । संमृशति यथा पुरस्तादित्यपपाठ एव ।

किमत्रेति यजमानः पृच्छति भद्रमित्यध्वर्युः प्रत्याह तन्म इति यजमानः ।

किमत्रेत्यत्राध्वर्युः संबोध्यः । भद्रमित्यत्र यजमानः संबोध्यः । तन्म इत्यत्राध्वर्युः संबोध्यः । अत्राप्यधस्तात्स्थितहस्तयोरेव प्रश्नप्रतिवचने ।

रक्षोहणो वलगहनः प्रोक्षामि वैष्णवानिति

॥ १८ ॥ यवमतीभिरद्भिरुपरवाञ्शिः प्रोक्षति ।

यवमतीभिर्यवमिश्राभिः । यवो यवौ यवा वाऽऽसु सन्तीति विग्रहत्रयस्यापि प्रकृते स्वीकारे बाधकाभावादेकेन यवेन द्वाभ्यां यवाभ्यां त्रिभिश्चतुरादिभिर्वाऽपि यवैर्मिश्रणम् । न यवसंख्यानियमः । अद्भिरिति वचनाद्दृष्ठोक्तसंस्काराभावोऽत्र । त्रिभिरित्यपि पाठः क्वचित्पुस्तके दृश्यते । अयमेव पाठो युक्तः । सर्वेषां युगपत्प्रोक्षणस्य नियमेनासंभवात् । एवमनुपूर्वाण्येषां कर्माणि क्रियन्त इत्यनेनात्रापि क्रमस्य प्रापणात् । सूत्रान्तरे स्पष्टतया क्रमस्यैवोक्तत्वात् । उपरवमन्त्रस्तन्त्रं स्याल्लोकवद्बहुवचनात्, न संनिपातित्वादसंनिपातिकर्मणां विशेषाग्रहणे कालैकत्वात्सकृद्वचनमिति जैमिनिना सूत्रद्वयेनास्यार्थस्योक्तेश्च । उपरवमन्त्रस्तन्त्रं स्यात्, बहुवचनात् । लोके यथैकस्मिन्बहुवचनमसमर्थं तद्वदिहापीति पूर्वसूत्रार्थः । संनिपातित्वान्मन्त्रस्य कर्मादौ संनिपतनशीलत्वात्, मन्त्रान्तकर्माद्योः संनिपतनशीलत्वात्करणमन्त्रत्वादिति यावत्करणमन्त्रे मन्त्रान्तेन कर्मादिसंनिपातनियमात् । खननस्योपक्रमो मन्त्रान्तेन संनिपतितस्तदर्थ एव मन्त्रो नान्येषामुपरवाणामलमुपकर्तुम् । करणमन्त्र एतादृशविशेषग्रहणात्सकृद्वचनं मन्त्रस्य न भवति । अतः प्रातिपदिकमात्रं कारकमात्रं च विवक्षितं, बहुवचनं त्वेकस्मिन्नेव पूजार्थं प्रयुक्तमिति द्रष्टव्यम् । न च पाशानित्यत्रापि बहुवचनस्याविवक्षा स्यादिति वाच्यम् । बहुवचनविवक्षितत्वस्य सर्वथैवात्रासंभवेन दृष्टान्तवैषम्येण पाशाधिकरण आपत्तेरभावात् । असंनिपातीनि कर्माणि यत्र मन्त्रान्तक्रियाद्योः संनिपातो नास्ति तान्यसंपातिकर्माणि तेषां मन्त्रक्रिययोरेकस्यान्तोऽपरस्याऽऽदिरित्ययं विशेषः । सोऽकरणमन्त्रे नास्ति । अतो विशेष(षा)ग्रहणादुभयोः कालैकत्वात्सकृदेव वचनमकरणमन्त्रस्य । तेनार्थात्करणमन्त्रस्याऽऽवृत्तिरिति उत्तरसूत्रार्थः । एकादशाध्याये चतुर्थे पादेऽस्ति । सूत्रे त्रिभिरिति पाठे सकृन्मन्त्रेण द्विस्तूष्णीमिति प्रत्युपरवम् । मन्त्रगतं बहुवचनमग्निमन्त्रगतबहुत्ववत्पूजार्थं ज्ञेयम् । त्रिरिति पाठेऽपि सकृदेव मन्त्रः संभवात् । असंभवे मन्त्रावृत्तिः क्रियासमाप्त्यनुरोधेन ।

रक्षोहणो वलगहनोऽवनयामि वैष्णवानिति यवमतीरपोऽवनयति ।

उपरवेषु यवमिश्रा अपः प्रक्षिपति । सर्वत्र मन्त्रावृत्तिः ।

यवोऽसीति यवं प्रास्यति ।

यवोऽसीति मन्त्र एकवचनश्रवणाद्यवं प्रास्यतीत्यत्राप्येकवचनम् । अविवक्षितमेतदेकवचनम् । तेन बहव एव यवाः प्रक्षेपणीयाः । तथा च बौधायनः—अथैषु यवान् प्रस्कन्दयति यवोऽसि यवयास्मद्द्वेषो यवयारातीरितीति । प्रासनं प्रक्षेपणम् । अत्र

१ ख. ग. °शेषम्° ।

प्रशब्दस्ताडनमिव क्षेपणं द्योतयति। यवयास्मद्द्वेषो यवयारातीरिति लिङ्गात्। अरातीरित्यन्तो मन्त्रः।

रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवानिति प्राचा बर्हिषाऽवस्तृणाति ।

अत्र बर्हिःशब्दस्तृणजातिवाची नतु संस्कारवाचीति ज्ञेयम्। एवं च च्छेदनादयो बर्हिर्धर्मा न भवन्ति। तथा च प्रथमाध्याये चतुर्थपादे जैमिनिः—बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्द इति। सूत्रार्थस्तु—बर्हिराज्ययोरसंस्कारे जातिमात्रे शब्दलाभाद्याज्ञिकप्रयोगेऽपि जात्यनुगमाद्बर्हिर्लुनातीत्यत्र च यद्बर्हिस्तल्लुनातीतिवाक्यार्थानुगुण्यादन्यथाऽतिक्लिष्टकल्पनापत्तेरतच्छब्दः संस्कारनिमित्तकः शब्दो नेति। प्राचा प्राचीनाग्रेण बर्हिषा तृणेनावाधः प्रदेशान्स्तृणाति अन्तर्हितान्करोति।

रक्षोहणो वलगहनोऽभिजुहोमि वैष्णवानिति हिरण्यमन्तर्धाय स्रुवेणाभिजुहोति ।

क्रमेणोपरवभूमिषु हिरण्यमन्तर्धाय तथैव मध्ये निधाय स्रुवेणाभिजुहोति हिरण्यमभिलक्षीकृत्य जुहोति। जुहोतिचोदितत्वात्स्वाहाकारः। दर्विहोमधर्मः। अग्न्योरन्तरा गमने नात्र दोषः। तेनैव प्रत्यागमनम्। स्रुवग्रहणं जुह्वाव्यावृत्त्यर्थम्।

रक्षोहणौ वलगहनौ प्रोक्षामि वैष्णवे इत्यधिषवणफलके प्रोक्षत्यौदुम्बरे कार्ष्मर्यमये पालाशे वा तष्टे प्रधिमुखे सꣳहिते पुरस्तात्समापिकर्ते पश्चाद्द्व्यङ्गुलेन त्र्यङ्गुलेन चतुरङ्गुलेन वा पश्चादसꣳहिते संतृण्णे असंतृण्णे वा ।

फलकशब्दस्य नपुंसकलिङ्गत्वाद्वैष्णवे इत्येव पाठः। उत्तरमन्त्रेषु स्त्रीलिङ्गपाठस्तु छान्दसत्वेन समर्थनीयः। रक्षोहणौ वलगहनौ प्रोक्षामि वैष्णवी इति केचित्पठन्ति। ययोरधि उपरि सोमः सूयते कण्ड्यते ते अधिषवणे, अधिषवणे च ते फलके चाधिषवणफलके ते अनेन मन्त्रेण संस्कृताभिरद्भिः प्रोक्षति युगपदेव, द्विवचनलिङ्गात्संभवाच्च। तयोः स्वरूपमाह—औदुम्बरे इत्यादिना। औदुम्बरे उदुम्बरविकारभूते। बिल्वादित्वाद्विकारार्थेऽण्प्रत्ययः। कार्ष्मर्यः श्रीपर्णीवृक्षस्तद्विकारभूते कार्ष्मर्यमये। नित्यं वृद्धशरादिभ्य इत्यनेन शरादित्वान्नित्यं मयट्प्रत्ययः। पालाशे पलाशविकारभूते। पलाशादिभ्यो वेत्यनेन वैकल्पिकोऽण्प्रत्ययः। तष्टे सर्वतः कपाटे इव। प्रधिर्धनुराकारं चक्रस्य फलकं तस्यैव मुखं ययोस्ते प्रधिमुखे। संहिते संश्लिष्टे। एतादृशे पुरस्ताद्भवतः। सममृजु। अपिरत्र च्छेदने किंचिद्विशेषं द्योतयितुम्। स च श्लैक्ष्ण्यरूपः। अपिकर्तं श्लैक्ष्ण्यविशिष्टं छेदनं ययोस्ते समापिकर्ते। एतादृशे पश्चाद्भवतः। समीचीनत्वार्थको वा। तेन समीचीनच्छेदनं कर्तव्यमिति सिद्धं भवति। तच्च श्लैक्ष्ण्यरूपमेव। अनेन पश्चात्प्रधिमुखता व्यावर्त्यते। पश्चात्फलकयोः पश्चिमप्रान्ते मध्ये

द्व्यङ्गुलाद्यन्यतममात्रमन्तरालं भवति । द्व्यङ्गुलेनेत्यत्र प्रमाणेनेति शेषः । एवं त्र्यङ्गुलेन चतुरङ्गुलेनेत्यत्रापि । इदं च प्राक्तिर्यक्च तिर्यगेव वा । तथा चायमर्थो भवति—दक्षिणफलकस्यैकाङ्गुलात्मकं सार्धाङ्गुलात्मकं द्व्यङ्गुलात्मकं वा पश्चिमप्रान्तोत्तरप्रान्तयोः समचतुरश्रअ(म)संभेदार्थं तक्ष्णा छिद्रं कारयेत् । उत्तरफलके तु पश्चिमप्रान्तदक्षिणप्रान्तयोस्तथैव । तिर्यगेवेति पक्षे दीर्घचतुरश्रं भवति । अनेन संश्लिष्टता पश्चाद्व्यावर्त्यते । समापिकर्ते द्व्यङ्गुलेन त्र्यङ्गुलेन चतुरङ्गुलेन वाऽसंश्लिष्टे च पश्चादिति व्यवहाद्वक्तव्ये भेदेन सूत्रकरणमसंहितत्वस्यानित्यताज्ञानार्थमिति द्रष्टव्यम् । संतर्दनं संश्लेषणं तद्विशिष्टे संतृण्णे द्वयोः समीभूतयोर्दृढसंश्लेषार्थं संश्लेषणप्रदेशौ तक्षणेन तनूकृत्यैकस्योपर्यपरं संश्लेषयेदित्येतत्संतर्दनम् । दक्षिणफलकस्योत्तरप्रान्त उत्तरफलकस्य दक्षिणप्रान्ते साम्येन छिद्रे कृत्वा दक्षिणफलकोत्तरप्रान्तस्थच्छिद्रे दारुमयं कीलकं दत्त्वा तं कीलकमुत्तरफलकदक्षिणप्रान्तस्थच्छिद्रे प्रवेशयेदित्येवं संतर्दनं तद्विशिष्टे इति केचिदाहुः । असंतृण्णे संतर्दनरहिते । दीर्घसोमे संतृद्ये धृत्या इति श्रुतौ संतृण्णे अभिषवणफलके इत्यहीनसूत्रे चाहीने संतर्दननियमादत्र विकल्प ऐच्छिक इति केचिदाहुः । वस्तुतः प्रकृतावसंतृण्णे दीर्घसोमशब्दवाच्येऽहीने संतृण्णे इति व्यवस्थितविकल्प एव । यद्यपीष्ट्याद्यपेक्षया दीर्घत्वं प्रकृतावपि तथाऽपि सोमगतदीर्घत्वस्य सोमान्तरापेक्षत्वाद्विकृतावुत्कर्षः संतर्दनस्य । तथा च तृतीयाध्याये तृतीयपादे जैमिनिः—संतर्दनं प्रकृतौ क्रयणवदनर्थलोपात्स्यादिति । क्रयणवदनर्थलोपादर्थलोपाभावात्संतर्दनं प्रकृतौ स्यात् । वासोहिरण्यप्रभृतिषु क्रयद्रव्येष्वेकेनैव क्रयसिद्धावितराणि वचनसामर्थ्याद्दीयमानान्यपि सुतरामानर्तिं कुर्वन्तीति वासःप्रभृतिषु यथा नार्थलोप एवं प्रकृतेरल्पकालत्वादसंतृण्णयोरपि फलकयोरभिषवसंभवेऽपि वचनसामर्थ्यात्संतर्दनाश्रयणे सति अभिषवे सौकर्यमेव लभ्यते नत्वर्थलोप इत्यलुप्तार्थत्वात्संतर्दनं प्रकृतौ स्यादिति पूर्वपक्षसूत्रमाचार्यैरित्थं व्याख्यातम् । भाष्यकारेण तु संतर्दनमलुप्तार्थत्वात्प्रकृतौ स्यात्संतर्दनासंतर्दनयोः क्रयणवद्विकल्पसंभवेनासंतर्दने सत्यपि संतर्दननिवेशोपपत्तेरित्येवं विकल्पे क्रयणवदित्येतद्दृष्टान्तीकृत्य व्याख्यातम् । अविशेषेण संस्थासु द्विरात्रादिषु चोत्कर्ष इति सिद्धान्तः । अत्र सूत्रं तत्रैव—उत्कर्षो वा ग्रहणाद्विशेषस्येति । दीर्घसोमत्वरूपविशेषस्य संस्थादिष्वेव सत्त्वेन तत्रैव संतर्दनं न प्रकृतौ तदभावादिति तदर्थः । दीर्घत्वं यजमानगतं गृहीत्वा पुनः प्रकृतावेव समावेशनकर्तृतो वा विशेषस्य तन्निमित्तत्वादिति सूत्रेण कर्ता यजमानस्तस्मात् , दीर्घत्वरूपविशेषस्य तन्निमित्तत्वाद्यजमाननिमित्तत्वादिति कर्तृतो वेति सूत्रोक्तपक्षं खण्डयति क्रतुतो वाऽर्थवादानुपपत्तेः स्यादिति सूत्रेण धृत्या इत्यर्थवादानुपपत्तेः क्रतुनः क्रतुनिमित्तक एव विशेषो नतु यजमाननिमित्तक इति

बौधायनोऽपि —अथास्यैते फलके दीर्घसोमे संतृण्णे भवतोऽसंतृण्णे एकाहे ते संसृष्टे उपदधातीति।

रक्षोहणौ वलगहनावुपदधामि वैष्णवी इत्यधिषवण-फलकाभ्यामुपरवानपिदधाति द्वौ दक्षिणेन द्वावुत्तरेण।

द्वाभ्यां हस्ताभ्यां युगपदधिषवणफलकाभ्यामुपरवानपिदधाति आच्छादयति। तत्र विशेषः—द्वावुपरवौ दक्षिणेनाधिषवणफलकेनापिदधाति द्वावुपरवावुत्तरेणाधिषवणफलकेनापिदधाति द्वौ दक्षिणेन द्वावुत्तरेणेति। अनेन द्वयोः प्रमाणं प्रयोजनं च तुल्यमिति गम्यते। तेन काष्ठलाभानुरोधेनैकेन फलकेन त्रयाणामपिधानमेकेनैकस्यापिधानमित्यपि कदाचित्स्यात्तन्निवारितं भवति। सकृदेव मन्त्रः। द्विवचनलिङ्गात्संभवाच्च। ताभ्यामुपरवानपिदधातीति तच्छब्दपरामर्शेनैव तयोर्लाभे पुनरधिषवणफलकाभ्यामितिवचनमनन्तरोक्तौदुम्बरत्वादिस्वरूपापेक्षायाः पाक्षिकत्वद्योतनार्थम्। अपिधाने द्वौ दक्षिणेन द्वावुत्तरेणेतिवचनेनोदक्संस्थतयाऽपिधानं नतु प्राक्संस्थतयेति गम्यते। एकेन द्वावेकेन द्वावित्येवमुच्यमाने प्राक्संस्थताऽपि पक्षे स्यात्सा मा भूदित्येतदर्थमेवं वचनम्। एकेन दक्षिणावपिदधात्येकेनोत्तरावित्येतावतैवोदक्संस्थतासिद्धावेवं वचनमिदं फलकं दक्षिणमिदमुत्तरमितिज्ञानार्थं पूर्वमेव चिह्नं कर्तव्यमितिज्ञापनार्थम्। दक्षिणेनोत्तरेणेति करणार्थकतृतीयान्ते पदे। अथैने शङ्कुभिः परिणि(ण)हन्तीति बौधायनेन षड्भिः शङ्कुभिरनवसर्पणार्थं स्तम्भनमुक्तं तदपि दृष्टार्थत्वात्कर्तव्यमेव। द्वाभ्यां पुरस्ताद्द्वाभ्यां पश्चाद्द्वाभ्यामभितोऽनवसर्पणायेति शङ्कुसमावेशनप्रकारोऽप्युक्तस्तेनैव। द्वयोः पुरो द्वौ शङ्कू द्वयोः पश्चाद्द्वौ दक्षिणस्य दक्षिणत एक उत्तरस्योत्तरत एक इत्यर्थः।

रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी इत्यौपरवेण पुरीषेण पर्यूहति।

अधिषवणफलके इति शेषः। उपरवाणामिदमौपरवं तेनौपरवेण पुरीषेण मृदा परि परितः समन्तादूहति वेष्टयतीत्यर्थः। संतृण्णत्वपक्षे पर्यूहणक्रियैकैव। असंतृण्णत्वपक्षे भिन्नैव। यद्यपि द्रव्यपृथक्त्वेऽभ्यावर्तेत इति परिभाषासूत्रान्मन्त्रावृत्तिरस्मिन्पक्षे प्राप्ता तथाऽपि मन्त्रस्य द्विवचनलिङ्गत्वात्सकृदेव भवति।

रक्षोहणौ वलगहनौ परिस्तृणामि वैष्णवी इति दर्भैः परिस्तृणाति।

अधिषवणफलके इति शेषः। परिस्तरणविषये दर्भसाध्यत्वस्यातिप्रसिद्धत्वेनार्थादेव तत्सिद्धौ दर्भवचनं प्रसूनरहिततृणविशेषसंग्रहार्थमच्छिन्नाग्रत्ववैशिष्ट्यसंग्रहार्थं च। परि परितः समन्तप्रदेशं दर्भैराच्छादयतीत्यर्थः। परितो वेष्टयतीति वाऽर्थः। अत्रापि संतृण्णासंतृण्णत्वभेदेन पूर्ववद्व्यवस्था द्रष्टव्या। प्रादक्षिण्यं परिभाषासिद्धम्।

---

१ ख. संतृण्णे।

रक्षोहणौ वलगहनौ वैष्णवी इत्यभिमन्त्रयते ।

अधिषवणफलके इति शेषः । स्पष्टोऽर्थः ।

रक्षोहत्वा वलगहत्प्रोक्षामि वैष्णवमित्यधिषवणचर्म प्रोक्षति ।

अधि उपरि सोमः सूयते कण्ड्यते यस्मिंस्तच्च तच्चर्म च । अद्भिरितिवचनाभावात्प्रोक्षणार्थानामपां संस्कारः ।

चर्मस्वरूपमाह—

लोहितमानडुहमुपरिष्टाल्लोमाऽऽसेचनवद्यथाऽभिषवायोपात्तं भवति ।

लोहितं रक्तम् । अनडुह इदमनडुहो विकारो वाऽऽनडुहम् । उपरिष्टाल्लोमानि यस्य । आसिच्यते. बहिरानीयते सोमरसो येन तदासेचनं तदस्यास्तीत्यासेचनवत् । आसेचनवदित्यनेन पुटाकारता गम्यते । यथाऽभिषवायेत्यनेनार्थसिद्धपरिमाणं प्रदर्शितम् । उपात्तं पर्याप्तम् । उपात्तमिति पाठ उपयुक्तमित्यर्थः । यथाशब्दस्य यावदित्यर्थ उभयत्रापि चर्मविशेषणान्येतानि ।

रक्षोहत्वा वलगहत्स्तृणामि वैष्णवमित्यधिषवणफलकयोरास्तृणाति ।

चर्मेति शेषः । चर्मणि विशेषमाहाऽऽपस्तम्बः—यस्मिन्निमीते तस्याधिषवणचर्म खरं परिकृत्तं चतुष्पुटमुपरिष्टादासेचनवदिति । अस्यार्थः—यस्मिंश्चर्मणि सोमो मितस्तस्यैकदेशेनाधिषवणचर्म कर्तव्यं तच्च खरं भवति न मृदूकृतम् । परि परितः समन्तभागे कृत्तं छेदितं चतुष्पुटं येषु पुटेषु ग्राव्णः(वाणः) साद्यन्ते । अनेन चतसृषु दिक्षु विदिक्षु वा चत्वारः पुटाः कर्तव्या इति गम्यते ।

तस्मिꣳश्चतुरो ग्राव्णः सꣳसादयत्यूर्ध्वसानूनाहननप्रकारानुपरं प्रथिष्ठं मध्ये पञ्चमम् ।

तस्मिन्नास्तृते चर्मणि । यद्यपि ग्रावशब्दः केवलपाषाणपरस्तथाऽपि अग्रे स्वरूपविशेषाभिधानात्कण्डनसाधनीभूत आकारविशिष्टो लोकप्रसिद्धः पाषाणोऽत्र ग्रावशब्देन ग्राह्यः । तत्संख्यामाह—चतुर इति । संसादयतीत्यत्रत्यसंशब्दो यथोर्ध्वसानव आसादिता न पतेयुस्तथेत्येतादृशमर्थं सूचयति । तत्र विशेषमाह—ऊर्ध्वसानूनाहननप्रकारानिति । सानुशब्दोऽग्रवाची । ऊर्ध्वानि सूक्ष्मरूपप्रदेशात्मकानि सानूनि येषां त ऊर्ध्वसानवस्तानूर्ध्वाग्रानिति यावत् । स्थूलप्रदेशो मुखं तदेव कण्डनसाधनम् । आहन्यतेऽनेनेत्याहननं आहननाय प्रकारो येषु त आहननप्रकारास्तान् । आहननं कण्डनं तदर्थं विशेषः स्थौल्यरूपः संज्ञार्थं कल्पनीय इत्यर्थः । कण्डनाधिकरणीभूतः

---

१ ङ. ज. झ. भ. ढ. °पात्तं भ° ।

पाषाण उपरः । मध्ये चर्मणो मध्य उपरं प्रथिष्ठम् । मध्य इति स्वतन्त्रवचनात्पृथगेतस्य सादनम् । उपरस्य महत्त्वेन चतुर्भिर्ग्रावभिः सहाऽऽसादनासंभवात्पृथगारम्भः । अतिशायने तमबिष्ठनाविति सूत्रेणातिशयितेऽर्थे पृथुशब्दादिष्ठन्प्रत्ययो र ऋतो हलादेर्लघोरित्यनेनेष्ठे परत ऋकारस्य रकारः, टेरिति सूत्रेणेष्ठे परत उकारस्य लोपस्तेन प्रथिष्ठमिति रूपं भवति । पञ्चममिति वचनं कण्डनाधिकरणीभूतस्याऽऽकारविशिष्टस्यापि पाषाणस्य ग्रावत्वमस्तीति प्रदर्शयितुम् । प्रयोजनं यदि ग्रावा भिद्येतेत्यादिना विहितं प्रायश्चित्तमुपरभेदेऽपि भवतीति ।

बृहन्नसीत्येकैकम् ।

एकैकमित्यनेन पूर्वं चतुर्णां ग्राव्णां तूष्णीमेव संसादनं कृत्वा मध्य उपरस्य ततस्तूष्णीमेव संसादनं कृत्वा पुनर्मन्त्रेण प्रागादिदिक्षु क्रमेणैकैकं ग्रावाणं मध्य उपरं च मन्त्रेण संसादयतीत्यर्थो गम्यते । अन्यथा मन्त्र एकवचनश्रवणात्सुसंभृता त्वा संभरामीति मुष्टिष्विव प्रत्येकं मन्त्रप्राप्तावेकैकमित्यस्य वैयर्थ्यापत्तेः । एवं चेदं ज्ञायते युगपदासादनस्य फलं विजातीयमदृष्टम्, एकैकासादनस्य ततो विलक्षणमदृष्टं फलमिति । तत्र युगपदासादनस्य प्रागादिषु दिक्षु कर्तुमशक्यत्वादुपरस्य चर्मणो मध्ये संसादनविधानाद्ग्राव्णां चर्मणो दक्षिणोत्तरप्रान्तयोः पश्चिमपूर्वप्रान्तयोर्वा संसादनम् । तत्र दक्षिणेन हस्तेन द्वयोर्ग्राव्णोरेकस्मिन्प्रान्ते सव्येन हस्तेन द्वयोरेकस्मिन्नित्येवं युगपदासादनम् । एकैकस्य संसादनमपि चर्मण्येव । उपरे ग्राव्णः संमुखान्कृत्वेत्युपराधिकरणत्वस्य विधास्यमानत्वात् ।

रक्षोघ्नो वो वलगघ्नः प्रोक्षामि वैष्णवानि-
त्युपरे ग्राव्णः संमुखान्कृत्वा प्रोक्षति ।

स्थूलप्रदेशो मुखं येन सोमः कण्ड्यते ।

सार्धप्रादेशमात्रः स्याद्दृढपाषाणनिर्मितः ।
वर्तुलः सूक्ष्म एकत्र स्थूल एकत्र वै भवेत् ॥
षडङ्गुलपरीणाहो मुखं(खे) तु स्थौल्यमीरितम् ।
अग्रं सूक्ष्मप्रदेशः स्याद्ग्राव्ण एतद्धि लक्षणम् ॥ इत्यभियुक्ताः ।

प्रादेशमात्रत्वं मुखपदवाच्यपदार्थं चाऽऽपस्तम्बोऽप्याह—तस्मिंश्चतुरो ग्राव्णः प्रादेशमात्रानूर्ध्वसानूनाहननप्रकारानश्मनः संस्सादयन्तीति, स्थवीयांसि मुखानीति च । स्थवीयांसि स्थूलतराणि । स्थवीयांस्यभ्यन्तराणि कृत्वा तानि मुखानीति लाट्यायनद्राह्यायणौ । उपरे ग्राव्णः संमुखान्कृत्वा प्रोक्षतीत्यत्रोपर इत्यधिकरणसप्तमी । अनेनाऽऽपस्तम्बोक्तमुपरसंमुखत्वं व्यावर्त्यते । उपरस्य तु लक्षणाभावादर्थलक्षणावायामविस्तारौ । आकारश्चतुरश्रो वर्तुलो वा । संमुखानभिमुखान् । बहुवचनलिङ्गात्संभवाच्च युगपदेव

प्रोक्षणम् । अत्राद्भिरितिवचनाभावात्प्रोक्षणार्थानामपां संस्कारो भवत्येव । दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनं स्तोत्रार्थं बर्हिर्मुष्टिमुपनिबध्नाति । तथा च बौधायनः—अथ दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनं बर्हिर्मुष्टिमुपनिबध्नाति स्तोत्रेभ्य इति ।

औपरवस्य पुरीषस्याग्रेणोपस्तम्भनं चतुरश्रं खरं करोति यावन्तमाप्तं पात्रेभ्यो मन्यते ॥ १९ ॥

इति हिरण्यकेशिसूत्रे सप्तमप्रश्ने षष्ठः पटलः ।

उपरवाणामिदमौपरवं तस्यौपरवस्य पुरीषस्य मृदः । इदं चेतरपुरीषव्यावृत्त्यर्थम् । औपरवस्य पुरीषस्येत्यवयवषष्ठी । औपरवपुरीषैकदेशेनेत्यर्थः । तृतीयार्थे षष्ठी वा । प्रथमपक्ष औपरवपुरीषैकदेशोऽवश्यं स्थापनीयो भवति खरलेपनार्थम् । द्वितीयपक्षे सर्वस्यैवौपरवस्य पुरीषस्य खरकरण एवोपयोगः । लेपनस्य प्रयोजने लौकिकेन पुरीषेण लेपनम् । येन काष्ठेन शकटमुपष्टभ्नं तदग्रभागे समीप एव चतुरश्रं चतुष्कोणं खरसंज्ञकं चत्वरं करोति । खरस्य चतुरश्रताऽग्रेऽसश्रोणिव्यवहारात् । तत्प्रमाणमाह—यावन्तमित्यादिना । पात्रेभ्यः सोमसंबन्धिभ्य ऊर्ध्वपात्रेभ्यश्चमसेभ्यः पर्याप्तायै चाऽऽप्तमेतावत्परिमिते खरे सर्वसोमपात्रासादनं भवतीति निश्चित्य तदनुरोधेन करोतीत्यर्थः । अनेन प्रमाणनियमाभावः सूच्यते । उच्चताया अनुपदेशादनियमः । पुरीषेण जलमिश्रितेनैव खरः कार्यो दार्ढ्याय पुरीषस्य पात्रबुध्नासंलग्नतायै च । इदं जलमिश्रणमर्थापत्तिसिद्धम् । हविर्धानप्राक्स्थूणातः पश्चात्संचरार्थं स्थलमवशिष्य कार्यः । यथाऽग्रेण खरः संचरो भवतीति सूत्रात्, अग्रेण खरं परीत्य दक्षिणत उपविशतीति ब्रह्मत्वसूत्राच्च । स्पष्टमाहात्रैवाऽऽपस्तम्बः—पुरस्तात्संचरः शिनष्टीति । अग्रेणोपस्तम्भनमित्यत्र दक्षिणस्यैवोपस्थितत्वादुदाहृतब्रह्मत्वसूत्राल्लिङ्गाच्च ग्रहणम् । स्पष्टमाहात्राऽऽपस्तम्बः—एतस्यैव हविर्धानस्याग्रेणोपस्तम्भनमुपरवपांशुभिश्चतुरश्रं खरं करोति सोमपात्रेभ्य आप्तं मन्यत इति ।

इति श्रीकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापनामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य षष्ठः पटलः ॥ ६ ॥

अथ सप्तमप्रश्ने सप्तमः पटलः ।

उत्तरत आग्नीध्रीयं मिनोति मध्ये वेदेरर्धमन्तर्वेद्यर्धं बहिर्वेदि प्राचीनवꣳशं विमितं विमिन्वन्ति दक्षिणतउपचारम् ।

उत्तरत इत्यत्र सप्तम्यर्थे तसिः । उत्तरस्मिन्प्रदेश इत्यर्थः । आग्नीध्रशब्दात्तस्येदमित्यर्थे वृद्धाच्छ इति च्छप्रत्यय इयादेशः । वेदेर्महावेदेरुत्तरप्रान्तस्थप्राक्सूत्रमध्ये शङ्कुं निखाय यावदायामं प्रमाणमिति शुल्बोक्तप्रकारेण चतुरश्रं विहरति । तत्र विशेषः—अर्धमन्तर्वेद्यर्धं बहिर्वेदीति । अर्धमाग्नीध्रीयमण्डपार्धमन्तर्वेदि वेदिमध्ये भवति, अर्धं वेदेर्बहिर्भवतीत्यर्थः । अर्धं बहिर्वेदीत्ययमेव विधिः । अर्धमन्तर्वेदीति त्वनुवादश्श्रुत्यनुकरणार्थः । एतादृशी श्रुतिः शाखान्तर उन्नेया । यथा स्वशाखायां प्रकृतौ हविर्निर्वापे तूष्णीं चतुर्थमित्ययमेव विधिस्त्रिर्यजुषेत्यनुवादस्तथाऽत्रेति द्रष्टव्यम् । न च विनिगमनाविरहः । वेदेः सर्वार्थत्वेन सर्वस्य मण्डपस्यापि वेद्यन्तर्भावे प्राप्ते बहिर्भावांश एव विधेरपेक्षितत्वेनार्धं बहिर्वेदीत्यस्यैव विधित्वकल्पनात् । अर्थादर्धमन्तर्वेदीत्यस्यानुवादत्वमर्धलक्षणावेतस्याऽऽयामविस्तारौ । बौधायनस्तु अथ महावेद्या उत्तरांसीयाच्छङ्कोर्वेद्यन्तेनाष्टादश प्रतीचः प्रक्रमान्प्रक्रामन्ति तदाऽऽग्नीध्रागारं विमिमीते यथाऽन्तर्वेद्यर्धं स्याद्बहिर्वेद्यर्धमथैनत्समुच्छ्रित्य परिश्रयन्ति तस्य दक्षिणं द्वारं कुर्वन्त्याग्नीध्रागारस्य पार्श्वमानीयं पञ्चारत्निरिति प्रमाणविशेषमाह । उत्तरत आग्नीध्रीयं मिनोतीति सामान्यप्रतिज्ञा । विमितमिति वचनं महावेदिविहरणोत्तरमेवाऽऽग्नीध्रीयमानमिदं कर्तव्यमितिसूचनार्थम् । उत्तरत आग्नीध्रीयं मिनोतीत्यत्र वचनादत्रैव मानं कर्तव्यम् । विमितमिति वचनं महावेदिविहरणाव्यवहितोत्तरं वा मानं कर्तव्यमितिपक्षान्तरसूचनार्थं वा परिश्रयणस्य विमानसमकालताव्यावृत्त्यर्थं वा । विमिन्वन्ति परिश्रयन्ति। आद्यपक्षद्वयेऽपि परिश्रयणमत्रैव । दक्षिणतो दक्षिणप्रदेश उपचर्यते निष्क्रमणप्रवेशात्मकं कर्म क्रियते येन स उपचारो मार्गः । मार्गार्थं द्वारं द्वारप्रमाणं च वाधूल आह—उत्तरत आग्नीध्रीयं मिनोति मध्ये वेदेरर्धमन्तर्वेद्यर्धं बहिर्वेदि प्राचीनवꣳशं विमितं विमिन्वन्त्यरत्निमात्रं षोडशाङ्गुलमात्रं वा दक्षिणतो द्वारं कुर्वन्तीति । सूत्रान्तरे दक्षिणदिग्वर्जमेव परिश्रयणमुक्तम् । तेन द्वारं मार्गार्थं कर्तव्यं दक्षिणदिशः परिश्रयणमेव वा न कर्तव्यं मार्गार्थमिति पक्षद्वयं सिद्धं भवति । उपचारमित्यत्राकर्तरि च कारके संज्ञायामिति सूत्रेण घञ् । ञित्वाद्धातोरादिवृद्धिः । दक्षिणतउपचारमिति समस्तं पदं तस्मादुत्तरतउपचारोऽग्निरित्यत्रेव । उत्तरतउपचार इत्यत्र समस्तपदत्वं तु उत्तरतउपचार इत्युत्तरतः—उपचार इत्यवग्रहाज्ज्ञेयम् । चतुःस्थूणमित्यप्यापस्तम्बः । साध्यानाꣳ षडह आश्वत्थत्वनियमादत्र वृक्षानियमः । आग्नीध्रीयमण्डपवन्मार्जालीयमण्डपोऽपि

बौधायनेनोक्तः—उत्तरतउपचारत्वमत्र विशेषः, एतेन मार्जालीयो व्याख्यातस्तस्योदीचीं द्वारं कुर्वन्तीति ।

अग्रेणापरं वेद्यन्तं त्रिषु प्रक्रमेष्वपरिमिते वोदीचीनवꣳशꣳ सदो दक्षिणतः प्रतिकृष्टतरं यावद्धत्विग्भ्यो धिष्णियेभ्यः प्रसर्पकेभ्यश्चाऽऽप्तं मन्यते ।

सद इत्यनन्तरं मिनोतीति शेषः । अपरस्य वेद्यन्तस्य मध्यशङ्कुमारभ्य त्रीन्प्राचः प्राक्संस्थान्प्रक्रमान्प्रक्रम्य तत्र शङ्कुं दद्यात् । स सदसः पश्चिमान्तस्तत आरभ्योदीचीनवंशं सदः साधयेत् । उदीचीनवंशमित्यनेन दक्षिणोत्तरदीर्घत्वं सदसः प्रदर्श्यते । सीदन्ति ऋत्विजः सोमभक्षणार्थं यत्रेति सदस्तत् । योगरूढं पदम् । दक्षिणतो दक्षिणे भागेऽतिशयेन प्रतिकृष्टमिति प्रतिकृष्टतरम् । द्विवचनविभज्योपपदे तरबीयसुनावित्यनेनातिशयेऽर्थे तरप्प्रत्ययः । प्रतिकर्ष आधिक्यम् । तत्रातिशयः पदमानपक्ष एकपदात्मकः प्रक्रममानपक्ष एकप्रक्रमात्मकः । चतुर्विंशाङ्गुलाद्यात्मकप्रक्रममानपक्ष एकारत्न्यात्मकः सांकाशनानुरोधेन स्वीकर्तव्यः । प्रतिकर्षे हेतुमाहाऽऽपस्तम्बः—दक्षिणतः प्रक्रमे पृष्ठ्याया औदुम्बरीं मध्ये सदसो मिनोति दक्षिणा सदः प्रतिकर्षेद्यथा सांकाशनस्याविरोधं स्यादिति । अस्यार्थः—आयामतो विस्तारतश्च मध्ये सदस औदुम्बरीं मिनोति दक्षिणतः प्रक्रमे पृष्ठ्याया औदुम्बरीं मिनोति यथा मध्ये सदो भवति तथा दक्षिणांशो विवृद्धः स्यात् । किमर्थमिति चेत्, शालामुखीयादीनां सांकाश्याविरोधो यथा स्यादिति । इतरथा ह्यौदुम्बर्या तिरोधीयेत इति । अविरोधमित्यर्थाभावेऽव्ययीभाव इति । यावदृत्विग्भ्य इत्यादिनाऽर्थसिद्धपरिमाणत्वं प्रदर्शितम् । सदसोऽष्टादशपदैरेव मानमिति नियमः परं नास्ति किं तु धिष्ण्यादिसमावेशानुरोधेनाष्टादशपदेभ्यो न्यूनमधिकं वाऽपि भवतीति द्रष्टव्यम् । एतच्च नवारत्नि तिर्यक्सप्तविंशतिरुदगायतमिति सदसो विज्ञायतेऽष्टादशेत्येकेषामितिशुल्बसूत्रोक्तमानद्वयेन विकल्पितं द्रष्टव्यम् । आपस्तम्बस्तु नवारत्निविस्तारं सप्तविंशतिरुदगायतमपरिमितं वेति । अपरिमितशब्द उक्तप्रमाणाधिकप्रमाणवाची । यावदृत्विग्भ्य इत्यनेनाष्टादशारत्नितोऽपि न्यूनं मानं प्राप्यते । वेदिमध्ये कृत्स्नस्य सदसो निवेशो यथा भवति तथा मानं पदात्मकं प्रक्रमात्मकं वा कल्पनीयम् । शुल्बसूत्रे सप्तविंशतिरुदगायतमिति दक्षिणोत्तरदीर्घत्वविधानात्तिर्यक्शब्देनात्र प्राच्येव ग्राह्या । तन्नवारत्निप्रमाणं भवति । अपरिमितत्वपक्षेऽपि प्राग्विस्तीर्णं नवारत्न्येव भवति विंशतिचतुर्विंशत्यन्यतरसंख्याङ्गुलप्रक्रमेणाष्टादशारत्नि उदक्सप्तविंशत्यरत्नि । देशस्तु प्रयोगसूत्र एवोक्तः । तद्विहरणप्रकारः शुल्बसूत्रे—तदेकरज्ज्वोक्तं पञ्चदशिकेनैवापायम्यार्धपञ्चमैः श्रोणयꣳसान्निर्हरेदिति । उदीच्यत्र पृष्ठ्या ।

दक्षिणेन पृष्ठ्यां प्रक्रमे मध्ये सदस औदुम्बर्यवटः ।

अत्र प्राची पृष्ठ्या ग्राह्या । दक्षिणपदसाहचर्यात् । पृष्ठ्याया दक्षिणप्रदेशे समीप एवैकं पृष्ठ्यासंलग्नमार्जवेन प्रक्रममानपक्षे प्रक्रमं पदमानपक्षे पदं मीत्वौदुम्बर्यवट आयामतो विस्तारतश्च सदसो मध्ये भवतीत्यर्थः । मध्ये सदस इति वचनात्तदनुरोधेनैव पृष्ठ्याया दक्षिणप्रदेश आर्जवेन प्रक्रमो मातव्योऽथवा पदं मातव्यम् । अनेन सांकाश्यं रक्षितं भवति । औदुम्बर्युदुम्बरविकारभूता तस्या अवटो गर्तः ।

अभ्रेरादानं परिलेखनं च यूपे व्याख्यातम् ।

देवस्य त्वेत्यभ्रेरादानं परिलिखितमित्यवटपरिलेखनं च यूपे यूपनिमित्तके कर्मणि व्याख्यातमुक्तं यथा तथाऽत्र कर्तव्यमित्यर्थः । अत्रैवावटं खानयति । अभ्र्यादानपरिलेखनयोरवटमर्यादाकरणार्थत्वेन तस्य चावटखननार्थत्वेनावटखननस्यार्थतोऽत्रैव सिद्धेर्दर्शितप्रायत्वात्खात्वा प्रोक्षतीति भरद्वाजेन स्पष्टोक्तेश्च । चकारोऽत्र खननार्थकप्रैषस्यानुक्तस्य समुच्चयार्थः । स चाग्नीदौदुम्बर्यवटं खनेत्येतावानेव । उपराभावादुपरसंमितमित्यादिः प्रैषांशो लुप्यते । अत आग्नीध्रकर्तृकताऽवटखननस्य सिद्धा भवति । बौधायनेन तु प्रैषपूर्वकमुद्गातृकर्तृकमौदुम्बर्यवटखननमुक्तम् । प्राक्पुरीषस्योद्वपनमित्ययं विशेषश्चात्र तेनैवोक्तः । दार्ढ्यानुरोधेन गर्तः खननीयः ।

दिवे त्वेति परस्तादर्वाचीं प्रोक्षति ।

परस्तादग्रभागप्रदेशमारभ्यार्वाचीं मूलपर्यन्तं प्रोक्षति, यदीयोऽवटस्तमग्रेण स्थापनमार्थिकम् । इयं प्रागग्रैव स्थापनीया । अवटोत्तराग्रस्थापने प्रोक्षणस्य दक्षिणापवर्गतापत्तेः प्रत्यगपवर्गत्वापेक्षया दक्षिणापवर्गत्वस्य देवकर्मस्वतीव विरुद्धत्वात् । स्पष्टमेतदाहाऽऽपस्तम्बः—अग्रेणावटं प्राचीं निधायेति । प्रत्यगग्रत्वं दक्षिणाग्रत्वं वाऽत एव निरस्तं भवति । तूष्णीं प्रक्षाल्येत्यप्याह सः । अग्रं मध्यं मूलमित्येतादृशोऽत्र क्रमस्तत्क्रमेण प्रोक्षतीति परस्तादर्वाचीं प्रोक्षतीत्यस्यार्थः । दिवे त्वेतिग्रहणं मन्त्रक्रमदर्शनार्थं न त्वेतावत एव मन्त्रस्य प्रोक्षणकरणत्वं न चेतरयोर्विकल्पार्थकत्वं चेति प्रदर्शयितुम् । तेन दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्येतावता मन्त्रेणैकप्रयत्नेन परस्तादर्वाचीं प्रोक्षतीत्यर्थः सिद्धो भवति । अमुमर्थमाह बौधायनः—तां परस्तादर्वाचीं प्रोक्षति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेतीति । पूर्वत्रौदुम्बर्या उपक्रान्तत्वात्तच्छब्देन तस्याः परामर्शः । अथवा दिवे त्वेत्यग्रस्य प्रोक्षणमन्तरिक्षाय त्वेति मध्यस्य पृथिव्यै त्वेति मूलस्येत्येवं मन्त्रत्रयेणौदुम्बरीप्रदेशत्रयं *मन्त्रत्रयेण प्रोक्षतीत्यर्थः । भरद्वाजादिभिः स्पष्टमेवमेवोक्तम् । परस्तादर्वाचीं प्रोक्षतीतिवचनं यूपे दृष्टस्य क्रमान्तरस्य बाधनार्थम् । प्रोक्षणात्प्राग्बौधायनेन

* मन्त्रत्रयेणेति अधिकम् ।

कश्चन विशेष उक्तः—औदुम्बर्येषा स्थूणा प्रक्षालिता प्रपन्ना प्रागवट्यादुपशेत इति । प्रपन्ना तीर्थेन प्रपादिता ।

अपामवनयनं यवप्रासनं बर्हिषाऽवस्तरणं च यूपे व्याख्यातम् ।

शुन्धतां लोक इत्यपामवनयनं यवोऽसि यवयेति यवप्रासनं पितृणाꣳ सदनमसीति बर्हिषाऽवस्तरणं यूपे यूपनिमित्तके कर्मणि व्याख्यातमुक्तं यथा तथाऽत्र कर्तव्यमित्यर्थः । चकारः प्रोक्षणेऽनुक्तस्य यवमिश्रितत्वस्य समुच्चयार्थः । उक्तं च यवमतीभिः प्रोक्षणीभिरौदुम्बरीं प्रोक्षतीति भरद्वाजेनापि यवमिश्रणम् ।

उच्छ्रयस्व वनस्पते सजूर्देवेन बर्हिषेति प्राचीनकर्णामुद्गात्रा सहोच्छ्रयत्युदिवꣳ स्तभानेति वा ।

प्राचीनः प्रागग्रः कर्णो यस्या उच्छ्रयणकाले सा प्राचीनकर्णा । कर्णः क्षुद्रशाखामूलं स यथा प्राग्भागगतो भवति तथोच्छ्रयति । व्यवस्थितविकल्पोऽयमेकस्मिन्प्रयोग एको मन्त्रोऽन्येष्वपर इति । तत्रापि आद्ये प्रयोग आद्यो मन्त्र इतरेष्वन्त्यः । इदमेव ज्ञापयितुं शाखान्तरीयमन्त्रस्य प्रथममुपादानमेतत्प्रकरणपठितस्य स्वशाखास्थस्यानन्तरमुपादानम् । अनेन स्वशाखास्थस्यापि कर्मसंबद्धत्वं सिद्धं भवति । यत्र शाखान्तरीयस्यैवोपादानं नतु स्वशाखास्थस्यापि तत्राऽऽर्थिको विकल्पः । वरुणस्त्वोत्तभ्नात्वित्युपस्तम्भनमन्त्रः शाखान्तरीयो वरुणस्य स्कम्भनमसीति स्वशाखागतः । तेन यज्ञकर्मार्था मन्त्रा यथारूपमितर इति सूत्राभ्यां स्वशाखागतस्य वरुणस्य स्कम्भनमसीत्यस्य प्राप्तावेकस्मिन्प्रयोगे द्वयोर्विनियोगासंभवाद्विकल्पः पर्यवस्यति । अयं विकल्प आर्थिकः । अत्राऽऽद्ये प्रयोगेऽयमेव मन्त्रोऽन्येष्वयमेवेति नियमो न, किंतु ऐच्छिको विनियोग इति । एतादृशं भेदं प्रदर्शयितुमेवोपस्तम्भनादिषु स्वशाखास्थमन्त्रविनियोगावचनमौदुम्बर्युच्छ्रयणे तद्वचनमिति । आर्थिकविकल्पवाचनिकविकल्पयोरेतादृशो भेदः । नच प्रक्रमात्तु नियम्यत इति परिगृहीतपक्षस्वीकारनियमविधायकसूत्रविरोधः शङ्क्यः । तस्य वैमृधोपक्रममात्रविषयत्वात् ।

रूपं काशेऽनुनिर्वापो देवताश्रपणं तथा ।
आदौ ये विधृताः पक्षास्त एव स्युः सदैव हि ॥

इतिच्छन्दोगपरिशिष्टवचने पञ्चानामेव ग्रहणेनैतदतिरिक्तस्थले परिगृहीतपक्षस्वीकारनियमस्याप्रवृत्तेरेव प्रदर्शितत्वाच्च । नच पञ्चानां ग्रहणमितरवैकल्पिकपदार्थोपलक्षणमिति वाच्यम् । उपलक्षणपरतायां प्रमाणाभावात् । अवशिष्टस्य मन्त्रस्य फलोपधायककारणतया अभावेऽपि स्वरूपसत्त्वेव कारणताऽरण्यस्थदण्डादीनामिव द्रष्टव्या । स्वेनोच्छ्रयणं कर्तुमशक्यं चेदुच्छ्रापयति । अयमर्थो णिजर्थविवक्षया लभ्यते । उद्गीथांशमुद्गायतीत्युद्गाता तेन सहित औदुम्बरीमुत्थापयतीत्यर्थः । द्वितीयो मन्त्रो दृꣳहेत्यन्तः ।

द्युतानस्त्वा मारुतो मिनोत्वित्यवटेऽवदधाति ।

अत्र वाऽवटं खानयति परिकर्मिभिः । धर्मणेत्यन्तो मन्त्रः । अवटेऽवधानं स्थापनम् । अत्रापि प्राचीनकर्णामुद्गात्रा सहेत्यनुवर्तते । स्पष्टमाहाऽऽपस्तम्बः—द्युतानस्त्वा मारुतो मिनोत्विति प्राचीनकर्णाꣳ सहोद्गात्रा मिनोतीति ।

पर्यूहणं परिदृꣳहणं परिषेचनं च यूपे व्याख्यातम् ।

ब्रह्मवनिं त्वेति पुरीषेण पर्यूहणं ब्रह्म दृꣳहेति मैत्रावरुणदण्डेन परिदृंहणमुत्तम्भयेति प्रदक्षिणमपां परिषेचनमित्येतत्त्रितयं यूपे यूपनिमित्तके कर्मणि व्याख्यातमुक्तं यथा तथाऽत्र कर्तव्यमित्यर्थः ।

तस्यरः कर्णे विशाखे वा हिरण्यं निधाय घृतेन द्यावापृथिवी आपृणेथाꣳ स्वाहेति स्रुवेणाभिजुहोति ।

कर्णः क्षुद्रशाखामूलम् । विशाख इत्यौदुम्बर्यवयवविशेषविशेषणम् । विगता शाखा यस्मादवयवात् । एतादृशोऽग्रात्मकोऽवयवः । तत्र वा हिरण्यं निधायाभिजुहोतीत्यर्थः । अथवा विशिष्टा शाखा यस्मादवयवात्तस्मिन्वेत्यर्थः । अस्मिन्व्याख्याने यस्मिन्प्रदेशे महती शाखा तादृशेऽवयवे हिरण्यनिधानं भवति । स्रुवग्रहणं जुहूव्यावृत्त्यर्थम् । स्थापितं हिरण्यमभिलक्षीकृत्यौदुम्बर्युपर्येव होमः कर्तव्य इत्येतदर्थं द्योतयितुमथवौदुम्बर्यभिमुख्यार्थको वाऽभिः । जुहोतिचोदितत्वादेव स्वाहाकारे सिद्धे स्वाहेतिवचनं मूल आज्ये प्राप्ते सत्येव स्वाहाकारः कर्तव्योऽवस्रावणं तु मन्त्रारम्भसमकालं पूर्वमेवेत्यर्थविशेषं द्योतयितुम् । तथाच कात्यायनः—भूमिं प्राप्ते स्वाहाकार इति । भूमिं प्राप्ते सत्याज्ये स्वाहाकारः कर्तव्य इत्यर्थः । मन्त्रस्याल्पत्वात्क्रियाया दीर्घत्वान्मन्त्रारम्भकालेत्वमवस्रावणक्रियारम्भस्यासंभवान्मन्त्रान्तेऽत्र क्रिया न । एतेनावस्रावणस्य धारारूपत्वादाघारे धारायां चाऽऽदिसंयोग इत्यापस्तम्बोक्तपरिभाषाङ्गीकारो ज्ञापितो भवति । एतेनार्थादिदमपि सिध्यति अत्र मन्त्रपाठो विलम्बितवृत्त्येति ।

आमूलादन्ववस्रावयति ।

आङत्राभिव्याप्तौ । औदुम्बर्या मूलमभिव्याप्येत्यर्थः । तथा चाग्रमारभ्य मूलपर्यन्तमौदुम्बरीमनुलक्षीकृत्याधः स्रावयति । मूलपर्यन्तं स्रावित आज्ये भूमिप्राप्तं भवत्येव तयोः संबद्धत्वात् । तथा च मूलं प्राप्तमाज्यं भूमिप्राप्तमेव तत्रैव स्वाहाकार इत्यर्थः ।

यजमानमात्रीसंमिता वर्षिष्ठाः स्थूणा मिनुतो यथा सुष्ठु ।

यजमानमात्री यजमानप्रमाणा यावद्यजमानस्योर्ध्वं प्रमाणं तावत्प्रमाणौदुम्बरीत्यर्थः । यूपे दर्शनाद्भूमौ निखातव्येन भागेन सह यजमानमात्रीति केचित् । ऊर्ध्वं

१ ख ग °ल्म° ।

निखाताद्यजमानमात्री भवतीत्यन्ये । संकोचे प्रमाणाभावात् । निखातव्येन प्रदेशेन सहैव यजमानमात्रत्वमित्येव युक्तम् । यजमानमात्रीत्यनेनौदुम्बर्या ऊर्ध्वप्रमाणं दर्शितम् । स्थौल्यं तु दार्ढ्यानुरोधेनैव सिद्धम् । यजमानमात्र्यौदुम्बरी वर्षिष्ठा स्थूणानां भवतीति भरद्वाजेन स्पष्टमेवोक्तमेतत् । परार्थान्येकेन क्रियेरन्यथाकपालेनोपवपति यजमानेन संमितौदुम्बरी भवतीत्युदाहरणादपि औन्दुम्बर्या ऊर्ध्वप्रमाणं ज्ञेयम् । इदं चोदाहरणं द्वादशाहविषये । तत्रानेकयजमानोपस्थितावेकेन येन केनचिद्यजमानेन गृहपतिसंज्ञकेन मुख्येन यजमानेन वा संमितौदुम्बरी भवतीति । यजमानमात्र्यौदुम्बरी तत्संमितास्तया संमितास्तावत्प्रमाणा वर्षिष्ठा अतिशयेन वृद्धा इति वर्षिष्ठाः । अतिशायने तमबिष्ठनाविति वृद्धशब्दादिष्ठन्प्रत्यये प्रियास्थिरास्फिरोरुबहुलगुरुवृद्धेत्यनेन वृद्धशब्दस्य वर्ष इत्यादेशे रूपम् । वृद्धशब्दः पुरातनपर्यायः । स च दार्ढ्यं लक्षयति । तेनातिशयेन दृढा इत्यर्थो भवति । स्थूणा द्विशाखास्तम्भाः । उत्तरत्र पर्यन्त्यानां प्रमाणविशेषविधानात् । औदुम्बरीसादृश्याच्च यजमानमात्रीसंमिता इत्यनेन मध्यमा एव स्थूणा अत्र ग्राह्याः । मिनुत इति द्विवचनात्स्वस्वभागस्थाः स्थूणा उभाभ्यां सहैव मातव्याः । दक्षिणभागस्थास्तिस्रोऽध्वर्युणा । उत्तरभागस्थास्तिस्रः प्रतिप्रस्थात्रा । बहुत्वस्य प्रत्येकमन्वयात्तस्य च त्रित्वे पर्यवसानात्तिस्रस्तिस्रः । अधिकप्रयोजनेऽधिका अपि । यथा सुष्ठु यथा दृढं सदो भवति तथा स्थूणा कार्या इत्यर्थः ।

पर्यन्त्या नाभिदघ्ना औदुम्बरीमभ्यग्रा मिनोति ।

पर्यन्ते प्रान्ते भवाः पर्यन्त्याः । दिगादित्वाद्भवार्थे यत्प्रत्ययः । अत्र भवनं नोत्पत्तिरसंभवात्, किंतु सत्ता सा च भाविनी ग्राह्या । अथवा पर्यन्तमर्हन्तीति पर्यन्त्याः खलयवमाषतिलवृषब्रह्मणश्चेत्यत्रत्येनानुक्तसमुच्चयार्थेन चकारेण पर्यन्तशब्दादपि यत्प्रत्ययो भवति । नाभिदघ्ना नाभिप्रमाणाः पादावारभ्य नाभ्यवधिकं यावत्प्रमाणं तावत्प्रमाणा इत्यर्थः । एकप्रमाणोपस्थितौ मात्रज्दघ्नचोस्तिर्यगूर्ध्वव्यवस्थया प्रयोग इति नियमो नास्ति । औदुम्बरीमभ्यग्रा औदुम्बर्यभिमुखाग्राः सर्वाः स्थूणा मिनोतीत्यर्थः । औदुम्बरीमभिनम्रा इति यावत् । नम्रत्वमेवाभिमुखत्वमत्र प्रकारान्तरस्यासंभवात् । मिनोतीत्येकवचनादध्वर्युणैव पर्यन्त्याः सर्वा मातव्याः । यथा सुष्ठ्वित्यत्राप्यन्वेति ।

नीचैः सदो वृष्टिकामस्य मिनुयादुच्चैर-
वृष्टिकामस्य विपरीतमेके समामनन्ति ।

नाभिदघ्नं नित्यं प्रमाणं ततोऽपि किंचिन्नीचैर्नीचं सदो वृष्टिकामस्य यजमानस्य मिनुयात् । किंचिदुच्चैरुच्चं सदोऽवृष्टिकामस्य यजमानस्य । अवर्षणे सति वृष्टिकामना । अतिवर्षणे त्ववृष्टिकामना । इदं च यदैनैनं यज्ञ उपनमेत, अथाऽऽदधीत सैवास्यर्धिरेतिश्रुत्यनुरोधेन यदा वर्षासु सोमपूर्वाधानं क्रियते तदैतत्संभवा द्रष्टव्यः । नीचैरित्यव्ययं

नीचत्वार्थकम् । उच्चैरित्यव्ययमुच्चत्वार्थकम् । समस्ते क्रतावर्थं श्रूयमाणं यजमानः कामयते तथा नित्येषु यज्ञाङ्गेषु यानि तु कामयतिः श्रावयतीतिसूत्रात् । अत्र कमिधातुश्रवणात्संकल्पोऽत्र यजमानेन कार्यो वृष्टिकामो नीचैः सदः करिष्ये, अवृष्टिकाम उच्चैः सदः करिष्य इति । कामयतिः कमिधातुः । इक्श्तिपौ धातुनिर्देश इति सूत्रात् (वार्तिकात्)श्तिप् । विपरीतमेके समामनन्ति यत्पूर्वस्य फलं तदुत्तरस्य यदुत्तरस्य फलं तत्पूर्वस्येति विपरीतशब्दार्थः । सदसो नीचैस्त्वोच्चैस्त्वे औदुम्बर्याः स्थूणानां च नीचोच्चत्वाभ्यामिति द्रष्टव्यम् ।

नव च्छदींष्युपक्लृप्तानि भवन्ति ।

एतद्दिवसस्तंबन्ध्यनुष्ठानारम्भात्प्रागेवोपकल्पनम् । अर्थः स्पष्टः ।

उदीचो वꣳशानाधाय प्राचो वꣳशानादधाति ।

वंशान्वेणून्वंशानिति बहुत्वमविवक्षितम् । तेन संभव एकस्य वंशस्य वेणोर्द्वयोर्वा वंशयोर्वेण्वोरप्याधानम् । उदीच उदगग्रान्प्राचः प्रागग्रान् । आधानं स्थापनम् ।

ऐन्द्रमसीति त्रीणि मध्यमानि छदींष्युदञ्चि निदधाति ।

मन्त्रावृत्तिरेकवचनात् । ऐन्द्रमसीत्येकैकं मध्यमं छदिरुदगग्रं निदधाति । एतावानेव मन्त्रः । ऐन्द्रमसीत्येकैकं मध्यमानि छर्दीष्यधिनिदधातीति भरद्वाजः ।

इन्द्रस्य सदोऽसीति त्रीणि दक्षिणानि
विश्वजनस्य छायेति त्रीण्युत्तराणि ।

एतेन नवच्छदि सदो भवतीत्युक्तं भवति । उभयत्रापि मन्त्रावृत्तिः । एकवचनात् ।

दक्षिणान्युत्तराणि करोत्यौदुम्बरीमभिसंमुखानि ।

दक्षिणानि च्छर्दींषि उत्तराणि सर्वेषामुपरिशयानि करोतीत्यर्थः । दक्षिणान्युदगग्राणि उत्तराणि दक्षिणाग्राणीति औदुम्बरीमभिसंमुखानीत्यस्यार्थः । संशब्दः सम्यक्श्लेषणार्थः ।

नवछदि तेजस्कामस्य मिनुयादितिब्राह्मणव्याख्यातानि काम्यानि छदींꣳषि तेषां याथाकामी ।

नवछदि तेजस्कामस्य मिनुयादित्यादि यद्ब्राह्मणं तेन व्याख्यातानि उक्तानि काम्यानि कामायार्हाणि नवादिसंख्याविशिष्टानि छर्दींषि तेषां कामानां तेजआदीनां मध्ये यः कामस्तत्संबन्धिपक्षोऽङ्गीकर्तव्य इत्यर्थः । याथाकामीत्यत्र ताच्छील्ये णिनिः । अत्रापि कमिधातुश्रवणात्संकल्पो यजमानेन कार्योऽमुककामोऽमुकच्छदि सदः करिष्य इति कामनानुरोधेन । नवच्छदिपक्षो नित्योऽपि । त्रीणि मध्यमानि त्रीणि दक्षिणानि त्रीण्युत्तराणीति नित्यविधिबलान्नवछद्यग्निष्टोमस्य मिनुयादिति भरद्वाजोक्तेश्च । नवच्छ-

दिसदःपक्षे समं स्यादश्रुतत्वादिति न्यायान्मध्ये दक्षिण उत्तरे च त्रीणि त्रीण्येव । एकादशच्छदिसदःपक्षे मध्यदेशस्य प्रधानत्वान्मध्ये पञ्चेतरयोस्त्रीणि त्रीणि । पञ्चदशच्छदिसदःपक्षे पञ्च पञ्चैव सर्वत्र समं स्यादश्रुतत्वादिति न्यायात् । सप्तदशच्छदिसदःपक्षे मध्ये सप्त मध्यदेशस्य प्रधानत्वात्, इतरयोः पञ्च पञ्च । एकविंशतिच्छदिसदःपक्षे सप्त सप्तैव सर्वत्र, समं स्यादश्रुतत्वात्, अपि वा कर्मवैषम्यात्, अतुल्याः स्युः परिक्रये समाख्याविधिश्रुतौ परिक्रयान(न्न) कर्मण्युपपद्यन्ते(ते) दर्शनाद्विशेषस्य तथाऽभ्युदय इति न्यायत इति द्रष्टव्यम् । अयं न्यायो जैमिनिना दशमाध्याये तृतीयपादे दर्शितः। सूत्रार्थस्तु अश्रुतत्वाद्विशेषाश्रवणात्समो विभागः स्यादिति प्रथमसूत्रार्थः। अपि वेत्यनेन साम्यं व्यावर्त्यते समो विभागो न भवति किं तु कर्मणो वैषम्यात्कस्यचित्कर्म बहुप्रयासं कस्यचित्कर्माल्पायासमित्येवं कर्मणो वैषम्यात्प्रयासानुरूपेण विभाग इति द्वितीयसूत्रार्थः । परिक्रयेऽतुल्याः स्युः समा न स्युः समविभागा न स्युरिति यावत् । कस्मिन्विषय एषामतुल्यत्वमित्याकाङ्क्षायां परिक्रय इति । परिक्रयविषय इति तदर्थः । तेन परिक्रयातिरिक्तविषये विशेषाश्रवणे साम्यमेवेति प्रदर्शितं भवति । अतुल्यत्वे हेतुमाह—समाख्याविधीति । द्वादशाहेऽध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीत्यादिवाक्येऽर्धिनो दीक्षयति तृतीयिनो दीक्षयति पादिनो दीक्षयतीत्यत्रार्धिसमाख्यया ब्राह्मणाच्छंस्यादीनां तृतीयसमाख्ययाऽऽग्नीध्रादीनां पादिसमाख्यया पोत्रादीनां व्यवहारदर्शनादर्धादिसंबन्धं विनाऽर्धादिव्यवहारायोगात्प्रधानेभ्यो ब्रह्मादिभ्यो यद्दीयते तस्यार्धं ब्राह्मणाच्छंस्यादिभ्यस्तृतीयांश आग्नीध्रादिभ्यश्चतुर्थांशः पोत्रादिभ्यो देय इति नियमः कल्प्यते । अर्धित्वादिसमाख्याकल्प्यो विधिः समाख्याविधिः, एतत्प्रतिपादकश्रुतौ परिक्रयाद्वैषम्यमुपपद्यते न परिक्रयव्यतिरिक्ते कर्मण्युपपद्यते वैषम्यं विशेषस्य तस्या(थाऽ)भ्युदयेऽभ्युदयेष्टौ[1] ये मध्यमाः स्युस्तानग्नये दात्र इत्यादिश्रुत्या विशेषस्य साम्यविषयस्य प्रदर्शनादिति । तत्र येषु क्रतुषु च्छदिःसंख्यानियमो नास्ति तेषु तत्तत्संस्थानुरोधेन काम्यानां प्रकृतावेव निवेश इति न्यायाङ्गीकारे नव च्छदींष्येवैतेषु नेतरे पक्षाः । काम्यं नवच्छदित्वमपि न ।

कटांस्तेजनीश्च भवतं छदिषामन्तरालेष्वन्ववस्यन्ति
तानन्तर्वर्ता इत्याचक्षते परि त्वा गिर्वणो गिर इत्यभितः
परिश्रयतः पूर्वमपरं च द्वारे कुरुतोऽध्वर्युर्दक्षिणां द्वारेयीं
परिषीव्यति प्रतिप्रस्थातोत्तरामिन्द्रस्य स्यूरसीति सीव्यत
इन्द्रस्य ध्रुवोऽसीति ग्रन्थी कुरुतस्तौ मज्ञातौ भवतः ।

इन्द्रस्य ध्रुवोऽसीत्यनेनेन्द्रस्य ध्रुवमसीति विकल्पते । अन्यद्धविर्धानविमानसूत्रवद्व्याख्येयम् ।

---

१ ख. ग. °थथाभ्युदयेष्टौ ।

ऐन्द्रमसीन्द्राय त्वेति संमितमभिमृशतः ।

संमितं विमितं सदः ।

प्राग्वंशस्य सदोहविर्धानयोश्च ॥ २० ॥ समानꣳ सांकाशिनम् ।

संकाशयतीति संकाशनम् । नन्द्यादित्वाल्ल्युः । युवोरनाकावित्यनादेशः । सांकाशनमिति पाठे संकाशनमेव सांकाशनमिति स्वार्थेऽण्प्रत्ययं कृत्वा समर्थनीयः । सांकाशिनमितीकारविशिष्टपाठस्त्वार्ष एव । सांकाशनं संदर्शनं सर्वतो दर्शनं तदेषां समानं भवति । यथैकत्र स्थितः सर्वानपि पश्येत्तथाऽऽर्जवेनैषां द्वाराणि कार्याणीत्यर्थः । प्राग्वंशस्यासमासेन निर्देशस्तत्तत्कामनानिमित्तदक्षिणाप्रत्यगुत्तरदिगन्यतमे केवलैकद्वारनिमित्तकप्राग्वंशप्राग्द्वाराभावहेतुकतुल्यसांकाशनत्वानित्यत्वनिबन्धनः ।

नासꣳस्थिते सोमेऽध्वर्युः पूर्वेण द्वारेण हविर्धाने प्रविश्यापरेण निष्क्रामेद्यदि निष्क्रामेदिदं विष्णुर्विचक्रम इति जपेत् ।

सोमे सोमसंबद्धे तन्त्रेऽसंस्थितेऽसमाप्ते सतीत्यर्थः । सोमसंबद्धतन्त्रसमाप्तिस्तु अवभृथ एव भवति तावत्पर्यन्तोऽयं निषेधः । अवभृथे यद्यपि साक्षात्सोमसंबन्धो नास्ति तथाऽप्यृजीषसोमलिप्तपात्रद्वारा संबन्धोऽस्ति अतोऽवभृथपर्यन्तमस्त्येव निषेधः । अमुमर्थमाह बाधूलः—नाऽवभृथादध्वर्युः पूर्वेण द्वारेण हविर्धाने प्रविश्यापरेण निष्क्रामेद्यदि निष्क्रामेदिदं विष्णुरिति जपेदिति । आऽवभृथादिति पदच्छेदः । अवभृथपर्यन्तमिति तदर्थः । इदमुपलक्षणमपरेण प्रविश्य पूर्वेण निष्क्रमणं नेत्यापस्तम्बोक्तस्य निषेधस्य । एवं च येन द्वारेण प्रवेशस्तेनैव निष्क्रमणमिति नियमः पर्यवस्यति । यदिशब्दान्नैमित्तिकत्वमेतस्य । अध्वर्युग्रहणमितरेषामृत्विजां व्यावृत्त्यर्थम् । तेनाध्वर्योरेवायं निषेधः । नच प्रतिप्रस्थातृनेष्टुन्नेतॄणामप्यध्वर्युत्वात्तत्परोऽप्ययं निषेध इति वाच्यम् । एकवचनविरोधापत्तेः । यदि प्रतिप्रस्थातृनेष्टुन्नेतृग्रहणमिष्टं स्यात्तदा तामध्वर्यव उद्गृह्णन्तीत्यत्रेवात्रापि ब्रूयादेव । नह्यत्र तथोक्तमतोऽध्वर्योरेव निषेधः । एतेनैकवचनस्य जात्यभिप्रायकत्वकल्पना निरस्ता भवति । एवमुत्तरसूत्रेऽपि द्रष्टव्यम् ।

नापरेण सदः प्रविश्य पूर्वेण निष्क्रामेद्यदि निष्क्रामेदुत्तिष्ठन्नोजसा सहेति जपेत् ।

असंस्थिते सोमेऽध्वर्युरित्यनुवर्तते । इदमुपलक्षणं पूर्वेण द्वारेण सदः प्रविश्यापरेण निष्क्रमणं नेत्यापस्तम्बोक्तस्य । अयमप्यवभृथपर्यन्त एव निषेधः । तथा च बाधूलः—नाऽवभृथादध्वर्युरपरेण सदः प्रविश्य पूर्वेण निष्क्रामेद्यदि निष्क्रामेदुत्तिष्ठन्नोजसा सहेति जपेदिति । आऽवभृथादित्यत्रापि पदच्छेदः । अत्रापि येन द्वारेण प्रवेशस्तेनैव निष्क्र-

---

१ ख. ग. °तमके° ।

मणमिति नियमः पर्यवस्यति । यदिशब्दान्नैमित्तिकत्वमेतस्यापि जपस्य । सदोविमानानन्तरमसंस्थिते सोमे नाध्वर्युः प्रत्यङ्सदोऽतिक्रामेत् । तथा च श्रुतिः—नासंस्थिते सोमेऽध्वर्युः प्रत्यङ्सदोऽतीयादिति । अत्रापि सोमसंस्थाऽवभृथपर्यन्तैव ग्राह्या । अत्राऽऽपस्तम्बः—नाध्वर्युः प्रत्यङ्सदोऽतीयाद्धिष्णियान्होतारं वेति । सदस्यपि धिष्णियानतीत्य न गच्छेत् । तत्र तु होतारं वेत्यस्मिन्कल्पे धिष्णियातिगमनेऽपि न दोषः । अत्र श्रुतिरपि—प्राणा वा एते यद्धिष्णिया यदध्वर्युः प्रत्यङ्धिष्णियानतिसर्पेत्प्राणान्संकर्षेत्प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वः खलु वै नाभ्यै प्राणोऽवाङपानो यदध्वर्युः प्रत्यङ्होतारमतिसर्पेदपाने प्राणं दध्यात्प्रमायुकः स्यादिति । अत्र परिगृहीतपक्ष एवाऽऽन्तं स्वीकर्तव्यः । अन्यथा दोषाभावमेवैकतरपक्षं गृहीत्वा संपादयेत । धिष्णियसंबन्धिकर्मसु धिष्णियानतिक्रम्य गमनं निषिद्धम् । इतरकर्मसु होतारमतिक्रम्य गमनं निषिद्धमिति व्यवस्थितविकल्पो वाऽयम् ।

अत्रोपरवकर्मैके समामनन्ति ।

पूर्वत्रोपरवकर्म यदुक्तं तत्तत्र न कर्तव्यं किंतु अत्रास्मिन्काले कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः ।

चात्वालात् पुरीषमाहृत्य धिष्णिया-
न्निवपति चतुरश्रान्परिमण्डलान्वा ।

पुरीषार्थं चात्वालं पुनरधस्तात्खात्वा तस्मात्पुरीषमाहृत्याऽऽहार्य वा धिष्णियानायतनानि निवपति करोतीत्यर्थः । चतुर्थ्यर्थे द्वितीया वा । सा च तादर्थ्ये, तेन धिष्णियार्थं तत्तत्स्थाने निवपतीत्यर्थो भवति । सप्तम्यर्थे वा द्वितीया, तेन धिष्णियस्थानेषु निवपतीत्यर्थो भवति । निवपनं तत्तत्प्रदेशे पुरीषप्रक्षेपणम् । चात्वालाद्धिष्णियानुपवपतीति श्रुतौ यदुपवपनमुक्तं तन्निवपनमेव । न्यन्ये धिष्णिया उप्यन्त इत्यनुवादात् । अथ याचति स्फ्यमुदपात्रं चात्वालात्पुरीषं सिकता इत्येतत्समादायेति, आग्नीध्रं हुत्वा स्फ्येनोद्धत्यावोक्ष्य चात्वालात्पुरीषं सिकता इति निवपतीति, अथैनं सिकताभिराभ्राशिनं करोतीति च बौधायनः । आभ्राशिनं प्रकाशवन्तम् । ते च धिष्णियाश्चतुरश्राः परिमण्डला वा भवन्ति । तथा च शुल्बसूत्रे—पिशीलमात्रा भवन्तीति धिष्णियानां विज्ञायते चतुरश्रा इत्येकेषां परिमण्डला इत्येकेषामिति । यदि सौमिकेषु धिष्णियेषु शुल्बसूत्रोक्तं पिशीलप्रमाणं सिंहावलोकनन्यायेनाऽऽकाङ्क्षितत्वादुपयुज्यत इति कल्प्यते तदा समावेशानुरोधेन पञ्चविधपिशीलान्यतमपिशीलमानेनैव धिष्णियाः कल्पनीयाः । अस्मिन्पक्षे प्रादेशान्तरालता न भवति असंभवात् । इदं च पदमानपक्षे । वस्तुत इदं पिशीलमानमाग्निकेषु धिष्णियेष्वेव न सौमिकेषु । चतुरश्रान्परिमण्डलान्वेत्यस्योभयत्रोपादानवैयर्थ्यापत्तौ सौमिकेषु पिशीलप्रमाणानियमज्ञापनार्थत्वेनैव सार्थक्यस्य

निर्वोढुं शक्यत्वात् । अस्मिन्पक्षेऽतीव न्यूनं मानं प्रादेशात्मकं तदप्यत्र भवति । शास्त्रान्तरे प्रादेशमानं दृष्टं चास्ति । प्रादेशमात्रान्तरालत्वमप्यस्मिन्नेव पक्षे सूत्रान्तरे दृष्टम् । इदं च पञ्चदशाङ्गुलपदपक्षे । दशाङ्गुलद्वादशाङ्गुलान्यतम(र)पदपक्षे न्यूनमप्यन्तरालं समावेशानुरोधेन । पिशीलमात्रत्वपक्षे समावेशानुरोधेनान्तरालकल्पना द्रष्टव्या । तत्र पिशीलं पञ्चधा वदन्ति बाह्वोरन्तरालमेकं बद्धमुष्टीरत्निर्द्वितीयमरत्निस्तृतीयं द्वात्रिंशदङ्गुलं चतुर्थं षट्त्रिंशदङ्गुलं पञ्चममिति । विंशत्यङ्गुलं षष्ठमिति केचित् । परिमण्डलत्वपक्षे क्षेत्रतः पिशीलमात्रत्वम् । प्रादेशमात्रत्वेऽप्येवम् । होतारमतिक्रम्य न गच्छेदित्यस्मिन्कल्पे प्रत्यङ्मुखतोदङ्मुखता वा नित्रपने । धिष्णियानतिक्रम्य न गच्छेदित्यस्मिन्कल्प उदङ्मुखतैवेति ।

विभूरसीत्याग्नीध्रीयमाग्नीध्रागारे यथोत्तरेणान्तर्वेदि संचरो भवति ।

आग्नीध्रस्येदमाग्नीध्रीयं धिष्णियम् । आग्नीध्रं च तदगारं चाऽऽग्नीध्रागारम् । आग्नीध्रस्यागारमाग्नीध्रागारमिति वा, तस्मिन्नाग्नीध्रीयं धिष्णियं कर्तव्यं, तच्च यथोत्तरेणान्तर्वेदि वेदिमध्यतो धिष्णियमुत्तरेणाऽऽयतनस्य गमनवेलायां पादस्पर्शो यावत्परिमिते मार्गे न भवति तावत्परिमितप्रदेशं संचरार्थमवशिष्य कर्तव्यमित्यर्थः । अग्नीधः शरणे रणं चेत्यनेनाग्नीच्छब्दाद्गृहे वाच्ये रणप्रत्ययस्तस्माद्वृद्धाच्छ इति छप्रत्ययस्तस्येयादेशः । अगारशब्दो गृहवचनः । प्रवाहण इत्यन्तो मन्त्रः ।

अन्तःसदसमितरान् ।

इतरान्मैत्रावरुणादीनां धिष्णियान् । सदसो मध्य इत्यन्तःसदसम् । अव्ययीभावसमासोऽयम् । शरदादित्वात्समासान्तष्टच्प्रत्ययः ।

बहिरसीत्यपरेण सदोबिलं पृष्ठ्यायां प्रक्रमे होत्रीयम् ।

अपरेण सदोबिलं सदसः पूर्वबिलस्यापरतः प्रक्रमेऽतीते होतुरिदं होत्रीयं धिष्णियं भवतीत्यर्थः । होत्रीयमिति धिष्णियविशेषस्य नामधेयम् । एङ्प्राचां देश इति वृद्धसंज्ञाविधायके सूत्रे वा नामधेयस्य वृद्धसंज्ञा वाच्येति होत्रीयशब्दस्य धिष्णियविशेषनामधेयत्वाद्वृद्धसंज्ञायां वृद्धाच्छ इति छप्रत्ययस्तस्येयादेशः । अत्रैनपा प्रक्रमात्मकमेव सामीप्यं विवक्षितं वचनात् । अन्तःसदसमित्यनेनापरबिलस्य व्यावृत्तिः । बिलशब्दोऽत्र द्वारवाची, सदःपदसांनिध्यादन्यस्य बिलस्यासंभवात् । हव्यवाहन इत्यन्तो मन्त्रस्य ।

श्वात्रोऽसीति दक्षिणेन होत्रीयं मैत्रावरुणस्य ।

पञ्चदशाङ्गुलपदप्रभृतिमानपक्षे प्रादेशान्तरालसंभवाद्द्वादशाङ्गुलपदप्रादेशयोस्तुल्यत्वात्तावत्परिमितमेवान्तरालम् । तथा च दक्षिणेनेत्येनपाऽत्रापि तावदेव सामीप्यं विवक्षितं भवति । दशाङ्गुलद्वादशाङ्गुलान्यतम(र)पदमानपक्षे प्रादेशान्तरालासंभवा-

यावदर्थमन्तरालम् । धिष्णियानां विशीलमात्रत्वपक्षे तु प्रादेशान्न्यूनमेवान्तरालम् । एवमग्निमेष्वपि धिष्णियेषु द्रष्टव्यम् । देव्यौ प्रशास्तारौ मित्रावरुणौ । एतस्यापि मानुषप्रशास्तृत्वेन मित्रावरुणतुल्यत्वात्तदीयकर्मकर्तृत्वाद्वा मित्रावरुणलिङ्गकयाज्याप्रवक्तृत्वाद्वा मैत्रावरुणत्वम् । मित्रावरुणयोः प्रशास्तृत्वं मित्रावरुणौ प्रशास्तारौ प्रशास्तादित्यस्मिन्प्रवरणवाक्य आम्नातम् । मैत्रावरुणस्यैव प्रशास्तेति संज्ञान्तरम् । प्रशास्त्वर्थेनेति प्रस्थितयाज्याप्रैषात् । प्रकर्षेण सर्वान्प्रैष्याञ्छास्तीति प्रशास्तेति तदर्थः । प्रचेता इत्यन्तः ।

उत्तरेण होत्रीयमुदगायतानितरान् ।

अत्राप्यन्तरालव्यवस्था पूर्ववद्द्रष्टव्या । होतृधिष्ण्यस्य सामीप्यं ब्राह्मणाच्छंसिधिष्ण्यं यावदन्तरालं भवति तावद्विवक्षितम् । एवमुत्तरोत्तरेष्वपि ज्ञेयम् । नचैनप्प्रत्ययबलात्सर्वधिष्ण्यानां होतृधिष्ण्यसंलग्नतैव कुतो न कल्प्यतेऽपरेणाऽऽहवनीयं यजमानमात्रीं वेदिं करोतीतिवदिति वाच्यम् । सर्वेषां होतृधिष्ण्यसंलग्नताया एवासंभवेनैतादृशकल्पनाया दूरापास्तत्वादुदगायतानितिवचनविरोधाच्च । नचैनप्प्रत्ययविरोधः । होतृधिष्ण्यस्येतरेषां धिष्ण्यानां च मध्ये यावदन्तरालं तावत एव सामीप्यस्यात्रानायत्या विवक्षणात् । नच होतृधिष्ण्यस्य मैत्रावरुणब्राह्मणाच्छंसिधिष्ण्ययोरेव संलग्नत्वमेवास्तु संभवात्, इतरेषामपि परस्परमेवमेव सजातीयत्वसंपादनायेति वाच्यम् । अन्तरालाभावे स्वस्वधिष्ण्योत्तरेण गमनासंभवापत्तेः । नचाङ्गुलात्मकमेवान्तरालमस्त्विति वाच्यम् । एतावत्परिमितान्तरालप्रदेशस्य गमनक्रियायामयोग्यत्वात् । एवं च यावताऽन्तरालेनाऽऽयतनस्य गमनवेलायां पादाघातो न भवेत्तावदन्तरालं मध्ये कर्तव्यमिति सिद्धं भवति । धिष्णियानां पञ्चदशाङ्गुलपदप्रभृतिमानपक्षे प्रादेशान्तरालान्न्यूनमेव । अन्यथाऽङ्कधारणधर्मेणोपवेशनानुपपत्तेः । नचेष्टापत्तिः । अङ्गप्रधानार्थोपवेशनाङ्गभूताङ्कधारणधर्मकोपवेशनबाधापेक्षया केवलधिष्ण्यसंलग्नत्वादिरूपैनबर्थबाधस्यैवोचितत्वात् । अथवा दक्षिणेन होत्रीयमुत्तरेण होत्रीयमित्यत्र द्वितीया षष्ठ्यर्थे । दक्षिणेनोत्तरेणेतिपदद्वयं दक्षिणत उत्तरत इत्यर्थकं विभक्तिप्रतिरूपकमव्ययं, तेन सामीप्यस्यानपेक्षणे सिद्धे मध्येऽन्तरालसिद्धिः । दशाङ्गुलद्वादशाङ्गुलान्यतम(र)पदमानपक्षेऽङ्कधारणसंकोचः स्थलालाभनिमित्तकसंकुचितपदमानानुरोधेनानायत्या स्वीकर्तव्यः । स्वी कुर्वन्ति चेदानीं शिष्टाः । तत्प्रयुक्तं शालामुखीये तत्तदुपवेशनकाले कालव्यवधाने सति भेदेन तदव्यवधाने सकृत्सर्वादावौपवसथ्ये सौत्येऽहनि च सर्वप्रायश्चित्तं होतव्यं न वा । उदगायतानुदक्संस्थान् । उदगायतानितिवचनं होतृधिष्ण्यस्योत्तरतो ब्राह्मणाच्छंसिधिष्ण्यं सान्तरालं तत उत्तरतः पोतृधिष्ण्यं सान्तरालं तत उत्तरतो नेष्टृधिष्ण्यं सान्त-

---

१ ख. ग. 'शान्न्यून' ।

रालं तत उत्तरतोऽच्छावाकाधिष्ण्यं सान्तरालमित्येवं क्रम इत्यर्थं बोधयितुम्। एतेन प्रागायतत्वं साक्षाद्धोतृधिष्ण्यस्यैव सर्वेषां सामीप्यार्थं समन्तभावश्चेति निरस्तं भवति।

इतरशब्दवाच्यानाह—

तुथोऽसीति ब्राह्मणाच्छंसिन उशिगसीति पोतुरन्धारिरसीति नेष्टुरवस्युरसीत्यच्छावाकस्य प्रतिकृष्टतरम् ।

ब्राह्मणाच्छंसिन उपसंख्यानमिति पञ्चम्या अलुक्। ब्राह्मणे विहितानि शस्त्राण्युपचाराद्ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी, ऋत्विग्विशेषः। द्वितीयार्थे पञ्चम्युपसंख्यानादेव। ब्रह्मशब्दोऽपि स्थलविशेषे ब्राह्मणाच्छंसिनि। ब्रह्मन्यजेतिप्रस्थितयाज्याप्रैषदर्शनात्। पाति यजमानमाशासनद्वारेति पोता, ऋत्विग्विशेषः। अस्ति चास्मिन्नर्थे लिङ्गं मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जन इति पोतृप्रस्थितयाज्यायाम्। नप्तृनेष्टृहोतृपोतृभ्रातृजामातृपितृदुहितृ इत्युणादिसूत्रेण निपातनात्साधुः। पत्नेजनीग्रहणप्रदेशं प्रति पत्नीं नयतीति नेष्टा। अयमप्यनन्तरोदाहृतेनोणादिसूत्रेण निपातनात्साधुः। अच्छशब्देनाच्छशब्दादिसूक्तं लक्ष्यतेऽच्छा वो अग्निमवस इति। तत्, आ, अत्यन्तं समीचीनं वक्तीत्यच्छावाक ऋत्विग्विशेषस्तस्य धिष्णियं प्रतिकृष्टतरमधिकतरमितरधिष्णियतो भवतीत्यर्थः। तत्राऽऽधिक्यप्रमाणस्यानुपदेशाददृष्टार्थं किंचिदधिकं कर्तव्यम्। दृष्टासंभवाददृष्टार्थताऽत्र। वासिष्ठवाधूलौ तु आधिक्ये प्रमाणनियममाहतुः—सर्वेभ्यो धिष्णियेभ्योऽधिकं चतुरङ्गुलैरच्छावाकस्य धिष्णियं भवतीति। विश्ववेदाः कविर्बम्भारिर्दुवस्वानिति क्रमेणान्ताः।

शुन्ध्यूरसीति मार्जालीयं बहिःसदसं दक्षिणार्धे वेदेः सममाग्नीध्रीयेण यथा दक्षिणेनान्तर्वेदि संचरो भवति।

मृज्यन्ते शुद्धानि क्रियन्ते पात्राणि यत्र तन्मार्जालीयम्। मृजेरालीयच्, इत्युणादिसूत्रेण मृजूष् शुद्धावित्यस्माद्धातोरालीयच्प्रत्ययः। बहिःसदसं सदसो बहिर्बहिःसदसम्। अव्ययीभावसमासोऽयम्। शरदादित्वात्समासान्तष्टच्प्रत्ययः। अन्तःसदसमितरानित्यस्यानुवृत्त्या मार्जालीयस्यापि सदस्येव समावेशः स्यात्तं वारयितुं बहिःसदसमिति वचनम्। दक्षिणार्धे वेदेरिति वचनं बहिःसदसत्वेऽपि वेदेरुत्तरार्धं व्यावर्तयितुम्। सममाग्नीध्रीयेणेत्यनेन पूर्वसूत्रोपात्तायाः प्रतिकृष्टतरताया व्यावृत्त्यर्थम्। नन्वेवं लाघवाद्धोतृधिष्णियस्य मुख्यत्वाच्च तस्यैवात्र प्रतिकृष्टतरत्वव्यावृत्त्यर्थं ग्रहणं कर्तव्यं समं होत्रीयेणेति किमर्थममुख्यगुरुभूताग्नीध्रीयग्रहणमिति चेन्न। आग्नीध्रीयमार्जालीययोरुदक्सूत्रार्जवेन साम्यत्वसिध्यर्थं तदुपादानाद्धोतृधिष्ण्ये तदसंभवात्। आग्नीध्रीयस्य महावेद्युत्तरप्रान्तप्राक्सूत्रमध्यमारभ्याऽऽर्जवेन महावेदिदक्षिणप्रान्तप्राक्सूत्रमध्यपर्यन्तमुदक्सूत्रं दत्त्वा तत्र मार्जालीयं कार्यमित्यर्थः फलितो भवति। सममाग्नी-

ग्नीयेणेत्यत्र तृतीया तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्यामिति सूत्रेण । यथा दक्षिणेनान्तर्वेदि संचरो भवतीत्येतत्सूत्रं यथोत्तरेणान्तर्वेदि संचरो भवतीतिसूत्रवद्व्याख्येयम् । बौधायनेनाऽऽग्नीध्रमण्डपस्य पञ्चारत्नित्वमुक्तं मार्जालीयमण्डपोऽपि तद्वदुक्तः सोऽपि संभवे कार्यः । अरत्निमानं चतुर्विंशाङ्गुलप्रभृतिप्रक्रमपक्ष एव संभवति नान्यदा । विंशाङ्गुलपर्यन्तप्रक्रमपक्षे पदमानमेवेति ज्ञेयम् ।

रौद्रमनीकꣳ सर्वत्रानुषजति ।

रौद्रं रौद्रपदवन्तमनीकमनीकपदवन्तं मन्त्रभागं सर्वेषु मन्त्रेषु अन्तिममन्त्रव्यतिरिक्तेषु अनुषजति योजयतीत्यर्थः । स च भागो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा हिꣳसीरिति । इमं भागं तत्तन्मन्त्रान्तेषु योजयतीति निष्कृष्टोऽर्थः । रौद्रमनीकमित्यत्र मतुबर्थकोऽर्शआदित्वादच्प्रत्ययः । एतेन केवलरौद्रानीकपदयोरनुपयुक्तयोर्व्यावृत्तिर्भवति । केवलरौद्रपदोपादान उत्तरस्याऽऽदिना पूर्वस्यान्तं विद्यादित्यनया परिभाषया तत्तन्मन्त्रान्तेष्ववगतेषु तदनन्तरं यस्य कस्यचिद्रौद्रपदवतो मन्त्रस्यानुषङ्गः स्यात् । रौद्रपदवान् मन्त्रस्तु स्वशाखायां ब्रह्मणा त्वा शपामीत्यनुवाकात्मक एव । केवलानीकपदोपादाने यस्य कस्यचिदनीकपदवतः सेनानीकेनेत्यस्यानुषङ्गः स्यात्स च मा भूत्किंतु पदद्वयविशिष्टमन्त्रस्यैवानुषङ्गः स्यादित्येतदर्थम् । पदद्वयविशिष्टस्तु रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा हिꣳसीरित्ययमेवैतत्प्रकरणगतश्च । अहिरसि बुध्निय इत्यन्तिममन्त्रान्त एव पठितत्वात्तत्रैवानुषङ्ग इत्येतादृशार्थं वारयितुमनुषङ्गविधिः । सर्वत्रान्तिममन्त्रव्यतिरिक्तेषु मन्त्रेषु । अन्तिमे तु पठित एवास्ति । अत्र नोपस्पर्शनमनीकविशेषत्वाद्रौद्रशब्दस्य । रौद्रेणानीकेनेति सर्वत्रानुषजतीत्येतावतर्जुमार्गेणैवानुषङ्गसिद्धौ रौद्रमनीकमिति वक्रवचनं रौद्रानीकवद्विशिष्टोऽयमनुषङ्ग इतिज्ञानावश्यकत्वसिध्यर्थम् । ज्ञानाभावे यजुर्भ्रेषप्रायश्चित्तं दक्षिणाग्नौ होतव्यमिति ।

अत्र वेदिस्तरणमेके समामनन्ति ।

पूर्वत्र यद्वेदिस्तरणमुक्तं तत्तत्र न कर्तव्यं किं तु अत्रास्मिन्काले कर्तव्यमित्येक आचार्या वदन्तीत्यर्थः । नचोत्तरं बर्हिष उत्तरबर्हिः स्तृणातीतिश्रुतेर्वैयर्थ्यभिया पूर्वत्र स्तरणं नित्यमत्र द्वितीयं स्तरणं वैकल्पिकमिति वाच्यम् । एतस्याः श्रुतेरग्नीषोमीयार्थबर्हिःस्तरणपरत्वेन सार्थक्यसंभवे द्वितीयापूर्वस्तरणकल्पनाया अनुचितत्वात् ।

अत्र स्तरणे विशेषमाह—

उत्तरवेदिं खरमुपरवान्धिष्णियाꣳश्च न स्तृणाति ॥ २१ ॥

इति हिरण्यकेशिसूत्रे सप्तमप्रश्ने सप्तमः पटलः ।

———

उत्तरवेदिमित्यनन्तरमिवशब्द उपमार्थकोऽध्याहार्यः । यथोत्तरवेदिं न स्तृणाति पूर्वत्र तद्वदत्र स्तरणे खरमुपरवान् धिष्णियानपि न स्तृणातीत्यर्थः । अन्यथा पूर्वत्र स्तरण उत्तरवेदिस्तरणापत्तेः । नचेष्टापत्तिः । उत्तरवेदेरग्न्यायतनत्वेन तत्स्तरणस्य कुत्राप्यदर्शनात्, अग्नेस्तत्र विद्यमानत्वेनासंभवाच्च ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्य सप्तमः पटलः ॥ ७ ॥

अथ सप्तमप्रश्नेऽष्टमः पटलः ।

अग्नीषोमीयस्य पशोस्तन्त्रं प्रक्रमयति ।

अग्निश्च सोमश्चाग्नीषोमौ । अग्नीषोमौ देवता यस्य सोऽग्नीषोमीयः । तस्य पशोस्तन्त्रमग्न्यन्वाधानादिकर्मकलापं प्रक्रमयति आरभत इत्यर्थः । स्वार्थे णिजयम् ।

तस्य निरूढपशुबन्धेन कल्पो व्याख्यातः ।

स्वतन्त्रः पशुर्निरूढः स बध्यते यस्मिन्कर्मणि तत्पशुबन्धाख्यं कर्म तेन कर्मणा तस्याग्नीषोमीयस्य पशोः कल्पः प्रकारो व्याख्यात उक्त इत्यर्थः । तत्र सर्वपशूनामेष कल्पः पशुः प्रातर्दोहविकारः कालसामान्यात्तथाऽऽमिक्षाऽऽग्नेयैन्द्राग्नयोस्तद्विकारेषु चैतदविकृतमग्नीषोमीये तद्विकारेषु चाऽऽश्ववालः प्रस्तर ऐक्षवी तिरश्ची कार्ष्मर्यमयाः परिधयोऽधिकाः पौतुद्रारवेभ्योऽमुष्मा अमुष्य वपाया मेदसः प्रेष्यामुष्मै पुरोडाशस्य प्रेष्यामुष्मा अमुष्य हविषः प्रेष्येति पशोर्दैवते संप्रेष्यत्यैन्द्रे सारस्वत्यां तद्विकारेषु च दार्शपूर्णमासिकः प्रचरणकल्पः प्रचरणकल्प इति पशुप्रकृतिविकृतिभावबोधकं सूत्रम् । आग्नेयैन्द्राग्नयोरित्यादिना पञ्चपशूनां प्रकृतित्वं प्रदर्श्यते । आग्नेयैन्द्राग्नावग्निष्टोमोक्थ्यसंस्थयोरेतौ सवनीयौ पशू तयोरविकृतमन्यूनानतिरिक्तमेतत्तन्त्रं यन्निरूढ उक्तं तयोर्ये विकृतिभूताः पशवस्तेष्वपि तथा । अग्नीषोमीय उपवसथीयः पशुस्तद्विकारेष्वौपवसथेषु निरूढादधिकमाश्ववालादिकं तत्तु पूर्वमातिथ्यायामिष्टौ कृतं यदातिथ्याया बर्हिस्तदुपसदां तदग्नीषोमीयस्येत्यादिनाऽग्नीषोमीयार्थमेवोक्तमिति तद्विकारेष्वपि तथैव । निरूढे सवनीये तद्विकारेषु च प्रणयने पौतुद्रवा एव परिधयो न कार्ष्मर्यमयाः । तेषामग्नीषोमीय एव वचनेन प्राप्तत्वात् । प्रैषविशेषास्तु शाखान्तरेण व्यवस्थापितास्ते निरूढे न सन्तीत्युक्त

मन्त्रैव ते तथैव शाखान्तरास्सवनीयेष्वपि न सन्तीत्येतदविकृतमित्यनेनोक्तम् । ऐन्द्रे सारस्वत्यां तद्विकारेषु च दार्शपूर्णमासिकः प्रचरणकल्प इत्यनेन मैत्रावरुणव्यापारो वपापुरोडाशाङ्गयागेषु व्यावर्त्यते । तत्राग्नीषोमीयादयो निरूढस्यांशेन विकृतयः । अन्याध्वर्यवे चैते प्रकृतयो निरूढो विकृतिरिति । निरूढपशुं प्रकृत्यैव स्वशाखायामञ्जन्ति त्वेति प्रश्ने हौत्राद्याम्नानात्तत्सर्वेषु नैमित्तिककाम्येषु स्वतन्त्रेषु नित्येषु च सर्वेष्वेतेषु पशुषु हौत्रं प्रयच्छत्तेषां प्रकृतिर्भवत्येव । तथाऽऽध्वर्यवे वैशेषिकं वेदिमानादिकं चौपदेशिकमेव प्राप्यान्येषु प्रयच्छत्तथाऽग्नीषोमीयादाध्वर्यवमतिदिष्टं प्राप्य तद्विकृतोऽपि भवति । सर्वपशूनामेष कल्प इत्यनेन सर्वेषां पशुबन्धानां साङ्गो विधिरेष एवेत्येतावन्मात्रं प्रदर्श्यते नातिदेशोऽनेन क्रियते किंतु सोमाङ्गैः संकीर्णोऽग्नीषोमीयसवनीयानां विधिरिति ततो निष्कृष्टो निरूढेऽतिदेशप्राप्तो निरूढ एव व्याख्यातः स सर्वेषां समानः । औपदेशिकोऽग्नीषोमीयादीनामितरेषामातिदेशिकः । ये वैशेषिका मन्त्राः शाखान्तरीया इन्द्राग्निभ्यां त्वा जुष्टमुपाकरोमीत्यादयो निरूढे श्रूयमाणास्तेऽग्नीषोमीयादौ सौर्यप्राजापत्ययोरपि चातिदेशादूह्याः । अत्रेत्थं व्यवस्था तन्त्रान्तर्गतेषु पशुषु सादृश्यादग्नीषोमीयादय एव प्रकृतिभूताः । तत्राप्यौपवसथ्ये क्रियमाणानामग्नीषोमीय एव सुत्यायां क्रियमाणानामाग्नेयादयस्तत्राप्याग्नेयैन्द्राग्नयोस्तुल्यत्वेऽपि पशुपुरोडाशबलेनैवाद्यवस्था । येषां ह्याग्नेयपुरोडाशविकाराः पशुपुरोडाशास्तेषामाग्नेयः सवनीयः प्रकृतिः । येषां तु द्विदेवत्यानां बहुदेवत्यानां वा पशुपुरोडाशाः षडक्षरनामवत्त्वेनैन्द्राग्नपुरोडाशविकारास्तेषामैन्द्राग्न एव प्रकृतिः । येषामनेकदेवतानां चतुरक्षरनामवतामग्नीषोमीय एव पुरोडाशः पशुपुरोडाशप्रकृतिस्तेऽप्याग्नेयस्यैव सवनीयस्य विकाराः । आग्नेयाष्टाकपालधर्माणामग्नीषोमीयैकादशकपालेषु विहितं साक्षादतिदेशमादाय सादृश्याद्विकार इतिसूत्रबोधितसादृश्यहेतुकविकारनिर्वाहोऽत्र कार्यः । एतच्चैतस्मिन्व्यवस्थितविकल्पे द्रष्टव्यम् । इन्द्रदेवत्यानां पशूनां ये पशुपुरोडाशास्तेषां तु ऐन्द्राग्नपुरोडाशधर्मकत्वादैन्द्राग्नः सवनीयः प्रकृतिर्नाग्नेः । अन्यत्र प्रकृतिदेवताभ्यो यथा सौम्यश्चरुरैन्द्रः पुरोडाश इतीति सूत्रेण सोमेन्द्रदेवत्ययोः पुरोडाशयोरेकवचनप्रतिपाद्यदेवत्यत्वेऽपि आग्नेयविकारत्वाभावप्रतिपादनेनाथेतरेऽग्नीषोमीयस्यैन्द्राग्नस्य वेति सूत्रेणैन्द्रस्य सौम्यस्य चाऽऽग्नेयविकारातिरिक्तकोट्यन्तर्गतत्वेन यद्यप्युभयविकारत्वस्येच्छया प्राप्तिर्वाशब्दस्य व्यवस्थितविकल्पार्थत्वं स्वीकृत्यैन्द्रस्यैन्द्राग्नविकारत्वमेव सोमस्याग्नीषोमीयविकारत्वमेवेति तथाऽपि सौत्यसौम्यादिष्वाग्नेयविकारत्वमेव । कपालधर्मसादृश्यात् । प्रकृतिगता देवताः प्रकृतिदेवतास्ताभ्यः प्रकृतिदेवताभ्यः । प्रकृतिगतत्वं हि देवतात्रयस्य, अग्नेरिन्द्रस्य सोमस्य च । तत्राग्नेः स्वातन्त्र्येण सहभूतत्वेन च देवतात्वं प्रकृतौ, इन्द्रस्य सोमस्य चाग्निसहभावेनैवेत्ययं विशेषः । अन्यत्र प्रकृतिदेवताभ्यो यथा सौम्यश्चरुरैन्द्रः पुरोडाश इतीत्यत्रेतिशब्दो वैमृधगुणविशिष्टेन्द्रदेवतापरिग्रहार्थः । अत एव प्रकृतिदेव-

ताभ्य इति बहुवचनं संगच्छते। ननु इन्द्रस्य वैमृधाख्यगुणविशिष्टस्यापीन्द्राभिन्नत्वेनेन्द्रशब्देनैव तद्ग्रहणं तथा च बहुत्वस्य प्रकृतावसंभवेनासंगत्यापत्तिरिति चेन्न। इन्द्रमहेन्द्रवदत्रापि भेदस्य सत्त्वेन बहुत्वस्य संभवेनासंगतेरभावात्। इन्द्रस्य सोमस्य च प्रकृतिगतत्वमांशिकं तदेव प्रकृतिदेवताभ्य इत्यत्र गृह्यते। यद्यप्यग्नेरपि प्रकृतिगतत्वमस्ति तथाऽपि नाऽऽग्नेयस्यान्यत्र प्रकृतिदेवताभ्य इत्यत्र ग्रहणम्। यथा सौम्यश्चरुरैन्द्रः पुरोडाश इत्युभयोरेव ग्रहणात्सोमदेवत्यपशुविषय आग्नेयधर्माणामप्राप्तेः साधितत्वेन सामान्यत्वात्तदपेक्षयाऽऽशभूतस्यैन्द्रस्य विशेषत्वेनैन्द्राग्नधर्माणां प्रापणे प्रबलत्वेन ऽप्यक्षरनामकत्वेन चाऽऽश्वमेधिकसोमेन्द्रपशूनामैन्द्राग्नधर्मा एव, ये क्रत्वन्तरे विहिता ऐन्द्राः पशवस्ते षोडशिसंस्थासंबन्धिसवनीयस्यैन्द्रस्य पशोर्विकाराः, ये सरस्वद्देवताकास्त आग्नेयपशोरेव विकाराः। प्रातिपदिकसाम्यात्सरस्वतीविकारत्वं केचिदिच्छन्ति। ये त्वन्ये सरस्वतीदेवत्या ये च स्त्रीदेवतास्ते स्त्रीदेवतासाम्येनातिरात्रसंस्थासंबन्धिसवनीयायाः सरस्वत्या मेष्या एव विकारा मैत्रावरुणीसौर्याद्यनूबन्ध्या विना। संप्रैषश्च भवतीतिवक्ष्यमाणानूबन्ध्याप्रकरणस्थात्सूत्राल्लिङ्गेन सात्यमत्र न भवतीति ज्ञापितत्वात्। अन्यत्र तु भवत्येवेति व्यवस्था। तस्मादग्नीषोमीयादयः पञ्चापि सोमतन्त्रान्तर्गतानां व्यवस्थिताः प्रकृतयः सोमतन्त्रबहिर्भूतानां तु निरूढ ऐन्द्राग्न इति पञ्चापि पशवः प्रत्यक्षधर्माणो हौत्रेण निरूढस्य विकृतयः। इतर आध्वर्यवेण वैशेषिकेण च हौत्रमतिदेशात्समानमेव प्राप्तमपि शाखान्तरादैन्द्रे सारस्वत्यां च वपापुरोडाशाङ्गयागविषयकमैत्रावरुणव्यापारप्रतिबन्धेनैव व्यवस्थापितम्। औपवसथ्ये क्रियमाणानां सुत्यायां क्रियमाणानां चापि पशवः प्रकृतिभूता यथायथमिति मतमैच्छिकविकल्पाभिप्रायं द्रष्टव्यमित्यस्तु प्रासङ्गिको विचारः। इदानीं प्रकृतमुच्यते तस्य निरूढपशुत्वेन कल्पो व्याख्यात इति सूत्रं हौत्रेण सर्वपशुप्रकृतित्वं निरूढस्यैवेत्यभिप्रायेणैव भगवताऽऽचार्येण प्रणीतमिति द्रष्टव्यम्।

षड्ढोता पश्विष्टिश्चाङ्गभूते न विद्येते।

येऽन्तस्तन्त्रवर्तिनोऽङ्गपशवः समानदेशकालाग्नयश्चाग्नीषोमीयाद्यनूबन्ध्यान्ता आङ्गिनश्च तेषु षड्ढोता न भवति आरम्भार्थत्वात्। प्रधानारम्भेणैव तदारम्भसिद्धेश्च। तथा पश्विष्टिरपि देवतारूपाग्न्यारम्भस्य दीक्षणीययैव सिद्धेर्न भवति। ये तु बहिस्तन्त्रवर्तिनो भिन्नदेशकालाग्नयश्च वायव्यपशुपञ्चपशुसौत्रामणीपश्वादयश्च तेषां सत्यपि कथंचिदङ्गभावे भवत एव षड्ढोतृपश्विष्टी। ननु षड्ढोता पश्विष्टिश्च न विद्येते इत्येतावदेव वक्तव्यं प्रकरणादेवैतस्याङ्गभूतस्य पशोर्लाभात्। अतोऽङ्गभूत इत्येतस्य शब्दस्योपादानं नैव कर्तव्यमिति चेत्सत्यम्। अङ्गभूत इत्येतस्य हेतुपरत्वप्रदर्शनार्थमुपादानस्याऽऽ-

---

१ क तेषु न।

वश्यकत्वात् । यतोऽङ्गभूतः पशुरतः षड्ढोतृपश्चिष्ट्योर्निषेधो न तु केवलाग्नीषोमीयप्रयुक्तोऽयं निषेध इति । तेन सवनीयादिषु पशुष्वपि षड्ढोतृपश्चिष्ट्यभावः सिध्यति । एकवचनं चोपपन्नं भवति । जात्यभिप्रायं चैकवचनम् । तथा चाऽऽपस्तम्बः—षड्ढोता पश्चिष्टिश्चाङ्गभूतेषु न विद्येते इति ।

अग्नीनन्वाधायाऽऽतिथ्यापरिधीनिध्म उपसंनह्यति ।

अग्न्यन्वाधानवचनं सूत्रान्तरोक्ताग्न्यन्वाधानप्रतिषेधनिराकरणार्थम् । अग्नीनन्वाधायेति ल्यप्प्रत्ययोऽग्नीषोमीयस्य पशोस्तन्त्रं प्रक्रमयति प्लक्षशाखामातिथ्याबर्हिष्युपसंनह्यतीति भरद्वाजेन सांनाय्यविकारत्वाच्छाखाहरणमुक्तं तन्मा भूदित्येतदर्थम् । द्रवद्रव्यं हि शाखया शोधनीयं न मांसं कर्मण्यविद्यमाने सहधर्मद्रव्यं निवर्तेत इत्युक्तत्वादिति भावः । आतिथ्याबर्हिष एवाग्नीषोमीयकार्यकारित्वस्योक्तत्वादर्थाद्बर्हिराहरणं निवर्तते । उत्करार्थं बर्हिस्तु सुत्यादिवस एवाऽऽहरणीयम् । प्रस्तरमेवाऽऽहरति बर्हिषः कल्पेनेतिवक्ष्यमाणसूत्रगतैवकारव्यवच्छेद्यं वेद्यर्थबर्हिरेव । अत्रान्वाधेया अग्नय औत्तरवेदिकशालामुखीयदक्षिणाग्नयः सभ्यावसथ्यपक्षे तावप्यन्वाधेयौ । प्राजहितस्य नैवान्वाधानं किंतु शालामुखीयस्यैव । एषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इति पशुसूत्रेण प्रकृताहवनीयस्यैव गार्हपत्यत्वोक्त्या पुराणगार्हपत्यस्य निवृत्तेरुक्तत्वात् । अत्रेति शब्देन तस्मिन्नेव कर्मणि स गार्हपत्यो न तदन्तःपतिताग्निहोत्रहोमे । शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति वक्ष्यमाणसूत्रेऽप्यत्रेति शब्दो योज्यः । अन्यथा कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीति विहितेऽग्निहोत्रहोमेऽपि ज्योतिष्टोमाद्द्वादशाहं द्वादशाहाद्गवामयनं गवामयनात्कुण्डपायिनामयनमित्येवंरूपचोदकपरम्परया प्राप्ते शालामुखीय एव श्रपणं स्यात् । यद्यपि दर्विहोमेऽस्मिन्स्वतश्चोदकाच्छालामुखीयस्य प्राप्त्यभावस्तथाऽपि कुण्डपायिनामयने शालामुखीयस्य चोदकात्प्राप्त्या तदङ्गभूतदर्विहोमहविःश्रपणेऽप्यस्ति तत्प्राप्तिरिति द्रष्टव्यम् । अतोऽत्रेत्येवमवश्यं वक्तव्यम् । तथा चात्रेति शब्देन कुण्डपायिनामयनान्तर्गते नामातिदेशप्राप्तमुख्यगार्हपत्यश्रपणवत्कर्मण्यग्निहोत्रेति । तथा च द्वादशाध्याये प्रथमे पादेऽमुमर्थमाह श्रपणं चाग्निहोत्रस्य शालामुखीये न स्यात्प्राजहितस्य विद्यमानत्वादित्यनेन सूत्रेण । नामप्राप्तेन प्राजहितेनान्यार्थस्य शालामुखीयस्य बाधो युक्त इति भावः । सूत्रार्थस्तु स्पष्ट एव । यद्यपि नाम्नः प्राबल्यं सासमिकन्यायेनैव सिद्धं तथाऽपि प्रसङ्गनिराकरणार्थं सूत्रमिदमिति द्रष्टव्यम् । नचैषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इति सामान्यसूत्रं शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति विशेषसूत्रेण बाध्यते, एवं च शालामुखीयप्राजहितदक्षिणाग्नीनामेवान्वाधानमत्रेति वाच्यम् । एषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इति सूत्रस्थेनात्रेति शब्देन पाशुककर्मण्येव प्रवृत्तेरुक्त्या सौमिककर्मण्येतस्याप्राप्तौ तत्रापि प्राप्त्यर्थं-

मेतत्सूत्रप्रणयनस्याऽऽवश्यकत्वेन समानविषयत्वाभावेन बाध्यबाधकभावस्यैवासंभवात्। एषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इत्येतस्य सूत्रस्य विषयः पाशुकं कर्म शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इत्येतस्य सूत्रस्य विषयः सौमिकं कर्म । एवं च विषयभेदाद्बाध्यबाधकभावो नात्रास्ति । अथवा पशुसूत्रविषयस्य हेतुपरताप्रदर्शनार्थं शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति सूत्रं यतः शालामुखीयं गार्हपत्यकर्मार्थमन्ववस्यन्ति विनियोजयन्ति श्रुतयः पाशुके कर्मणि अतस्तदग्निसाध्यत्वात्तस्मिन्नेव सौमिकान्यपि गार्हपत्यकर्माणि क्रियन्त इति । इध्म इति सिद्धवन्निर्देशादिध्माहरणस्यात्र कर्तव्यता गम्यते । आतिथ्याबर्हिःसंनहनं तु इध्माहरणोत्तरं कर्तव्यं नतु प्रकृतिप्राप्तस्थाने श्यपा तद्बाधात्। अथवाऽऽदानसमय एव बर्हिःसंनहनम्। अथवा परिधीनित्यनन्तरमपिशब्दोऽध्याहार्यः। तेन बर्हिःसंनहनमपि प्राकृतस्थान एव सिध्यति। तथा चाऽऽपस्तम्बः—आतिथ्याबर्हिस्तूष्णीमुपसंनह्यति तांश्च परिधीन्पाशुक इध्म इति। अत्रापि तूष्णीमुपसंनह्यतीत्यनुवर्तते । द्वादशाध्याये प्रथमपादे जैमिनिरपि संनहनहरणे तथेति चेत्, नान्यार्थत्वादिति सूत्राभ्यामाह। संनहनं च हरणं चानयोः समाहारः संनहनहरणं तस्मिन्संनहनहरणे । देशपृथक्त्वान्मन्त्रोऽभ्यावर्तेत इति पूर्वसूत्रोक्ता मन्त्रावृत्तिस्तथाशब्देनानुकृष्यते। नेत्यनेनाऽऽवृत्तिः खण्ड्यते । विहारदेशप्रापणं मुख्यं संनहनहरणयोः कार्यं तदतिरिक्तं कार्यमन्यशब्देनोच्यते । तच्च वेदिप्रापणात्मकं तदर्थत्वादित्यर्थः । यदि वेदिप्रापणार्थताऽपि स्यात्तदा प्रकृतावेव गार्हपत्याहवनीयं प्रति नीयमानेऽपि मन्त्रः प्रयुक्तः स्यात् । एवं संनहनेऽपि दैवाद्ग्रन्थिशैथिल्ये प्रसक्ते पुनस्तूष्णीं क्रियमाणे । नच विहारदेशप्रापणार्थतैवैतयोरित्यत्र किं विनिगमकमिति वाच्यम् । प्रथमोपस्थितेरेव विनिगमकत्वाल्लाघवात् । तदयं निर्गलितोऽर्थो जैमिनिसूत्रस्य देशपृथक्त्वान्मन्त्रोऽभ्यावर्तेत इतिसूत्रोक्तरीत्याऽत्रापि मन्त्रावृत्तौ प्राप्तायां लूनस्य बर्हिषो विहारदेशप्रापणार्थं यत्संनहनं हरणं च तदर्थौ हि संनहनहरणौ मन्त्रौ प्रकृते तथात्वाभावान्न मन्त्राविति । अत एव संभरणमन्त्रोऽपि न तेन परिधीनां सामिधेन्यर्थकाष्ठसंभरणोत्तरं तूष्णीं पृथगेव संभरणम् । अतः संभरणमन्त्रे त्रीनरीधीनिति लुप्यते । विंशतिधेत्यूहः संचरा इति संनामश्च । उपवेषधृष्टिशब्दनिवृत्तया संचरानित्येव वा । उपसंनह्यतीत्यत्रोपशब्दादिध्मसमिधामुपर्येव परिधीनां संनहनम् । अत्र तूष्णीं प्लक्षशाखां छित्वाऽऽनयन्ति । केचित्तु बर्हिर्धर्मेणैव तूष्णीमानयन्ति ।

अग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीः स्तीर्त्वा यथार्थं पाशुकानि पात्राणि प्रयुनक्ति ।

अत्राग्नयो ये साक्षादन्वाहितास्त एव । ते चौत्तरवेदिकशालामुखीयदक्षिणाग्नयः । सभ्यावसथ्यपक्षे तावपि । आग्नीध्रस्य साक्षादन्वाधानाभावान्न परिस्तरणम् । अग्नीन्प-

रिस्तीर्येत्यादि स्तीर्त्वेत्यन्तं कृतव्याख्यानम् । अत्र वेदकरणावचनादेवेदं ज्ञातं भवति महावेदिकरणार्थं कृतो यो वेदः स एवाऽऽवभृथाद्भवतीति । अवभृथे तु वेदकरणविधानात्पृथगेव वेदः । यथार्थं यथाप्रयोजनम् । इदं वचनमतिदेशप्राप्तौषधपात्राणां प्रयोजनाभाव इति वक्तुम् । पाशुकानीति वचनं पशुसंबन्धिनां स्वधितिवसाहोमहवनीयूरयूपशकलारणीसुवर्णशकलानां प्रयोगार्थम् । ननु पाशुकानीति नैव वक्तव्यं प्रकरणादेव तत्सिद्धेरिति चेन्न । तस्याऽऽपस्तम्बोक्तप्रचरणीप्रयोगनिवृत्त्यर्थत्वात् । नच सुत्यायामेव तत्प्रयोगविधानादत्रार्थान्निवृत्तौ पाशुकानीति वचनं व्यर्थमेवेति वाच्यम् । सुत्यायां प्रथमं तत्प्रयोगविधानेन पूर्वत्र प्रचरणी१ स्रुच२ सप्तमीं प्रयुनक्तीत्यापस्तम्बोक्तरीत्या ध्रुवाप्रयोगापत्तौ तन्निवृत्त्यर्थत्वेन सार्थक्यसंभवात् । सोमपात्रैर्न प्रसङ्गसिद्धिरित्यपि पाशुकानीत्यनेन प्रदर्शितं भवति । तथा च द्वादशाध्याये प्रथमपादे जैमिनिः—पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात्, न्याय्यानि वाऽप्रयुक्तत्वादप्रयुक्तैः प्रसङ्गः स्यात्, अस्ति शब्दसंस्पर्श इति । पूर्वाधिकरणे यथा महावेद्या प्राकृतवेदिप्रसङ्गस्तथा पात्रेष्वपि जुह्वादिपात्रेष्वपि प्रसङ्गः स्यात्, होमार्थत्वात्तेषामपि होमार्थत्वात् । होमार्थैः सौमिकैरैष्टिकजुह्वादिसाधकहोमादिकार्यसिद्धेरिति भावः । अयं पूर्वसूत्रार्थः । उत्तरसूत्रार्थस्तु न्यायो होमादिरूपं कार्यं तस्मादनपेतानि न्याय्यानि जुह्वादीनि । धर्मपथ्यर्थन्यायादनपेत इति सूत्राद्यत्प्रत्ययः । वाशब्दः पूर्वपक्षव्यावर्तकः । जुह्वादीन्येव सोमव्यतिरिक्तद्रव्यहोमकारीणि नतु चमसैः प्रसङ्गसिद्धिरिति । कुतः । अप्रयुक्तत्वात् । वेदिर्हि प्रयुक्ता पात्राणि त्वप्रयुक्तानि । अङ्गे प्रयुक्ते तद्गुणार्थं न प्राकृतस्य पुनः प्रयोगः । येन रूपेणैव प्राकृतपदार्थस्याङ्गत्वं तेनैव तल्लक्षणाङ्गप्रयुक्तौ सत्यां तत्र गुणहानावपि प्रसङ्गो युक्तः । भवति च वेद्यां हवींष्यासादयतीति वेदित्वेनैव प्राकृतवेदेरङ्गत्वेन वेदिलक्षणाङ्गप्रयुक्तौ सत्यां तत्र गुणहानावप्यासादने प्रसङ्गो युक्तः । इह तु नाङ्गप्रयुक्तिर्जुह्वादीनां चमससाधारणपात्रत्वेन नाङ्गत्वं येनाङ्गप्रयुक्तिः स्यात् । किं तु जुहूत्वादिना जुह्वा जुहोतीति वचनात् । ततश्च जुहूरूपस्याङ्गस्यैवाप्रयुक्तत्वात्पुनरनुष्ठेयानां जुह्वादिभिरङ्गैरनुष्ठानाय प्राकृतपात्रप्रयुक्तिरिति । तथा च निर्गलितोऽयमर्थः—न्यायशब्देन प्रकृतकार्यमुच्यते । प्रकृतकार्यं होमादिकार्यं तेभ्योऽनपेतानि बाधकशास्त्रं विना तेभ्यो न वियुक्तानि एतादृशानि जुह्वादीनि तेष्वेव सोमाङ्गैष्टिककर्मसु न तु साधारणधर्मेण पात्रत्वरूपेणैव प्रयुक्तौ जुह्वादीनां कथं तत्प्रयुक्तैर्ग्रहचमसादिभिः प्रसङ्गसिद्धिर्भवति । जुह्वादीनि तु जुहूत्वादिविशेषधर्मेणैव प्रयुक्तानि नतु पात्रत्वधर्मेण प्रयुक्तानि । अतो न प्रसङ्गसिद्धिरिति । इति द्वितीयसूत्रार्थः । तृतीयसूत्रार्थस्तु—शब्दस्य जुहूशब्दस्य सम्यक्*पात्राणीतिवचनं स्फ्यादिसाधारणपात्रसंग्रहार्थम् । अन्यथा प्रचरणीव्यावृत्त्यर्थं

---

* अत्र तृतीयसूत्रार्थप्रतिपादको ग्रन्थस्त्रुटितः ।

पाशुकवचनस्याऽऽवश्यकत्वे स्वविल्यादीनामेवासाधारणत्वेन पाशुकत्वात्तेषामेव प्रयोगः इति शङ्का स्यात्तां वारयितुं पात्राणीतिवचनम् ।

यत्प्रागाज्यग्रहणात्तत्कृत्वा प्रतिहृत्य
गार्हपत्ये पाशुकान्याज्यानि गृह्णाति ।

जुहूप्रभृतीश्चतुर्गृहीते गृहीत्वा तृतीयमाज्यस्य दधन्यानीयेत्यादिना पशुबन्धोक्तेन प्रकारेणेत्यर्थः । गार्हपत्य इति सप्तम्यन्तेनैव प्रतिहृत्येत्यस्यान्वयः । प्रतिहरणं प्रतीचीनं हरणम् । गार्हपत्य इति समीपसप्तमी । गार्हपत्यसमीपदेशे प्रतीचीनं हृत्वा तत्रैव पाशुकान्याज्यानि गृह्णातीत्यर्थः । प्रतिहृत्येत्यत्रान्तर्भावितो णिज्द्रष्टव्यः । अन्यथा गार्हपत्ये पाशुकान्याज्यानि गृह्णातीत्यनेनैवार्थात्प्रतीचीनहरणे सिद्धे प्रतिहृत्येत्यस्य वैयर्थ्यापत्तेः । प्रोक्षण्यासादनमातिथ्यावर्हिषा यावान्प्रदेश आस्तीर्यते तावतः प्रदेशस्य पश्चार्धे वितृतीयदेशे भवति । अत्र प्रचरण्याः पात्रप्रयोगकाले प्रयोगो नैव भवति । सुत्यायामेव तद्विधानात् । प्रचरण्यामाज्यग्रहणकाले प्रथमं न ग्रहणं तस्यापि सुत्यायामेव विहितत्वात् । अन्तेऽपि च न वैसर्जनहोमकाल एव तस्य विहितत्वात् ।

एवा वन्दस्वेत्युपस्थे ब्रह्मा राजानं कुरुते ।

अपोद्धृत्याऽऽज्यस्थालीमित्यन्तेऽध्वर्युणा कृते । उपस्थः पादविन्यासविशेषरूपासनविशेषः । तस्मिन्राजानं सोमं कुरुते स्थापयतीत्यर्थः । ब्रह्मत्वसूत्रेणैव सेत्स्यति सत्यत्र पुनर्वचनं प्रयोगक्रमज्ञानार्थमुपस्थे राज्ञः स्थापनादनन्तरमेवाऽऽदानं ग्रावादीनां न तत्पूर्वमिति । अत्र मन्त्रवचनं मन्त्रावचनात्पक्षे तूष्णींत्वमपि स्यात्तद्व्यावर्तयितुम् । अब्रह्मेति पदच्छेदो वाऽत्र । ब्रह्मव्यतिरिक्तो यः कश्चनर्त्विक्तद्गणस्थोऽन्यो वोपस्थे राजानं कुरुत इत्यर्थः । इदं च ब्रह्मत्वसूत्रे वक्ष्यमाणेन विधिना विकल्पते । ब्रह्मोपस्थे राजानं कुरुते ब्रह्मव्यतिरिक्तो यः कश्चनर्त्विग्वेति । अस्मिन्व्याख्यानेऽपि मन्त्रवचनं ब्रह्मव्यतिरिक्तर्त्विगर्थमपेक्षितमेव । अन्यथा तूष्णींत्वतादवस्थ्यापत्तेः ।

आददते ग्राव्णो वायव्यानि द्रोणकलशं चमसाना-
तिथ्यावर्हिरिध्ममाज्यान्यग्नीषोमीयं चानुनयन्ति ।

आददत इत्यनन्तरं परिकर्मिण इति शेषः । कर्तृसमुदायापेक्षमत्र बहुवचनम् । ग्रावादीध्मान्तानां रज्ज्वा बद्ध्वा तथा वहनेनाप्यनुनयनं संभवति । अत आदानविधिरिति चेत् । तस्य ग्रावादिचमसान्तानां भङ्गेनैव निवृत्तत्वात् । अर्थादेवाऽऽदानविधौ सिद्धे वचनं व्यर्थमिति चेत्सत्यम् । तस्य ब्रह्मकर्तृकाद्राज्ञ उपस्थे स्थापनादनन्तरमेवाऽऽदानं यथा स्यान्न तु पूर्वमपीच्छया कदाचिदपीत्येतादृशार्थज्ञापनार्थत्वेन वैयर्थ्याभावात् । ग्रावाणः प्रसिद्धाः । वायव्यानि ऊर्ध्वपात्राणि । द्रोणाकारः कलशो द्रोणकलशः । स

च चतुरङ्गुलदण्डः परिमण्डलश्चतुरश्रो वाऽर्धसिद्धपरिमाणोऽर्धसिद्धबिलोऽत्र । अत एव सूत्रकृता चतुरश्रपरिमण्डलान्यतराकारता द्रोणचितेरप्युक्ता । तेषां यान्यनादिष्टवृक्षाणि विकङ्कतस्य तानीति वक्ष्यमाणवचनाद्वैकङ्कतः । अभावे वारणव्यतिरिक्तयज्ञियवृक्षजः । अहोमार्थानि तु वारणस्येति सूत्रेणाहोमार्थपात्र एव वारणवृक्षजत्वोक्त्या द्रोणकलशे होमार्थत्वस्यापि सत्त्वेनार्थाद्वारणवृक्षनिषेधस्यैव प्रवृत्तेः । मार्तिकस्तु कलशो न भवति । नहि मृन्मयमाहुतिमानश इति श्रुत्या निषेधात् । घर्मे तु वाचनिकं मृन्मयस्य घर्मस्य होमसाधनत्वम् । चमसा वक्ष्यमाणलक्षणाः । ग्रावादीनि पूर्वोपयुक्तानि प्रोक्षितान्येव । आतिथ्याबर्हिस्तूष्णीमेव सप्रस्तरं संनद्धम् । इध्मः सातिथ्यापरिधिकः संनद्धः । आज्यानि स्रुग्गतानि स्थालीगतं च । स्रुग्गतस्थालीगते पृषदाज्ये च । अग्नीषोमीयमग्नीषोमदेवत्यमुपकल्पं पशुं येन कर्णगृहीतेन राज्ञ आतिथ्यं कृतं यजमानेन तम् । चकारोऽनुक्तसमुच्चयार्थः । तेन स्रुवसोमस्थालीपूतभृदाधवनीयपरिप्लवैकधनाकलशापन्नेजनीकलशवसतीवरीकलशदशापवित्रोदचनादीन्याददते परिकर्मिणः । प्रायश्चित्तपशुसत्त्वे तौ च । अनुनयन्तीत्यत्र पूर्वोक्तानि ग्रावादीन्येव संबध्यन्ते । अग्निं सोमं चानु पश्चाद्भागमेतानि नयन्ति प्रापयन्ति परिकर्मिण इत्यर्थः । आतिथ्याबर्हिष इध्मस्य चोपसादितत्वेऽपि अत्रानुनयनवचनात्पुनर्ग्रहणं ग्राववत् ।

उत्पत्नीमानयन्त्यन्वनांसि प्रवर्तयन्ति ।

पत्नीमुदानयन्तीत्यन्वयः । श्रुतिरेवेयमनूद्यत उत्पत्नीमानयन्तीति । अत एव व्यवहिताश्चेति सूत्रेण विहितमुपसर्गधात्वोर्मध्ये पदान्तरव्यवधानं न विरुध्यते । बहुवचनं परिकर्म्यभिप्रायम् । ते च बहुवचनात्त्रिप्रभृतयः । एतच्चाऽऽनयनं पत्नीशालातः शालामुखीयं प्रति । बहुभिरानयनमदृष्टार्थम् । अनांस्यनुप्रवर्तयन्तीत्यन्वयः । प्रवर्तनं नयनम् । इयमपि श्रुतिरेवानूद्यते । पदान्तरव्यवधानाविरोधोऽत्रापि पूर्ववद्द्रष्टव्यः । लौकिकान्यत्रानांसि । बहुवचनात्त्रिप्रभृतीनि । अनःप्रवर्तका बहुवचनात्प्रत्यनस्त्रिप्रभृतयः । अनुशब्दात्पश्चादनसां प्रवर्तनम् । एतानि शालामुखीय उत्तरवेदिसमीपे वा स्थाप्यन्ते यथोपयोगम् । अनसामभावे परिकर्मिणो हविरादि वहेयुः । तच्च महावेदिमुत्तरेणाऽऽग्नीध्रमण्डपपूर्वावधिपर्यन्तमेव । बहुवचनात्परिकर्मिण ऋत्विजो वैव नयन्ति । एतेन नयनार्थं बलीवर्दयोजनं नेति सूचितं भवति । वक्ष्यमाणकर्मोपयोगिसामग्रीसहितानि शकटानि प्रवर्तयन्ति । यावदेवास्यास्ति तेन सह सुवर्गं लोकमेतीति लिङ्गात् । अन्वनांसि प्रवर्तयन्ति यदस्यात्र शालं भवति पूर्वं तेनाग्निमन्ववस्यन्तीति बौधायनसूत्राच्च । शालं यज्ञायुधं यज्ञपात्राणीति यावत् । अनसां प्रवर्तनं यायावरविषयमित्यापस्तम्बः । तेनैतन्मते शालीनस्य निर्मन्थ्य एवेति गम्यते ।

---

१ ख. ग. 'द्वकि' ।

पत्न्युदानयनप्रकारमाह—

प्रैतु ब्रह्मणस्पत्नीति नेष्टा पत्नीमुदानयति ।

परिकर्मिभिः साकं नेष्टाऽपि पत्नीमुत्थाप्याऽऽनयति वैसर्जनहोमार्थं शालामुखीयं प्रति प्रैतु ब्रह्मणस्पत्नीति मन्त्रेणेत्यर्थः । उत्थाप्येत्ययमर्थ उच्छब्दाल्लभ्यते । उत्थाप्येत्यनेन यदि तिष्ठन्ती तदा तामुपवेश्योत्थाप्यैवाऽऽनेया नतु तादृश्येवाऽऽनेयेति बोध्यते । निपाता अनेकार्थका इति शास्त्रात् । उच्छब्दः शनैरित्यर्थे वा । वर्णेन सीदत्विति मन्त्रान्तः ।

अथाहमनुकामिनीत्यानीयमाना जपति ।

आनीयमाना नेष्ट्रा परिकर्मिभिश्च । पत्नीविशेषणमेतत् । विशा इहेति मन्त्रान्तः ।

सुप्रजसस्त्वा वयमित्यपरेण शालामुखीय-
मुपविश्य दार्शपौर्णमासिकान्मन्त्राञ्जपति ।

शालामुखीयस्यापरभागे समीप एवोपविश्य दर्शपूर्णमासयोर्भवा दार्शपौर्णमासिकास्तान्मन्त्रानग्ने गृहपत इत्यादीञ्जपति । पत्नीत्यनुवर्तते । अध्यात्मादेष्ठञिष्यत इत्यनेन ठञ् । अनुशतिकादित्वादुभयपदवृद्धिः । जपतीत्यनेनोपस्थानादीन्निवर्त्य तत्स्थाने जपोऽनेन विधीयते । सुप्रजसस्त्वा मम पुत्रा इत्यनयोस्तु स्वभावतो जप एव ।

शालामुखीयं गार्हपत्यकर्मभ्योऽन्वव-
स्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्ते ।

शालाया मुखं शालामुखं प्राग्वंशस्य पूर्वो भागः । तत्र भवः शालामुखीयो गृहपतिर्यजमानस्तेन संयुक्तोऽग्निर्गार्हपत्यः । गृहपतिसंयुक्तत्वं तदुत्पादितत्वेन । अतिप्रसङ्गपरिहारार्थं रूढिरपि स्वीकर्तव्या । गार्हपत्यस्य कर्माणि गार्हपत्यकर्माणि तेभ्यो गार्हपत्यकर्मभ्यो गार्हपत्यकर्मार्थमन्ववस्यन्ति श्रुतयो यतः । अतो यानि गार्हपत्यकर्माणि सर्वाणि तानि तस्मिञ्शालामुखीये क्रियन्त इत्यर्थः । प्रथमतः प्राग्वंशरूपाया एव शालायाः सिद्धत्वात्तन्मुखभवस्य प्राकृताहवनीयस्यैव शालामुखीयत्वम् । कृत्स्नायाः शालाया असिद्धत्वात्तन्मुखभवस्यापि औत्तरवेदिकस्य न शालामुखीयत्वम् । यद्यौत्तरवेदिकस्य शालामुखीयत्वं स्यात्तदा प्राञ्चो गच्छन्तीत्येतद्विरुध्येत । तस्मात्प्राकृताहवनीय एव शालामुखीयत्वम् । अत एव हविर्धानप्रणयने युञ्जते मन इत्याहुत्यधिकरणीभूतस्याग्नेरौत्तरवेदिकशब्देनैव ग्रहणं कृतं नतु शालामुखीयशब्देन । अथवाऽयमर्थः—शालामुखीयं शालामुखीयसंज्ञकं प्राकृताहवनीयं गार्हपत्यकर्मार्थमन्ववस्यन्ति कल्पयन्ति कर्तार इति शेष इति । द्विविधोऽत्र नियमः—शालामुखीयमेव गार्हपत्यकर्मभ्योऽन्ववस्यन्ति नतु पुराणगार्हपत्यमिति, उत्तरनियमेनाऽऽहवनीयकर्माणि व्याव-

र्यन्ते, आहवनीयत्वेऽपि शालामुखीयं गार्हपत्यकर्मभ्य एवान्ववस्यन्ति नत्वाहवनीयकर्मभ्योऽपीति । गार्हपत्यकर्माणि सौमिकान्यत्र विवक्षितानि नतु पाशुकानि । तेषु तु एषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इत्येतत्सूत्रादेव सिद्धेः । नन्वेवमेषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इत्येतस्मादेव सूत्रादपि सिध्यति किमर्थमिदं वचनमिति चेत्सत्यम् । एषोऽत्राऽऽहवनीय इत्यत्रत्येनात्रेति शब्देन पाशुककर्मस्वेवैतस्य प्राप्तत्वेन तदितरत्राप्राप्तौ तत्रापि प्राप्त्यर्थमेतत्सूत्रप्रणयनस्याऽऽवश्यकत्वात् । सौमिकेषु अग्निप्रणयनोत्तरं द्विविधगार्हपत्योपस्थितौ कस्मिन्गार्हपत्यकर्म कर्तव्यमित्याशङ्कायां शालामुखीयस्यैव गार्हपत्यकर्मसंबन्धित्वं नियम्यते । गार्हपत्यसंबन्धीनि सौमिकानि कर्माणि अग्नीषोमप्रणयनमारभ्यैव प्रवर्तन्तेऽतोऽत्र परिभाषाकरणम् । नन्वेवं तत्र तत्र गार्हपत्यशब्द एव प्रयोक्तव्यः, परिभाषयैव शालामुखीयस्य प्राप्तिर्भविष्यति, शालामुखीयस्य गार्हपत्यत्वमौत्तरवेदिकस्याऽऽहवनीयत्वं व्यावर्तयितुमेवोदयनीयायां प्राग्वंशग्रहणम् । एवं चोदयनीयाविषयकातिप्रसङ्गवारणे सिद्धे किमर्थं क्वचित्क्वचिच्छालामुखीयपदोपादानं क्रियत इति चेन्न । सर्वेषामितउत्तरभाविकर्मणां सौमिकत्वाविशेषेऽपि कर्मविशेषपरत्वमेव परिभाषाया ज्ञापयितुं तदावश्यकत्वेन तत्र तत्र शालामुखीयपदोपादानस्य प्रयोजनसत्त्वात् । तथा हि शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति परिभाषया यागसंबद्धान्येव कर्माणि गृह्यन्ते । अत एव सवनीयपुरोडाशप्रयुक्तपात्रासादनादीनां सवनीयपुरोडाशयागसंबद्धत्वादेव शालामुखीयप्राप्तेर्न कस्याप्यग्नेः श्रवणम् । अत एवोदयनीयायां प्राग्वंशग्रहणम् । यागव्यतिरिक्तेषु यागासंबद्धेषु वैसर्जनहोमादिषु गार्हपत्ये जुहोतीत्येवमुच्यमाने गार्हपत्ये जुहोतीति तत्र तत्र प्रत्यक्षश्रुतौ श्रूयमाणत्वेन प्राकृतगार्हपत्यपरतैव स्यात्तां वारयितुं शालामुखीयवचनमावश्यकं, प्रत्यक्षशालामुखीयपदश्रवणस्य यत्राभावः सवनीययागप्रयुक्तपात्रप्रयोगानिर्वापादौ तत्र परिभाषायाश्चरितार्थता । यागभिन्नेषु यागासंबद्धेषु वैसर्जनादिषु शालामुखीयग्रहणं प्राग्वंशे गार्हपत्यात्परनीत्यत्र प्राजहित एव गार्हपत्य इति परिसंख्यातुम् । नन्विदमेषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इत्यनेनैव सिध्यतीति चेन्न । एतत्सूत्रस्य तत्रस्थेनात्रेतिशब्देन पाशुकमात्रपरतायाः प्रदर्शनेन सवनीयपुरोडाशयागस्य पाशुकत्वाभावेन परिभाषाया अप्राप्तौ तत्प्रापणार्थं शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति परिभाषाया अवश्यमपेक्षितत्वात् । नचैवं वैसर्जनहोमादिष्वपि परिभाषयैव सिध्यतीति वाच्यम् । तथा सति तत्र तत्र शालामुखीयग्रहणस्य निर्हेतुकत्वापत्तेः । नच वैसर्जनहोमादिष्वपि कस्याप्यग्नेः श्रवणं माऽस्त्विति वाच्यम् । आहवनीये जुह्वा हूयन्त इति परिभाषयाऽऽहवनीयप्राप्त्यापत्तेः । शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति सूत्राच्छालामुखीये गार्हपत्यकर्मप्रवृत्तिर-

ग्नीषोमप्रणयनमारभ्यैव नत्वन्वाधानमारभ्येत्येतादृशार्थाङ्गीकारे शालामुखीयस्य गार्ह-पत्यत्वेनान्वाधानमेव न स्यात्, गार्हपत्यत्वस्यैवाभावात् । इष्टापत्तौ तु प्रकृतकर्मण्यनु-पयुक्तस्य शालामुखीयस्यान्वाधानाभावश्चाऽऽपद्येत । अत्रापीष्टापत्तौ शालामुखीययोने-राग्नीध्रीयस्याग्नेरप्युपयोगसत्त्वेन तस्यानन्वाहिततापत्तिरित्येवं महान्विप्लव आपद्येत । अतो हेतुपरत्वमेवैतस्य युक्तमिति सुस्थम् । आहवनीय आग्नीध्रीयभागे विद्यमानेऽपि तदानीमेव गार्हपत्यादृष्टसंक्रमणात्तत्र कर्मोपपत्तिर्यथाऽऽपस्तम्बीयैः कृता तथाऽ-स्माभिरपि कर्तव्या । एतेन सोमसंबन्ध्यग्निप्रणयनप्रकरणस्थ एष सोमस्याऽऽहवनीयो यतः प्रणीयते स गार्हपत्य इत्यापस्तम्बसूत्रे, सत्याषाढभरद्वाजयोस्तु मतादाग्नीध्रप्रणय-नात्परत एव तत्र गार्हपत्यकर्माणीति द्रष्टव्यमिति सत्याषाढभरद्वाजसूत्राशयमज्ञा-त्वाऽऽपस्तम्बसूत्रविरुद्धमर्थं वर्णयन्तो धूर्तरामाण्डाररुद्रदत्ताः परास्ताः ।

समानव्रतान्ह्वयध्वमिति संप्रेष्यति ।

परिकर्मिण ऋत्विजो वाऽत्र प्रेष्याः । अपि समुच्चितं सपिण्डसहकृतं व्रतमेकपाक-संभोजनं येषां ज्ञातीनां तान् । अथवाऽपिशब्दस्तुल्यत्वार्थकस्तुल्यमेकपाकाशित्वरूपं व्रतं येषां तानिति । संह्वयध्वमाह्वयतेति प्रैषार्थः । परपस्यायनार्थत्वादुच्चैस्त्वम् । उप-सर्गस्य क्रियायामन्वयः । व्यवहिताश्चेति सूत्रादुपसर्गक्रिययोर्मध्ये पदान्तरव्यवधानं न विरुध्यते । एतस्य प्रैषस्य शाखान्तरीयत्वाच्छन्दस्त्वमस्त्येव ।

तꣳह्वयन्ते यजमानस्यामात्यान् ।

संह्वयन्त आह्वयन्ति यजमानस्यामात्याञ्ज्ञातीनित्यर्थः । परिकर्मिण ऋत्विजो वेति शेषः । बहुवचनं परिकर्म्यृत्विजामन्यतमप्राप्त्यर्थम् । संह्वयन्त इत्यत्र निसमुपविभ्यो ह्व इत्यात्मनेपदम् । अमात्या इति पाठे प्रथमा द्वितीयार्थे । अमात्यशब्द एकपाका-शिसगोत्रज्ञातिपरः ।

अध्वर्युं यजमानोऽन्वारभते यजमानं
पत्नी पत्नीं यजमानस्यामात्याः ।

अध्वर्युं यजमानोऽन्वारभते तं पत्नीति तच्छब्देनैव यजमानपरामर्शसिद्धौ पुनर्यजमान-ग्रहणं तच्छब्दस्य सर्वनामत्वेन बुद्धिस्थपरामर्शित्वात्कदाचिदादावुपस्थितत्वेन मुख्यत्व-मादायाध्वर्योर्व्यवहितस्यापि तस्यैवान्वारम्भ इति शङ्कां दूरीकर्तुम् । यजमानं पत्नी तां यजमानस्यामात्या इत्यत्र तच्छब्देनैव पत्न्याः परामर्शसिद्धौ पुनः पत्नीपदोपादान-मनेकपत्नीसत्त्वे सर्वासामप्यन्वारम्भार्थम् । अन्यथा तच्छब्दस्य प्रधानपरामर्शित्वमादाय ज्येष्ठया न विनेतरा इतिशास्त्रात्परार्थं कर्म कर्तव्यं ज्येष्ठयैव न चान्ययेति शास्त्राच्च ज्येष्ठाया एव प्रधानत्वेन तस्या एवान्वारम्भः स्यात्स मा भूत्किंतु सर्वा अप्यत्रान्वार-

---

१ क. ज. झ. ड. °मात्याः ।

मेयुरित्येतदर्थम् । सर्वा अपि पत्नयो यजमानमेवान्वारभन्ते सवर्णा असवर्णाश्च । सर्वा अपि पत्नीरमात्या अन्वारभन्ते । पत्नीशब्दग्रहणादाधानोत्तरं योढा तस्या अन्याधानाद्यसंबद्धतायां यज्ञसंयोगप्रयुक्तस्य पत्नीत्वस्य पत्युर्नो यज्ञसंयोग इति पाणिनिप्रोक्तस्याभावेन न पत्नीत्वेन ग्रहणं किंत्वमात्यत्वेनैव । यजमानस्यामात्या इत्यत्र यजमानग्रहणमध्वर्युव्यावृत्त्यर्थम् । अमात्या भ्रातृपुत्रादयः, भ्रातृपुत्रादीनां पत्नयः, अप्रत्ताः कन्याश्च । प्रत्तानां गोत्रान्तरसंक्रा(क)मात्र ग्रहणम् । पत्नीमेवान्वारभन्तेऽमात्या नान्योन्यमिति पत्नीं यजमानस्यामात्या इत्यस्यार्थः ।

तानहतेन वाससा प्रच्छाद्य प्रचरण्यां चतुर्गृहीतं
गृहीत्वा प्रच्छादनार्थस्य वाससो दशाया१
हिरण्यं बद्धवाऽऽज्येऽवधाय स्रुग्दण्डे वाससोऽन्त-
मुपनियम्य शालामुखीये वैसर्जनौ जुहोति त्व१
सोम तनूकृद्भ्य इति पूर्वामाहुतिं जुहोति जुषाणो
अप्तुराज्यस्य वेतु स्वाहेति द्वितीयाम् ।

तानमात्यानयजमानादीन्वा । तानिति तच्छब्देनाध्वर्युरात्मानं न प्रच्छादयेदिति गम्यते । ईषद्धौतं नवं श्वेतमित्यादिलक्षणलक्षितेन वाससाऽऽच्छादनपर्याप्तेन प्रच्छाद्य प्रकर्षेण च्छादयित्वेत्यर्थः । छादनं शिरसां शिरःसु च्छादितेषु अमात्याश्छादिता भवन्ति । सर्वेषु गात्रेषु शिरसः प्रधानत्वात् । यथा शिरांसि न दृश्यन्ते तथा छादयेदिति प्रकर्षः । प्रचर्यतेऽपूर्वो होमः क्रियतेऽनयेति प्रचरणी । योगरूढं पदं, तस्यां चतुर्गृहीतमाज्यं स्रुवेण गृहीत्वा प्रच्छादनार्थे तस्य वाससो दशाऽञ्चलस्तत्र हिरण्यं निक्षिप्य स्रुचः प्रचरण्या दण्डः स्रुग्दण्डस्तस्मिन्वाससोऽन्तमुपनियम्य संश्लिष्टं धृत्वा यथा न चलति, शालामुखीयेऽग्नाववान्तरदीक्षा विसृज्यते याभ्यामिति वैसर्जनौ वैसर्जननामकौ होमौ जुहोति । तत्र त्व१ सोम तनूकृद्भ्य इति पूर्वा प्रथमा वैसर्जनाहुतिः । जुषाणो अप्तुरिति द्वितीया । होमार्थं पात्रासादनपवित्रकरणप्रोक्षणीसंस्कारस्रुवप्रचरणी संमार्गाज्यसंस्कारान्कृत्वा कर्तव्यौ । प्रच्छादनार्थस्येति वचनमन्यवासोव्यावृत्त्यर्थम् । दशायामिति वचनं दशारहितप्रान्तव्यावृत्त्यर्थम् । दशायामिति सप्तमीनिर्देशाद्दशायामन्येन सूत्रेण दर्भेण वा बन्धनं नतु दशयैव बन्धनम् । एतच्च हिरण्यं वलयाकृति सच्छिद्रं वा भवति योग्यतया यथा घटमानयेति सामान्यत उक्तेऽपि योग्य एव घट आनीयते तथा । सच्छिद्रपक्षे सूत्रं प्रोतं कृत्वा तत्सूत्रेण दशायां बन्धनीयम् । दशायेत्येकवचनादेकस्यामेव दशायां दशायां बन्धनम् । जात्यभिप्रायं चैकवचनम् । तेन बह्वीष्वपि दशासु बन्धनमसंभवे सिद्धं भवति । शालामुखीयग्रहणमाहवनीये जुह्वा हूयन्त इतिपरिभाषाप्राप्ताहवनीयकार्यैकार्यौत्तरवेदिकस्य निवृत्त्यर्थम् ।

शेषमाज्यस्य करोति ।

पूर्वाहुतिः स्रुवद्वयपरिमितेनाऽऽज्येन । द्वितीयाऽऽहुतिस्तु बिन्दुमात्रपरिमितेनाऽऽज्येन । स्रुवद्वयपरिमितमाज्यशेषं करोति स्थापयतीत्यर्थः । वरूथ९ स्वाहेत्यन्तः पूर्वो मन्त्रः । द्वितीयस्तु कृत्स्न एव पठितः । आज्यशेषकरणादेकदेशेन होमो भवति । अप्तुराज्यस्य वेतु स्वाहेति लिङ्गादिदं गम्यते बिन्दुमात्राज्याहुतिर्द्वितीया भवतीति । स्पष्टं लिङ्गं प्रदर्शयितुमेव कृत्स्नमन्त्रपाठः । बौधायनोऽमुमर्थं स्पष्टमेवाऽऽह—अथ स्रुवेणाप्तुं प्रस्कन्दयतीति । प्रचरण्यां चतुर्गृहीतं गृहीत्वा वैसर्जनी जुहोतीति स्रुचैवाऽऽहुतिद्वयस्य विहितत्वात्स्रुवस्य बौधायनोक्तस्य नाङ्गीकारः ।

शालामुखीयेऽग्निप्रणयनान्यादीपयति सिकताश्चोपयमनीरुपकल्पयत उद्यच्छतीध्ममुपयच्छत्युपयमनीरुपयते धार्यमाणे ॥ २२ ॥ अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीति संप्रेष्यति प्रणीयमानाभ्यामनुब्रूहीति वा ।

अग्निः प्रणीयते यैः काष्ठैस्तानि शालामुखीये प्रज्वालयति । प्रकृतगार्हपत्यादेवार्थायार्थीय प्राप्तमग्न्युद्धरणं बाधितुं शालामुखीय इत्युक्तम् । सिकता वालुका एवोपयमनीरुपयम्यते प्रदीप्तोऽग्निर्याभिस्ता उपयमन्यस्ता यथोपयमनसमर्थाः स्युस्तथा पात्रेण धृताः करोति । चकारोऽवधारणार्थः । तेन सिकता एवोपयमनीरुपकल्पयत इत्यर्थो भवति । न च चकारस्य प्रसिद्धसमुच्चयार्थकत्वं परित्यज्यावधारणार्थकत्वस्वीकरणमयुक्तं, तथा चोपयमन्यः सिकतातो भिन्ना एव भवन्तीति वाच्यम् । उपयमनीरुपनिवपतीति सिकतानामेवोपवापयोग्यत्वात्सिकता उपयमनीः कृत्वेति भरद्वाजोक्तेः सिकताभिरुपयम्येत्यापस्तम्बोक्तेश्चात्रावधारणार्थत्वस्यैव युक्तत्वात् । यान्यपि(ग्नि)प्रणयनान्यादीप्तानि तान्येव समुदायापन्नानीध्म इत्युच्यते, काष्ठान्येवेध्मो नतु संस्कारनिमित्तः शब्द इति दर्शितम्, इध्ममुद्यच्छति समूहीकृत्योर्ध्वं धारयति । उपयच्छति सिकताः शरावगृहीताः प्रदीप्तेध्मस्य संवरणार्थमुप समीपे यच्छति अधस्ताद्धारयति यथोद्यम्यमानोऽग्निर्न विशीर्येताधस्ताच्च न पतेत् । उपयत उपयमनीभिर्यमिते धार्यमाण इध्म उपरीत्यर्थः । अन्यत्स्पष्टम् । अत्र हौत्रं याजुर्वहौत्रसत्त्वेऽपि आश्वलायनीयमेव ।

त्रिरनूक्तायामयं नो अग्निरित्यग्निप्रथमाः सोमप्रथमा वा प्राञ्चो गच्छन्ति ।

उपाध्वितत्वात्प्रथमैव त्रिरनूक्ता भवति । तथैवापठदापस्तम्बः—प्रथमायां त्रिरनूक्तायामिति । अग्निः प्रथमः पूर्वो येषां तेऽग्निप्रथमाः । अस्मिन्पक्षेऽग्नेः पश्चात्सोमस्तत्पश्चाद्धु-

१ ख. ग. °ध्यमाने का° ।

वचनोपात्ता अध्वर्युब्रह्मयजमानाः । सोमः प्रथमः पूर्वो येषां ते सोमप्रथमाः । अस्मिन्पक्षे सोमस्य पश्चादग्निस्तत्पश्चादध्वर्युब्रह्मयजमानाः ।[१] प्राञ्चः प्राङ्मुखाः । अयं नो अग्निरिति मन्त्रेण गच्छन्ति । त्रयाणां मन्त्रः । पत्न्या अपीति केचित् । अत्राऽऽह बौधायनः कर्मान्ते—संप्रच्छन्नाश्चेव गच्छेयुराहवनीयादिति । आ, आहवनीयादिति पदच्छेदः । आहवनीयपर्यन्तमित्यर्थः । होतुर्वेशं यन्तीति बौधायनः । शाखान्तरे वैसर्जनहोमवासोऽध्वर्युर्गृह्णातीति विधानादध्वर्युणा तस्य वाससो ग्रहणं कार्यं, यजमानेनादत्तस्य ग्रहणायोगाद्दानमर्थसिद्धम् । मीमांसकास्तु लोभमूलकत्वादितच्छास्त्रं न प्रमाणं तथा च न वासोग्रहणमध्वर्योः, अतो दानमपि नेत्याहुः । अयं न्यायः प्रथमाध्याये तृतीयपादे[१] अग्निना हेतुदर्शनाच्चेत्यनेन सूत्रेणोक्तः । इदं सूत्रं विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति पूर्वसूत्रस्यैव शेष इति भाष्यमतम् । वार्तिककारमते भिन्नमेवेति भेदो ज्ञेयः । श्रुतिविरोधे यन्मानान्तरानपेक्षं श्रुतिवाक्यं तदेव प्रमाणं स्यान्नतु स्मृतिवाक्यं यस्मात्सत्येव विरोधे स्मृतेः श्रुत्यनुमापकत्वादिति विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमित्येतत्सूत्रस्यार्थः । हेतुदर्शनाल्लोभरूपहेतुदर्शनात् । चः पूर्वसूत्रोक्तहेतुसमुच्चायकः इति हेतुदर्शनाच्चेत्येतत्सूत्रस्यार्थः । वाजसाताविति मन्त्रान्तः ।

यथार्थमनुनयन्ति ।

अथ प्रयोजनमनतिक्रम्य यथार्थमनु अग्नीषोमावनु नयन्ति ग्रावादीनि परिकर्मिण इत्यर्थः । ग्रावादीनामादावाग्नीध्रीये स्थापयिष्यमाणत्वाद्ग्रावादीन्येव पुरो नयन्ति । ततः पश्चादातिथ्याबर्हिः । तस्यैव प्रथमं स्तरणरूपकार्योपस्थितेः । तत इध्मं नयन्ति । तस्यैवानन्तरमभ्याधानरूपकार्योपस्थितेः । तत आज्यानि । तेषामेवानन्तरं होमरूपकार्योपस्थितेः । ग्रावादीनामनन्तरमुपयोगात्तत एतेषां नयनम् । अचेतनत्वादनुनयन्तीत्येवं वचनं, बहुवचनात्परिकर्मिणः ।

अनुगच्छन्त्यमात्याः ।

एतान्पदार्थाननु पश्चाद्गच्छन्तीत्यर्थः । पूर्वत्रान्वारम्भविधानादुत्तरत्र यथेतममात्याः प्रतिगच्छन्तीतिविधानाच्चार्थादेवानुगमनेऽमात्यानां सिद्ध इदं वचनं होमोत्तरमन्वारम्भपरिसंख्यार्थमनुगमनमात्रं भवति नत्वन्वारम्भोऽपीति । अनुगुणतापनज्ञानत्वादनुगच्छन्तीत्येवं वचनम् ।

अनुनयन्त्यग्नीषोमीयम् ।

अनुगच्छन्त्यमात्या इत्येतदुत्तरं वचनादग्नीषोमीयपशोरमात्याननु नयनं, पशुत्वादनुनयन्तीत्येवं वचनं, बहुवचनात्परिकर्मिणः । अत एव पशोर्बलिष्ठत्वं गम्यते ।

---

१ क. ज. झ. म. ट. °नुहरन्ति ।

आग्नीध्रीय एतमग्निं प्रतिष्ठाप्याग्ने नयेति नयवत्यर्चाऽऽग्नीध्रे जुहोति ।

आग्नीध्रीये धिष्णिय एतं प्रणीतमग्निं धिष्ण्यसंमुखो भूत्वा स्थापयेदित्यर्थः । मध्यभाग आत्माभिमुखतया स्थापनं बोधयितुं प्रतिः । अत्र प्राङ्मुखत्वेन नोदङ्मुखता । न विहारादुपपर्यावर्तेत इति निषेधात् । अग्न्यायतनं गोमयेनोपलिप्य स्फ्येनोद्धत्यावोक्ष्यायमग्निः स्थापनीयः सार्वत्रिकमिति वचनाद्यत्र यत्राग्निरायतने स्थाप्यते तत्र गोमयोपलेपनोद्धननावोक्षणानि कर्तव्यानि । अग्ने नयेत्यृक्, नयेतिपदवत्वान्नयवती । नयवत्यर्चाऽऽग्नीध्रे जुहोतीति श्रुतिरपि । इदं च विशेषणं ज्ञानार्थं, ज्ञानाभावे दक्षिणाग्नौ यजुर्भ्रेषप्रायश्चित्तं कर्तव्यम् । ऋग्ग्रहणप्रयोजनमतिच्छन्दसर्चा मिमीत इत्यत्र यथोक्तं तद्वज्ज्ञेयम् । तस्मिञ्जुहोतीत्येतावतैव तस्याग्नेः संप्रत्ययसिद्धावाग्नीध्र इति वचनमाग्नीध्रीयधिष्णियस्थापितोऽग्निराग्नीध्रसंज्ञो भवतीति । संज्ञायाः प्रयोजनं यज्ञतनूराग्नीध्रे जुहोतीत्यादावेतस्याग्नेः संप्रत्ययः । विधेमेति मन्त्रान्तः । जुहोतिचोदितत्वात्स्वाहाकारः । वक्ष्यमाणावपि होमौ वैसर्जनसंज्ञकावेव । सुवर्गाय वा एतानि लोकाय हूयन्ते यद्वैसर्जनानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमत आहवनीये जुहोति सुवर्गमेवैनं लोकं गमयतीति श्रुतेः ।

शेषमाज्यस्य करोति ।

द्वौ स्रुवाववशिष्टौ तयोरेकस्रुवपरिमितेनाग्ने नयेत्याहुतिं हुत्वैकस्रुवपरिमितमाज्यमवशेषयतीत्यर्थः ।

निदधाति ग्राव्णो वायव्यानि द्रोणकलशं चमसांश्च ।

आग्नीध्रीय इति शेषः । चकारः सोमस्थालीपूतभृदाधवनीयपरिप्लवैकधनाकलशपन्नेजनीकलशवसतीवरीकलशदशापवित्रोदचनानां समुच्चयार्थः । स्रुवस्य त्वत्र उपयोगात्स्रुग्भिः सह नयनम् ।

अतिहरन्तीतराणि ।

अत्रातिरग्र इत्यर्थे । तथा चाऽऽग्नीध्रीयस्याग्रेऽपीतराणि आतिथ्याबर्हिरिध्माज्यानि स्रुवं पशुं चोत्तरवेदिपर्यन्तं हरन्तीत्यर्थः । प्रायश्चित्तपशुसत्त्वे तावपि अग्रे हरन्ति । पुरोऽर्थको वा । अस्मिन्कल्पेऽग्नीषोमयोरग्रत एवं हरणमितरेषाम् । अनुहरन्तीतराणीति पाठ इतरेषामप्यनुनयनमेव ।

उत्तरेणाऽऽग्नीध्रीयं धिष्णियं परीत्योरु विष्णो विक्रमस्वेत्यौत्तरवेदिके जुहोति ।

धिष्णियग्रहणं मण्डपस्थानिवृत्त्यर्थम् । परीत्येत्यस्याऽऽग्नीध्रं परिक्रम्य दक्षिणतो गत्वा जुहोतीत्येतादृशार्थविवक्षयाऽऽग्नीध्रस्यापि प्राप्तिसंभवेन तद्वारणाय तद्ग्रहणस्याऽऽ-

१ इ. ज. झ. म. ड. 'दधाति । २ ख. 'व ग्रहण' ।

न्यकत्वात् । औत्तरवेदिकं प्रति गमनमार्थिकं तद्विना होमासंभवात् । अत्र सर्वत्रियम उत्तरत्र विनियोगाभावात् । आपस्तम्बः स्पष्टमेवाऽऽह—उरु विष्णो विक्रमस्वेति सर्वमाज्यशेषं जुहोतीति । तिरेति मन्त्रान्तः । जुहोतिचोदितत्वात्स्वाहाकारः ।

यथेतममात्याः प्रतिगच्छन्ति ।

इतमनतिक्रम्य यथेतम् । अव्ययीभावसमासोऽयम् । येन मार्गेण गमनं पूर्वं कृतं तेनैव मार्गेणामात्याः प्रतिगच्छेयुरित्यर्थः । आज्यबर्हिरिध्मानामादातारस्तु तत्तदुपयोगपर्यन्तमुत्तरवेदिसमीप एवावतिष्ठन्ते । अग्नीषोमीयपशोर्नेताऽप्योपाकरणकालादवतिष्ठत एव । ऐन्द्राग्नाश्विनपशुसत्त्वे तयोर्नेतरावप्यु(प्यो)पाकरणकालादवतिष्ठेते । सुरक्षितानि सादयित्वा वैते सर्वे गच्छेयुः ।

सोमो जिगाति गातुविदिति सौम्यर्चाऽपरेण द्वारेण हविर्धाने ब्रह्मा राजानं प्रपादयति ।

सौम्यर्चेति पूर्ववद्व्याख्येयम् । प्रपादयति प्रवेशयति । अत्र वचनं प्रयोगक्रमज्ञानार्थं यदा राज्ञः प्रपादनं तदैव वक्ष्यमाणोऽध्वर्योर्हविर्धाने प्रवेशो न तत्पूर्वमिति । ब्रह्मत्वसूत्रे राजानं प्रत्यादाय सोमो जिगाति गातुविदिति सौम्यर्चाऽपरेण द्वारेण हविर्धाने प्रविश्याध्वर्यवे राजानं प्रदाय यथेतं प्रत्येत्यापरेणोत्तरवेदिमतिक्रम्य दक्षिणत उपविशतीति ब्रह्मकर्तृकमेवाध्वर्यवे राज्ञः प्रदानं विधास्यमानम् । अनेन तु प्रयोजककर्तृत्वं विधीयते । तथा च ब्रह्मा मन्त्रं स्वयमुक्त्वा येन केनापि परिकर्मिणा पूर्वेण द्वारेण हविर्धाने राज्ञः प्रवेशनमात्रं तेनैवाध्वर्यवे राज्ञः प्रदानं च कारयेदिति । एवं च द्वयोर्विरोधाद्विकल्पः । अत्र मन्त्रवचनं मन्त्रावचनात्पक्षे तूष्णींत्वमपि स्यात्तद्व्यावर्तयितुम् । अब्रह्मेति पदच्छेदो वाऽत्रापि । अर्थस्तु स्पष्टः । अस्मिन्व्याख्यानेऽपि मन्त्रवचनं ब्रह्मव्यतिरिक्तर्त्विगर्थमपेक्षितमेव । अत्रायं पिण्डितोऽर्थः—यदा तु ब्रह्मकर्तृकमध्वर्यवे प्रदानं तदा पूर्वेण गतश्रिय इत्येतन्न भवति किं तु ब्रह्मकर्तृकप्रदानमात्र एवेति पूर्वव्याख्यायाम् । यदा तु ब्रह्मव्यतिरिक्तर्त्विक्कर्तृकता स्वी क्रियते तदैव पूर्वेण गतश्रिय इत्येतद्भवति न तु ब्रह्मकर्तृकतायामित्येतद्द्वितीयव्याख्यायामिति ।

पूर्वेण गतश्रियः ।

द्वारेणेति पूर्वसूत्राद्विशेष्यस्यानुवृत्तिः । गता प्राप्ता श्रीर्यैस्तस्य गतश्रियः । एतादृशस्य यजमानस्योक्तव्यवस्थानुसारेण पूर्वेण हविर्धाने राज्ञः प्रपादनम् । ये गत्यर्थास्ते प्राप्त्यर्था इति शास्त्रमर्यादया गमनार्थकधातोः प्राप्त्यर्थकत्वं ज्ञेयम् । गतश्रीशब्दवाच्याः 'त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यः' इति श्रुत्युक्ता ग्राह्याः ।

---

१ ख. ग. क्रियेत ।

शुश्रुवाननेदत्रयाध्यायी । अहे बुध्निय मन्त्रं मे गोपाय, यमृषयस्त्रयिविदा विदुः, ऋचः सामानि यजूꣳषि, सा हि श्रीरमृता सताम्, इति मन्त्रवर्णात् । ग्रामणीर्ग्रामाधिकारीति यावत् । अभिषिक्तः क्षत्रियो राजन्यः । एतेषां त्रयाणां पूर्वेण द्वारेण प्रपादनम् । आसदमिति मन्त्रान्तः ।

उर्वन्तरिक्षमन्वेमीति पूर्वेणाध्वर्युः प्रविश्यादित्याः सदोऽसीति दक्षिणस्य हविर्धानस्य नीडे कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृणाति ।

अत्रापि द्वारेणेत्यस्य विशेष्यानुवृत्तिः । स्वशाखादृष्टस्यान्विहीति पाठस्य प्राप्तिः स्यात्सा मा भूदित्येतदर्थमन्वेमीत्यस्य पाठः । पूर्वेणेति वचनं नियमार्थं गतश्रियोऽगतश्रियो वाऽपि यजमानस्य क्रतौ पूर्वेणैवाध्वर्योः प्रवेशो न तु पूर्वव्यवस्थानुसारेणेति । अध्वर्युग्रहणं ब्रह्मव्यावृत्त्यर्थम् । दक्षिणग्रहणमुत्तरव्यावृत्त्यर्थम् । अन्यत्सोमक्रयवद्व्याख्येयम् ।

प्रत्त्वꣳ राजानमादित्याः सद आसीदेति तस्मिन्नासादयति ।

इदमपि तद्वद्व्याख्येयम् ।

प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्येध्मं वेदिं च प्रोक्ष्य प्रोक्षण्यवशेषं निनीय पवित्रे अपिसृज्यापरेणोत्तरवेदिं मन्त्रेण बर्हिः स्तृणाति यथा दर्शपूर्णमासयोः ।

उक्तेतरपरिसंख्यार्थमनुक्रमणम् । आपो देवीरित्यभिमन्त्र्य ब्रह्मन्प्रोक्षिष्यामीति ब्रह्माणमामन्त्र्य । आमन्त्रणेन प्रसवोऽप्युपलक्ष्यते । अन्यथाऽऽमन्त्रणस्य वैयर्थ्यापत्तेः । वेदश्छन्नत्वादैष्टिकप्रोक्षणलोपः शङ्क्येत तन्निवृत्त्यर्थं वेदिवचनम् । अत्र वेदिरातिथ्यायां बर्हिःस्तरणं यत्र कर्तव्यं भवति तावत्परिमितैव विवक्षिता न कृत्स्ना महावेदिरिति । बर्हिषः प्रोक्षितत्वात् । प्रोक्षणस्य चादृष्टार्थत्वेन प्रोक्षणजन्यादृष्टस्य निष्पन्नत्वेन पुनःप्रोक्षणप्रयोजनाभावात्प्रोक्षणादिप्रयोजनाभाववदास्तरणस्य दृष्टकार्यत्वेन तथा वक्तुमशक्यत्वादास्तरणे सिद्धे प्रोक्षणाभावादमन्त्रकमेव स्तरणमाशङ्क्येत तां शङ्कां वारयितुं मन्त्रेणेति । प्रोक्षणाद्यभावस्तु यज्ञोत्पत्त्युपदेशे निष्ठितकर्मप्रयोगभेदात्प्रतितन्त्रं क्रियेतेति सूत्रेण द्वादशाध्याये प्रथमे पादे जैमिनिनाऽपि प्रोक्तः । यदातिथ्याया बर्हिस्तदुपसदां तदग्नीषोमीयस्येत्येतत्सूत्रव्याख्यानावसर इदं सूत्रं व्याख्यातम् । बर्हिष्प्रोक्षणनिषेधभाव एव मन्त्रग्रहणं सप्रयोजनं भवति । अत एव बर्हिष्पदघटितः पाठ आधुनिकस्थित एवेति ज्ञायते । देशपृथक्त्वामन्त्राऽप्यावर्तेत

१ क. ज ञ. म ड. °दि बर्हिष प्रो° । २ ख. ग. °ध्याव° ।

इति सूत्रेण द्वादशाध्याये प्रथमे पादे जैमिनिनाऽपि समन्त्रकं स्तरणमुक्तं, सूत्रार्थस्तु स्पष्ट एव । बर्हिःसाधारण्यात्प्रसङ्गप्राप्ताविदमुच्यते । देशपृथक्त्वादित्यनेनेदं बोध्यते बर्हिरर्थस्तरणमिदं न भवति किं तु बर्हिषा वेदिं स्तृणातीति द्वितीयानिर्देशात्प्रयोजनवत्त्वाच्च वेदिदेशसंस्कारार्थमिति । भिन्नौ चेह प्राग्वंशोत्तरवेदिदेशसमीपदेशौ तेन तदर्थं स्तरणं तदङ्गं च मन्त्रोऽप्यावर्तते । असत्यामावृत्तौ वेदिवैगुण्यादग्नीषोमीयहविषामासादनं विगुणं स्यात् । भवतु वा बर्हिरर्थं स्तरणं बर्हिषि स्तीर्णे हवींषि साक्षादासाद्यन्त इति तथाऽपि तदावृत्तेस्तदङ्गमन्त्रावृत्तिः । अन्यथा ऽमन्त्रास्तीर्णे बर्हिषि हवींषि साद्येरन्निति । अन्तर्वेदि पुरोग्रन्थीत्यादिकं प्रत्युक्षणान्तं निवर्तते । तूष्णींगृहीत एव प्रस्तरे यजमाने प्राणापानौ दधामीति पवित्रे अपिसृजति । पवित्रे अपिसृज्येति ल्यपा ब्रह्मणे प्रस्तरप्रदानमाहवनीयकल्पनं च व्यावर्त्येते । तेन प्रस्तरं धृत्वैव बर्हिरास्तरणं कर्तव्यमिति सिद्धं भवति । स्तीर्णेन बर्हिषाऽन्तरितत्वात्तृणैरन्तर्धानं न । शुल्बस्तरणं तु भवत्येव । तस्य बर्हिरास्तरणाङ्गत्वेनाव्यवधायकत्वात् । अपरेणोत्तरवेदिमिति वचनमुत्तरवेद्याः समीपेऽपरभाग एवैतस्य बर्हिषः स्तरणं न तु सोमार्थबर्हिःस्तरणवदुत्तरवेदिपार्श्वद्वयेऽपि स्तरणमित्येतदर्थम् । एनप्प्रत्ययेनोत्तरवेदेर्दूरस्थोऽपरभागो हविर्धानमारभ्य कृत्स्नो व्यावर्त्यते । एवं चोत्तरवेदिसमीपप्रदेशे हविर्धानमण्डपावधिके बर्हिः स्तृणातीत्यर्थः सिध्यति । ननु मन्त्रेणेति वचनं सौमिकस्तरणवत्तूष्णींत्वस्याऽऽपाय इत्यस्य मन्त्रस्य च प्राप्तिः स्यात्सा मा भूत्किं तु प्राकृत एव मन्त्रः स्यादित्येतदर्थमस्त्विति चेन्न । एतस्य बर्हिषः केवलपश्वर्थत्वेन सौमिकस्तरणधर्माणां प्राप्तेरेवासंभवेन तन्निवृत्तिरूपप्रयोजनासंभवात् । एवं च पूर्वोक्तमेव प्रयोजनम् । यथा दर्शपूर्णमासयोरित्यनेन प्रत्यगपवर्गत्वादयो धर्मा अतिदिश्यन्ते । नन्वनेनैव मन्त्रप्राप्तिरपि भविष्यति किमर्थं मन्त्रेणेति चेत्सत्यम् । सौमिके स्तरणे व्यभिचारदर्शनेन मन्त्रेणेति वचनं विना निर्वाहाभावात् ।

सन्नेष्वाज्येषु यूपसंमानेन प्रतिपद्यते ।

सन्नेष्वाज्येष्वित्यनेनानूयाजार्थे उपभृत्युद्(द्)ग्राहेत्येतदादिकं सूचितं भवति । वेद्यास्तरणानन्तरं प्लक्षशाखास्तरणं बर्हिषि । तथोक्तं कात्यायनीये बर्हिषि प्लक्षशाखां स्तृणातीति । यूपसंमानमग्निनाऽग्निष्ठाश्र्यदिशं मिनोतीत्येतत्कर्म तेनोपलक्षितं सर्वमपि कर्म यूपसंमानं देवस्य त्वेत्यभ्र्यादानादि स्वर्ववगूहनान्तं तेन प्रतिपद्यते तत्करोतीत्यर्थः ।

अग्नीषोमीयं पशुमुपाकरोति ॥ २३ ॥ स व्याख्यातरूपः ।

व्याख्यातं रूपं यस्य स व्याख्यातरूपः । मन्त्रैर्गृहीतबर्हिः प्लक्षशाखाभिरग्नीषोमदेवतोद्देशेन पशुं स्पृशन्संकल्पयतीत्यर्थः । स व्याख्यातरूप इत्यनेन यो राज्ञ आतिथ्यायोपकल्पितः स एवोपाकरणीयो नत्वातिथ्यायैव स उपाकरणार्थमन्य इति बोध्यते ।

नन्वेवं सति स व्याख्यात इत्येतावदेव वक्तव्यं रूपपदं निरर्थकमिति चेन्न । सर्वेषूक्तेषु लक्षणेषु लोहः कृष्णश्वेतो लोहितश्वेत इत्येतेषां वर्णानामत्यावश्यकत्वार्थज्ञापनार्थत्वेन सार्थक्यात् । फलं सर्वलक्षणलक्षितपशोर्लाभे लोहत्वादिभिर्न चारितार्थ्यम् । कदाचिच्चारितार्थ्ये कृते प्राकृते प्रायश्चित्तं कर्तव्यमेव । तादृशपश्वलाभवशेन केवललोहत्वादिविशिष्टस्यैव पशोर्ग्रहणे तु प्रायश्चित्तं नेति द्रष्टव्यम् । छागलक्षणं कात्यायनपरिशिष्टे—

अथातः संप्रवक्ष्यामि च्छागानां लक्षणं शुभम् ।
अशुभं चैव वर्ज्यानां तत्प्रवक्ष्याम्यतः परम् ॥
एकवर्णो द्विवर्णश्च बहुवर्णस्तथैव च ।
रोहितो यस्तु वै छागः स पशुः कुलमुद्धरेत् ॥
यस्तु श्वेतमुखश्छागः कृष्णग्रीवः सितोदरः ।
पशूनां चैव मुख्यः स्यात्पशुकामस्तमालभेत् ॥
मञ्जिष्ठवर्णसंकाशो यच्छृङ्गे चतुरङ्गुले ।
स च्छागः पालको नाम महान्पालयते धनम् ॥
विकटो वामनो वेहत्साहस्राः पशवस्त्रयः ॥
साधयन्ति महायज्ञं महच्च लभते फलम् ।
यज्ञे तु दक्षिणे पार्श्वे मण्डलं यस्य वै भवेत् ॥
छागः सर्वार्थको नाम सर्वकामफलप्रदः ।
श्वेतं तु दक्षिणे पार्श्वे भवेद्वै यस्य मण्डलम् ॥
स च्छागो विजयो नाम अमित्रदमनः स्मृतः ।
श्वेतकृष्णः प्रतिष्ठायाः कृष्णैः श्वेतैः प्रतिष्ठितैः ॥
प्रतिष्ठितौ तु तौ छागौ प्रतिष्ठार्थे तु याज्ञिकैः ।
षडुन्नतः षडावर्तः सकुक्षिलोमशोदरः ॥
स्निग्धस्त्वग्लोमवर्णः स्याच्छागः सर्वार्थसाधकः ।
लोहकर्णः पुष्पकर्णो यस्य चैतद्द्वयं भवेत् ॥
लम्बाकर्णैककर्णो वा शुण्ठकर्णं तथैव च ।
तलसमश्चाफव्यङ्गशुण्ठाकर्णस्तथैव च ॥
दारिद्र्यं पुत्रनाशं च मरणं चैव तादृशे ।
एकवर्णास्त्रयः पादास्तुरीयस्तं यदा भवेत् ॥
स च्छागो मुसली नाम अचिरात्क्षपयते कुलम् ।
कालालः कृष्णपार्श्वस्तु श्वेतपादो प्रतिष्ठितः ॥
छागो वैश्रवणो नाम नभागस्योपतिष्ठति ।
कश्चिच्चण्डेन्द्रियः क्षीणश्वेतं वृद्धमजायत ॥

वार्भाणसं तु तं प्राहुर्वर्जयेद्यज्ञकर्मणि ।
वर्जयेद्यज्ञकर्मणीति ॥

प्रवरं प्रवृत्याऽऽश्रावमृतुप्रैषादिभिः सौमिकानृत्विजो वृणीते ।

प्रवरं प्रवृत्य प्राकृतं प्रवरं प्रवृत्य । प्रवरं प्रवृत्येति पूर्वकर्मविधिप्रदर्शनायानुवादः । तेनोपाकृत्य पञ्च जुहोतीत्यादि कर्म सिद्धं भवति । सौमिकर्त्विग्वरणरूपं विशेषं विधातुमप्ययमनुवादः । प्राकृतं दैवं मानुषं च वरणं कृत्वेति प्रवरं प्रवृत्येत्यस्यार्थः । आश्राव्याऽऽश्राव्येत्याश्रावम् । आभीक्ष्ण्येऽयं णमुल् । तेन प्रतिवरणमाश्रावणसिद्धिः । आभीक्ष्ण्यं पौनःपुन्यम् । आश्रावणसंबद्धत्वात्प्रत्याश्रावणमपि प्रतिवरणम् । बौधायनः स्पष्टमेवाऽऽश्रावणं प्रत्याश्रावणं च प्रत्येकं पठितवान्—प्रसिद्धः होतारं वृणीतेऽथाऽऽश्रावयत्योश्रावयास्तु श्रौषण्मित्रावरुणौ प्रशास्तारौ प्रशास्त्रादित्यसौ मानुष इति मैत्रावरुणस्य नाम गृह्णात्यथाऽऽश्रावयत्योश्रावयास्तु श्रौषडिन्द्रो ब्रह्मा ब्राह्मणादित्यसौ मानुष इति ब्राह्मणाच्छंसिनो नाम गृह्णातीत्यादिना संपृञ्चानावसंपृञ्चानौ तन्व इत्यन्तेन सूत्रेण । ऋतुग्रहार्थमृतुपङ्क्तश्च प्रैषास्ते च मैत्रावरुणेन पठिष्यमाणास्तेषामादय ऋतुप्रैषादयस्तैर्ऋतुप्रैषादिभिर्ऋतुप्रैषप्रतीकैरित्यर्थः । सौमिकान्सोमस्येमे सौमिकाः सोमसंबन्धिन एतानृत्विज ऋतुयाजिनो होत्रादीन्वक्ष्यमाणान्वृणीत इत्यर्थः । अत्रर्तुशब्द ऋतुग्रहपरः । तान्यजन्तीत्यृत्विजः । ऋतुग्रहयाजिनोऽत्रर्त्विजो विवक्षिता इत्यर्थः । प्रकरणादर्थाच्चैतेषां सौमिकत्वे सिद्ध इदं वचनं यो होता सोऽध्वर्युः स पोता य उद्गाता स नेष्टा सोऽच्छावाको यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्ता यः प्रस्तोता स ब्राह्मणाच्छंसी स ग्रावस्तुद्यः प्रतिप्रस्थाता सोऽग्नीत्स उन्नेता गृहपतिर्गृहपतिः सुब्रह्मण्यः सुब्रह्मण्य इति कुण्डपायिनामयनप्रकरणस्थेन सूत्रेणैकस्यानेककर्मकर्तृत्वेनानेकर्तुयाजित्वेऽप्येकेनैव वरणसिद्धिरेकव्यक्तिकत्वादिति शङ्कां वारयितुं सौमिकानिति व्यक्त्यभेदेऽपि सोमसंबन्धिकर्तृत्वमुपादाय प्रत्यृतुयाज्येव वरणमिति सौमिकमेवेदं वरणं नतु पाशुकमितिज्ञापनार्थं च । एतेन स्वतन्त्रपशुष्वप्यग्नीषोमीयविकारत्वमपि ज्ञायते । अग्नीषोमीयविकारत्वमस्त्व एवाग्नीषोमीयपशुतो होत्राग्नीध्राध्वर्युप्रतिप्रस्थातृमैत्रावरुणयजमानानामेव पाशुककर्मणि संभवेन तेषामेव वरणप्रसक्तौ तन्निवृत्त्यर्थत्वेनैव सौमिकानित्यृत्विग्विशेषणस्य सार्थक्यं संभवति नान्यथा । ब्राह्मणाच्छंसिपोतृनेष्टॄणामसंभव एव पाशुके कर्मणि । अतस्तेषामप्रसक्तिरेव । एवं च स्वतन्त्रेषु काम्येषु चतुरक्षरनामवद्दैवत्येषु तथाभूतेषु सवनीयेषु अनुबन्ध्यायां चाग्नीषोमीयातिदेशोऽपि पक्षे भवतीति सिद्धं भवति ।

आश्रावमृतुप्रैषादिभिः सौमिकानृत्विजो वृणीत इति सामान्यप्रतिज्ञा तत्र कथमित्याकाङ्क्षायामाह—

इन्द्र होत्रात्सजूर्दिव आ पृथिव्या इति होतारम् ।

इन्द्र होत्रात्सजूर्दिव आ पृथिव्या इत्ययमृतुप्रैषादिस्तेन सौमिकमृतुयाजिनं होतारं वृणीत इत्यर्थः । इन्द्र होत्रात्सजूर्दिव आ पृथिव्येति तृतीयान्तपाठस्त्वपपाठ एव । दिव इति षष्ठीवत्पृथिव्या इत्यत्रापि षष्ठ्या एव युक्तत्वात् , ऋतुप्रैष इन्द्रं होत्रात्सजूर्दिव आ पृथिव्या ऋतुना सोमं पिबतु होतर्यजेति प्रैषे षष्ठ्या एव श्रवणाच्च । अन्यथर्तुप्रैषादिभिरित्येतस्य विरुद्धत्वापत्तेः । नचेन्द्रं होत्रेत्यस्मिन्नृतुप्रैषेऽनुनासिकपाठाभावेन कथं सानुनासिकस्यर्तुप्रैषादित्वमिति वाच्यम् । अनुनासिकस्य प्रायशो यजुर्धर्मत्वेनाऽऽश्वर्यवे यजुर्धर्मविशिष्टर्तुप्रैषादेरेव ग्राह्यत्वात् । नहि निरनुनासिकर्तुप्रैषानुरोधेनाध्वर्युणाऽपि तथैव तदादिर्वक्तव्य इति नियमः । वेदधर्मस्य प्रबलत्वात् । नहि सानुनासिकत्वनिरनुनासिकत्वधर्मभेदेन ऋतुप्रैषत्वर्तुप्रैषत्वाभावौ सिध्यतः । मृगारेष्टेरग्नयेंहोमुगादिदेवतासूनयापत्तेः । तथा चोभयत्राप्यृतुप्रैषत्वमस्त्येवेति अवश्यमङ्गीकार्यमेवेति सिद्धम् ।

अविसृज्य वृणवस्फ्य उत्तरान्वृणीते ।

होतारमृतुप्रैषादिना वृत्वा स्फ्येन सह धृतं वेदिस्थं तृणं वेद्यामेवाविसृज्य भेदयित्वाऽस्फ्यः संनहनसहितस्फ्यरहितो भूत्वैवोत्तरान्वक्ष्यमाणान्वृणीत इत्यर्थः ।

अग्निमाग्नीध्रादित्याग्नीध्रम् ।

स्पष्टम् ।

अश्विनाऽध्वर्यू आध्वर्यवादित्यात्मानं प्रतिप्रस्थातारं च ।

अध्वर्योः स्ववरणकर्तृत्वादात्मानमित्येवं निर्देशः । अत्र चकारः परस्परसमुच्चयार्थ एव । अन्यस्यासंभवात् ।

मित्रावरुणौ प्रशास्तारौ प्रशास्त्रादिति मैत्रावरुणमिन्द्रो ब्रह्मा ब्राह्मणादिति ब्राह्मणाच्छꣳसिनं मरुतः पोत्रादिति पोतारं ग्रावो नेष्ट्रादिति नेष्टारम् ।

स्पष्टम्

अग्निर्देवीनां[2] विशां पुर एताऽयꣳ सुन्वन्यजमानो मनुष्याणां तयोरस्थूरि गार्हपत्यं दीदाय गच्छतꣳ हि मा वायुराधाꣳसीत्संपृञ्चानावसंश्वयूनौ तन्व इति यजमानम् ।

प्रवरणेऽयं विधिः सर्वोऽप्यपूर्व एव । सौमिकानित्यविशेषेणोक्तेऽपि ऋत्विजोऽत्रर्तुयाजार्था एव ग्राह्याः । तद्धङ्गामेव वरणात्तत्प्रैषसंयोगाच्च । एवं चर्तुयाजार्थमेवैत-

१ क. ज. झ. भ. ट. 'पिब्पृति । २ ङ. ब. ग. 'भिर्देवी' ।

द्वरणमिति । अत एव पाशुक एतद्वरणनिवृत्तिः । अत्र केचिदाहुः—सुत्यायां वरण एव सुन्वच्छब्दः, अग्नीषोमीयदिवसे वरणे सुन्वच्छब्दस्य लोप एवेति । सुन्वन्निति वर्तमानार्थकशतृप्रत्ययनिर्देशादिति तेषामयमाशयः । अपरे तु अग्नीषोमप्रणयनादूर्ध्वं सुन्वच्छब्दस्य प्रवृत्तिर्वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानत्वमादाय, अतो न लोप इत्याहुः । सूत्रकृतोऽयमेवार्थोऽभिप्रेतः ।

जुष्टो वाचो भूयासमित्येताभ्यां प्रवृतः
प्रवृतो जुहोत्यनन्तरं प्रवरात् ।

जुष्टो वाचो भूयासमृचा स्तोममित्येताभ्यां मन्त्राभ्यां द्वे आहुती यो वः प्रवृतः स स स्वस्वप्रवरणानन्तरमेव जुहोतीत्यर्थः । यत्र मन्त्रगणेन कर्म चोदयेत्प्रतिमन्त्रं तत्र जुहुयादिति परिभाषयाऽऽहुतिद्वित्वम् । आद्यस्य पुरस्तात्स्वाहाकारत्वात्तेनैव स्वाहाकारेण होमो न मन्त्रान्तेऽन्यः स्वाहाकारः प्रयोज्यः । तत्स्वाहाकारान्त एव प्रदानं भवति । द्वितीये भवत्येवान्ते स्वाहाकारः । पुरस्तात्स्वाहाकाराभावाद्दर्विहोमधर्मेण होमाः । आहवनीये जुह्वा हूयन्त इति परिभाषया जुह्वा होमे प्राप्ते तस्या व्यापृतत्वादेतस्य होमस्य सौमिकवरणाङ्गत्वात्प्रचरण्याः सोमसंबन्धित्वात्तयैव होमः । पशुसंबन्धिहोमो वसाहोमहवन्या । प्रवृतः प्रवृत इति वीप्सया सर्वैर्ऋतुयाजिभिः स्वस्ववरणानन्तरमेताभ्यामाहुतिद्वयं होतव्यम् । होत्रादिभिरपि याजुषधर्मेणैव होतव्यम् । एतयोराहुत्योः प्रवरणनिमित्तकत्वात्प्रवृताहुतिसंज्ञा कृताऽऽश्वलायनेन प्रवृताहुतीर्जुह्वति वषट्कर्तार इति । सूत्रकृताऽपि प्रवृतः प्रवृतो जुहोतीत्यनेनेदं संज्ञाकरणं सूचितमेव ।

हुत्वाऽध्वर्युरुत्तरान्वृणीते ।

अध्वर्युर्हुत्वाऽनन्तरमेवोत्तरान्वृणीते । प्रतिप्रस्थातुः प्रवृताहुत्योः प्रतीक्षा न कर्तव्येति भावः । उत्तरान्मैत्रावरुणादीन् ।

सवनीय एके प्रवरानामनन्ति ।

अग्नीषोमीये प्रवरकर्तव्यता योक्ता सा तत्र न कर्तव्या किं तु सवनीये पशावेव कर्तव्येत्येक आचार्या वदन्तीत्यर्थः । अच्छावाकस्य न प्रवरणं वचनाभावात् । अत एव प्रवृताहुती अपि न । प्रवृताहुतीर्जुह्वति वषट्कर्तारोऽन्येऽच्छावाकादित्याश्वलायनः । अच्छावाकस्य वषट्कर्तृत्वात्प्रवृताहुतिहोमे प्राप्तेऽन्येऽच्छावाकादिति पर्युदासः क्रियते । अध्वर्युप्रतिप्रस्थात्रोर्यजमानस्य च साक्षादपि पक्षे वषट्कर्तृत्वं वक्ष्यत्येव सूत्रकारः स्वयं वा निषद्य यजत इत्यनेन सूत्रेण । प्राव्रियन्त ऋतुयाजिन ऋतुयाजार्थमाह्वयन्त इति प्रवराः । यद्यप्यृतुयाजाः सुत्यायां तथाऽपि अग्नीषोमीये वरणं वचनात् । होत्रादीनां प्रवरणे विशेषमाहाऽऽपस्तम्बः—सर्वत्रोपांशु नामग्रहणमसौ मानुष इत्युच्चैरिति । सर्वेषु प्रवरणेषु तस्य नाम प्रथमया विभक्त्योपांशु गृहीत्वा

मानुष इत्युच्चैर्वदतीत्यापस्तम्बसूत्रार्थः । अध्वर्युप्रवरणेऽहं चामुकशर्मा च मानुषाविति प्रयोगः । केचित्तु अमुकामुकशर्माणौ मानुषावित्यध्वर्योरिवाऽऽत्मनोऽपि नामग्रहणमिति वदन्ति तत्तुच्छम् ।

आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥

इति स्मृतावात्मनामग्रहणनिषेधात्, स्पष्टवचनं विना नामग्रहणस्यायुक्तत्वाच्च । अत एव सूत्रकृताऽऽत्मानमिति परोक्षनिर्देशः कृतः । अतोऽहंशब्देनैव निर्देशः । यजमानप्रवरणेऽयं सुन्वन्यजमान इत्येतैरेव शब्दैर्निर्देशसिद्धेर्न यजमाननामग्रहणम् ।

हुतायां वपायाः सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति संप्रेष्यति पितापुत्रीया सुब्रह्मण्या भवति ।

हुतायां वपायामग्नीषोमीयस्य पशोर्वपायां हुतायाम् । एकत्वमविवक्षितं तेनैन्द्राग्नाश्विनपशुसत्त्वे तयोरपि वपयोर्हुतयोरनन्तरमेव सुब्रह्मण्याह्वानं नत्वग्नीषोमीयवपाहोमानन्तरं सुब्रह्मण्याह्वानं तदनन्तरमैन्द्राग्नाश्विनपश्वोर्वपायाग इति हुतायामग्नौ वषट्कारेण प्रक्षिप्तायाम् । हुतायां वपायामित्यनेन घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युच्यमाने जुहूपभृतावादायेत्यादिकं कर्म सूचितं भवति । यद्यपि प्रवरणानन्तरं निरूढपशौ मैत्रावरुणाय दण्डप्रदानस्यैव विहितत्वात्तदेवात्रापि प्राप्तं तथाऽपि क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति वाक्यात्सोमक्रयोत्तरमेव तस्य यजमानेन दत्तत्वाद्दत्तस्य पुनर्दानायोगान्नात्र दानम् । सोमक्रयोत्तरं मैत्रावरुणेनाविक्षुरो विखुरो भूयासमिति मन्त्रेणैव यजमानात्प्रतिग्राह्यः । उत्तरवप्यमार्जनयोर्वपायागाङ्गत्वात्तयोरपि ग्रहणम् । तथा चाऽऽपस्तम्बः—हुतायां वपायां मार्जयित्वेति । मध्यपतितत्वादुत्तरवप्यहोमस्याप्यस्मिन्सूत्रे ग्रहणं द्रष्टव्यम् । पाशुकी दक्षिणा तु नैव भवति । सर्वेषु सौमिकेष्विष्टिपशुबन्धेषु नान्वाहार्यं ददातीति निषेधात् । अन्वाहार्यग्रहणस्य पशुबन्धदक्षिणोपलक्षणपरतायाः पूर्वमेव वर्णितत्वात् । प्रधानदक्षिणयैव परिक्रयसिद्धेरित्येतदाशयोऽपि तत्रैव वर्णितः । हुतायां वपायां वरं ददाति तिस्रो वा दक्षिणा नयेदितिपशुबन्धयाजमानसूत्रस्वरसाद्दक्षिणादानं भवत्येव । कथमेतदिति चेदुच्यते—हुतायां वपायां वरं ददातीतिसूत्रान्मार्जनात्प्रागेव वरदानं ततो मार्जनमिति यथा पशौ साधितं तथैवात्रापीति द्रष्टव्यम् । तिस्र इत्यत्र गावो विशेष्याः क्रियापदद्वयाद्वरदानं भिन्नम् । वरं ददातीति विहितं वरदानं सर्वर्त्विग्भ्य एव । तिस्रो गा इति गोत्रयदानमपि तेभ्य एव । तिस्रो वेत्यत्र वरं ददातीत्यस्माद्भागाद्वरशब्दोऽनुवर्तते । वरं तिस्रो गा वा दद्यादिति तदर्थः ।

---

१ ख. ग. °रिग्रहसि° । २ ख. ग. °नं ति° ।

ऐष्टिकदक्षिणादानधर्मा वरदाने न ।किंतु ऋत्विजो वरं वो ददामीत्येवमेव दानं पाशुकदक्षिणादान एवैष्टिकधर्मा उत्तरत्रैव दक्षिणापदात् । यदि वरं ददाति तिस्रो वा दक्षिणा नयेदित्येतस्य सूत्रस्यैकार्थकत्वं स्यात्तदा हुतायां वपायां वरं तिस्रो वा दक्षिणा नयेदित्येव ब्रूयात् । नोक्तं च तथा । अतो वरं ददातीत्येतद्भिन्नं तिस्रो वेत्येतद्भिन्नमित्येव वक्तव्यम् । तथा च प्रथमवरदानं पाशुकदक्षिणा न भवति । अतस्तस्य निषेधो न । पश्वेकादशिनीसूत्रे वरदानस्य तन्त्रत्वविधानमनयैव रीत्या संगतं भवति नान्यथेति द्रष्टव्यम् । अथवाऽवधारणार्थको वाशब्दोऽत्र । सौमिकेषु पशुषु श्रुतौ विशेषः—प्राञ्चमग्निं प्रहरन्त्युत्पत्नीमानयन्त्यन्वनाꣳसि प्रवर्तयन्त्यथ वा अस्यैष धिष्णियो हीयते सोऽनुध्यायति स ईश्वरो रुद्रो भूत्वा प्रजां पशून्यजमानस्य शमयितोर्यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य पशुश्रपणꣳ हरेत्तेनैवैनं भागिनं करोति यजमानो वा आहवनीयो यजमानं वा एतद्विकर्षन्ते यदाहवनीयात्पशुश्रपणꣳ हरन्ति स वैव स्यान्निर्मन्थ्यं वा कुर्याद्यजमानस्य सात्मत्वायेति । प्राजहितात्पशुश्रपणहरणे भागित्वसंपादनं प्रयोजनं तच्चाभागित्वोपपादनं विना कर्तुमशक्यम् । अतस्तत्प्रदर्शयितुं प्राञ्चमग्निमित्यारभ्य शमयितोरित्यन्ता श्रुतिः । अस्याः श्रुतेरयमर्थः—पूर्वं पश्चिमदिगवस्थिते गार्हपत्ये स्थितोऽग्निः शालामुखीये पुरातनाहवनीये प्रथमं नीतोऽनन्तरं ततोऽपि प्राङ्मुखो हृतस्तादिदमुच्यते प्राञ्चमग्निं प्रहरन्तीति । पश्चिमदिगवस्थितायां पत्नीशालायामवस्थितां पत्नीमपि शालामुखीयं पुरातनाहवनीयं प्रत्युदानयन्ति । प्रतीचीनगार्हपत्यसमीपस्थितानि शकटान्यपि प्राग्देशेऽनुक्रमेण प्रवर्तितानि । यदैतत्सर्वं संपद्यते तदानीमेवास्य पुरातनगार्हपत्यस्य धिष्णियः स्थानविशेषो हीयते शून्यो भवति । स चाग्निः पुनर्मनसि चिन्तयति यजमानस्य हानिं संपादयामीति । चिन्तयमानश्चासौ रुद्रः क्रूरो भूत्वा यजमानस्य प्रजां पशूञ्शमयितोर्विनाशयितुं समर्थो भवति । यर्हि पशुमाप्रीतमित्यारभ्य सात्मत्वायेत्यन्तया श्रुत्या भागित्वोपपत्तिः क्रियते । यर्हि यस्मिन्काल आप्रीसंज्ञकाभिः प्रयाजयाज्याभिराप्रीतं तोषितं पशुमुदञ्चमुदङ्मुखं नयन्ति तर्हि तस्मिन्काले तस्य प्रतीचीनगार्हपत्यस्य संबन्धिनं पशुश्रपणकारिणमग्निं हरेत् । तेनैव हरणेनैनं प्रतीचीनगार्हपत्याग्निं भागिनं भागयुक्तं करोति । ततः प्रजाद्यविनाश इति द्रष्टव्यम् । नन्वाहवनीयादेव पशुश्रपणमग्निं कुतो न हरेयुरित्याशङ्क्य तत्र दोषं दर्शयति यजमानो वा आहवनीय इत्यादिश्रुतिः । आहवनीयादग्निं विकृष्य हरणे यजमानस्यायं विकर्षः स्यात् । आहवनीयस्य प्रधानत्वेन यजमानरूपत्वात् । तस्मात्स एव प्राजहित एव वा श्रपणार्थः स्यान्निर्मन्थनेन लौकिकेन कंचिदग्निं निष्पाद्य तेन वा श्रपणं कुर्यात् । एवं सति यजमानो विकर्षरहितः संपूर्णस्वरूपो भवतीति । तर्हि तस्य पशुश्रपणं हरेदित्यत्रत्यतच्छब्देन स वैव स्यादित्यत्रत्यतच्छब्देन च प्राजहितः परामृश्यते । एतदपि प्राञ्चमग्निं प्रहरन्तीत्यादिश्रुतिपर्यालोचनयैव प्रत्ये-

तव्यम् । तथा च बौधायनः स वैव स्यादिति पुराणगार्हपत्यमभ्युपदिशन्तीति । समानोऽयं विधिः सवनीयेऽपि । एतस्याप्यङ्गभूतत्वेन दैक्षपशुतुल्यत्वात् । निरूढपशौ स्वाहृत्यवचनादाहवनीयादेवाऽऽहर्तव्यः । अत्र वाधूल आह—समानमावपाहोमाद्यार्हिं पशुमाप्रीतमुदञ्चं नयन्तीत्युक्त९ हुतायां वपायां मार्जयित्वा सुब्रह्मण्य पितापुत्रीया९ सुब्रह्मण्यामाह्वयेति संप्रेष्यतीति । आपस्तम्बीयप्रायश्चित्तसूत्रेऽपि यर्हि पशुमाप्रीतमुदञ्चं नयन्तीत्युक्तमिति । यार्हि पशुमित्यारभ्य ये पशुं विमथ्नीरन्नित्यन्तं प्राग्यदुक्तं ब्राह्मणे तत्सूत्रेऽनुसंधातव्यमित्यर्थः । पर्यग्निकरणं त्वौत्तरवेदिकोल्मुकेनैव । अत्र विशेषः—आग्नीध्रः पर्यग्निकरणानन्तरमुत्तरं वेद्यन्तमनु पूर्वया द्वारा प्राग्वंशं प्रविश्य पुराणगार्हपत्यादग्निमादाय पूर्वया द्वारा निर्हृत्योत्तरेणाऽऽग्नीध्रीयं पशुसमीपं नीत्वा पशोः पुरतो हरति । शामित्रदेशं प्रति पशौ गते तत्र पशोरुत्तरतो निदधाति । वपया सहैकदेशमग्निं प्रत्याहृत्यैतेनैव मार्गेण पुराणगार्हपत्य एव क्षिपेत् । केचित्तु दक्षिणं वेद्यन्तमनु गत्वा दक्षिणया द्वारा प्राग्वंशं प्रविश्य पुराणगार्हपत्यादग्निमादाय प्रदक्षिणमावृत्य दक्षिणया द्वारा निर्हृत्य दक्षिणेन मार्जालीयं ब्रह्मयजमानावन्तरेण नीत्वाऽन्तरा यूपमाहवनीयं च पशुसमीपं हृत्वा पशोः पुरतो हरति । शामित्रदेशं प्रति पशौ गते तत्र पशोरुत्तरतो निदधाति । वपया सहैकदेशमग्निं प्रत्याहृत्यैतेनैव मार्गेण पुराणगार्हपत्य एव क्षिपेदित्याहुः । तदयुक्तं प्रादक्षिण्यविरोधात् । उत्तरतउपचारो विहार इतिपरिभाषाविरोधाच्च । निर्मन्थ्यपक्षे प्रमुच्य पशुमित्येतस्मात्प्राक्तूष्णीमाहवनीयसमीपे निर्मथ्य तं पुष्टं कृत्वा केनचित्पात्रेण पशोरग्रतो हृत्वा शामित्रदेशे पशोरुत्तरतो निदधाति । वपया सह तदेकदेशमग्रतो हृत्वा शुद्धदेशे विहाराद्बहिरेव त्यजेत् । अस्मिन्मन्थने लौकिके एवारण्यौ । पितापुत्रीयेत्यत्र पितृशब्देन पितरश्च मातरश्चेत्येकशेषेण मातरोऽपि संगृह्यन्ते । तत्रापि पितृवर्गो मातृवर्गश्च पितृमातृशब्दाभ्यां ग्राह्यः । पुत्रशब्देन पुत्राश्च पुत्र्यश्च पुत्रा इत्येकशेषेण पुत्रीणामपि ग्रहणम् । इदं च पौत्रप्रपौत्रयोरुपलक्षणम् । पितरः पुत्राश्च यस्यां कीर्त्यन्ते सा पितापुत्रीया, एतादृशी सुब्रह्मण्या भवतीत्यर्थः । स्रस्नीष्व मेखलां प्रमुञ्च सारय यजमान इति त्वाचक्षतां नामग्राहं ते पितृभिः पितामहैः प्रपितामहैः पुत्रैः पौत्रैः सुब्रह्मण्यः सुब्रह्मण्यामाह्वयत्विति प्रैष एव बौधायनेन स्पष्टं सर्वमिदमुक्तम् । स्रस्नीष्व शिथिलां कुरुष्वेत्यर्थः । सुब्रह्मण्यस्य परिज्ञानाय प्रैषोत्तरं पितापुत्रीयैषेति वक्तव्यमेव । आपस्तम्बवाधूलाभ्यां तु सुब्रह्मण्य पितापुत्रीया३ सुब्रह्मण्यामाह्वयेति प्रैष एव तथा पठितः । पितापुत्रीयसुब्रह्मण्याह्वानप्रकारो लाट्यायनद्राह्यायणसूत्रयोर्द्रष्टव्यः । नामग्रहणप्रयोजनं निदानसूत्रे द्रष्टव्यम् । मात्रादीनां स्त्रीणां नामग्रहणं नेत्यपि निदानसूत्रे । अस्मिन्पक्षे पितापुत्रीयेत्यत्र नैकशेषः । पतितप्रव्रजितानां न नामग्रहणम् ।

अपराह्णे वसतीवरीर्गृह्णाति वहन्तीनाम् ।

त्रेधा विभक्तस्याह्नस्तृतीयो भागः पञ्चधा विभक्तस्याह्नश्चतुर्थो भागो वाऽत्रापराह्णस्तस्मिन्वसतीवरीर्वसतीवरीसंज्ञका अपो गृह्णाति । तत्र विशेषमाह—वहन्तीनामिति । अनेन स्थावरादयो व्यावर्त्यन्ते । न स्थावराणां गृह्णीयादिति श्रुतावपि निषेधः । सर्वथा वहन्तीनामलाभे स्थावराणामपि ग्रहणम् । न स्थावराणां प्रतीपं तिष्ठन्गृह्णातीति बौधायनेन विशेषप्रदर्शनेन वहन्त्यलाभे स्थावराणामपि ग्रहणस्याभ्यनुज्ञानात् । सोमोपसर्जनमेतासां प्रयोजनम् । वक्ष्यति च सूत्रकारः—वसतीवरीभिरुपसृज्येति । वसतीवरीभिरुपसृज्येत्यत्रैतासामपां संप्रत्ययार्थं वसतीवरीरिति विशेषणम् । वसतीवरीनिर्वचनं तु श्रुतौ देवा वै यज्ञमाग्नीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन्वसतु नु न इदमिति तद्वसतीवरीणां वसतीवरित्वमिति । पुरा कदाचिद्देवा आग्नीध्रमण्डपे स्थित्वा यज्ञं यज्ञसाधनीभूताञ्छालादीन्पदार्थान्ममेत्येवं व्यभजन्त ततः सर्वैः स्वस्वभागेषु यदवशिष्टं तदुद्दिश्य परस्परमब्रुवन्निदमवशिष्टमिदानीं साधारण्येनास्माकमेव तिष्ठतु प्रातर्विभागं करिष्यामः । यस्माद्वसत्विति देवैरुक्तं तस्मात्तस्य योगाद्वसतीवरीरिति नाम संपन्नं तद्रूत्य आपो वसतीवर्य इति । विभक्ताद्यज्ञादत्यशिष्यत यद्रूपं द्रव्यं तद्देवैः प्रार्थितं नोऽस्मदर्थमिदमब्रूपं द्रव्यम् । नुरवधारणे, अस्मदर्थमेव । अग्नीषोमीयवपायागोत्तरशालामुखीयसमीप एव वसतु इति प्रार्थितत्वाद्वसतीवरित्वमपाम् । एतादृशीरपो गृह्णातीत्यर्थः । वहन्तीनामिति षष्ठी पञ्चम्यर्थे । अवयवषष्ठी वा । अत्र विशेषमाहाऽऽपस्तम्बः—आहूतायां वसतीवरीः कुम्भेन गिरिभिदां वहन्तीनां प्रत्यङ्तिष्ठन्गृह्णातीति । गिरिभिदां वहन्तीनामित्यपां विशेषणद्वयम् । या गिरिं भित्त्वा निर्गता वहन्ति नद्यस्तासामपो गृह्णातीत्यर्थः ।

नान्तमा वहन्तीरतीयात् ।

अन्तमा समीपगता वहन्तीरपो नातीयान्नातिक्रामेत् । अन्तमा एव वहन्तीर्गुणरहिता अप्यपस्त्यक्त्वा दूरस्था वहन्तीर्गुणविशिष्टा अप्यपो न स्वीकार्या इति । समुद्रतीरस्थैः समुद्रस्याऽऽपो न ग्राह्याः क्षारत्वात् । श्रुतावपि निषेधः—तस्मात्समुद्रस्य न पिबन्ति प्रजननमिव हि मन्यन्त इति ।

संधावातपस्य च्छायायाः ।

छायाऽत्र मानुषप्रयत्नाजन्या । सा चाभ्रकृता । आतप उष्णम् । अभ्रच्छायोष्णयोः संधौ गृह्णातीत्यर्थः । श्रुतिरपि—छायायै चाऽऽतपतश्च संधौ गृह्णातीति । छायाया इति चतुर्थी षष्ठ्यर्थे । आतपन्नि(दि)ति ना (ता)न्तस्याऽऽतपवाचकस्य शब्दस्याऽऽतपत इति षष्ठ्येकवचनम् । संधेरुभयपदार्थाधीनत्वाच्चकाराभावेऽपि अर्थात्समुच्चयः सिध्यत्येव ।

कूलस्य वृक्षस्य स्वयं वा छायां कृत्वा ।

अभ्रच्छायाया अभावे कूलस्य तृणादिगुल्मस्य वृक्षस्य वा यस्य कस्यचिद्याज्ञि-

यस्य स्वयं वस्त्रच्छत्राद्यन्यतमेन पदार्थेनोपायान्तराभावे शरीरस्य वा छायां कृत्वैतादृश्याश्छायाया आतपस्य च संधौ गृह्णातीत्यर्थः। संधावातपस्य च्छायाया इति सूत्रात्संधावातपस्येत्यनुवर्तते। सर्वं चैतदापस्तम्बोऽप्याह–यद्यभ्रच्छायां न विन्देदात्मनो वृक्षस्य कूलस्य वा छायायामिति।

ग्रहणप्रकारमाह—

हविष्मतीरिमा आप इति प्रतीपं तिष्ठन्कुम्भं कुम्भीं वाऽभिपूरयति ।

अपां प्रतीपम्। अव्ययीभावसमासोऽयम्। अव्ययीभावत्वान्नपुंसकत्वम्। अबभिमुखमित्यर्थः। अत्राबभिमुखत्वं नाम प्रवाहाभिमुखत्वम्। प्रतीपमिति तिष्ठन्नित्यत्रैवान्वेति। कुम्भस्य कुम्भ्या वाऽबभिमुखताऽभिशब्दादेव लभ्यते। अबभिमुखस्तिष्ठन्कुम्भं कुम्भीं चाऽबभिमुखतया धृत्वा पूरयतीत्यर्थः। प्रतीपमित्यत्र द्व्यन्तरुपसर्गेभ्योऽप ईदित्यनेन कृतसमासान्ताप्शब्दाकारस्य दीर्घेकारादेशः। अस्तनः कुम्भः सस्तना कुम्भी बौधायनसूत्रात्। तत्र स्तनद्वयं चतुष्टयं वा कुम्भ्याः। कुम्भे कुम्भ्यां वाऽपि दृढत्वं योग्यतयैव सिध्यति। स्पष्टमेवेदमाह बौधायनः–अथ यो वीडितः कुम्भस्तं याचतीति। वीडितशब्दार्थः कर्मान्ते–दृढ इत्येवेदमुक्तं भवतीति।

यद्यगृहीताः सूर्योऽभिनिम्रोचेद्यो ब्राह्मणो बहुयाजी तस्य गृहात्कुम्भ्यानां गृह्णीयात्।

यदीत्यनेन नैमित्तिकत्वम्। अगृहीता वसतीवर्यः सत्यश्चेत्सूर्योऽभिनिम्रोचति अस्तमेति तदा यो ब्राह्मणो बहुयाजी तस्य गृहाद्गृह एव कुम्भे भवाः कुम्भ्यास्तासामपां गृह्णीयात्। भवनमत्र सत्ता। बहुयाजिशब्देन सोमयाज्युच्यते। स हि गृहीतवसतीवरीक इति लिङ्गात्। सोमयाजी बहुयाजी भवतीति विज्ञायत इत्यापस्तम्बसूत्रात्, यो ब्राह्मणो बहुयाजीति सोमयाजिनं ब्रूत इति भारद्वाजसूत्राच्च। नतु बहुयाजनकर्ता। तस्य निषिद्धत्वात्। गृहादिति पञ्चमी सप्तम्यर्थे। गृह इत्यनेन तत आहृत्य वहन्तीनां समीपे गत्वा तत्र ग्रहणमित्येतादृशोऽर्थो व्यावर्त्यते। कुम्भ्यानामिति पञ्चम्यर्थे षष्ठी।

यदि तं न विन्देयुरग्निं हिरण्यं चाऽऽदाय परेयाद्यत्राऽऽपः स्युस्तज्ज्योतिरुपरिष्टाद्धारयन्हिरण्यमन्तर्धाय वरे दत्ते गृह्णाति।

तं बहुयाजिनम्। यदीत्यनेनाग्निं हिरण्यं चाऽऽदायेत्यारभ्य वरे दत्ते गृह्णातीत्यन्तस्य विधेर्नैमित्तिकत्वं प्रदर्श्यते। न विन्देयुर्न लभेयुः। यथा वसतीवरीग्रहणकाले यदि सूर्योऽभिनिम्रोचति तदा बहुयाजिनो गृह एव कुम्भ्यानां ग्रहणं कर्तव्यमित्यनेन वह-

न्तीनां व्यावृत्तिः कृता तद्वद्यदि तं न विन्देयुरित्यस्मिन्कल्पेऽप्येतत्सूचयितुमेव यत्राऽऽपः स्युरिति सामान्यनिर्देशः कृत इति । अथ वाऽवहन्त्यो वहन्त्यो वा यत्र संनिहिता आपः स्युस्तत्र गत्वा ग्रहणं कर्तव्यं न तु वहन्तीनामर्थे दूरं गन्तव्यमिति सूचयितुम् । वसतीवरीग्रहणकाले सूर्याभिनिम्रोचने वहन्तीनां परित्यागं कृत्वा बहुयाजिगृहाधिकरणककुम्भ्या ग्रहणविधिबलाद्दृष्टार्थताऽपि ज्ञायते रात्रौ भयशङ्कायाः सत्त्वात्तदर्थं संनिधान एव ग्रहणमिति । एतेनेदमपि ज्ञायते वहन्तीनां ग्रहणार्थमर्धमार्गं गतस्तत्र केनचित्प्रतिबन्धेन विलम्बो जातो दिवसस्त्वस्तात्पूर्वं ग्रहणं कर्तुमपर्याप्तस्तदा झटिति ग्राममागत्य साङ्गाग्निहोत्रहोमपर्याप्तं कालं तत्र स्थित्वाऽग्निं हिरण्यं चाऽऽदाय वहन्त्यो वाऽवहन्त्यो वा यत्राऽऽपः संनिहिताः स्युस्तं देशं प्रति अग्निहिरण्यादानं यत्र कृतं ततः परावृत्य गच्छेदिति । यदि तु अग्निहिरण्ये गृहीत्वैव गच्छेच्चेत्तदा तस्माद्देशादेव परावृत्य यत्राऽऽपः स्युस्तं देशं प्रति गच्छेदिति । एतदभिप्रायेणैव परेयादिति परेत्युपसर्गः परावर्तनार्थक उपात्तः सूत्रकृता । तज्ज्योतिरुपरिष्टाद्धारयन् । तदित्यस्य तत्रेत्यर्थः । सुपां सुलुगित्यनेन सप्तम्या लुक् । ज्योतिःशब्दग्रहणादत्र कंचन विशेषं सूचयति यथा स्वच्छमनवच्छिन्नं द्रष्टुं शक्यते तथा प्रकाशः कर्तव्य इति । तथा चेदमवगतं भवति आनीतो यो लौकिकोऽग्निस्तस्मिन्नुल्कां प्रज्वलयित्वा(त्य) तत्प्रकाशे वसतीवरीग्रहणं कर्तव्यमिति । उपरिष्टाद्धारयन्, उपरिष्टात्कुम्भस्य कुम्भ्या वा धारयन् । यथा वसतीवरीग्रहणानुकूलं भवति तथेत्यर्थः । उल्कामुपरिष्टाद्धारयमाणो गृह्णीयादित्यापस्तम्बः । धारयन्नित्यनेन शत्रा समानकालता बोध्यते । सामानाधिकरण्यादेव समानकर्तृकता । हिरण्यं कुम्भे कुम्भ्यां वाऽन्तर्धायावधायेत्यर्थः । हिरण्यं वाऽवधायेत्येवाऽऽपस्तम्बः । श्रुतावपि ज्योतिष्या वा गृह्णीयाद्धिरण्यं वाऽवधाय सशुक्राणामेव गृह्णातीति विकल्प उक्तः । शुक्रं तेजः । सूत्रकारमते तु ज्योतिर्हिरण्ययोः समुच्चय एव । वाकारः समुच्चयार्थक इत्याशयः । अत्र श्रुतिः शाखान्तर उन्नेया । वरे दत्ते यजमानेन वरे स्वस्मै दत्तेऽध्वर्युर्गृह्णातीत्यर्थः । एतदन्तं नैमित्तिकम् ।

अग्नेर्वोऽपन्नगृहस्य सदसि सादया-
मीत्यपरेण शालामुखीयमुपसादयति ।

स्पष्टोऽर्थः । धत्तेत्यन्तो मन्त्रः । एतदन्तो वसतीवरीग्रहणविधिः । तत्र त्रेधाविभक्तदिवसद्वितीयभागांशे वपायागोत्तरं बह्ववकाशश्चेत्तदा प्रकारद्वयम् । तत्र वपायागोत्तरं पशुपुरोडाशतन्त्रमारभ्य तृतीये भागे प्राप्ते कृतान्ताद्विरम्य वसतीवरीर्गृहीत्वा कृतान्तात्कर्म प्रतिपद्यत इत्येकः । वपायागोत्तरं तृतीयभागप्रतीक्षार्थं विरम्य तस्मिन्प्राप्ते वसतीवरीर्गृहीत्वैव पशुपुरोडाशतन्त्रमारभत इत्यपरः । यदि तु वपायाग एव विलम्बवशात्तृतीयभागे(गो) गतस्तदा वपायागोत्तरमादौ वसतीवरीरेव गृहीत्वा पशुपुरोडाशतन्त्रा-

रम्भः कार्यः। आपस्तम्बेन स्पष्टं वसतीवरीग्रहणोत्तरमेव पशुपुरोडाशतन्त्रारम्भ उक्तः। एवं पञ्चधाविभागपक्षेऽपि ज्ञेयम्। पशुपुरोडाशार्थ्यर्थहविर्निर्वापस्तु प्रकृतशालायामनोन्तर एव न तु हविर्धानाख्ययोः शकटयोः प्रवर्तने कृते निर्वापः प्रसङ्गात्तत्रैव कार्यः । अपरेण गार्हपत्यं निर्वपतीति प्राकृतदेशस्य हविर्धानाभ्यामसिद्धेः। अनसोऽधिनिर्वपतीति विधिस्तु अनोन्तर उपात्तेऽपि सिध्यति। नच मन्त्रवन्महावेद्यामवस्थापितयोर्हविर्धानयोः पत्नीशालायां नयनमस्त्विति वाच्यम्। अनोन्तरोपादाने बाधकाभावात्तेनैव निर्वाहे मन्त्रवन्महावेद्यां स्थापितयोर्नयनस्यायोगादिति द्रष्टव्यम्। तथा च द्वादशाध्याये प्रथमे पादे जैमिनिः— हविर्धाने निर्वपणार्थे साधयेतां प्रयुक्तत्वात्, असिद्धिर्वाऽन्यदेशत्वात्। प्रधानवैगुण्याद्वैगुण्ये प्रसङ्गः स्यात्, अनसां च दर्शनादिति त्रिभिः सूत्रैराह। हविः सोमरसात्मकं धीयते स्थाप्यते ययोस्ते शकटे हविर्धाने ते एव निर्वपणार्थे निर्वपणरूपं कार्यं साधयेतां संपादयेतां तयोः सोमकर्मार्थं प्रयुक्तत्वात्प्रयुक्तपरित्यागे कारणाभावादिति। नच निर्वपणकार्यस्यानसोऽधिनिर्वपतीति श्रुत्याऽनो(नउ)पादानकत्वाद्धविर्धानयोर्निर्वापेऽनो-(नउं)पादानकत्वाभावान्निर्वपणकार्यस्य विगुणत्वापत्तिरिति वाच्यम्। हविर्धानयोरप्यनोरूपत्वेनानस्त्वस्य तयोरपि सत्त्वेनानस्त्वाकारेणैवाङ्गत्वाद्धविर्धानयोर्निर्वापेन च निर्वापस्य सिध्याऽनो(नउ)पादानकत्वाभावाभावेन विगुणत्वापत्त्यभावात्। अङ्गे प्रयुक्ते तद्गुणार्थे पुनरङ्गप्रयोगस्यायुक्तत्वाद्वेदिप्रसङ्गस्थले परिमाणहानिवदिह गार्हपत्यपाश्चात्यलक्षणहानिर्न दोष इति भावः। अयं प्रथमसूत्रार्थः। अन्यदेशत्वाद्भिन्नदेशत्वान्निर्वपणकार्यस्य सिद्धिः। हविर्धानमण्डपे हि हविर्धाने प्रकृतिप्राप्तनिर्वापदेशस्तु अपरेण गार्हपत्यं हविर्धाननिर्वपणयोरेकदेशत्वासंभवान्न हविर्धानाभ्यां प्राकृतनिर्वपणकार्यस्यासिद्धिः । अनसोऽधिनिर्वपतीति विधिस्तु अनोन्तर उपात्तेऽपि सिध्यति। नच मन्त्रवन्महावेद्यामवस्थापितयोर्हविर्धानयोः पत्नीशालायां नयनमस्त्विति वाच्यम् । अनोन्तरोपादाने बाधकाभावात्तेनैव निर्वाहे मन्त्रवन्महावेद्यां स्थापितयोर्नयनायोगात्। इष्टापत्तौ सोमार्थं पूर्वं प्राची प्रेतमध्वरमिति मन्त्रेण कृतं हविर्धानप्रवर्तनमत्र रमेथामिति मन्त्रेण कृतं स्थापनं चानर्थकं स्यात्। पुनः प्रवर्तनस्थापनयोरनुष्ठाने त्वावृत्तिरशास्त्रीया स्यादिति सर्वथा प्रधानभूतः सोमो विगुणः स्यात्। तद्वैगुण्याद्वैगुण्यप्रसङ्गो भवेत्। नहि प्रधानवैगुण्याद्वैगुण्यं कुत्रापि दृष्टम्। अतो नयनं नैव युक्तम्। वैगुण्यप्रसङ्ग इत्यत्र प्रसङ्गशब्देनाऽऽपत्तिरुच्यते।

अस्तमिते संवादप्रभृतिना पशुतन्त्रेण प्रतिपद्यते।

अस्तमदर्शनमिते गते सूर्ये सतीत्यर्थः। अनेन तत्पूर्वकालो व्यावर्त्यते। अस्तमितात्पूर्वं संवादप्रभृति नैव भवति किंतूत्तरमेवेति। तेन पशुपुरोडाशयागोत्तरं दिनावशेषे विराम एव कर्तव्यः। अस्तोत्तरं पशुपुरोडाशयागविलम्बवशात्पतितेऽपि न दोष इति

सिद्धं भवति। शृत९हवी३ः शमितरित्ययं संवादस्तत्प्रभृतिना तदादिना पशुतन्त्रेण पशुसंबन्धिकर्मकलापेन प्रतिपद्यते संवादप्रभृति पशुतन्त्रमारभ्यत इत्यर्थः। जुह्वां पञ्चगृहीतं गृहीत्वा पृषदाज्यस्रुवं चाऽऽदायेति संवादसंबन्ध्येवेति, पशुसूत्रे स्वपा तत्संबन्धित्वस्य बोधितत्वात्तदादानस्योत्तरत्रोपयोगाच्च।

तस्य दक्षिणेन हविर्धानमुत्तरेण वा समवत्तं परिहरति।

तस्य पशोः। पाशुकेडावदानसमूहः समवत्तशब्देनोच्यते। इदं च समवत्तधानीति पाशुकेडापात्रे सूत्रकृता(तो) व्यवहाराज्ज्ञेयम्।

न यजमानो भक्षान्भक्षयति भक्षणमेके समानन्ति।

भक्ष्यन्ते ते भक्षाः। भक्षशब्देनेडा हृदयादयोऽवत्ताः पदार्था उच्यन्ते। भक्षाणामिति शेषः। तस्मात्तस्य नाऽऽश्ये तस्माद्वाऽऽश्यमित्युभयश्रुतेरिति भावः। इडाभक्षणादीनां सौमिकैर्न प्रसङ्गसिद्धिः। भक्षयित्वाऽऽज्येडां विरमन्तीतिदर्शनात्, भक्षणमेके समामनन्तीति सूत्राच्च। तथा चाध्वर्व्वादिभिरिडाभक्षणं कर्तव्यमेव। जैमिनिरपि द्वादशाध्याये प्रथमे पाद एवमेवाऽऽह—शेषभक्षास्तथेति चेन्नान्यार्थत्वादिति। ऋत्विग्भक्षाः शेषप्रतिपत्त्यर्था नत्वानत्यर्थाः। अतो न प्रधानदक्षिणयैव तेषां निवृत्तिरिति शेषभक्षास्तथेति चेदित्यनेन सूत्रेण प्रतिपाद्यते।

पत्नीसंयाजान्तः ॥ २४ ॥ अग्नीषोमीयः संतिष्ठते।

पत्नीसंयाजैरन्तः समाप्तिर्यस्य स पत्नीसंयाजान्तः। पत्नीसंयाजान्तो भवतीत्येतावतैव कर्मसंस्थायां सिद्धायां संतिष्ठत इति पुनः संस्थाबोधकवचनं पत्नीसंयाजान्तैरप्रतिपत्तिकर्मभिरपि संस्थापनीय इत्येतदर्थम्। तेन समन्त्रमेव प्रतिपत्तिकर्माणि वेदप्रतिपत्तिः परमत्र न भवति। तस्य सुत्यासमाप्त्यन्तं धारणस्योक्तत्वात्। प्रकरणादेवाग्नीषोमीयलाभे पुनर्वचनमग्नीषोमीय एव प्रतिपत्तिकर्माण्यावश्यकानि न पत्नीसंयाजान्तेषु द्वादशाहसंबन्धिसुत्यादिवसेषु प्रतिपत्तिकर्माणि आवश्यकानीति प्रदर्शयितुम्। अग्नीषोमा यो अद्य वां यो अग्नीषोमा हविषा सपर्यादिति याजुषहौत्रसत्त्वे वपाया याज्यानुवाक्ये। अग्नीषोमा य आहुतिमग्नीषोमा चेति तद्वीर्यं वामिति पशुपुरोडाशस्य याज्यानुवाक्ये। अग्नीषोमाविम९ सुमेऽग्नीषोमा हविषः प्रस्थितस्य वीतमित्यङ्गानां याज्यानुवाक्ये। ऐन्द्राग्नपशोस्तु शुचिं नु स्तोमं नवजातमद्य श्नथद्वृत्रमुत सनोति वाजमिति वपाया याज्यानुवाक्ये। उभा वामिन्द्राग्नी प्रचर्षणिभ्य इति पशुपुरोडाशस्य। आवृत्रहणा गीर्भिर्विप्र इत्यङ्गानाम्। अथाऽऽश्विनपशोः—आवा९ रथो रोदसी स पप्रथानो अभिपञ्चभूमेति वपाया याज्यानुवाक्ये। स्वश्वायशसा युवोः श्रियं परियोषेति पशुपुरोडाशस्य। योहस्यवा९ रथिरायुवं भुज्युमवविद्धमित्यङ्गानाम्। पशुहौत्रं सर्वं याजुषम्। पशुद्वयसत्त्वे द्विवचनान्त ऊहः। पशुत्रयसत्त्वे बहुवचनान्तः।

निशायां वसतीवरीः परिहरति सर्वतो न पुरस्तात् ।

निशेरते प्राणिनो यस्मिन्काले स कालो निशाशब्देनोच्यते । रात्रेः पूर्वार्धं निशाशब्देन ग्राह्यमिति केचित् । द्वितीययाम एव निशेत्यन्ये । तृतीययामोऽपीत्यपरे । पूर्वमते प्रथमयामेऽपि वसतीवरीपरिहरणं भवति । द्वितीये तृतीये च मते तु न प्रथमे याम इति भेदः । अग्नीषोमीयदिवससंबन्धिन्येव निशा ज्ञेया सांनिध्यात् । अथैतस्या रात्रेर्विवासकाल इत्याश्वलायनेन संवादप्रभृतिपाशुकतन्त्रस्य बोधनप्रभृतिसोमतन्त्रैकदेशस्य चाधिकरणीभूताया रात्रेरेकत्वं प्रदर्शयितुमेवैतस्या इति विशेषणदानाच्च । परि परितो वेदिं हरति । प्रकृते परिहरणशब्दस्य विवक्षितमर्थमाह—सर्वतो न पुरस्तादिति । परिहरति सर्वत इतीयं श्रुतिरेवानूद्यत इति वा । सर्वत इत्यनेन पुरस्तादपि परिहरणे प्राप्ते रक्षोपहननरूपपरिधिपरिधानकार्यं पुरस्तात्प्राग आदित्यो यथा संपादयति तद्वदत्रापि सर्वतः परिहरति रक्षसामपहत्या इति श्रुतावुक्तं रक्षोपहननरूपवसतीवरीपरिहरणकार्यं पुरस्तात्प्राग आदित्यः संपादयिष्यत्येवेति भावः । नन्वादित्यो ह्येवोद्यन्पुरस्ताद्रक्षाꣳस्यपहन्तीत्यनेन परिधान उद्यत एवाऽऽदित्यस्य रक्षोपहननकर्तृत्वेन वसतीवरीपरिहरणस्य रात्रिसाध्यत्वेनाऽऽदित्यस्योदयासंभवेन रक्षोपहननकर्तृत्वासंभवादसंगतमिदमिति चेन्न । उद्यन्नित्यस्योदयं यास्यन्नित्येतादृशार्थाङ्गीकारस्याग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नित्यस्या इष्टेर्निशितायां निर्वपेदित्यनेन रात्रौ कर्तव्यायाः परिधिपरिधानविषये साकꣳ रश्मिभिः प्रचरन्तीत्येकेषामित्यस्मिन्पक्ष आनीकवतीकैडिनीष्टिसंबन्धिनोऽर्धाद्रात्रौ पतितस्य परिधानस्य विषये चाऽऽवश्यकत्वेनात्रापि तद्रीत्या रक्षोपहननकर्तृत्वसंभवेनासंगतेरभावात् । इयं सामान्यप्रतिज्ञा । अथवा सर्वतो न पुरस्तादित्यस्यांशस्योत्तरत्रैवान्वयः । तथा च सर्वतो न पुरस्तादुत्क्रामतेत्येतावान्प्रैष एव । तदर्थस्तु सर्वतः सर्वेभ्यो दिक्प्रान्तेभ्य उत्क्रामत पुरस्तात्प्रदेशात्तु नोत्क्रामत तत्र परिहरणाभावादिति । सामर्थ्याददीक्षितान्प्रतीदं वचनम् । उक्त्वा वसतीवरीः परिहरतीत्यन्वयः ।

उत्क्रामतेत्युक्त्वाऽन्तर्वेदि यजमानः पत्नी च भवतः ।

पत्नीत्यत्रैकत्वमविवक्षितमुद्देश्यगतत्वात् । तेन पत्न्यनेकत्वे सर्वा अप्यन्तर्वेदि भवेयुः । तत्र ऋत्विजामपि दीक्षितत्वादन्तर्वेदि भवनम् । अध्वर्योर्वसतीवरीपरिहरणकर्तृत्वात्तस्य नान्तर्वेदि भवनम् । चकारः परस्परसमुच्चयार्थः ।

नादीक्षितमभि परिहरति ।

अदीक्षितानां बहिर्निष्क्रमणे हेतुरयं निषेधः । अदीक्षितमभितः परिहरणं न कर्तव्यमिति तदर्थः ।

परिहरणप्रकारमाह—

आदाय कुम्भꣳ सव्येऽꣳसेऽत्याधायापरेण प्राज-
हितमतिक्रम्य दक्षिणया द्वारोपनिर्हृत्य द-
क्षिणं वेद्यन्तमनु परिहृत्येन्द्राग्नियोर्भागधेयीः
स्थेति दक्षिणस्यामुत्तरवेदिश्रोण्याꣳ सादयति ।

आदाय कुम्भमित्यत्रान्यस्मादिति शेषः । तेनान्येनाध्वर्यवे कुम्भप्रदानं कर्तव्यमिति सिद्धं भवति । अन्यथा सव्येऽꣳसेऽत्याधायेत्यनेनैवार्थादादानसिद्धेर्वचनं व्यर्थं स्यात् । कुम्भग्रहणं कुम्भ्युपलक्षणम् । सव्य इत्यंसविशेषणं वसतीवरीणामन्तरङ्गस्वसिद्ध्यर्थम् । अंसग्रहणं पार्श्वव्यावृत्त्यर्थम् । अतिरत्रान्तर्धानार्थकः, अंसे किंचिदन्तर्धायाऽऽधानं कर्तव्यमिति । प्राजहितः पुराणगार्हपत्यः प्रकर्षेणाग्निप्रणयनादिकर्मसु जहितस्त्यक्तः स प्राजहित इत्यर्थो वा । अस्मिन्पक्षे योगरूढं पदम् । दीर्घश्छान्दसः । गत्वेति परित्यज्याऽतिक्रम्येति वचनाद्गार्हपत्यापरभागमुल्लङ्घ्यैवाग्रे गन्तव्यमिति । दक्षिणया द्वारा दक्षिणेन द्वारेण । उपशब्दो नम्रीभवनरूपमर्थविशेषं द्योतयति । निर्हरणं द्वाराद्बहिर्निःसारणम् । दक्षिणं वेदेर्महावेदेरन्तं प्रान्तमनुलक्षीकृत्यैव वसतीवरीः परिहृत्येन्द्राग्नियोर्भागधेयीः स्थेति मन्त्रेण दक्षिणस्यामुत्तरवेदिश्रोण्यां सादयति ।

आदाय कुम्भं दक्षिणेऽꣳसेऽत्याधाय यथेतं
प्रत्येत्योत्तरपूर्वया द्वारोपनिर्हृत्योत्तरं वेद्यन्त-
मनु परिहृत्य मित्रावरुणयोर्भागधेयीः स्थेत्यु-
त्तरस्यामुत्तरवेदिश्रोण्याꣳ सादयति ।

दक्षिणेऽꣳस इत्यत्र दक्षिणवचनं वसतीवरीणामन्तरङ्गतासिद्ध्यर्थम् । अंसग्रहणं पार्श्वव्यावृत्त्यर्थम् । उत्तरपूर्वया द्वारोपनिर्हृत्येति कामनार्थं विहितस्यैतस्य तत्र एव नान्यथा । तदभाव उत्तरपूर्वयोत्तरया वा द्वारोपनिर्हरणम् ।

आदाय कुम्भꣳ सव्येऽꣳसेऽत्याधाय तीर्थेन प्रपाद्य
विश्वेषां देवानां भागधेयीः स्थेत्याग्नीध्रे सादयति ।

तीर्थशब्दो वेद्युत्करयोरन्तरा प्रदेशे चात्वालोत्करयोरन्तरा प्रदेशे च वर्तते । अन्तरा वेद्युत्करावन्तरेण चात्वालोत्करौ वा तीर्थमिति सूत्रान्तरात् । अचात्वाले कर्मणि पूर्वतीर्थं सचात्वाल उत्तरम् । आग्नीध्र आग्नीध्रधिष्ण्यसमीपे । जागृतेति मन्त्रान्तः । आदाय कुम्भं सव्येंऽसेऽत्याधाय तीर्थेन प्रपद्येत्येतावतैव सव्येंऽसेऽत्याहितत्वाद्द्रव्यस्य तीर्थेन प्रपादने सिद्धे णिच्प्रयोगोऽन्यत्रापि स्वेनागृहीतस्यापि तीर्थेन प्रपादनं ज्ञापयति । तेन पश्वादीनां तीर्थेन प्रपादनं सिद्धं भवति । इदमपि अत्र वचनाज्ज्ञातं भवति केनचित्पदार्थेन स्वस्यासाहित्ये तीर्थेन प्रपदनं नानियतमिति ।

नन्वन्तरा यज्ञाङ्गानि बाह्यः कर्तार इत्यनया परिभाषयैवान्तरङ्गत्वे सिद्धे पुनरन्तरङ्गत्वसिद्ध्यर्थं सव्यदक्षिणग्रहणं तत्र तत्र यत्कृतं तद्व्यर्थमिति चेत्सत्यम् । कर्तृगृहीतस्य यज्ञाङ्गस्यान्तरङ्गत्वमत्रैव नान्यत्रेतिज्ञापनार्थत्वात् । अत्रैवोच्यमाने तद्व्यतिरिक्तेऽस्मिन्नेव स्थलान्तरे नियमभावापत्तिरतस्तत्र तत्र सव्यदक्षिणवचनम् ।

अत्र वसन्ति ।

अत्राऽऽग्नीध्र एव वसन्ति नान्यत्र । वसन्तीत्यत्रान्तर्भावितो णिच् । तेन वासयन्तीत्यर्थो भवति । अध्वर्युरित्येव शेषः । बहुवचनस्य पूजार्थत्वात् । अथवाऽध्वर्युचतुष्टयेन आसमीया वसतीवर्य इति शेषः । आग्नीध्र उपवासयत्येतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदेव यज्ञस्यापराजितं तदेवैना उपवासयतीति श्रुतेः । एना वसतीवर्यः ।

सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति संप्रेष्यति
पितापुत्रीया सुब्रह्मण्या भवति ।

पूर्ववद्व्याख्येयम् ।

या यजमानस्य व्रतधुक्तामाशिरे दुहत या पत्न्यास्तां दधिग्रहाय या घर्मधुक्तां दधिघर्माय तप्तमनातञ्च्यं पयो मैत्रावरुणाय शृतातङ्क्यं दध्यादित्यग्रहाय कुरुतादिति संप्रेष्यति।

या यजमानस्य व्रतदोग्ध्री गौस्तामाशिर आशिरनिमित्तं दुहत, मथितं दध्याशिरं, या पत्न्या व्रतदोग्ध्री गौस्तां दधिग्रहाय दधिग्रहार्थं दुहत, दध्ना ग्राह्यो ग्रहो दधिग्रहः । अनेनार्थाद्दधिरूपं द्रव्यमत्र ज्ञायते । या घर्मधुक्, घर्मः प्रवर्ग्यस्तत्संबन्धिद्रव्यदोग्ध्री गौस्तां दधिघर्माय दुहत । दध्ना साध्यो घर्मो घर्मनामककर्मविशेषो दधिघर्मस्तदर्थमित्यर्थः । अत्रापि अनन्तरोक्तरीत्या दधिरूपमेव द्रव्यं ज्ञायते । तप्तमनातञ्च्यमनातञ्च्यं यस्य तत्तस्य सत आतञ्चनं न, एतादृशं पयो मैत्रावरुणाय मैत्रावरुणग्रहाय । कुरुतेत्यत्राऽऽकृष्यतेऽथवा कुरुतादित्यत्रापकृष्यते । शृतं सदेवाऽऽतञ्च्यं दुग्धस्य शीतत्वापेक्षा यत्र न तच्छृतातङ्क्यमित्युच्यते । एतादृशं दधि आदित्यग्रहायाऽऽदित्यग्रहार्थं कुरुतादित्यर्थः । कुरुतादिति लोटः प्रथमपुरुषैकवचनम् । दधिग्रहदधिघर्मार्थयोर्दध्नोर्न शृतातङ्क्यरूपता । आज्यग्रहस्य सोमग्रहस्य वा तत्कामनयाऽनुष्ठानं कर्तव्यत्वेनाभिमतं यदा तदा या पत्न्यास्तां दधिग्रहायेति लुप्यते । दधिग्रहाभावेन दोहाभावात् । अप्रवर्ग्ये या घर्मधुक्तां दधिघर्मायेत्येतल्लुप्यते । दधिघर्माभावेन दोहाभावात् । मैत्रावरुणपयोर्थं यस्याः कस्याश्चिद्गोर्दोहः । शृतातङ्क्यार्थं यस्याः कस्याश्चित् । आशिरादित्रयार्थदोहकर्ताऽतो मैत्रावरुणपयोर्थदोहकर्ता तु तप्तमनातङ्क्यं पयो मैत्रावरुणायेत्यत्र दुहतेत्यस्यान्वय इति पक्ष आशिरादित्रयार्थदोहनवत्कर्ताऽत्रापि अनियतः । कुरुतादित्यग्रिमस्यात्रान्वय इति पक्षे तु प्रतिप्रस्थातैव । एकवचनात् । एकव-

घनादादित्यग्रहार्थशृतातङ्क्यदध्यर्थदोहकर्ताऽपि पूर्ववत्प्रतिप्रस्थातैव । पञ्चानां दोहानाममन्त्रैव करणं प्रैषानुरोधात् । सवनीयामिक्षार्थस्य दोहस्येदानीमेव दोहनम् । सांनाय्यनिष्पत्तेर्दिनद्वयसाध्यत्वात् । सवनीयामिक्षार्थदोहकर्ता प्रतिप्रस्थातैव प्रातर्दोहस्य तत्कर्तृकत्वेन तत्संबन्धिन एतस्यापि तत्कर्तृकताया एव युक्तत्वात् । अनूबन्ध्यास्थानीयामिक्षाकरणमन्यथाऽनुपपत्त्या लौकिकेन दध्नैव । कलौ गवालम्भस्य निषिद्धत्वादामिक्षैव । तत्र पञ्च दोहास्तूष्णीम् । सवनीयामिक्षार्थं समन्त्रको दोहः । पञ्चानां दोहानाममन्त्रमेव शाखाहरणादितन्त्रम् । ततमनातङ्क्यमिति वचनात्तापमात्रं कार्यम् । पयस आतञ्चने दधित्वापत्तिः । इष्टापत्तौ तु पयसा मैत्रावरुणं श्रीणातीति पयःकरणकं श्रपणं न सिध्येत् । एवं चार्थादेवाऽऽतञ्चननिवृत्तावनातङ्क्यमिति वचनं शाखाहरणादिदोहधर्मप्राप्तिं ज्ञापयति । स च पयसः प्रदानार्थत्वाभावात्तूष्णीमेव । अत एव क्रयधर्मा न भवन्ति । तथा च नवमाध्याये चतुर्थपादे जैमिनिः—श्रपणानां त्वपूर्वत्वात्प्रदानार्थे विधानं स्यात्, गुणो वा श्रपणार्थत्वादित्यादिसूत्रैरमुमर्थमाह । सोमे पयसा मैत्रावरुणं श्रीणातीति पयसः सोममिश्रणं प्रदानार्थं दृष्टार्थत्वात् । सोमसंस्कारार्थत्वे त्वदृष्टार्थता स्यादिति प्राप्ते द्वितीयाश्रुतिवशाददृष्टकल्पने दोषाभावान्न पयसः प्रदेयत्वमिति । श्रपणानां पयःप्रभृतीनां प्रदानार्थे । सवनीयामिक्षार्थं समन्त्रकमेव शाखाहरणादितन्त्रम् । अथवाऽऽदौ सर्वेषां क्रमेणामन्त्रसमन्त्रभेदेन शाखाहरणम् । क्रमेण तथैवोपवेषकरणं तथैव त्रिवृद्दर्भपवित्रावसर्जनम् । क्रमेण तथैव दोहा इति । शतं मित्रावरुणाभ्या१ शरदो दुहानाः । इह वो मित्रावरुणौ रमयतां गावः प्र णो ब्रूहि मित्रावरुणाभ्या१ हविरिन्द्रियं बहु दुग्धि मित्रावरुणाभ्यां देवेभ्यो हव्यं० सोमेन त्वाऽऽतनच्मि मित्रावरुणाभ्यां दधि, इति सवनीयामिक्षायां विकारः । शाखोपवेषयोराहरणसमय एव परिज्ञानार्थं चिह्नानि कार्याणि । अथवाऽऽदावेव सवनीयामिक्षार्थको दोहः । ततोऽमन्त्रकाः पञ्च दोहाः । एतदनुरोधेनैव शाखाहरणोपवेषकरणादि । सर्वेषु दोहेषु जातेषु समन्त्रकामिक्षायाः प्रातर्दोहाय वत्सापाकरणम् ।

आग्नीध्र ऋत्विजोऽलंकृता वसन्ति ।

अनेन सदसि वासो व्यावर्त्यते । आपस्तम्बेन न सदस्युपवस्तवा इति दोहार्थप्रैष एव निषेध उक्तः । अलंकृता इत्यत्रालंकारो मानुष एव नतु दिव्यापित्र्यौ । ते चोक्ता वैखानसेन—

हेमभूषणसंपन्नः शुभ्रवस्त्रानुलेपनः ।
सुगन्धिकुसुमैर्जुष्टो दिव्योऽलंकार उच्यते ॥
स एव पुष्परहितः साञ्जनो मानुषः स्मृतः ।
एषोऽनुलेपरहितः पित्र्योऽलंकार ईरितः ॥ इति ।

---

१ ख. ग. °ति । स° ।

प्राग्वंशे पत्नीं जागरयन्ति ।

ऋत्विजस्त्वयैतस्यां रात्रौ जागरणमेव कर्तव्यमिति पत्नीं जागरणे नियोज्य निद्राबाधायां निद्रां कुर्युः । न तु निद्राया अवश्यकर्तव्यता । न च बोधनविधिवशान्निद्राया आवश्यकत्वमन्यथा विधेर्वैयर्थ्यापत्तेरिति वाच्यम् । निद्रासत्त्व एव बोधनविधेश्चारितार्थ्यसंभवेन विधेर्वैयर्थ्याभावात् । जागरयन्तीत्यत्र प्रयोजका ऋत्विजः ।

हविर्धाने यजमानो राजानं गोपायति गोपायति ॥ २९ ॥

इति हिरण्यकेशिसूत्रे सप्तमप्रश्नेऽष्टमः पटलः ।

हविर्धानवचनं हविर्धानादन्यत्रापि सतो राज्ञो गोपनं व्यावर्त्यते । यथा राजानं भृत्या रक्षन्ति तद्वद्यजमानः परिकर्मिभिः सह सोमं राजानमैकाग्र्येण दस्युभ्यः श्वादिभ्यश्च रक्षतीत्यर्थः । यजमानवचनमवध्वर्युव्यावृत्त्यर्थम् । जागर्त्येतां रात्रिं हविर्धाने राजानं गोपायन्नित्येतावदे(त्ये)व सूत्रे याजमानसूत्र एव लाघवात्कर्तव्येऽत्र पृथक्सूत्रकरणं स्वस्य गोपनाशक्तावन्येनापि गोपनं करणीयमिति द्वादशाहाद्यहीनद्वितीयादिरात्रिषु जागर्ति वा न जागर्ति यदा जागर्ति तदा स्वयं राजानं रक्षत्यन्येन वा रक्षयेत्, यदा न जागर्ति तदाऽन्येनैवेत्यर्थादित्येतादृशार्थज्ञापनार्थम् । द्विरुक्तिः प्रश्नसमाप्तिद्योतनार्था ।

इति ओकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषासहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नविवेचनक्लेशकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तौ सप्तमप्रश्नस्याष्टमः पटलः ॥ ८ ॥

संपूर्णोऽयं सप्तमः प्रश्नः ।

अथाष्टमः प्रश्नः।

तत्र प्रथमः पटलः।

महारात्रे बुध्यन्ते।

रात्रेर्महान्भागो महारात्रं तस्मिन्महारात्रे रात्रेर्यो महान्भागस्तस्मिन्नित्यर्थः। मयूरव्यंसकादिलक्षणः समासः। समासान्तो भागपदलोपश्च तदादित्वात्। एतादृशे व्याख्याने यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यादिति श्रुतौ श्रुतं रात्रिशब्दमहच्छब्दयोर्लिङ्गभेदकृतवैयधिकरण्यं साधकम्। महती चासौ रात्रिश्चेति विग्रहस्तु नैवात्र भवति। महत्त्वस्य रात्रिविशेषणत्वे महत्त्वं रात्रौ, मानकृतं तच्च वसन्ते सर्वथा नैव संभवति। उत्तरोत्तरं रात्रीणामल्पमानत्वात्। रात्रिषु महत्त्वं तु दक्षिणायन एवोत्तरोत्तरम्। तथा सति महतीषु रात्रिषु सतीष्वेव बोधनं स्यात्, बोधनस्य च मुख्यार्थत्वादत्रैव कर्तव्यता स्यात्। वसन्ताद्यरात्राविव कर्तव्यता स्याद्वा। तस्या एव महत्त्वात्। सा च प्रकृते विरुध्येतेत्यतो नैतादृशो विग्रहोऽत्र युक्तः। एतेनानन्तरोदाहृतश्रुतौ रात्रिया इति चतुर्थी यथा षष्ठ्यर्थे तथा महतीति महच्छब्दगतसप्तमीविभक्तिरपि षष्ठ्यर्थिकैव। एतदनुरोधेन पुंलिङ्गमपि विपर्यस्तं कर्तव्यमिति कुमृष्टिकल्पना निरस्ता द्रष्टव्या। तत्र महच्छब्देन रात्रितृतीयभागो गृह्यते। किमेतादृशमेव महत्त्वमित्यत्र नियामकमिति चेत्। वक्ष्यमाणस्य त्वरमाणस्त्वनुदित उपाꣳशुमुदितेऽन्तर्याममुभावनुदित इत्येकेषामिति सूत्रस्यैव नियामकत्वात्। एतेनैव जानीमो यावता कालेनोपांशुपर्यन्तमुभयपर्यन्तं वा कर्मानुदिते भवति तदनुरोधेन बोद्धव्यमिति। एतेनेदमपि ज्ञातं भवति चतुर्थाविभक्तरात्रितृतीयभागाद्यभागात्मके काल एव बोद्धव्यमिति। ननु किमर्थमिदं सूत्रमर्थादेव तत्सिद्धेरिति चेन्न। आशुकर्मकारिभिरप्यृत्विग्भिरेतस्मिन्नेव काले बोद्धव्यं नत्वेतस्य पुरस्तादुपरिष्टाद्वेतीच्छासिद्धनियमनार्थत्वात्। नन्वेवमपि महारात्रे कर्माण्युपक्रमन्त इत्येतावतैव सिध्यति नार्थो बोधवचनेनेति चेन्न। तस्य संबन्धविशेषज्ञापनार्थत्वात्। यत्र महारात्रे बोधनमस्ति तत्रैव पुरा वाचः प्रवदितोः प्रातरनुवाकोपाकरणं नान्यत्रेति। तेन द्वादशाहे प्रायणीयातिरात्राख्ये प्रथमसौत्यदिवसे समाप्त एवाहन्युदितेऽप्यादित्ये द्वितीयसौत्यदिवसीयप्रातरनुवाकोपाकरणं कर्तव्यं बोधनाभावादिति सिद्धं भवति। एतेन यत्र होताऽऽश्विनं शंसति तत्र मैत्रावरुणः प्रातरनुवाकमनुब्रूयादिति शाखान्तरबलात्प्रतिप्रस्थात्रैव द्वितीयसौत्यादिवसकर्म कर्तव्यं यावत्पर्यन्तमध्वर्युः पूर्वकर्मणः सकाशान्निर्मुक्तो भवति तावत्पर्यन्तमध्वर्योर्निर्मुक्ततायामध्वर्युरेव तत आरभ्य करोतीति केषांचिन्मतं नास्माकमनुकूलमिति प्रदर्शितम्।

तथा कर्माण्युपक्रमन्ते यथा पुरा वाचः प्रवदितोः प्रातरनुवाको भवति।

यथा वाचो मनुष्याणां पक्षिणां वा प्रवदितोः प्रवदनात्पुरा प्राक् प्रातरनुवाक

आरब्धो भवति तथा तदनुरोधेन कर्माणि यज्ञतनूहोमादीनि उपक्रमन्त आरभन्त इत्यर्थः। कर्मोपक्रमस्तु कृतशौचैरेव कार्यः। अन्यथा कर्मण्यनधिकारः स्यात्। स्नाता एव कर्म कुर्युरिति केचित्। कृतहस्तपादप्रक्षालना आचान्ता एवेत्यन्ये। न च कर्मान्ते हस्तपादान्प्रक्षाल्यान्तरेण चात्वालोत्करौ देवयजनमभिप्रपद्यन्त इति हस्तपादा-न्प्रक्षाल्याऽऽग्नीध्रे यजमानमुपसंगच्छन्त इति कल्पसूत्रे च हस्तपादप्रक्षालनमात्रेणैव कर्माधिकारस्योक्तत्वेन स्नानं विनैवाधिकारो नित्यं स्नानं तु स्वकाले भवत्येवेति वाच्यम्। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्वित्यनेन याज्ञवल्क्यवचनेन सूत्रोक्तस्यापि पक्षस्य बाधात्। तथा च स्नात्वा कर्माणि कुर्वीतेति स्मृतौ स्नातस्यैव कर्मकरणेऽधिकारस्योक्तेः सामान्यशास्त्रमनुसृत्यैव स्नातैरेव कर्म कर्तव्यमित्येव युक्तं परं तु अमन्त्रकमिदं स्नान-मिति द्रष्टव्यम्। संध्योपास्तिस्तु मध्य एव स्वकाले।

प्रजापतिर्मनसाऽन्धोऽच्छेत इति त्रयस्त्रिंशतं यज्ञतनूराग्नीध्रे जुहोति।

स्मार्तावृताऽऽज्यं संस्कृत्य तेन होमो दर्विहोमधर्मेण। प्रजापतिर्मनसेत्यादयस्त्रय-स्त्रिंशन्मन्त्रा यज्ञतनूसंज्ञकास्तैः साध्यास्त्रयस्त्रिंशत्संख्याका आहुतीर्जुहोतीत्यर्थः। तत्र प्रथमा चतुष्पदा। त्रयोदशी त्रिंशी च त्रिपदा। इतरा द्विपदाः। विंशत्याद्याः सदैकत्व इति कोशादेकवचनम्।

विशेषमत्राऽऽह—

पूर्वां पूर्वामनुद्रुत्योत्तरयोत्तरयैकया नु प्रथमया।

प्रजापतिर्मनसाऽन्धोऽच्छेत इति पूर्वा यज्ञतनूः। धाता दीक्षायामित्युत्तरा यज्ञतनूः। तत्र प्रजापतिर्मनसाऽन्धोऽच्छेत इति पूर्वां यज्ञतनूमनुद्रुत्य संयोज्य धाता दीक्षायामि-त्युत्तरया यज्ञतन्वा जुहोतीत्यर्थः। एवं धाता दीक्षायामिति द्वितीयां यज्ञतनूं संयोज्य सविता भृत्यामिति तृतीयया यज्ञतन्वा। सविता भृत्यामिति तृतीयां यज्ञतनूं संयोज्य पूषा सोमक्रयण्यामिति चतुर्थ्या यज्ञतन्वेत्यादित्रयस्त्रिंशयज्ञतनूपर्यन्तम्। एतदर्थमे-वोभयत्र वीप्सा। संहितारूपमेवैतद्योजनम्। आहुतिषु त्रयस्त्रिंशत्त्वसिद्ध्यर्थमुपायमाह— एकया नु प्रथमयेति। नुरवधारणे। त्रयस्त्रिंश्याहुतिस्तु एकयैव प्रथमयेति। एकयेति वचनमन्तिमां यज्ञतनूमनुद्रुत्य प्रथमया यज्ञतन्वा जुहोतीत्येवं स्यात्, अन्तिमापेक्षया प्रथमाया अनन्तरत्वेनोत्तरत्वात्तत्पूर्वत्वेनान्तिमायाः पूर्वत्वात्, पूर्वां पूर्वामनुद्रुत्योत्तर-योत्तरयेति सूत्रात्, अथवाऽन्ताल्लोपो विवृद्धिर्वेति न्यायेनानुद्रवणविशिष्टयाऽन्तिमया यज्ञतन्वेति स्यात्तन्मा भूदित्येतदर्थम्। एकशब्दः केवलवाची। प्रथमयेति वचनं तेनैव न्यायेन केवलाया अन्तिमायाः प्राप्ताया निवारणार्थम्। जुहोतिचोदितत्वात्स्वाहाकारः। यत्र मन्त्रगणेनेति परिभाषया प्रतिमन्त्रम्।

---

१ इ. ज. झ. ञ. ढ. °रयै°।

यज्ञार्तिं प्रति जुहोतीत्येकेषाम् ।

यज्ञस्याऽऽर्तिर्यज्ञार्तिस्तां यज्ञार्तिम् । आर्तिर्विनाशो भ्रेष इति यावत् । अनेन नैमित्तिकत्वमप्येतस्य होमस्य केषांचिदाचार्याणां मते भवति। यज्ञार्तिमित्यत्र कर्मप्रवचनीयसंज्ञा । तेन प्रतियज्ञार्तिं अयं होम इति सिद्धं भवति ननु रात्रिसंबन्धितृतीयभागाधिकरणकबोधनाभावरूपयज्ञार्तिनिमित्तक एवायं होम इति । एतद्रूपयज्ञार्तिनिमित्तके होमे प्राप्ते प्रायश्चित्तस्य संधानार्थत्वेन प्रबलत्वादादौ प्रायश्चित्तार्थं कृत्वाऽनन्तरं नित्यः कर्तव्य इति सोमतन्त्र एव यत्किंचिद्यज्ञविभ्रेषेऽनादिष्ट इदं प्रायश्चित्तं होतव्यं नतु पाशुकैष्टिकतन्त्रयोः । उत्तरसूत्रे सवनीयस्य तन्त्रं प्रक्रमयतीत्येतावतैव पाशुकतन्त्रमेतदितिज्ञानसिद्धौ पशुशब्दोपादानं यज्ञतनूहोमः सोमतन्त्रसंबन्ध्येव तत्रानादेशेऽयमेव होम इति । दोषनिर्हरणे सामर्थ्यातिशयात्सर्वप्रायश्चित्तमपि होतव्यम् । एकेषामितिवचनात्प्रायश्चित्तात्मकत्वं पाक्षिकमिति गम्यते ।

सवनीयस्य पशोस्तन्त्रं प्रक्रमयति ।

सवने सौत्येऽहनि भवः पशुः सवनीयस्तस्य पशोस्तन्त्रं कर्मकलापं प्रक्रमयति आरभत इत्यर्थः ।

तस्य निरूढपशुबन्धेन कल्पो व्याख्यातः ।

तस्य सवनीयस्य । अन्यदग्नीषोमीये कृतव्याख्यानम् । षड्ढोतृपशिष्टी न स्तः । अङ्गभूतत्वात्पशोः । अग्निप्रणयनान्तं कर्म कृतत्वाल्लुप्यते । सवनीये पशौ नाग्न्यन्वाधानं विद्यत इति निषेधादन्वाधानाभावः । प्रायणीयाप्रभृतिष्वित्यनेन व्रतोपायनाद्यभावः ।

न बर्हिर्विद्यते प्रस्तरमेवाऽऽहरति बर्हिषः कल्पेन ।

बर्हिः पाशुकं बर्हिः । उत्करबर्हिस्तु विद्यत एव । ननु प्रस्तरमेवाऽऽहरति बर्हिषः कल्पेनेत्येवकारेणैव बर्हिर्व्यवच्छेदो भवति किमर्थमयं निषेधो न बर्हिर्विद्यत इति चेन्न । बर्हिषः कल्पेन प्रस्तरमेवाऽऽहरतीत्येतावत्येवोच्यमाने बर्हिर्व्यवच्छेदो न भविष्यति किंतु बर्हिषः कल्पस्यैव बर्हिराहरणे व्यवच्छेदो भविष्यति । तथा च तूष्णीमाहरणं स्यात्तदा तद्व्यावर्तयितुं निषेधस्याऽऽवश्यकत्वात् । न बर्हिर्विद्यत इत्येतावत्येवोच्यमाने प्रस्तरस्यापि बर्हिष्ट्वान्निवृत्तिः स्यात्तद्व्यावृत्त्यर्थं प्रस्तरमेवाऽऽहरतीतिवचनम् । प्रस्तरमाहरत्येवेत्येवकारस्याऽऽहरतीत्येतदनन्तरमन्वयः । तथा चैवमर्थो भवति बर्हिषः कल्पेनाऽऽहरत्येव न तु संनहनमपीति । एवंरीत्यैवैवकारः सार्थको भवति तेन संनहनं यदाऽऽपस्तम्बेनेध्माबर्हिः संनह्यति न वा बर्हिः प्रस्तरमेवेति सूत्रेण संनह्यतीति व्याख्यातृप्रदर्शितशेषेण प्रापितं व्यावर्त्यते । उत्करबर्हिरर्थमेव शुल्बकरणं न प्रस्तरार्थम् । उत्करबर्हिरर्थं शुल्बकरणादि स ते मा स्थादित्यन्तं करोति । सुसंभृता त्वा संभरामीति

नास्ति शुल्बस्यैवाभावात् । अलुभितो योनिरित्येतदपि नास्ति अनन्तरोक्तहेतोः । उत्कर-बर्हिःसंभरणेऽलुभितो योनिरित्येतदेव । आपस्त्वामितीन्द्रस्य त्वेत्येतद्वयं प्रस्तरस्याऽऽदौ कृत्वोत्करबर्हिषः करोति । बृहस्पतेर्मूर्ध्ना हरामीत्यादिनिधानान्तमुभयोः सहैव । उर्वन्तरिक्षं प्रेहीत्यस्मिन्मन्त्रे तु नोहः । गमनाक्रियाया आत्मन्येव संबन्धेन बर्हिःसंबन्धासंभवात् । हे आत्मन्नुरु विस्तीर्णमन्तरिक्षमिव बर्हिष्प्रतिच्छेदनार्थं गतस्ततः परावृत्य प्रेहि विहारदेशं प्रति प्रकर्षेण गच्छेत्येतादृशो ह्यात्मसंबन्धः । नच बर्हिष एवात्र संबन्धोऽस्तु किं बाधकमिति वाच्यम् । पूर्वस्मिन्नेतादृश एव मन्त्रे व्यभिचाराद्गमनकरणमन्त्रत्वदर्शनाद्गमनकर्तुरेकत्वाच्च । अदित्याः सद आसीदेत्यत्राऽऽसीदतमिति द्विवचनान्त ऊहो भवत्येव । बर्हिरभिधायकत्वात् । एवं देवंगममसि अदित्यास्त्वा पृष्ठे सादयामीत्यनयोरपि देवंगमे स्थः । अदित्या वां पृष्ठे सादयामीति यथायथमूहः । परिभोजनीयाख्यमुष्टिमुलपराज्यर्थमुष्टिं चैतैः सहैवाऽऽहरति प्रकृतिवत्तूष्णीमेव । अग्नीषोमीयविकारपक्ष आश्ववालः प्रस्तर ऐक्षवी तिरश्ची कार्ष्मर्यमयाः परिधयोऽधिकाः पौतुदारवेभ्य इति पशुसूत्रोक्तमाश्ववालप्रस्तरादिकं सर्वमस्त्येव । बर्हिस्तु नैव । न बर्हिर्विद्यत इति निषेधस्यात्रापि प्रवृत्तौ बाधकाभावात् ।

पात्रसꣳसादनकाले प्रचरणीं प्रथमा४ स्रुचं प्रयुनक्ति ।

पात्रसंसादनकाल इत्यनेन परिस्तरणपाणिप्रक्षालनोलपराजीस्तरणब्रह्मयजमानसदनकरणानि सूच्यन्ते । अथवा पात्रसंसादनकाल इत्यस्य पात्रसंसादनदेश इत्यर्थः । तथा च पात्रसंसादनदेशे प्रचरण्याः प्रयोग इति अर्थो भवति । दृष्टं च कालशब्दस्य देशपरत्वं बौधायनसूत्रे स उपरवाणां काल इत्यादौ । स च प्रचरण्याः सौमिकत्वाच्छालामुखीयोत्तरतःसंलग्नदेश एव । ननु सर्वैष्टिकपाशुकपात्रसंसादनदेशो यः स एव प्रचरण्याः सौमिक्या अपि तथा च कथं देशभेद इति चेत्सत्यम् । शालामुखीयं गार्हपत्यकर्मभ्योऽन्ववस्यन्ति तस्मिन्गार्हपत्यकर्माणि क्रियन्त इति वचनात्प्रचरण्याः सोमकर्मसंबन्धिपात्रत्वेन शालामुखीयोत्तरतःसंलग्नदेश एव स्वतन्त्रतयैव प्रचरण्याः प्रयोगो न तु क्रमप्राप्ते स्थाने द्वंद्वत्वधर्मेणैतेनैवरीत्या देशभेदसंभवात् । वेदस्तु महावेद्यर्थं कृतो यः स एव शालामुखीयस्योत्तरतो दर्भान्संस्तीर्य यथार्थं पाशुकानि पात्राणि प्रयुनक्ति । तत्र प्रचरणीं स्रुचमधिकां प्रयुनक्ति । सा च जुह्वादिभ्यः स्रुग्भ्यः प्रथमा भवति । आगन्तूनामन्ते निवेश इति न्यायेन प्राकृतस्रुक्प्रयोगानन्तरं सर्वपात्रप्रयोगान-

---

१ ख. ग. °स्ति बर्हिषोऽभा° । २ ख. ग. °तलुप्यते प्रस्तरसंभरण उत्तानिधनादिकरणकनिधानाभावात् । उत्करबर्हिःसंभरणे तु अलुभितो योनिरित्येतदेव लुप्यते प्रस्तराभावात् । आ° । ३ ख. ग. प्रेतमित्यत्रोहं केचित्कुर्वन्ति । तन्न । ग° । ४ ख. ग. तु कर्मप्रा° ।

न्तरं वैतस्याः प्रयोगः स्यात्तं वारयितुं प्रथमामितिवचनम् । प्रथममिति परित्यज्य प्रथमामित्येवं वचनं स्रुग्भ्य एव प्राथम्यं स्यान्नतु सर्वपात्रेभ्यः प्राथम्यमित्येतादृशार्थं बोधयितुम् । स्रुग्ग्रहणं वसाहोमहवनीवज्जुहूरेवेयं नतु केवलं जुहूकार्यकारित्वमात्रमितिज्ञापनार्थम् । तेन सुत्याहनि जुह्वां व्यापृतायां पशुबन्धे वसाहोमहवनीवत्प्रचरण्येव भवति । तथा च भरद्वाजः—प्रचरण्या सोम इति । व्यापृतायां जुह्वामियं होमकार्येषु भवतीति । अत एव पालाशीयम् । अनयोर्भेदे किं फलमिति चेत् । जुहूकार्यकारिपात्राणां विशेषवचनाभावे वैकङ्कतत्वं जुहूरूपपात्राणां पालाशत्वमिति । यदि जुहूकार्यकारिणामपि पात्राणां जुहूरूपता स्यात्तदा वैकङ्कतत्वविधायकपरिभाषा निरवकाशत्वेनापार्थिका स्यादिति ज्ञेयम् । वैसर्जनहोमसंबन्धिप्रचरण्यां स्रुग्ग्रहणाभावान्न पालाशत्वं किंतु परिभाषाप्राप्तवैकङ्कतत्वमेव । दण्डयूपौ न प्रयुनक्ति प्रयुक्तत्वात् । यूपशकलमपि न प्रयुनक्ति प्रयोजनाभावात् ।

आज्यग्रहणकाले प्रचरण्यां चतुर्गृहीतं गृहीत्वोत्तरासु गृह्णाति ।

आज्यग्रहणकाल इत्यनेन पवित्रकरणादिकमाज्योत्पवनान्तं पाशुकं कर्म सूच्यते । न ब्रह्मवरणं वाचस्पत इत्याद्येव ब्रह्मणः संमार्जनकाले प्रचरणीमादौ तूष्णीमेव जुहूवत्संमृज्य जुह्वादिस्रुचः संमार्ष्टि । प्रचरण्या जुहूत्वेऽपि अवषट्कारसंबन्धित्वात्तूष्णीं संमार्गो वसाहोमहवन्या इव । उपभृद्ध्रुवयोस्तु पृथङ्मन्त्रसत्त्वात्समन्त्रकः संमार्गः । प्रयोग आज्यग्रहणे च प्राथम्यात्प्रत्याहारन्याये[न]तन्मध्यपतितसंमार्गेऽपि प्राथम्यम् । प्रचरण्यां चतुर्गृहीतमपूर्वहोमार्थत्वात्तूष्णीमेवाऽऽदौ गृहीत्वोत्तरासु जुह्वादिषु पशुवद्गृह्णातीत्यर्थः । प्रचरण्याः प्रथमत्वात्तामपेक्ष्योत्तरत्वं जुह्वादीनाम् । स्पयस्य वर्त्मन्येवाऽऽज्यग्रहणं विशेषवचनाभावात् । आग्नीध्रे वा । अथैकेषां प्राग्वंशेऽग्नीषोमीयस्याऽऽज्यानि गृह्णात्याग्नीध्रे सवनीयस्योत्तरवेद्यामनुबन्ध्याया इति आपस्तम्बसूत्रात् । उत्तरवेदिसमीपे वा । अपरेणोत्तरवेदिं सवनीयस्यानूबन्ध्यायाश्चाऽऽज्यानि गृह्णातीत्येक इति तेनैव विकल्पेनाभिधानात् । एतत्पक्षान्तरसत्त्वं सूचयितुमेव वाऽऽज्यग्रहणकाल इति वचनम् । अस्मिन्कल्पे कालशब्दो देशपरो ज्ञेयः ।

प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्येध्मं वेदिं प्रस्तरं च प्रोक्ष्य प्रोक्षण्यवशेषं निनीय पवित्रे अपिसृज्य प्रस्तरं सादयित्वा स्रुचः सादयति ।

उक्तेतरपरिसंख्यार्थमनुक्रमणम् । आमन्त्रणेन प्रसवोऽप्युपलक्ष्यते[1] । अन्यथाऽऽमन्त्रणस्यैव निरर्थकत्वापत्तेः । इध्मं वेदिं प्रस्तरं च प्रोक्ष्य प्रोक्षण्यवशेषं निनीयेत्यनेन

१ ख. °लभ्यते ।

क्रमेणान्तर्वेदि पुरोग्रन्थीत्यादेः प्रत्युक्षणान्तस्य निवृत्तिः क्रियते । प्रोक्षण्यवशेषं निनीय पवित्रे अपिसृज्येत्यनेन क्रमेण विष्णोः स्तूपोऽसीति पुरस्तात्प्रस्तरग्रहणं व्यावर्त्यते । ग्रन्थिविस्रंसनं तु भवत्येव । तद्विना पवित्रापिसर्जनासंभवात् । अत एव तदनुगुणत्वान्न व्यवधायकं भवति । पवित्रे अपिसृज्य प्रस्तरꣳ सादयित्वेत्यनेन क्रमेण ब्रह्मणे प्रस्तरप्रदानं तृणैरन्तर्धानं शुल्बस्तरणमनूयाजार्थोल्मुकोद्दूहनमाहवनीयकल्पमाघारसमिधोरभ्याधानं विधृत्योरासादनं च व्यावर्त्यते । स्तीर्णेन बर्हिषाऽन्तरितत्वादेव तृणैरन्तर्धानाभावः । शुल्बस्तरणमपि न । तस्य बर्हिरास्तरणाङ्गत्वेन तदभावादेव तदभावसिद्धेः । शुल्बस्य प्रतिपत्तिस्तु प्रस्तरेण सह सादनमात्रमेवेति । अनूयाजार्थोल्मुकोद्दूहनाहवनीयकल्पनयोः सर्वथैव व्यावृत्तिर्न किंतु अस्मिन्काले व्यावृत्तिः । तेनाऽऽज्याभिमन्त्रणोत्तरमेते कर्तव्ये एव । अत्र कर्तव्यतायां क्रमो बाधितः स्यात् । नच लोप एवानयोरस्त्विति वाच्यम् । अलोपेन निर्वाहे सर्वथा तस्यानुचितत्वात् । आघारसमिधोरभ्याधानमप्याज्याभिमन्त्रणोत्तरमेव । प्रस्तरस्य प्रदानाभावादेव प्रत्यादानाभावः । अथवाऽग्नीषोमीयपश्वर्थानूयाजार्थोल्मुकयोरेकशेषौ प्रज्ञातौ स्थापयितव्यौ तयोः सवनीयपश्वर्थानूयाजाः कर्तव्या इति । आहवनीयकल्पनस्यापि तत्सहचारित्वादेव निवृत्तिः । एवमग्नीषोमीयपश्वर्थाघारसमिधावेव प्रज्ञाते तथैव स्थापनीये । अस्मिन्कल्प इध्मे ततस्त्वामष्टादशधा संभरामि सुसंभृता, एकाꣳ समिधं यज्ञायुरनुसंचराम्, धृष्टिꣳ संभरामि सुसंभृतेत्यूहः । विधृत्योरासादनं तु लुप्यत एव । पवित्रे अपिसृज्य प्रस्तरसादनादि प्रतिपद्यत इत्येतावतैव सिद्धे प्रस्तरꣳ सादयित्वा स्रुचः सादयतीतिगुरुसूत्रकरणादेवमत्र ज्ञायते प्रस्तर एव सर्वासां स्रुचामत्र सादनमिति । अत्राऽऽस्तरणरूपमेवाऽऽसादनमित्यर्थतः सिद्धं भवति । स्रुचः सादयतीति अनुवाद एव । तेन स्रुवस्वधितिमाज्यस्थालीपृषदाज्यस्थालीस्रुगभिमन्त्रणाज्याभिमन्त्रणानि भवन्त्येव । अग्नीषोमीयविकारपक्षे बर्हिर्वर्जं सर्वं यथाप्रकृत्येव । परिधयोऽप्यस्मिन्पक्षे भवन्ति विधृती च ।

अयं नो अग्निर्वरिवः कृणोत्वित्याग्नीध्रमभिमृशति ।

यजमानेनायं यज्ञ इत्यनेन मन्त्रेण पञ्चहोत्रा चाऽऽज्याभिमर्शे कृत आग्नीध्रमाग्नीध्रमण्डपमभिमृशति । मण्डपशब्दो जनाश्रये वर्तते । मण्डपोऽस्त्री जनाश्रय इति कोशात् । तत्र जनाश्रयत्वं स्तम्भचतुष्टयोपरिदत्तवंशोपरिष्टाद्दत्ताच्छादनसंबद्धभूमावेव वर्तते नतु केवल आच्छादने केवलभूमौ च । आग्नीध्र उपविश्य हविर्धान उपविश्य सदस्युपविश्येत्यादौ विशिष्ट एव शक्तिग्रहात् । भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हतीतिन्यायसिद्धोऽभिमर्शात्मकः संस्कारो यद्यप्याच्छादनतद्विशिष्टभूम्योरविशिष्टो भूतभाव्युपयोगस्य तुल्यत्वात्तथाऽपि भूमेः साक्षादुपयोगात्तस्या एवाभिमर्शः । उभयोरेकदा स्पर्शासंभवेन विशेषणांशे बाधात् । नागृहीतविशेषणान्यायेन विशेष्यांश एव

पर्यवसानम् । केवलाच्छादनेऽपि यद्यप्युपवेशनं संभवति तथाऽपि तस्य कर्मण्ययोग्यत्वान्मण्डपशब्देन न ग्रहणम् । यद्यपि आग्नीध्रं प्रविश्य हविर्धानं प्रविश्य सदः प्रविश्येत्यत्र प्रवेशकरणत्वमवकाशस्यापि तथाऽपि अवकाश उपवेशनासंभवान्न मण्डपशब्देन ग्रहणम् । न च योगधारणबलेन तदपि संभवतीति वाच्यम् । तथा सत्यपि तस्य कर्मानुपयुक्तत्वेन प्रकृते ग्रहणायोगात् । एकदेशाभिमर्शेन सर्वोऽपि मण्डपोऽभिमृष्टो भवति । अभिमर्शमन्त्रपाठयोः समानकालिकता सर्वत्र । वाजसाताविल्यन्तो मन्त्रः ।

इदं विष्णुर्विचक्रम इति हविर्धाने ।

अभिमृशतीत्यनुवर्तते । द्रव्यपृथक्त्वान्मन्त्रावृत्तिः । पांसुर इत्यन्तो मन्त्रः । हविर्धानमिति पाठे मण्डपस्यैकत्वात्सकृदेव मन्त्रः ।

अग्न आयूꣳषि पवस इति स्रुचः ।

सर्वासां स्रुचां मध्ये यावतीनां स्रुचां सकृत्प्रयत्नेनाभिमर्शः संभवति तावतीषु सकृन्मन्त्रः । अन्यथा मन्त्रावृत्तिः । स्रुच इति द्रव्यैकत्वात्सकृन्मन्त्रो वा क्रमेणाभिमर्शः । प्रचरण्या अप्यभिमर्शः । गृहीताज्यत्वात् । वसाहोमहवन्या नाभिमर्शः । अगृहीताज्यत्वात् । दुच्छुनामित्यन्तो मन्त्रः ।

आवायो भूषेति वायव्यानि ।

सर्वेषां वायव्यानां मध्ये यावतां वायव्यानां सकृत्प्रयत्नेनाभिमर्शः संभवति तावत्सु सकृदेव मन्त्रः । अन्यथा मन्त्रावृत्तिः । वायव्यानीति द्रव्यैकत्वात्सकृन्मन्त्रो वा क्रमेणाभिमर्शः । वायव्यानि ऊर्ध्वपात्राणि । वायव्यानीति वचनान्न चमसानभिमृशति । यद्वायव्यं वा चमसं वेतिपृथग्वचनाल्लिङ्गात् । स्थालीस्त्वभिमृशत्येव । काश्यतस्तः स्थालीर्वायव्याः सोमग्रहणीरिति लिङ्गात् । पूर्वपेयमिति मन्त्रान्तः ।

उच्चिष्ठन्नोजसा सहेति सदः ।

अत्रापि पूर्ववद्भूमिपर एव सदःशब्दः । हविर्धानमिति पाठे हविर्धानशब्दोऽपि भूमिपर एव । सुतमिति मन्त्रान्तः ।

खरे पात्राणि प्रयुनक्ति ।

पूर्वकृते खरे । पात्राणि वक्ष्यमाणानि । प्रक्षाल्येति सूत्रान्तरे । अपूर्वत्वाद्वचनाभावाच्च न त्र्यविलत्वम् । सामान्यप्रतिज्ञेयम् ।

अग्निर्देवता गायत्री छन्द इत्येतैर्यथारूपं

कस्त्वा युनक्ति स त्वा युनक्त्वित्यवशिष्टानि ।

यथारूपं यथालिङ्गम् । उपांश्वन्तर्यामयोरैन्द्रवायवमैत्रावरुणाश्विनानां शुक्रामन्थि-

नोराग्रयणस्योक्थ्यस्य ध्रुवस्य च क्रमेणैतैर्दशभिर्मन्त्रैर्यथालिङ्गं प्रयोग इत्यर्थः । अस्य-न्ता मन्त्राः सर्वे । अवशिष्टानि ऋतुपात्रादीनि तेषां कस्त्वेत्ययं मन्त्रः ।

तत्र सर्वपात्रप्रयोगक्रममाह—

दक्षिणेऽक्ष उपाꣳश्वन्तर्यामयोः पा-
त्रे दक्षिणमुपाꣳशोरुत्तरमन्तर्यामस्य ।

उपाꣳशुश्चान्तर्यामश्चोपाꣳश्वन्तर्यामौ । तयोरुपाꣳश्वन्तर्यामयोः, उपांश्वन्तर्या-मसंज्ञयोर्ग्रहयोः । दक्षिण उपाꣳशोरुत्तरेऽन्तर्यामस्येत्येवं वचनं परित्यज्य दक्षिणमुत्तर-मित्येवं वचनं पूर्वमेव चिह्नकरणार्थम् । दक्षिणमुपांशोरुत्तरमन्तर्यामस्येत्यनेन प्राक्सं-स्थता व्यावर्त्यते ।

अपि वा पूर्वमुपाꣳशोरपरमन्तर्यामस्य ।

पूर्वं पूर्वदिग्गतम् । अपरमपरदिग्गतम् । तेन प्रत्यक्संस्थता भवति । अग्निर्देवता गायत्री छन्दः सोमो देवता त्रिष्टुप्छन्द इति क्रमेण द्वयोर्मन्त्रौ ।

ते अन्तरेण व्यानाय त्वेत्युपाꣳशुसवनं ग्रावा-
णꣳ सꣳस्पृष्टमुपाꣳशुपात्रेण प्रयुनक्ति ।

ते इत्यत्र द्वितीयाऽन्तरान्तरेणयुक्त इति सूत्रेण । ते उपांश्वन्तर्यामयोः पात्रे अन्तरेण तयोः पात्रयोर्मध्य इत्यर्थः । उपांशुरुपांशुग्रहार्थः सोमः सूयते कण्ड्यते येन स उपांशुसवनस्तं ग्रावाणमुपांशुपात्रेण संस्पृष्टं प्रयुनक्ति व्यानाय त्वेत्यनेन मन्त्रेण । उपांशुसवन इति पृथगन्वर्थसंज्ञाकरणाद्भिन्न एवायं ग्रावा । अत एवोपरें ग्राव्णः संमुखान्कृत्वा प्रोक्षतीत्यत्र नैतस्य प्रोक्षणम् । उपांशुसवनत्वादेवोपांशुपा-त्रमात्रसंस्पृष्टता नान्तर्यामपात्रसंस्पृष्टता । पात्रयोः प्रत्यक्संस्थत्वेऽपि उत्तराग्र एवो-पांशुसवनः । तथा चाऽऽपस्तम्बः—बृहन्नसीति ते अन्तरेण ग्रावाणमुपांशुसवनं दक्षि-णामुखꣳ सꣳस्पृष्टं पात्राभ्यामिति । उपांशुपात्रेण संस्पृष्टमित्येकेनैव पात्रेण सह संस्प-र्शस्य विधानात्पात्रद्वयसंस्पर्श आपस्तम्बोक्तो निवारितो भवति । अग्रकल्पना तु पूर्व-वदेव द्रष्टव्या ।

प्रत्यञ्चि द्विदेवत्यपात्राणि परिस्रगैन्द्रवाय-
वस्याऽऽजगावन्मैत्रावरुणस्य द्विस्रक्त्याश्विनस्य ।

प्रत्यञ्चि प्रत्यक्संस्थानि । पात्रयोरुदक्संस्थत्व उपांशुसवनमपरेण पात्रयोः प्राक्सं-स्थत्वेऽन्तर्यामपात्रमपरेण पात्रयोरुदक्संस्थत्वेऽन्तर्यामपात्रोत्तरत आरभ्य पात्रयोः प्राक्संस्थत्व उपांशुसवनोत्तरत आरभ्य प्रत्यञ्चि द्विदेवत्यपात्राणि प्रयुनक्तीत्यर्थः । अनि-यमं स्थानस्य दर्शयितुमेव वक्ष्यमाणर्तुपात्रप्रयोगवदपरशब्दो नोपात्तः । युक्तं चैतदपरश-

ब्दानुपादानम् । अन्यथा पात्रयोः प्रत्यक्संस्थत्वपक्ष उपांशुसवनसंलग्नापरभागे द्विदेवत्य-पात्रप्रयोगस्यान्तर्यामपात्रकृतव्यवधानेनासंभवात्तत्र बाधितं स्यादिति द्रष्टव्यम् । परितः स्रक्, यस्य तत्परिस्रक् । स्रक्शब्देन रास्नोच्यते । ऊर्ध्वपात्रबिलाधःप्रदेशे परितो रास्नावदित्यर्थः । आजगावत्, आजग(गा?)शब्दोऽजागलस्तने याज्ञिकैः संकेतितः । तौ चाजागल्ले द्वौ वर्तेते । तद्वदत्रापि द्वाविव वायस्य स्त इत्याजगावत् । तौ च पात्रबिलाधःप्रदेश कर्तव्यौ । मतौ बह्वचोऽनजिरादीनामित्यनेन दीर्घः । द्वे स्रक्ती कोणौ यस्य तद्द्विस्रक्ति । ऐन्द्रवायवस्यैन्द्रवायवग्रहस्य पात्रं परिस्रग्भवति । मैत्रावरुणस्य मैत्रावरुणग्रहस्य पात्रमाजगावद्भवति । आश्विनस्याऽऽश्विनग्रहस्य पात्रं द्विस्रक्ति भवतीत्यर्थः । द्विःस्रक्तीति सविसर्गपाठोऽपपाठ एव । इन्द्रो देवता जगती छन्दः, बृहस्पतिर्देवताऽनुष्टुप्छन्दः, अश्विनौ देवता पङ्क्तिश्छन्द इति क्रमेण त्रयाणां मन्त्राः ।

अपरे शुक्रामन्थिनोः पात्रे दक्षिणं
बैल्वꣳ शुक्रस्योत्तरं वैकङ्कतं मन्थिनः ।

आश्विनपात्रादपरेऽपरस्मिन्प्रदेशे शुक्रग्रहमन्थिग्रहयोः पात्रे प्रयुनक्तीत्यर्थः । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायादव्यवहितस्याऽऽश्विनस्यापरः प्रदेशो ग्राह्यः । दक्षिणं बैल्वमित्यादिना प्राक्संस्थताव्यावृत्तिः । दक्षिण उत्तर इत्येवं वक्तव्ये दक्षिणमुत्तरमित्येवं वचनं पूर्वमेव चिह्नकरणार्थम् । बैल्वं बिल्वविकारभूतं वैकङ्कतं विकङ्कतविकारभूतम् । प्रबाहुगित्यापस्तम्बः । सम इति तदर्थः । ननु मन्थिपात्रस्य वैकङ्कतत्वे परिभाषयैव सेत्स्यति सत्यत्र वैकङ्कतवचनं व्यर्थं दक्षिणं बैल्वꣳ शुक्रस्योत्तरं मन्थिन इत्येतावत्युच्यमाने बैल्वानुवृत्तिः स्यात्तां वारयितुं वैकङ्कतवचनमावश्यकमिति चेत्तदाऽपरे शुक्रामन्थिनोः पात्रे दक्षिणं शुक्रस्योत्तरं मन्थिनो बैल्वमाद्यमित्येवं सूत्रं कर्तव्यमेवं च बिल्वप्राप्तिं वारयितुं विकङ्कतग्रहणं न कर्तव्यं भवति वर्णद्वयन्यूनताप्रयुक्तं लाघवं च सिद्ध्यतीति किमर्थं बैल्वमाद्यमिति परित्यक्तं वैकङ्कतपदग्रहणं चोपात्तमिति चेन्न । एतादृशगुरुसूत्रकरणस्य यान्यनादिष्टवृक्षाणि विकङ्कतस्य तानीतिपारिभाषासिद्धाया विकङ्कतप्राप्तेर्मन्थ्यतिरिक्तपात्रेष्वनित्यताज्ञापनार्थं तदुपादानात् । तदुक्तमापस्तम्बेन—तेषां यान्यनादिष्टवृक्षाणि वैकङ्कतानि स्युर्यो वा यज्ञियो वृक्षः फलग्रहिरिति । सूर्यो देवता बृहती छन्दः, चन्द्रमा देवता सतोबृहती छन्द इति क्रमेण द्वयोर्मन्त्रौ ।

अपरे आश्वत्थे अश्वशफबुध्ने उभयतोमुखे
ऋतुपात्रे दक्षिणमध्वर्योरुत्तरं प्रतिप्रस्थातुः ।

अपरे मन्थिनोऽपरप्रदेशे आश्वत्थे अश्वत्थविकारभूते अश्वशफाविव बुध्ने मूले ययोः, अश्वशफबुध्ने इव बुध्ने ययोरिति वा । मुखमासेचनरूपा प्रणाली । बिलाद्बहिर्येन होम-

भक्षणार्थमवनीयते सोमस्तदनयोरुमदतो भवति आर्जवेनेत्यर्थः । अत एव वचनात्पात्रान्तराण्यप्येकतोमुखानि भवन्तीति गम्यते । दक्षिणमध्वर्योरुत्तरं प्रतिप्रस्थातुरित्यनेन प्राक्संस्थता व्यावर्त्यते । गुरुसूत्रकरणप्रयोजनं पूर्ववत् । अत्रापि प्रबाहुगित्यापस्तम्बः । कस्त्वेति मन्त्रोऽत्र । द्रव्यपृथक्त्वादावर्तते मन्त्रः ।

दक्षिणस्यां श्रोण्यामाग्रयणस्थालीम् ।

खरस्य दक्षिणस्यां श्रोण्यामाग्रयणस्थालीं, विश्वे देवा देवतोष्णिहा छन्द इति । प्रायः स्थाल्यो मृन्मय्यः प्रयोज्याः ।

उत्तरस्यामुक्थ्यस्थालीमुक्थ्यपात्रं चाश्वशफबुध्नम् ।

खरस्योत्तरस्यां श्रोण्यामुक्थ्यस्थालीमिन्द्रो देवता ककुच्छन्द इति प्रयुज्यैतेनैव मन्त्रेण तदुत्तरत उक्थ्यपात्रं प्रयुनक्ति ।

ते अन्तरेणोदञ्चि त्रीण्यतिग्राह्यपात्राणि ।

ते स्थाल्यावाग्रयणोक्थ्यसंबन्धिन्यौ । न च तच्छब्देन परामर्शः पात्रत्वसाजात्यमादायोक्थ्यस्थाल्युक्थ्यपात्रयोरेव तथा च तयोरेव मध्येऽतिग्राह्यपात्राणां प्रयोग इति वाच्यम् । विजातीयपात्रद्वयपरामर्शापेक्षया सजातीयपात्रद्वयपरामर्शस्य युक्तत्वात् । सर्वनाम्नो बुद्धिस्थपरामर्शित्वात् । स्थालीत्वसाजात्यमुक्थ्यपात्रे नास्ति । आकारतः करणतश्च स्थालीतो विजातीयत्वात् । तथा च स्थाल्योरेव मध्येऽतिग्राह्यपात्राणि प्रयोक्तव्यानि नतूक्थ्यस्थाल्युक्थ्यपात्रयोर्मध्य इति सिद्धं भवति । स्पष्टमाहाऽऽपस्तम्बः— स्थाल्यावन्तरेण त्रीण्युदञ्च्यतिग्राह्यपात्राणीति । उदञ्चीति प्राक्संस्थताव्यावृत्त्यर्थम् । उत्तरत्र विनियोगादेव त्रित्वे सेत्स्यति सत्यत्र त्रीणीति वचनं पात्राणां परस्परसंलग्नत्वेन प्रयोग इति ज्ञापयितुं, त्रय एव यदाऽतिग्राह्यास्तदैवोदक्संस्थतया सादनमिति तेन वाजपेये सप्तदशातिग्राह्येषु नास्त्युदक्संस्थतानियम इतिज्ञापनार्थं वा । एतेषां पात्राणामतिग्राह्यसंबन्धिनां स्वल्पकर्मकरणत्वेन विपर्यासासंभवाच्चिह्नप्रयोजनं नातीव । कस्त्वेति मन्त्रावृत्त्या प्रयोगः ।

दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनमादि-
त्यस्थालीमादित्यपात्रं चाश्वशफबुध्नम् ।

अग्रेणोपस्तम्भनमित्यनेनोपस्तम्भनानुरोधेनातिग्राह्यपात्राणां पश्चात्खर एव प्रयोग इति बोध्यते । उपोप्तेऽन्ये ग्रहाः साद्यन्त इति श्रुतेः । एतेनेदमपि ज्ञायते—उपस्तम्भनेन संलग्न एव खरः कर्तव्य इति । आदित्यस्थाल्युत्तरत आदित्यपात्रस्य प्रयोगः । कस्त्वेति मन्त्र आवर्तनीयः, द्रव्यपृथक्त्वात् ।

उत्तरस्य हविर्धानस्याग्रेणोपस्तम्भनमनुपोप्ते ध्रुवस्थालीम् ।

अग्रेणोपस्तम्भनमित्यनेनोपस्तम्भनसंलग्नतयैव ध्रुवस्थाली प्रयोज्येति बोध्यते । पृथिवी देवता विराट्छन्द इति मन्त्रः । औपरवपुरीषकृतखररूपं स्थलमुपोप्तं तद्भिन्न-

मनुपोसम्। अत्रानुपोतवचनमुपोतेऽन्ये ग्रहाः सायन्त इतिश्रुत्युक्तोपोतशब्दार्थः खर एव तत्रैव ध्रुवव्यतिरिक्तानां प्रयोग इतिप्रदर्शनार्थम्।

उत्तरेऽस्त औदुम्बरं चतुःस्रक्ति दधिग्रहपात्रम्।

औदुम्बरमिति विकङ्कतबाधनार्थम्। परिमण्डलत्वबाधनार्थं चतुःस्रक्तीति वचनम्। मुखं त्वत्राप्यस्त्येव। कस्त्वेति मन्त्रः। षोडश्यादिषु क्रतुविशेषेषु तत्तत्संबन्धीनि षोडश्यादीनि पात्राणि यथावकाशं प्रयुनक्ति। आगन्तूनामन्ते निवेश इति न्यायाद्दधिग्रहपात्रान्ते प्रयोगः कस्त्वेति मन्त्रेण। खर एव तस्य प्रयोगः। उपोतेऽन्ये ग्रहा इति श्रुतेः। ध्रुवस्थालया एवानुपोतस्थले प्रयोगवचनेनान्येषामुक्तानामनुक्तानां चोपोत एव प्रयोगस्यार्थत एव सिद्धत्वात्। उपोतशब्दार्थस्तु प्रागुक्त एव।

मध्ये परिप्लवाम्।

मध्ये खरस्य मध्ये। परि सोमरसस्य मध्ये प्लवते तरति नौकेवेति परिप्लवा। सोमरसस्य मध्ये प्लव इवेति परिप्लवा। प्लवशब्दो नौकावाची पुंलिङ्ग एव। पात्रवाचिनष्टाबन्तता सूत्रकृद्वचनसिद्धा। पुंलिङ्गस्य प्लवशब्दस्य नौकावाचित्वं श्रुतौ—प्लवो वा एषोऽग्नेर्यत्संयानीर्यत्संयानीरुपदधाति प्लवमेवैतमग्नय उपदधातीति। परिप्लवाशब्देन सोमरसस्य मध्ये नौकेव तरणार्थं प्रक्षेपः सूचितो भवति। स च पवमानग्रहग्रहणात्प्राक्कर्तव्यः। उक्तं च बौधायनेन—परिप्लुपात्रं प्रास्य द्रप्सानानुमन्त्रयत इति। परिप्लुशब्दः परिप्लवापर्याय एव। खरस्य मध्ये परिप्लवारूपपात्रं कस्त्वेति मन्त्रेण प्रयुनक्तीत्यर्थः। आधाररूपहोमार्थत्वाद्वैकङ्कतं तत्।

यथावकाशमेकादश चमसान्नैयग्रोधान्रौहितकान्वा ॥१॥ रत्नमतोऽत्सरुकान्वा।

अधिकसंख्याया व्यावृत्त्यर्थमेकादशेति सावधारणं द्रष्टव्यम्। तेन धिष्णियवंशाधारणार्थकस्य चमसस्य न प्रयोग इति सिद्धं भवति। अन्यथा द्वादशेति ब्रूयादेव। एकादशेति वचनं सदस्यपक्षे। सदस्याभावे दशैव भवन्ति। यथावकाशमित्यनेन स्थानानियमः प्रदर्श्यते। नैयग्रोधो वटः। रौहीतकः सूक्ष्मपर्णो वटः। यथाऽमरेण—

रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः।
गायत्रीबालतनयः खदिरो दन्तधावनः॥

इत्यनेन करञ्जवाचकत्वमुक्तं तथाऽपि प्रकृते करञ्जस्यायज्ञियवृक्षत्वेनानुपयोगात्।

रोही रौहितकश्चैत्यवटपादपयोः पुमान्।

इति विश्वकोशोक्तं वटवाचित्वमेव प्रकृतोपयोगाद्ग्राह्यम्। नचैवं नैयग्रोधरौहीतकशब्दयोर्वटत्वजात्यवच्छिन्नपदार्थवाचकत्वेनैकार्थकत्वाद्वाशब्दबोधितविकल्पोऽनुपपन्न इति

वाच्यम् । तस्य नैयग्रोधानौदुम्बरान्वेतिसूत्रान्तरोक्तौदुम्बरत्वव्यवच्छेदकैवकारार्थक-स्वस्यैवाङ्गीकारेण विकल्पस्यैवाप्रसरेण तदनुपपत्तेरभावात् । नैयग्रोधग्रहणं करञ्जव्या-वृत्त्यर्थं, रौहीतकग्रहणं केवलनैयग्रोधव्यावृत्त्यर्थम् । एवं च रौहीतकाख्यवटमात्रस्य ग्रहणमिति सिद्धं भवति । एतस्यालाभे प्रसिद्धवटोदुम्बरातिरिक्तं यज्ञियवृक्षमात्रं ग्राह्यं तस्याप्यलाभे तदपीत्यपि सिध्यति । त्सरुर्दण्डस्तद्वन्तस्तद्वहितान्वा । अत्सरुकानित्यत्र स्वार्थे कप्रत्ययः । चम्यतेऽद्यते सोमरसो येषु होत्रादिभिरिति चमसाः । ते चतुरश्रा अर्थसिद्धपरिमाणा इति केचित्सूत्रकाराः । प्रादेशमात्राश्चतुरङ्गुलबिला इति बौधाय-नादयः । तत्रात्सरुमत्तायां पुरुषज्ञातानि लक्षणानि सांकेतिकानि कार्याणि । त्सरुम-त्तायां तु पुरुषज्ञातानि दण्डेषु विशेषलक्षणानि कार्याणीत्यत्र मूलं मानवसूत्रं—दक्षि-णस्यावालम्बदेशे चमसान्नैयग्रोधान्रौहीतकान्वा नानालक्षणांस्त्सरुमत इति । अथैत-द्भाष्यं दक्षिणस्य हविर्धानस्य, अवालम्बो नाम नीडाधोभागस्तत्र दश चमसान्न्यग्रो-धस्येमे नैयग्रोधास्तान्रौहीतकस्येमे रौहीतकास्तान्नानाचमसलक्षणोक्तानि दण्डेषु लक्ष-णानि येषां तान्त्सरुमतः सदण्डान्प्रागग्रानुदक्संस्थान्प्रयुनक्तीत्यर्थः । तथा च कठसू-त्रम्—प्रागग्रान्दश चमसान्सवृन्तानथ इति । वृत(न्तं)मूल(लं)दण्ड इति यावत् । चम-सलक्षणानि मानवसूत्रे कठसूत्रे च—अथातश्चमसलक्षणानि व्याख्यास्यामोऽर्थात्परिमा-णानि पात्राणि भवन्ति त्र्यङ्गुलखाताश्चमसाः त्र्यङ्गुलदण्डाश्चतुरङ्गुलोच्छ्रायाः षडङ्गु-लविस्ताराः प्रादेशमात्राश्च दीर्घत्वेन तेषां दण्डेषु लक्षणानि भवन्ति ।

अरेखश्चमसो होतुरुन्मृष्टो ब्रह्मणः स्मृतः ।
उद्गातुरवमृष्टश्च स्वामिनः पार्श्वमृष्टकः ॥
एकरेखस्तु कर्तव्यः प्रस्तोतुश्चमसो बुधैः ।

द्विरेखो ब्राह्मणाच्छंसिनः प्रोक्तस्त्रिरेखः पोतुरुच्यते (?) ।

अभ्रिं तु कारयेन्नेष्टुराग्नीध्रस्य मयूखवान् ।
अथाजस्य पदं कुर्यादच्छावाकस्य लक्षणम् ॥ इति ।

अरेखो रेखाशून्यो होतुश्चमसो भवतीत्यर्थः । उदूर्ध्वं मृष्टस्तष्टो दण्डोपरिभागोऽ-धिकं तनूकृतश्चमसो ब्रह्मणो भवेदित्यर्थः । अव दण्डाधोभागो मृष्टस्तष्टोऽधिकं तनूकृत उद्गातुश्चमस इत्यर्थः । पार्श्वे दण्डपार्श्वे मृष्टस्तष्टोऽधिकं तनूकृतः स्वामिनो यजमानस्य चमस इत्यर्थः । एका रेखा तिर्यग्दण्डे यस्य स एकरेखः । स प्रस्तोतृचमसः । तिस्रो रेखास्तिर्यग्भूता दण्डोपरि यस्य स त्रिरेखः पोतुरित्यर्थः । नेष्टुश्चमसदण्डेऽभ्रिः काष्ठकुद्दा-लकस्तदाकारं कारयेदित्यर्थः । अभ्रिः स्त्री काष्ठकुद्दाल इत्यभिधानात् । आग्नीध्रचमस-

---

१ ग. प्रशास्तुश्च° । २ ग. प्रशास्तुश्चम° ।

दण्डे मयूखो बुधैः कर्तव्य इत्यर्थः । द्वे रेखे तिर्यग्भूते दण्डोपरि यस्य स द्विरेखो ब्राह्मणाच्छंसिन इत्यर्थः । खकं तीक्ष्णमग्रं कुर्यात्तद्दण्डस्येत्यर्थः । अच्छावाकदण्डेऽजस्य च्छागस्य पदं कुर्यादित्यर्थः । एवं व्याख्यातं तद्भाष्ये । अथवा होतृचमसमारभ्याच्छावाकचमसपर्यन्तमेकैकरेखावृद्ध्या यावद्दशरेखं दण्डेष्वङ्कयेदित्यपि तद्भाष्यकृतोक्तम् । इदानींतनैरभियुक्तैरेवमुक्तानि—

ब्रह्मणश्चतुरश्रः स्याद्धोतुस्तु परिमण्डलः ।
पृथ्वग्रो यजमानस्य त्र्यश्रिरुद्गातुरेव च ॥
प्रशास्तुरवतष्टः स्यादुत्तष्टो ब्रह्मशंसिनः ।
पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद्दक्षिणावृतः ॥
अच्छावाकस्य राम्नावानाग्नीध्रस्य मयूखकः ।
सव्यावृतः सदस्यस्येत्येतच्चमसलक्षणम् ॥ इति ।

चतुरश्रत्वादीनि ब्रह्मादिचमसदण्डानां क्रमेण विशेषणानि । चतुरश्रश्चतुष्कोणः । परिमण्डलो वर्तुलः । पृथु स्थूलमग्रं यस्य स पृथ्वग्रः । त्र्यश्रिस्त्रिकोणः । अवतष्टोऽधस्तष्टः । उत्तष्ट ऊर्ध्वं तष्टः । विशाखी, अग्रभागे शाखाद्वयवान् । दक्षिणावृतो दक्षिणभागे तष्टः । अग्रभागे राम्ना रेखा तद्वान् । मयूखस्तीक्ष्णाग्रः । मयूखशब्दात्स्वार्थे कप्रत्ययः सव्यावृतो वामभागे तष्टः । अत्र मूलं मृग्यम् ।

प्रादेशमात्राण्यूर्ध्वसानूनि मध्ये संनतानि वायव्यानि ।

अनेन वायव्यसंज्ञकपात्राणां स्वरूपं प्रदर्श्यते । प्रादेशमात्राणि प्रादेशप्रमाणानि । अत्र प्रादेशपरिमितदैर्घ्यविशिष्टकाष्ठप्रदेशस्य भागत्रयं कृत्वाऽग्रिमो भाग ऊर्ध्वशब्देनोच्यते । मध्य इत्यनेन मध्यमो भागः । अवशिष्टोऽधोभागोऽर्थतः । तत्र प्रादेशस्य द्वादशाङ्गुलत्वात्तस्य भागत्रयं चतुश्चतुरङ्गुलात्मकं भवति । तत्राग्रिम ऊर्ध्वशब्देनोपात्ते भागे सानु भवति । सानुशब्देनात्र बिलमुच्यते । मध्यमे भागे संनमनम् । अर्थात्तृतीयेऽधस्तने भागे बुध्नाकारः । एवं चोलूखलाकारता प्रदर्शिता भवति । पात्रस्य स्थौल्यं तु दैर्घ्यानुरोधेन । एतादृशलक्षणानि वायव्यानि वायव्यसंज्ञकानि पात्राणि भवन्ति यैर्देवतोद्देशेन सोमरसो गृह्यते । मानवसूत्रे—प्रादेशमात्राणि संलग्नमध्यानि तृतीयेदुखानीति । प्रादेशो द्वादशाङ्गुलः प्रमाणं येषां तानि प्रादेशमात्राणि प्रादेशोच्चानि वर्तुलानि संलग्नं कृशं मध्यं येषां तानि । तृतीयेन भागेनोदुखानि उत्खातानि चतुरङ्गुलबिलानीति भाष्यकृता व्याख्यातम् । कठसूत्रेऽपि वायव्यानि हस्तमात्राणि प्रादेशमात्राणि वा तृतीयखातानीति । स्थालीषु तु स्थालीति पृथग्व्यवहाराद्वायव्यत्वेऽपि नेदं लक्षणम् ।

१ म. स्वकं । २ क. तु दार्व्यानु ।

स्थालीषु वायव्यत्वं तु काश्चतस्रः स्थालीर्वायव्या: सोमग्रहणीरिति श्रुतिलिङ्गात् । दधिग्रहपात्रे चतुःस्रक्तीति विशेषणादन्येषां वायव्यानां परिमण्डल आकारः ।

यथा स्रुगदण्डैवं परिप्लुता ।

अदण्डा दण्डरहिता । दण्डरहितायाः स्रुचो यथा स्वरूपं निष्पद्यते तथा परिप्लुतायाः स्वरूपमित्यर्थः ।

तेषां यान्यनादिष्टवृक्षाणि विकङ्कतस्य तान्यहोमार्थानि तु वारणस्य ।

तेषां पात्राणां मध्ये यानि अनादिष्टवृक्षाणि, नाऽऽदिष्टोऽनादिष्टः । अनादिष्टो वृक्षो येषां तानि अनादिष्टवृक्षाणि । पात्राणीति शेषः । अनादिष्टवृक्षाणि पात्राणि विकङ्कतस्य भवन्तीत्यन्वयः । उत्तरत्राहोमार्थानीतिवचनाद्धोमार्थान्यनादिष्टवृक्षाणि विकङ्कतस्य भवन्तीति गम्यते । तुशब्दो वैलक्षण्यार्थः । विकङ्कतो भाषया सुतवीति प्रसिद्ध इति केचित् । वैहॆकल इत्यन्ये । वारणो वायवारण इति । तत्राहोमार्थान्यनादिष्टवृक्षाणि उपांश्वादीनि तेषु वैकङ्कतत्वं भवति । अहोमार्थानादिष्टवृक्षाणि तानूनप्त्रसंबन्धिचमस(सः)परिकर्मिकर्तृकसोमतन्त्रसंबन्धिवेदिकरणसाधनीभूतः स्फ्यो विधनं चेत्येतानि शौण्येव प्रकृतौ । यदि जुहोमीति लिङ्गादेतस्यापि होमार्थत्वमित्युच्यते तदा वैकङ्कत एव । अस्मिन्पक्षे बहुत्वं विकृतिभूतसोमतन्त्रसंबन्धिपात्राण्यादाकैव सार्थकं भवति । तानूनप्त्रसंबन्धिचमसस्य वारणवृक्षजत्वेऽपि विकृतिभूतसोमतन्त्रसंबन्धिपात्राणि वारणवृक्षजान्येव । तानि तत्र तत्र व्यक्ती भविष्यन्ति । वाक्यानां बहुत्वात्प्रधानत्वाच्चात्र परिभाषाकरणं न तु तानूनप्त्रसंबन्धिचमसावसरे । न च दर्शपूर्णमाससंबन्धिपात्रप्रयोगावसर इयं परिभाषोक्तैव तत्रैव सर्वत्रेति परिभाषोत्तरं वक्तव्यम् । एवं चात्रापि निर्वाहे पुनःपरिभाषाकरणक्लेशो व्यर्थ इति वाच्यम् । उभयत्र परिभाषाकरणस्यैष्टिकसौमिकतन्त्रव्यतिरिक्तपाशुकगार्ह्यादितन्त्रपरिसंख्यार्थत्वेन सार्थक्यात् । तेन पाशुक्यां समवत्तधान्यां गार्ह्यपात्रेषु दर्व्यादिषु चरकसौत्रामणिसंबन्धिसुराग्रहणार्थकवायव्यपात्रेषु कौकिलीसौत्रामणीसंबन्धिपयोग्रहार्थकवायव्यपात्रेषु चेयं परिभाषा न प्रवर्तते । एवं च होमार्थेषु विकङ्कत एव । अहोमार्थेषु वारण एवेत्ययं नियमो नेति सिद्धं भवति । तेषामित्यस्य सर्वनाम्नो बुद्धिस्थपरामर्शित्वमादाय सर्वपात्रपरामर्शित्वमेव स्वीकर्तव्यं न तु संनिहितपरामर्शित्वमादाय वायव्यचमसपरिप्लुतामात्रपरामर्शित्वम् । एतेषु अहोमार्थत्वस्य कुत्राप्यसंभवेनासंगतत्वापत्तेः । होमोऽर्थः प्रयोजनं येषां तानि न होमार्थानि अहोमार्थानि । होमोऽत्राङ्गप्रधानसाधारण एव गृह्यते । एवं च द्रोणकलशस्य वैकङ्कतत्वमेव । व्याघारणार्थचमसस्यापि वैकङ्कतत्वमेव । द्रोणकलशस्य तु होमार्थत्वेऽपि न वैकङ्कतत्वनियमः ।

वृक्षपरिभाषोत्तरमुपदेशात् । तेन यस्य कस्यचिद्यज्ञियस्य वृक्षस्य भवति । तथा चाऽऽपस्तम्बः—द्रोणकलशं प्रकृत्य तस्य वायव्यैर्वृक्षनियम इति । परं तु इयान्वायव्यतो द्रोणकलशे भेदः । वायव्येषु वैकङ्कतालाभे यज्ञियवृक्षोपादानम् । द्रोणकलशे तु अयं नियमो नेति द्रष्टव्यं मार्तिकत्वमेतेन द्रोणकलशस्य न भवतीति प्रदर्शितं भवति ।

युनज्मि ते पृथिवीं ज्योतिषा सहेति दक्षिणस्य हविर्धानस्य पश्चादक्षं द्रोणकलशꣳ सदशापवित्रं प्रयुनक्ति ।

द्रोणकलशपरिमाणं तु समाख्याबलाद्द्रोणपरिमितधान्येन पूर्णो भवति एतावत्परिमाणकः । द्रोणस्य द्रोणपरिमितधान्यस्य कला मात्राः कणा अस्मिञ्शेरते मान्तीति द्रोणकलशः । तथा च यास्कः—कलशः कला अस्मिञ्शेरते मात्रा इति । नतु कम्बुग्रीवादिमान् । याज्ञिकसमाचारात् । परिप्लवया द्रोणकलशाद्ग्रहं गृह्णातीति वक्ष्यमाणत्वात् । परि सर्वतः प्लवते तरतीति हि परिप्लवाशब्दार्थः । कम्बुग्रीवादिमति द्रोणकलशे प्रवेशाभावेन तदभावात् । तस्मात्समचतुरश्रो द्रोणकलशो वर्तुलो वेति याज्ञिकसमाचारः । उत्तरत्रोत्तरग्रहणादेव पूर्वत्र दक्षिणस्यार्थाल्लाभे दक्षिणग्रहणं पूर्वत्र दक्षिणस्योत्तरस्य वेत्यनियमशङ्कां व्यावर्तयितुम् । अक्षस्य पश्चादिति पश्चादक्षं, प्रोक्ताभ्यां द्वाभ्यां दशापवित्राभ्यां सहितं दशापवित्रद्वयं द्रोणकलशमध्ये निधाय तत्सहितं प्रयुनक्तीत्यर्थः । न्यक्त्वावचनादुत्तानस्यैव प्रयोगः । एवमाधवनीयपूतभृदेकवचनानामपि । उत्तरस्याऽऽदिना पूर्वस्यान्तं विद्याविति परिभाषयैव मन्त्रान्तलाभे कृत्स्नपाठो मन्त्रान्तेन कर्म संनिपातयेदितिपरिभाषाप्रवृत्त्यभावं ज्ञापयति । तेन युनज्मीतिक्रियापदोच्चारणकाल एव प्रयोग इति सिद्धं भवति । एवमग्रिमेष्वपि त्रिषु मन्त्रेषु ज्ञेयम् ।

युनज्मि वायुमन्तरिक्षेण ते सहेत्युत्तरस्य नीड आधवनीयम् ।

उत्तरग्रहणं दक्षिणनिवृत्त्यर्थम् । नीडं शकटोपस्थः । आधूतो निष्पीड्य गालित एव सोमोऽवनीयते यस्मिन्नित्याधवनीयस्तम् । पृषोदरादित्वात्साधुत्वम् ।

युनज्मि वाचꣳ सह सूर्येण त इति तस्यैव प्रधुरे पूतभृतम् ।

तस्येतिवचनं नीडपरामर्शार्थम् । अन्यथोत्तरहविर्धानस्यानुवृत्त्यैव प्राप्तिसंभवेन तत्परामर्शस्य निरर्थकत्वापत्तेः । पवमानग्रहान्कलशानिति सूत्र आधवनीयपूतभृतोरपि कलशयोरेव वक्ष्यमाणत्वेन कलशावेवैतयोः । तेन मृन्मयत्वं कलशाकारता च भवति । स्पष्टं कठसूत्रे—आधवनीयपूतभृतौ च कुम्भौ सापिधानाविति । कुम्भौ कलशौ कलशस्थाल्योराकारकृतः कश्चन भेदः । विस्तृतबुध्नमुखा ह्रस्वाकारा स्थाली । अविस्तृतबुध्नो विस्तृतमुखो दीर्घाकारः कलश इति द्रष्टव्यम् । प्रकृष्टा विस्तीर्णा यत्र पूतभृत्स्थापितो न पतति एतादृशी धूर्यस्मिन्स प्रधुरो देशस्तस्मिन्पूतभृतं प्रयुनक्तीत्यर्थः । ऋक्पूरब्धूःपथामानक्ष इति अकारः समासान्तः । अ अनक्ष इति पदच्छेदादयं लभ्यते ।

प्रशब्दो नीडसंबद्धसमीपदेशग्रहणार्थः। नीडसमीपवर्तिविस्तीर्णतिर्यक्काष्ठापरपर्यायधुर्विशिष्टे देशे पूतभृतं प्रयुनक्तीति निष्कृष्टोऽर्थः। एवकारेण नीडासंबद्धकेवलोत्तरहविर्धानतिर्यक्काष्ठवतो देशस्य सूत्रान्तरोक्तहविर्धानकुबुकस्य च व्यावृत्तिः क्रियते। एतेन ज्ञायते यत्रैवकारो न श्रूयते तत्रासंभवे सूत्रान्तरोक्तमपि संग्राह्यं यत्र श्रूयते तत्र तदेव नियतमसंभवेऽपीति। पूतभृदित्यन्वर्था संज्ञा। पूतं गालितमेव बिभर्ति सोममिति पूतभृदिति। वक्ष्यति च तिरःपवित्रं पूतभृत्येकदेशमवनयत्यत ऊर्ध्वं पूतभृति तिरःपवित्रमेवावनीयत इति। आधवनीयपूतभृतौ मृन्मयावेव। यथोक्तं बाहवृच्ये-पूतभृतमाधवनीयं च स्थालीमिति। स्थालीशब्दान्मृन्मयत्वम्।

पश्चादक्षं तिस्र एकधना स्थालीर्युनज्मि तिस्रो विपृचः सूर्यस्य त इति स्रुचोऽभिमृशति।

उत्तरस्य हविर्धानस्येत्येवानुवर्तते। अक्षपदसाहचर्यात्। अक्षस्य पश्चादिति पश्चादक्षम्। अयमव्ययीभावः। तिस्र इति वचनं पश्चादक्षं तिसृणामेव प्रयोग इति नियमार्थम्। तेनान्यासामेकधनानां यथासंभवं प्रयोग इति सिद्धं भवति। न च तिस्र एवैकधना इति भ्रमितव्यम्। व्यवरार्धा अयुज एकधना स्थालीरादायाऽऽद्रवन्तीति वक्ष्यमाणसूत्रविरोधापत्तेः। नचैवं मन्त्रलिङ्गविरोधः। पश्चादक्षं प्रयोक्तव्यासु तिसृष्वेकधनासु लिङ्गानुरोधेन मन्त्र इतरासु कृत्स्नेत्येवं मन्त्रावृत्त्येत्येवंरीत्या लिङ्गविरोधपरिहारात्। सोमवर्धनार्था आप एकधनास्तासां स्थालीर्मृन्मय्य इत्यर्थः। एकधनान्घटानित्यापस्तम्बः। विसर्गरहित एव पाठः। स्रुचोऽभिमृशतीति सूत्रे मन्त्रानुपदेशात्प्रथमाभिमर्शो दर्शनाद्याम्न आयुष्यौरयनयैवाभिमर्शनम्। उदीच्यानां स्रुचोऽभिमृशति यथा पुरस्तादिति पाठः सौत्रानुकूल एव। अथवा युनज्मि तिस्र इत्येष मन्त्रः स्रुगभिमर्शनार्थक एव। आपस्तम्बेन युनज्मि तिस्रो विपृचः सूर्यस्य त इति स्रुचः सन्ना अभिमन्त्रयत इति स्रुक्ष्वेव विनियुक्तत्वात्। तेन पश्चादक्षं प्रयोक्तव्यानां तिसृणामप्येकधनानां कृत्स्नेत्येव। नच पृषदाज्यधान्या अपि अभिमर्शसंस्कारस्याऽऽवश्यकत्वेन तया सह स्रुचां चतुष्ट्वेन लिङ्गविरोधात्कथमेतस्य मन्त्रस्य स्रुगभिमर्शनकरणत्वमिति वाच्यम्। उपभृत्सात्म्येनोपभृत्पृषदाज्यधान्योरेकत्वविवक्षया त्रित्वोपपत्तेर्लिङ्गविरोधाभावात्। प्रचरण्या यागसंबन्धित्वाभावेन नाभिमर्शः। स्रुक्त्वस्यास्यामपि सत्त्वात्तस्या अप्यभिमर्श इति आग्रह उपभृद्वज्जुह्वत्साम्येन तयोरप्येकत्वविवक्षया त्रित्वोपपत्तिर्भवत्येव। वसाहोमहवन्यास्तु रिक्तत्वान्नाभिमर्शः। तूष्णीमेव स्रुचामभिमर्श इति केचित्।

अत्राभिषवणचर्मणो ग्राव्णामिति प्रयोजनमेके समामनन्ति।

अभिषवणफलकाभिमन्त्रणोत्तरमभिषवणचर्मणः प्रोक्षणमास्तरणं ग्राव्णामासादनमुपरे संमुखकरणं तेषां प्रोक्षणं च यदुक्तं तत्तत्र न कर्तव्यं किं त्वत्रास्मिन्काल एव

कर्तव्यमित्येक आचार्याः समामनन्ति वदन्तीत्यर्थः । अधिषवणचर्मास्तरणमेवाधिषवण-चर्मणः प्रयोजनं प्रोक्षणस्य तदङ्गत्वात्तस्यापि ग्रहणम् । ग्राव्णां त्वासादन-मेव प्रयोजनं संमुखीकरणविशिष्टप्रोक्षणस्यापि तत्संस्कारत्वात्तत्संबद्धत्वाच्च तस्याप्यत्र ग्रहणं न तु प्रयोजनं नाम पदार्थान्तरं तस्यान्यत्रानुक्तत्वेनात्रेति कालविशेषस्याधिकर-णत्वप्रदर्शनमनुपपन्नं स्यात् । अत आस्तरणासादने एव प्रयोजनशब्देन ग्राह्ये इति द्रष्टव्यम् । उक्तं चैतदापस्तम्बेनात्रैव रक्षोहणो वलगहनः प्रोक्षामि वैष्णवमित्यधिषवण-चर्म प्रोक्ष्य रक्षोघ्नो वो वलगघ्नः प्रोक्षामि वैष्णवानिति ग्राव्णो रक्षोहा त्वा वलगहा वैष्णवमास्तृणामीत्यधिषवणफलकयोरुत्तरलोमाऽऽस्तीर्य रक्षोघ्नो वो वलगघ्नः सꣳसाद-यामि वैष्णवानिति तस्मिꣳश्चतुरो ग्राव्णः प्रादेशमात्रानूर्ध्वसानूनाहननप्रकारानश्मनः सꣳसादयन्त्युपरं प्रथिष्ठं मध्ये पञ्चममिति । एतेन कस्त्वेतिमन्त्रकरणकप्रयोजनशङ्का परास्ता । इतिशब्दोऽत्र समुच्चयार्थे । वायव्यपात्रादिप्रयोजनेन सह समुच्चयः ।

अर्वा क्षया ऋतस्य गर्भा भुवनस्य गोपाः श्येना अतिथयः पर्वतानां ककुभः प्रयुतो न पातारो वग्नुनेन्द्रꣳ ह्वयत घोषे-णामीवाꣳश्चातयत युक्ताः स्थ वहत स्वर्गं लोकमभिव-हत यजमानमित्युपरे ग्राव्णः संमुखान्कृत्वाऽभिमन्त्रयते ।

संमुखीकरणस्य यथायथं प्रोक्षणाभिमन्त्रणार्थत्वात्प्रतिप्रधानं गुणावृत्तिरिति न्याया-न्मध्ये प्रोक्षणेन व्यवधानाच्च द्वितीयं संमुखीकरणमपि भवत्येव ।

आसन्यान्मा मन्त्रात्पाहीत्याग्नीध्रे जुहोति ।

आहवनीयबाधनार्थमाग्नीध्रग्रहणम् । जुह्वाः प्रचरण्याश्च व्यापृतत्वादाज्यस्थाल्या-ज्येन स्रुवेणैवायं होमः । अपूर्वाज्यादिति केचित् । अत्र मूलं चिन्त्यम् । न च प्रचरणीस्थाज्यैकदेशेन तथैव होमोऽस्त्विति वाच्यम् । एतस्याऽऽज्यस्याग्रे विनियोगस्य विधास्यमानत्वेनात्र तेन होमासंभवात् । अभिशस्त्या इति मन्त्रान्तः ।

हृदे त्वा मनसे त्वेति द्वाभ्यामन्तरेषाꣳ राजानं ग्रावसूपावहरति ।

हृदे त्वा मनसे त्वा सोम राजन्नेह्यवरोहेति द्वाभ्यां मन्त्राभ्यामीषामन्तरेणषयोर्मध्येन नीत्वा संमुखीकृतेषु ग्रावसूपावहरति उपसादयति । भुरिगनुष्टुप्छन्दोलक्षणाक्रान्तत्वा-द्यच्छेत्यन्तः पूर्वो मन्त्रः । अथोत्तरः सोम राजन्नेहीति । स्पष्टमाहाऽऽपस्तम्बः—अत्र राजानमन्तरेषे ग्रावसूपावहरति हृदे त्वा मनसे त्वा सोम राजन्नित्येताभ्यामिति । बौधायनोऽपि—दक्षिणस्य हविर्धानस्यान्तरेणेषे राजानमुपावहरति हृदे त्वा मनसे त्वा सोम राजन्नेह्यवरोहेति द्वाभ्यामिति ।

---

१ ख. ग. °लदघ्नः । २ ख. ग. °क्षोह त्वा । ३ ख. ग. °लदघ्नः । ४ क. पृथिष्ठं । ५ ख. ग. °मन्तरेणेषे° ।

आग्नीध्रे पञ्चहोतारं जुहुयात्स्वर्गकामस्येत्येकेषाम् ।

अग्निर्होतेति पञ्चहोतृसंज्ञको मन्त्रस्तं जुहुयाद्विहोमधर्मेण पूर्ववत्स्रुवेणैवायं होमः । होमार्थत्वात्सग्रहः पञ्चहोता । आग्नीध्रग्रहणमाहवनीयनिवृत्त्यर्थम् । जुहुयादित्यन्तमेकं सूत्रम् । स्वर्गकामस्येत्यपरम् । तेन नित्यत्वं काम्यत्वं च सिध्यति । स्पष्टमेतमर्थमाहाऽऽपस्तम्बः—पञ्चहोतारं चाऽऽग्नीध्रे स्वर्गकामस्य नित्यवदेके समामनन्तीति । अस्मिन्नवसरे होमविषये परिभाषाविशेषमाहाऽऽपस्तम्बः—मध्येऽग्नेराज्याहुतीः पश्वाहुतीः पुरोडाशाहुतीरिति जुहोत्यभितः सोमाहुतीरिति । याः सोमाङ्गभूता आज्यपशुपुरोडाशानां प्रधानाहुतयस्ता मध्येऽग्नेर्जुहोति तदङ्गभूतास्त्वाज्यभागस्विष्टकृदाज्याहुतीर्यथाप्रकृत्येव यास्तु सोमाहुतयस्ता अभितो जुहोति यत्र यत्र दिशि या या आहुतिरुक्ता तत्र पार्श्वतोऽग्नेर्जुहोति न मध्य इत्यस्यार्थः ।

पुरा वाचः प्रवदितोः प्रातरनुवाकमुपाकरोति ।

पुरा मनुष्याणां पक्षिणां वा वाचः प्रवदिताः प्रवदनात्प्रातरनुवाकमुपाकरोति । तथा चाऽऽपस्तम्बः—पुरा वाचः पुरा वा वयोभ्यः प्रवदितोः प्रातरनुवाकमुपाकरोतीति । आश्वलायनेन पक्षिप्रवदनमेव प्रातरनुवाकार्थामन्त्रणे निमित्तमुक्तम्—अथैतस्या रात्रेर्विवासकाले प्राग्वयसां प्रवादात्प्रातरनुवाकायाऽऽमन्त्रित इति । प्रवदितोरिति भावलक्षणे स्थेण्., इति पाणिनिसूत्रात्तोसुन्प्रत्ययः । प्रातरनूच्यत इति प्रातरनुवाकस्तस्योपाकरणं तदारम्भार्थं होतुः प्रवर्तनम् । उपाकरणशब्दाच्छस्त्रसादृश्यं सूचितं भवति । तथा च प्रतिगरोऽत्र सिद्धो भवति । स्पष्टः प्रतिगरप्रकार उक्त आपस्तम्बेन—मनसा ते वाचं प्रतिगृणामीत्यध्वर्युर्होतारमाहेति । इत्युक्त्वा मनसा प्रतिगराननुसंधत्तेऽध्वर्युरित्यस्यार्थः । ननु स्तोत्रग्रहाभावात्कथमेतदिति चेत् । उच्यते—छन्दोगैर्विश्वरूपाणां गानस्यैव स्तोत्रत्वं वसतीवरीणां ग्रहत्वं चोक्तं तेनैव सर्वसंपत्तिर्भवतीति । बौधायनेनापि कर्मान्त उक्तम्—क उ खलु वासतीवरस्य स्तोत्रभक्तिर्भवति शस्त्रभक्तिश्चेति विश्वरूपा वु हास्य स्तोत्रभक्तिर्भवति प्रातरनुवाके ह शस्त्रभक्तिरिति । ननु न चान्यत्र विश्वरूपा ज्योतिष्टोमादिति लाट्यायनद्राह्यायणाभ्यां ज्योतिष्टोमव्यतिरिक्तस्थले विश्वरूपागानाभावस्योक्तत्वेन स्तोत्राभावात्प्रातरनुवाकाभावः प्रसज्येतेति चेन्न । छन्दोगवचनबलादग्निष्टोमोक्थ्यादिषु प्रकृतिभूतेषु कृतं सद्विकृतिष्वप्युपकरोतीत्येवमेव कल्पनात् । न चातिप्रसङ्गः । अन्यत्रैवंरूपवचनाभावेनातिप्रसङ्गाभावात् । युञ्जे वाचꣳ शतपदीं गाये सहस्रवर्तनि गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि संभृता देवा ओकाꣳसि चक्रिर इति विश्वरूपागानमन्त्रादपि प्रकृतिभूतज्योतिष्टोमशब्दवाच्याग्निष्टोमोक्थ्यषोडश्यतिरात्रात्मकप्रकृतिभूतक्रतुचतुष्टये तस्य विश्वरूपागानस्य विकृतिष्वपि उपकारो ज्ञायते । कथमि-

१ ग. °विषयमा° ।

त्याशङ्कायां तदर्थमर्थ उच्यते—शतशब्दोऽनन्तवाची । शतमनन्तं भवतीति निरुक्तात् । शतं पदानि अनन्तार्थवाचकानि पदानि यस्याः सा शतपदी तां शतपदीम् । एतादृशीं वाचं सुत्यार्थं युञ्जे योजयामि । सहस्रशब्दोऽप्यनन्तवाची । सहस्राणामनन्तानां विकृतीनां वर्तनिरूपो मार्गो येभ्यो यतोऽतस्तेष्वग्निष्टोमादिषु प्रकृतिभूतेषु सहस्रवर्तनी- ष्वेवाहं गाये तेनैव विकृतिष्वपि तदुपकारसिद्धिरिति तात्पर्यार्थः । सहस्रवर्तनीति सुपां सुलुगिति सूत्रेण सप्तम्या लुकि सति भवति । येषु गायत्रं त्रैष्टुभं जगत् । उपलक्षणमे- तदन्येषामपि च्छन्दसाम् । तेनान्यान्यपि च्छन्दांसि अत्र गृह्यन्त । विश्वा विश्वानि विकृत्यात्मकानि रूपाणि संभृता संभृतानि देवा इन्द्रादयो येषु स्वस्वभागग्रहणार्थमोकांसि गृहाणि चक्रिरे कृतवन्त इति मन्त्रार्थः । अथवापाकरणशब्द आरम्भार्थक एव । प्रतिगरणं वाचनिकम् । प्रातरनुवाकं जाग्रदुपासिताध्वर्युः स्वप्याद्वेति कात्यायनेन पक्षे स्वापोऽप्युक्तः । अयं च जाग्रत्ताया असंभवे द्रष्टव्यः ।

द्वेष्यस्य प्रोषितायाम् ।

द्वेष्यस्य शत्रोः सप्तम्यर्थे षष्ठी । सा च निमित्तार्थिका । द्वेष्ये सति तन्निमित्तं तत्पराभवनिमित्तमिति यावत् । प्रोषितायां प्रकर्षेणोषितायां समाप्तायां रात्रौ प्रातरनु- वाकमुपाकरोतीत्यर्थः । उष प्रुष प्लुष दाह इति धातुसूत्रे दाहशब्देन नाशो लक्ष्यते । तेन नष्टायां समाप्तायामित्ययमर्थो लभ्यते ।

देवेभ्यः प्रातर्यावभ्योऽनुब्रूहि ब्रह्मन्वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यामाह्वय प्रतिप्र- स्थातः सवनीयान्निर्वपेति संप्रेष्यति ।

प्रातर्यान्तीति प्रातर्यावाणो देवविशेषा अग्न्युषोश्विरूपाः । तदागमनार्थं प्रातरनुवा- कमनुब्रूहीत्यर्थः । होताऽत्र प्रेष्यः । बौधायनेन प्रातर्यावभ्यो देवेभ्यो होतरनुब्रूहीति प्रेष्यनिर्देशः स्पष्टमेव कृतः । सवनीयान्सवने सौत्येऽहनि भवाः सवनीयास्तान्पुरोडा- शान्निर्वपेति धानादिष्वपि पुरोडाशशब्देन व्यवहाराऽत्रेत्यत्र प्रमाणं सवनीयपुरोडाश- यागे वक्ष्यते । यथासंप्रैषं स्वं स्वं कर्म प्रेष्याः कुर्वन्ति । अस्यां सुब्रह्मण्यायां पितापुत्रीया सुब्रह्मण्या भवतीतिवचनाभावान्न पितापुत्रीयत्वनियमः ।

प्रतिप्रस्थाता सवनीयानां पात्रसंसादनप्रभृतीनि कर्माणि प्रतिपद्यते यथार्थमोषधिपात्राणि प्रयुनक्ति ।

प्रैषेणैव सिद्धे पुनः प्रतिप्रस्थातृग्रहणमध्वर्युव्यावृत्त्यर्थम् । अन्यथा निर्वापमात्रं प्रतिप्रस्थातृकर्तृकमितरत्करम्भोत्पादनपर्यन्तं सवनीयतन्त्रमध्वर्युकर्तृकमिति स्यात् । अत अध्वर्युव्यावर्तनायाऽऽवश्यकमेव प्रतिप्रस्थातृग्रहणम् । सवनीयानामिति वचनं

नियमार्थं सवनीयसंबन्धिकर्मैव प्रतिप्रस्थातृकर्तृकं नतु सौमिकमिति। तथा च शृणोत्वग्निरित्यादावनुक्तोऽप्यध्वर्युरेव करोतीति सिध्यति। अथवा सवनीयानामिति वचनं सवनीयानामेव प्रतिप्रस्थाता नियत इतरेषु सौत्येषु सौम्यादिनिर्वापेषु नायं नियत इति। तेनाध्वर्युवत्प्रतिप्रस्थाताऽपि सौम्यादिचरुषु पक्षे कर्ता भवतीति सिद्धं भवति। प्रतिप्रस्थातृकर्तृकता सौम्यचरौ बौधायनेन स्पष्टमेवोक्ता प्रैषेणैव—प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति। अत्र नियमार्थं प्रतिप्रस्थातैव करोति। तेन माध्यंदिनसवनतृतीयसवनयोः पक्षेऽन्यकर्तृकताऽप्यस्तीति सिद्धं भवति। स च बौधायनसूत्रे दृष्टत्वादाग्नीध्रः। पात्रसंस्सादनप्रभृतीनीतिवचनात्पाणिप्रक्षालनोलपराजीस्तरणयोर्निवृत्तिः। अथवोलपराजीस्तरणमात्रस्यैव निवृत्तिः। तस्य जातत्वात्। पाणिप्रक्षालनं तु कर्मणे वां देवेभ्यः शकेयमित्याह शक्त्या इति शक्तिरूपपुरुषनिष्ठसंस्कारस्यावश्यमपेक्षितत्वात्कर्तव्यमेवेति। तथा चाऽऽपस्तम्बः—सवनीयानां पाणिप्रक्षालनादिकर्म प्रतिपद्यत इति। प्रतिपद्यत आरभत इत्यर्थः। यथार्थं यथाप्रयोजनम्। औषधिग्रहणस्य पाशुकव्यावृत्तिपरत्वादैष्टिकहविरुपलक्षणीयमनेन। तेनाऽऽमिक्षावाजिनसंयुक्तानामपि प्रयोगः। यानि पश्वर्थं न प्रयुक्तानि अर्थवन्ति च तानि प्रयुनक्तीत्यर्थः। तानि च शूर्पकृष्णाजिनशम्योलूखलमुसलदृषदुपलावाजिनपात्रकुटरुपात्रीद्वयमेक्षणप्राशित्रहरणप्रणीताप्रणयनप्राकृतेडापात्रप्रातर्दोहपात्रामिक्षोद्धरणपात्रवाजिनोद्धरणपात्रधानार्थपात्रकरम्भार्थपात्रलाजार्थपात्रभर्जनार्थमेक्षणमदन्तीपात्रचतुर्धाकरणपात्रपिष्टलेपफलीकरणपात्राणीत्येतानि। स्फ्याग्निहोत्रहवणीस्रुवजुहूपभृद्ध्रुवाज्यस्थाल्युपवेषाः पाशुका एव। वेदस्य प्रयुक्तस्यापि पशुपुरोडाशे पुनःप्रयोगविधानदर्शनादत्रापि प्रयोगः। पशुपुरोडाशविषयत्वाद्विधानस्य तत्रैव प्रवृत्तिर्नात्रेत्याग्रहे न वेदप्रयोगः। पवित्रे कृत्वा यजमान वाचं यच्छेति संप्रेष्यति वाग्यतः पात्राणि संमृशतीति पशुसूत्रात्। पशौ प्रणीतानामभावेनात्र प्रसङ्गत उपकाराभावात्प्रणीताप्रणयनं भवत्येव। सवनीयानां मार्जनप्रभृतीनि कर्माणि प्रतिपद्यते यथा निरूढपशुबन्ध इति वक्ष्यमाणपशुबन्धातिदेशेन मार्जनपिष्टलेपफलीकरणहोमकपालविमोचनवदेतेषामपि प्रापितत्वाच्च सवनीयार्थं प्रणीताभेदस्याऽऽवश्यकत्वात्। नचैतद्भिन्नविषयकमेतदिति वाच्यम्। संकोचे प्रमाणाभावात्। अथवा यदि प्रणीता न विद्येरन्याः काश्चन यजुषोत्पूय ताभिः संयौतीत्यापदर्थवाद इति सूत्रादत्र प्रणीताभाव एव। कोऽस्य विषय इति चेदुच्यते—प्रणीतानिषेधेन क्त्वाप्रत्ययबोधिताव्यवहितत्वेन च प्रणीतारहितानि यानि प्रसङ्गेन प्रणीतासापेक्षाणि कर्माणि यथा सौमिकेषु पशुषु सवनीया देविका देवसूहवींषीत्यादीनि तान्येतस्य विषयः। आपच्छब्देन संकटविषय एतत्प्रवर्तते न प्रणीतासमकक्षत्वेन सर्वत्र। नन्वनेनैव सूत्रेणावभृथवैश्वानरीयादावपि निषेधेनैव सेत्स्यति सति तत्र तत्र यजुरुत्पूताभिः संयौतीति वचनं व्यर्थमिति चेत्सत्यम्। अपूर्वत्वेन तत्र तत्राप्राप्तेर्वारणार्थं तस्य वचनस्यावश्यमपेक्षि-

त्वात् । न च संयवनं विना पुरोडाशान्यथानुपपत्त्यैव तत्सिद्धेस्तद्बोधतादवस्थ्यमिति वाच्यम् । यजुरुत्पूतत्वविधानार्थत्वेन तद्वचनोपपत्तेस्तद्बोधतादवस्थ्याभावात् । निरूढपशुसंबन्धिपशुपुरोडाशेऽपि यजुरुत्पूताभिः संयवनं वारयितुं तत्र प्रणीतावचनम् । उपवेषस्य पश्वर्थस्यापि उदसनं पशुतन्त्रसमाप्तावेव । नन्वेवं प्रणीताप्रणयनाभाव उपवेषोदसनाभावे च कर्माणि प्रतिपद्यत इतिबहुवचनानुपपत्तिरिति चेन्न । पिष्टलेपफलीकरणात्मकहोमद्वयात्मकं कर्मद्वयमादाय बहुवचनोपपत्तेः । तथा च यजुरुत्पूताभिरेव संयवनं पक्षे सिद्धं भवति । तथा च भरद्वाजः—यजुरुत्पूताभिः पुरोडाशं श्रपयतीति । बौधायनश्च पशुपुरोडाशे स्थित्वोऽऽह प्रोक्षणीशेषेण पिष्टानि संयौति यावदेवं सवनीयानामिति । पशावुपवेषस्य शामित्राङ्गारनिरूहणार्थमावश्यकत्वेन नियतत्वात्तदुपवेषेणैव कार्यसिद्धिः । वेदाग्राणि चतुर्धा विभज्यैकं भागं पाशुकपात्रेषु प्रयुनक्ति तेनैव स्रुचः संमार्ष्टि तमेव प्रहरति च । अपरो भागोऽत्र प्रयोज्यः । तेनैव वाजिनपात्रप्राशित्रहरणयोः संमार्गः । तमेव प्रहरति च । अवशिष्टौ द्वौ भागौ माध्यंदिने सवने तृतीयसवने च प्राशित्रहरणसंमार्गार्थं यथायथं प्रयोज्यौ तौ तत्र तत्र प्रहरति च । इध्मप्रव्रश्चनानामभ्याधानं पाशुकपात्रेषु प्रयुक्तानामपि प्रातःसवनसंबन्धिनि तृतीयसवनसंबन्धिनि वा सवनीयपुरोडाशतन्त्रान्तर्गतपिष्टलेपफलीकरणहोमे विभज्य त्रिषु सवनेषु वा ।

विशेषपात्राण्याह—

द्वे भर्जनार्थे कपाले अष्टौ पुरोडाशार्थान्यामिक्षार्था१ स्थालीम् ।

भर्जनमेवार्थः प्रयोजनं ययोस्ते द्वे कपाले बृहती भवतः । एकं धानार्थमेकं लाजार्थम् । बृहत्त्वं योग्यतया । कपालशब्दः खर्परावयवे रूढः । तेन शरावं कपालत्वेन ये प्रयुञ्जते त उपेक्ष्याः । भर्जनार्थे कपाले इति द्विवचनेनैव द्वित्वसिद्धौ द्विग्रहणं सजातीयत्वं द्वयोर्ज्ञापयति । तेन तुल्यपरिमाणत्वं सिद्धं भवति । आमिक्षार्थां स्थालीमिति आकृतिविशिष्टपदार्थः स्थालीशब्दवाच्यः स एवात्र भवति नतु कुम्भीशरावादीत्येतादृशार्थबोधनार्थम् ।

निर्वपणकाल इन्द्राय हरिवते धाना निर्वपतीन्द्राय पूषण्वते करम्भ सरस्वत्यै भारत्यै परिवापलाजानिन्द्राय पुरोडाशमष्टाकपालम् ।

निर्वपणकाल इत्येतदातिथ्यावद्व्याख्येयम् । इन्द्राय हरिवते धाना निर्वपतीत्यादिनाऽष्टाकपालमित्यन्तेन कस्यै देवतायै किं द्रव्यमित्याकाङ्क्षा निवार्यते । ननु इन्द्राय पुरोडाशमित्येतावदेव वक्तव्यम्, अष्टाकपालत्वं तु अष्टौ पुरोडाशार्थानीत्यनेनैव

१ ख. ग. °त्वा प्रो° ।

सिद्धम्, एवं चाष्टाकपालमिति वचनं व्यर्थमिति चेन्न । सर्वैन्द्रत्वाभावपक्ष ऐन्द्रः पुरोडाशोऽष्टाकपाल एव भवति न त्वेकादशकपालो भवतीतिज्ञापनार्थत्वेन वैयर्थ्याभावात् । तत्प्राप्तिस्तु ऐन्द्रपुरोडाशस्य सर्वत्रैकादशकपालत्वप्रसिद्ध्या । धानादिशब्दानां भाविनीं संज्ञामादाय प्रवृत्तिः । नानाबीजविषये नानाबीजेषु समवेतेष्वेकमुलूखलं मुसलꣳ शूर्पं कृष्णाजिनं चेतिपरिभाषातः । उलूखलादीनां चतुर्णां चकारसंगृहीतदृषदुपलयोश्च न प्रतिबीजं भेदः । प्रदेशभेदेन निर्वापोद्वापौ । विवेकपरापवने तु सामर्थ्यात्पात्रान्तरेष्वेकैकस्य बीजस्य भवतः । दृषदधिवापः पर्यायेण कृष्णाजिने प्रस्कन्दनं संवापश्च प्रदेशभेदेनेत्यादि द्रष्टव्यम् । ब्रह्मयजमानौ यथास्थितावेव । निर्वापविषय एव मन्त्रप्रयोगो दक्षाय वानस्पत्याऽसीत्यादि । अपरेण शालामुखीयं पात्रीद्वयं निधाय दक्षिणतः [१]यमुपकृष्येत्यादि । सर्वे शाकटमन्त्रा आवर्तनीयाः । शाकटभेदपक्ष एतन्नान्यदा । शाकटभेदपक्ष एव पात्रीभेदः । शकटाभेदपक्षे पात्र्या अप्यभेदः । अस्मिन्पक्षे नाऽऽवृत्तिः । एकस्यामेव पात्र्यां दक्षिणतो यवानामुत्तरतो व्रीहीणामित्येवं निधानम् । प्रस्कन्दनेऽप्येवम् । ऊर्जं धत्स्वेत्यस्याऽऽवृत्तिस्तन्त्रेण स्पर्शस्यासंभवात् । विभवन्ति तन्त्रमङ्गान्यविभवन्त्यावर्तन्त इति परिभाषासूत्रात् । पयो मयि धेहीति सकृदेव । अपहतꣳ रक्ष इत्यपि सकृदेव । दशहोतारं व्याख्याय शूर्पैकदेशे पवित्रे निधाय यच्छन्तामिति मुष्टिं पूरयित्वा तूष्णीमेव स्रुच्योप्य देवस्य त्वा० भ्यामिन्द्राय हरिवते जुष्टं निर्वपामीति यवान्निर्वपति । यच्छन्तां० देवस्य त्वा० भ्यामिन्द्राय पूषण्वते जु० इति यवान्पुनर्निर्वपति । यच्छन्तां० देवस्य त्वा० भ्याꣳ सरस्वत्यै भारत्यै जु० इति व्रीहीञ्शूर्पोत्तरभागे निर्वपति । यच्छन्तां० देवस्य त्वा० भ्यामिन्द्राय जुष्टं नि० इति व्रीहीन् । सर्वाण्यैन्द्राणि भवन्तीत्येकेषामिति पूर्वसूत्रोक्तसर्वैन्द्रत्वपक्ष इन्द्रायेत्येव सर्वत्र ।

प्रोक्षितेषु विभागमन्त्रेण व्रीहीन्विभज्यावधानवदन्त्यधाँल्लाजार्थान्निदधाति ।

इदं देवानामिति आवर्तते । तन्त्रेण स्पर्शस्यासंभवात् । इदमु नः सह स्फात्यै त्वेति चाप्यावर्तते । असंभवादेव । इदमहमित्यादि स्कन्नानुमन्त्रणान्तानि कर्माणि सकृत्सकृदेव । उर्वन्तरिक्षमन्विहीत्यपि सकृदेव । अत्रोहं केचित्कुर्वन्ति तदुर्वन्तरिक्षं प्रेहीत्यस्मिन्मन्त्रे सवनीयपशावूहखण्डनेन खण्डितं द्रष्टव्यम् । अदित्या वामुपस्थे सादयामीत्यूहितेन मन्त्रेण युगपदेवाऽऽसादनम् । इन्द्र हरिवन्हव्यꣳ रक्षस्व, इन्द्र पूषण्वन्हव्यꣳ रक्षस्व, सरस्वति भारति हव्यꣳ रक्षस्व, इन्द्र हव्यꣳ रक्षस्वेति यथादेवतं परि-

---

१ ख. ग. स्फ्यमवकृ ।

ददाति। सर्वेन्द्रत्वपक्ष इन्द्र इत्यरक्षस्वेत्येव। सशूकायामित्यादि। प्रोक्षणे देवस्य त्वा० म्यां सरस्वत्यै भारत्यै वो जुष्टं प्रोक्षामीन्द्राय हरिवत इन्द्राय पूषण्वत इन्द्राय। सर्वेन्द्रत्वपक्षे देवस्य त्वा० भ्यो वो जुष्टं प्रोक्षामीन्द्रायेति। इति हविः प्रोक्ष्य पात्रेषु प्रोक्षितेषु विभागमन्त्रो यथाभागं व्यावर्तेथामिति। अनेन मन्त्रेण व्रीहीन्विभज्येदं सरस्वत्यै भारत्यै चेदमिन्द्राय चेति द्वयोर्यथाक्रमं तां तां देवतामुपलक्ष्योपलक्षितं द्वितीयं पुरोडाशार्थं भागं यवावघातोत्तरमवहन्ति। अर्धाल्लाँजार्थान्व्रीहीन्सुरक्षितान्निदधाति। कृष्णाजिनादानाद्युलूखलाधिवर्तनान्तं तन्त्रम्। मुसलादानं तन्त्रेण। प्रथमे बीजे हविष्कृतमाह्वयत्युत्तमे वाचं विसृजत इति सूत्रात्प्रथमे बीज एव हविष्कृदाह्वानमन्तिमे बीजे त्रिष्फलीकरणसंप्रैषे सति वाचं विसृजते। प्रथमबीजाह्वानेनैव हविष्कृदाह्वाने सिद्धे न पुनराह्वानं प्रयोजनाभावात्। प्रथमबीजे त्रिष्फलीकरणसंप्रैष एव विसर्गेऽन्येषामवहननं नियमरहितेन कर्त्रा कृतमवैधं स्यादिति सूत्राशयः। अवहननं च दृष्टतण्डुलीभावसंपादनार्थं यावत्त्रिष्फलीकरणं तावत्तण्डुलीभावोऽतः संयुक्तानि त्वेकापवर्गाणीति काण्डानुसमयोऽत्र द्रष्टव्यः। तुषाणां निवपनं तन्त्रेणैव। तथा च भरद्वाजः—सर्वेषामन्ततस्तुषानुपवपतीति। प्रक्षालननिनयनमप्येतेनैव व्याख्यातम्। विवेचनं तत्तस्पाभ्यां त्रिष्फलीकर्तवा इति प्रैषः प्रतिबीजम्। अत्र दर्शित एव हेतुः प्रागेव। प्रक्षालने एकीकृत्य निनयति सहैव। प्रक्षालननिनयनान्तं यवानां कृत्वा व्रीहीणां कार्यम्। प्रोक्षितेष्विति वचनं चरुपुरोडाशार्थविभागदृष्टं प्रागधिवपनाद्विभागं व्यावर्तयितुम्। युक्तश्चावहननात्प्राग्विभागः। सतुषाणामेव व्रीहीणां लाजनिष्पादने सामर्थ्यात्प्रागधिवपनाद्विभाग एव मन्त्रो नात्रेति शङ्का स्यात्तां व्यावर्तयितुं विभागमन्त्रेणेति। व्रीहीन्पुरोडाशार्थानर्धानवहन्ति। अर्धानवशिष्टाल्लाँजार्थान्सुरक्षितान्निदधाति स्थापयति। व्रीहिग्रहणार्थग्रहणाभ्यामिदं ज्ञायते धानाकरम्भौ यवमयाविति। भ्रष्टेषु यवतण्डुलेषु धानाशब्दस्य लोकप्रसिद्धत्वात्। पुरोडाशस्य यवमयत्वं वैकल्पिकं चोदकप्राप्तमनेन व्यावर्त्यते। करम्भस्वरूपं तु सूत्रकार एव वक्ष्यति। परिवापशब्दो लाजापरपर्याय एव। कृष्णाजिनादानादि अव्यवकिरन्तीत्यन्तं कृत्वा पिष्टलेपं प्रज्ञातं निदधाति।

प्रथमेन कपालमन्त्रेण धानार्थं लाजार्थं च कपाले उपदधाति।

कपालमन्त्राणामनेकत्वादनेके विकल्पेन प्राप्तास्तत्र प्रथमेनैवोपधानम्। एतत्कपालद्वयं प्रथमं प्रथमकपालधर्मेणैवोपधेयं कृतप्रयोजना इतरे निवर्तन्ते। ननु प्रथमस्य मन्त्रस्य प्रथमकपालोपधाने प्राप्तिरुपस्थितत्वादेव सिध्यति किमर्थं प्रथमग्रहणमिति चेत्सत्यम्। प्रथमेन कपालमन्त्रेण स्थालीमुपधायेति स्थाल्युपधानवत्कपालोपधाने परिभाषाया अभावेन प्रथमेन कपालमन्त्रेणेतिवचनं यत्र यत्र तत्रैव प्रथमेन कपालमन्त्रेण प्रथमकपालोपधानं नान्यत्रेतिज्ञापनार्थं तद्ग्रहणात्। तेनाश्वमेधे पशुपुरोडाशान्निरु(रु)-

त्याग्नयेऽꣳहोमुचेऽष्टाकपाल इति दशहविषं मृगारेष्टिं निर्वपत्यग्नेर्मन्वे प्रथमस्य प्रचेतस इति याज्यानुवाक्या भवन्ति पशुपुरोडाशानां मृगारेष्टेश्च समानः स्विष्टकृदिडमिति विहितायां मृगारेष्ट्यां तन्त्रस्यानुक्तत्वेन प्रथमेन कपालमन्त्रेण धानार्थं कपालमुपधायेतिवचनाभावेन येन केनचित्कपालोपधानान्यतरमन्त्रेणैककपालोपधानमिति प्रयोजनं सिद्धं भवति । कपालग्रहणमयं कपालोपधानमन्त्र इति कपालोपधानात्पूर्वमत्र स्मरणमावश्यकमितिज्ञापनार्थम् । मदन्तीरधिश्रित्य धृष्टिरसीत्यादि अवशिष्टमङ्गारध्वेत्यन्तं कृत्वा करोति । अत्र कार्यक्षम एवाङ्गारः । तस्य चेन्धनैः प्रज्वालनं कृत्वा यथा कपाले धानानां भर्जनं भविष्यति तदनुकूलज्वालायुक्तं कृत्वा ध्रुवमसीति प्रथमेन कपालमन्त्रेणोपधाय निर्दग्धमिति तस्मिन्नङ्गारमधिनिर्वर्त्य पुनरङ्गारनिर्वर्तनादिना धानार्थकपालवल्लाजार्थं कपालमुपधाय निर्दग्धमित्यङ्गारमधिनिर्वर्त्य पुनरङ्गारनिर्वर्तनादिनैन्द्राग्नपुरोडाशकपालोपधानवदष्टौ कपालानि ऐन्द्रस्य पुरोडाशस्योपधाय क्रमेणाङ्गाराध्यूहनं करोति । केचिद्भर्जनकपालयोर्निर्दग्धमिति न भवतीति वदन्ति तन्न । तापरूपदृष्टप्रयोजनस्यावश्यमाकाङ्क्षितत्वात् । भृगूणामित्यङ्गाराध्यूहनं पुरोडाशार्थेष्वेवेत्यपि केचिद्वदन्ति तदनेन निरस्तं द्रष्टव्यम् । धानालाजार्थयोः कपालयोस्तप्यस्वेत्यूहः । यद्यपि ल्यप्प्रत्ययेनाव्यवधानं बोध्यते तथाऽप्यङ्गाराध्यूहनस्य कपालोपधानाङ्गत्वाद्येन नाव्यवधानमिति न्यायेन नाव्यवहितत्वबाधः । अथवाऽऽमिक्षाकरणोत्तरमङ्गाराध्यूहनं, धानार्थं लाजार्थं च कपाले उपधायेतिकपालवचनं पूर्वत्र द्वे भर्जनार्थे कपाले इत्यनेन भर्जनपर्यन्तमेव कपालत्वं नोत्तरत्र तथा च भर्जनपर्यन्तमेव कपालधर्मप्राप्तिर्नोत्तरत्रेति शङ्कामपाकर्तुम् ।

अष्टौ पुरोडाशस्योपधायाऽऽमिक्षायाः कल्पेन मैत्रावरुणीमामिक्षां करोति ।

आमिक्षाया वैश्वदेव्याः कल्पेन प्रकारेण मैत्रावरुणीं मित्रावरुणदेवत्यामामिक्षां करोतीत्यर्थः । आमिक्षां करोतीत्यत्राऽऽमिक्षावचनं मित्रावरुणौ पयस्ययेति श्रुतौ पयस्यां मैत्रावरुणस्येति वक्ष्यमाणसूत्रे च पयस्याशब्दार्थ आमिक्षैव न तु पयस्याख्यं द्रव्यान्तरं किंचिदस्तीति प्रदर्शयितुम् । अत्रैवाऽऽमिक्षाकरणं न तु पुरोडाशाधिश्रयणोत्तरं धानालाजानां भर्जनात्पूर्वं विधानात् । अन्यथा वैपरीत्योक्तिरसंगता स्यात् । तेनाऽऽमिक्षाकरणं प्रातर्दोहानन्तरमेव, अनन्तरं संवपनादीति सिद्धं भवति । तत्रायं प्रयोगक्रमः—निरूढमित्यादिना संपृच्यध्वमित्यन्तेन विधिना प्रातर्दोहं दोहयित्वा शूर्पात्पात्रान्तरे मन्त्रेण यवतण्डुलान्समोप्य हर्योर्वीवाराभ्यामुत्पुनामीत्युत्पूय तथैव लाजार्थान्व्रीहीन्समोप्योत्पूय मन्त्रेणैव पिष्टानि समोप्योत्पुनाति । ततः समाप इत्यादि पिण्डकरणान्तं पुरोडाशस्य कृत्वा धानार्थलाजार्थाभ्यां कपालाभ्यां क्रमेणाङ्गारापोहनं कृत्वा कपालयोगादङ्गारानपोहतीति ।

अधिश्रयणमन्त्रेण धाना लाजांश्च भर्जयति ।

अधिश्रयणमन्त्रो धर्मोऽसि विश्वायुरिति, तेन मन्त्रेण धाना लाजांश्च भर्जयति । पुरोडाशस्य कपालेषु स्थापनेऽयं मन्त्रो यथा तथा यवतण्डुलानां व्रीहीणां च कपालयोः प्रक्षेप एतस्य मन्त्रस्य प्राप्तिः स्यात्सा मा भूत्किं तु भर्जन एवैतस्य विनियोगो यथा स्यादित्येतदर्थमिदं सूत्रम् । तेन यावद्भर्जनं तावत्पर्यन्तं मन्त्रावृत्तिः । मन्त्रान्ते भर्जनानुकूलव्यापार आरब्धव्य इति वेति सिध्यति । धर्मोऽसीत्यस्यैकवचनान्तशब्दवतो मन्त्रस्य प्रकृतेऽसमर्थत्वादूहः कार्यः । तत्र धर्माः स्थ विश्वायुष इति यवतण्डुलेषु, लाजार्थव्रीहिष्वपि धर्माः स्थ विश्वायुष इति । प्रकृतिवद्वा धर्मोऽसि विश्वायुरिति परिवाप इति तेषामेकवदेव चोदनात् । धर्मशब्देन हविरेव संस्तूयते न तु तदवयवभूततण्डुला इत्यस्मिन्पक्षे धानास्वपि नोह इति द्रष्टव्यम् । धानानां लाजानां च प्रथमलेपानुमार्जने न स्तः । असंभवात् । पर्यग्निकरणं संस्कारत्वात्संभवाच्च सर्वेषाम् । आमिक्षायास्तु न तस्या अपूर्वधर्मवत्त्वात् । अभिज्वलनं तु पुरोडाशस्यैव नेतरत्रासंभवात् । अग्निस्त इत्यस्त्येव । परितस्तपनस्य पाकानुकूलत्वेनाऽऽवश्यकत्वात् । सं ब्रह्मणेति नास्ति असंभवात् । अविदहन्तः श्रपयतेति[1] त्वस्त्येव[2] । अस्यार्थस्य प्रकृतेऽपेक्षितत्वात् । य(प)कारोऽपपाठ एव । णिजन्तता वा कल्पनीया । लाजशब्दस्य बहुवचनान्तत्वं पुंलिङ्गं च दाराक्षतलाजानां बहुत्वं चेति लिङ्गानुशासनसूत्रेण ।

अनुपदह्यमानाः परिशेरते ।

उपशब्दोऽत्रात्यर्थकः । यावदुद्वासनं स्वे स्वे कपाल एव परिशेरतेऽवस्थिता भवेयुः । अनुपदह्यमाना इति वचनाद्यथाऽतिदाहो न भवति तथा क्रमेण भर्जनम् । किंचिद्दाहस्य दुष्परिहार्यत्वान्नावर्जनीयत्वम् । महापितृयज्ञे तु बहुरूपा धाना भवन्तीति श्रुतेः कासांचिदतिदाहोऽपि न दोषाय । अन्यथा बहुरूपत्वमनुपपन्नं स्यात् । आप्यनिनयनं गार्हपत्यस्य पश्चादेव महावेद्या आस्तृतत्वात्, जघनेन गार्हपत्यमाप्येभ्यो निनीयेति बौधायनोक्तेश्च ।

यत्प्रागलंकरणात्तत्कृत्वा विभागमन्त्रेण धाना विभज्य पिष्टानामावृताऽर्धाः सक्तून्कृत्वा संयवनमन्त्रेण संयौति स करम्भो भवति ।

वाजिनपात्रं प्राशित्रहरणं चाऽऽसादितैर्वेदाग्रैः संमृज्य तानि प्रहृत्य धानादीनि उद्वासयति । धानाभ्यो लाजाम्यश्चाध्यूहनाभावादेवाङ्गारापोहनाभावः । अधिश्रयणमन्त्र ऊहः कृतश्चेदभिमन्त्रणादिमन्त्राणामप्यूहः । इदमहं सेनाया इति पुरोडाशस्यैव ।

---

१ ख. ग. 'ति प्रैषोऽस्त्ये' । २ ख. ग. 'व । प्रैषार्थं' ।

सूर्यज्योतिषो विभात महत इन्द्रियायेत्यूहेन प्रकृतिवद्धाना अभिमन्त्र्य तथैव लाजानूहेन प्रकृतिवद्धाऽभिमन्त्र्य प्रकृतिवदेव पुरोडाशमभिमन्त्र्य स्योनं व इति ऊहेन प्रकृतिवद्धानार्थपात्र उपस्तीर्य तथैव लाजार्थपात्रे उपस्तीर्य स्योनं त इति पात्र्यामुपस्तीर्याऽऽमिक्षावाजिनोद्धरणपात्रयोस्तूष्णीमुपस्तृणाति । धानानामत्र नाभिघारणम् । आप्यायतां घृतयोनिरग्निः० खमङ्ग्ध्वं त्वचमङ्ग्ध्वं सुरूपान्वो वसुविदः पशूनां तेजसा सरस्वत्यै भारत्यै जुष्टानभिघारयामीति लाजानभिघारयति । अनूहो वा । सर्वैन्द्रत्वपक्षे तूष्णीमभिघारणम् । तूष्णीं पुरोडाशमभिघार्य यस्त आत्मेत्यामिक्षामभिघार्य वाजिनमभिघारयति । आर्द्रा भुवनस्य गोपाः शृता उत्स्नान्ति जनिभ्यो मतीनामित्यूहेन कपालाद्धाना उद्वासयति । प्रथस्नुपदस्यालोपो वा । अस्मिन्पक्षे प्रथस्नव इत्यूह ऊहपक्षे । अनूहो वा । तस्मिन्सीदताऽमृते प्रतितिष्ठत यवानां मेधाः सुमनस्यमाना इति उपस्तीर्णे स्वपात्रे निदधाति । अनूहो वा । तूष्णीं वा निधानम् । जनितार इति लाजोद्वासनमन्त्र ऊहपक्षे धानोद्वासनमन्त्रतो विशेषः । तस्मिन्सीदताऽमृते प्रतितिष्ठत व्रीहीणां मेधाः सुमनस्यमाना इत्युपस्तीर्णे स्वपात्रे निदधाति । अनूहो वा । प्रकृतिवत्पुरोडाशमुद्वासयति । ततो दृꣳहेत्यामिक्षामुद्वास्य तथैव वाजिनमुद्वासयति । तत इरा भूतिरिति अञ्जनं संख्यानमुद्वासनं च क्रमेण कपालयोर्द्वयोः कृत्वा पुरोडाशकपालानां करोति । एतदन्ताः पदार्था अलंकरणप्राग्भूतास्तान्कृत्वा यथाभागं व्यावर्तेथामिति धानाः समशो द्वेधा विभज्येदमिन्द्राय हरिवते चेदमिन्द्राय पूषण्वते चेति देवतोपलक्षणं करोति । सर्वैन्द्रत्वपक्ष उभयत्रेन्द्राय चेत्येव । तूष्णींत्वव्यावृत्त्यर्थं विभागमन्त्रेणेति वचनम् । यथा धानाः सर्वा आज्येन स्निग्धा भवन्ति तथाऽत्राभिघारणं धानानां तूष्णीमैन्द्राग्नविकारत्वात् । ततोऽर्धानां करम्भं करोति । अथवा करम्भोत्पत्त्यनन्तरं वा धानानामभिघारणं तदनन्तरं करम्भस्येति । पिष्टानामावृता पिष्टानां याऽऽवृत्करणप्रकारः कृष्णाजिनादानादिरवेक्षणादिर्वा तेन प्रकारेणार्धधानाः सक्तून्सक्तुरूपाः करोति । द्वितीयपक्षे कृष्णाजिनशम्यादृषदुपलास्तथैवावस्थिता भवेयुः । यवानां पिष्टानि सक्तव इत्युच्यन्ते । सक्तुशब्दो नित्यं बहुवचनान्तः पिष्टशब्दवत् । संयवनमन्त्रो जनयत्यै त्वा संयौमीति । अनेन मन्त्रेणाऽऽज्येन ततः संयौति मिश्रयति यथाऽऽज्यप्लुतो भवति तथा । संयवने सति स पदार्थः करम्भसंज्ञको भवतीत्यर्थः । संयवनमन्त्रेणेतिवचनं प्रकृतौ पिण्डार्थानयनस्य दृष्टार्थत्वादिह तदभावान्मन्त्रनिवृत्तिरित्याशङ्कां निराकर्तुम् । केचित्तु संयवनमन्त्रेणेत्युपलक्षणं तेनाऽऽदित आज्यस्यापि प्रणयनं कार्यम् । समाज्यमाज्येनाग्मत्समोषधयो रसेन सꣳ रेवञ्जगतामधुमन्मधुमता सृज्यस्वेति विकारः । तत एव तत्समाज्यमा-

१ ख. ग. 'जिनयोरुद्ध' ।

उत्पातपरिप्रजातमसीत्यानीय समाज्येन पृच्यस्वेति परिप्लाव्य जनयत्यै त्वेति संयौतीति । तत्तुच्छम् । उपलक्षणपरतायां प्रमाणाभावात् । एतदाज्यमैष्टिकमेव । अपूर्वाज्यमिति केचित् । यजुरुत्पूतमित्यन्ये । विभागोत्तरमभिघारणं स्पष्टमापस्तम्ब आह—उद्वासनकाले धाना उद्वास्य विभागमन्त्रेण विभज्यार्धा आज्येन संयौत्यर्धाः पिष्टानामावृता सक्तून्करोतीति । अत्र संयवनमभिघारणमेव परं तु किंचित्सविशेषं शब्दान्तरोपबन्धात्सद्द्रष्टव्यम् । स च सर्वव्यापिस्निग्धतारूपः । मन्थं संयुतं करम्भ इत्याचक्षत इत्यप्यापस्तम्बः । परिशेषाल्लाजानां परिवापसंज्ञाऽर्थत एव सिद्धा भवतीति संज्ञाकरणाभावः । आपस्तम्बस्तु स्पष्टमेवाऽऽह—लाजान्परिवाप इति । परितो भर्जनसमये वाप इव वापो भवति यासां ताः परिवाप इत्यन्वर्थसंज्ञयाऽपि लाजवाचकत्वम् । लाजेभ्यस्तुषाणां निःसारणे नखानामेव योग्यता नोलूखलस्य । अन्यथा लाजानां खण्डितत्वापत्तेरित्येतादृशार्थस्य लोकत एव सिद्धत्वादनुक्तिः । स्पष्टमेतदुक्तमापस्तम्बेन—नखैर्लाजेभ्यस्तुषान्संहरति नखेरूलूखलधर्मान्मुसलधर्मांश्च करोतीति । संहरणमपोद्धरणम् । तुषविमोकार्थं सवनीयकर्म कर्तुर्नखैरूलूखलधर्मान्मुसलधर्मांश्च करोति । तेषां संमर्शनप्रोक्षणे अपि काले कृते भवतः । ततो लाजेषूद्वासितेषु कृष्णाजिनादानादिमसदुपसमसनान्तं कृत्वाऽधिषवणानि स्थ मानुषाणि प्रति वोऽदित्यास्त्वग्वेत्तु इति स्ववामहस्तनखानि निधाय तेषु प्रकृतिवदोप्यादयः स्थ मानुषास्त इदं देवेभ्यो हव्य९ सुशमिशमीष्वमिति आदानं भावयज्ञपित्वाऽव रक्षो दिवः सपत्नं वध्यासमिति तुषान्निःसारयित्वोत्करे निनीय वर्षवृद्धमसीति जपित्वा वर्षवृद्धाः स्थेत्यभिमन्त्र्याद्वपनपरापवनमन्त्रौ जपित्वा पराध्माता अमित्रा इति तुषानभिमन्त्रयते । तथा च भरद्वाजः—तत्राऽऽवपनमन्त्रोऽवहननमन्त्र उद्वपनमन्त्रो निष्पवनमन्त्र इति क्रियते पाण्योरुलूखलमुसलधर्माः क्रियेरन्निति । ततो हस्तेन तुषानुपवपति कपालानामुपहितत्वात् । केचित्तु सतुषेष्वपि लाजशब्दो वर्तते तेन नास्ति तुषविवेचनमिति प्राहुस्तन्न । सतुषस्य यागयोग्यत्वाभावात्, लोकप्रसिद्धिविरोधात्, आपस्तम्बभरद्वाजाभ्यां स्पष्टतया तुषविमोचनस्योक्तत्वाच्च । औपासनहोमे व्रीहीणां स्वरूपत एव होमसाधनत्वं तु वाचनिकम् ।

अनलंकृतेष्वभूदु पारुशत्पशुरामिरधाय्यग्निर्व इत्येतस्या९ शस्यमानायां९ शृणोत्वग्निः समिधा हवं म इत्येतचतुर्गृहीतं जुहोति ।

नालंकृता अनलंकृतास्तेषु अनलंकृतेषु । पुरोडाशविशेषणमेतत् । तथा चायमर्थो भवति अनलंकृतेषु पुरोडाशेषु सत्स्विति । अनलंकृतेष्वित्यत्र प्रतिप्रस्थात्रेति शेषः । अत्रालंकरणशब्देन लक्षणयाऽभिघारणं गृह्यते न तु देवस्त्वा सवितेति अभ्यञ्जनमुपाञ्जनं च । अन्यथाऽग्रे विधास्यमानेनालंकरणेनैवात्र तदभावे सिद्धेऽनलंकृतेष्विति वचनस्य वैयर्थ्यापत्तेः । तथा चेदं सिद्धं भवति शृणोत्वग्निरित्याहुतेरनन्तरमभिघारणमिति । अपूर्वा

इति शस्यमानायामित्येतावतैव सिद्धे दीर्घप्रतीकग्रहणं पूर्वार्धस्यैव शस्यमानत्वमपेक्षत इयमाहुतिर्नोत्तरार्धस्यापीति । एतस्यामिति वचनं त्रिवारं शस्यमानायामपि प्रथमावृत्तावेवेयमाहुतिर्न द्वितीयतृतीयावृत्त्योरितिज्ञापनार्थम् । एतच्छब्दस्य सर्वनामत्वेन प्रधानपरामर्शित्वात्प्रथमावृत्तेरेवोपस्थितत्वेन स्वतःसिद्धत्वेन चतुर्गृहीतहोमस्य द्रव्यत्यागरूपत्वेन च प्रधानत्वात्प्रधानायां प्रथमावृत्तौ होमरूपप्रधानसंबन्धो युक्त इति भावः । एतच्चतुर्गृहीतमिति विशिष्टवचनं पञ्चगृहीतस्यापि पक्षे प्राप्तिं ज्ञापयितुम् । इदं म इति मन्त्रान्तः । जुहोतिचोदितत्वात्स्वाहाकारः ।

अपरं चतुर्गृहीतं गृहीत्वा ॥ २ ॥ दर्भमुष्टिं धारयमाणोऽप इष्य होतर्मैत्रावरुणस्य चमसाध्वर्यवाद्रवैकधनिन आद्रवत नेष्टः पत्नीमुदानयोन्नेतर्होतृचमसेन वसतीवरीभिश्च चात्वालं प्रत्युपास्स्वेति संप्रेष्यति ।

अपरवचनं पूर्वेण संबन्धार्थं तेनाभूदुषा इति पूर्वार्धस्य शस्यमानत्वमत्रापि अपेक्षत एवेति सिद्धं भाति । एतस्यामित्यस्य त्वत्र नापेक्षा । पूर्वार्धे द्वयोरसंभवात्, ग्रहणस्य होमापेक्षया गौणत्वाच्च । चतुर्गृहीतवचनं पक्षे प्राप्तस्य पञ्चगृहीतस्य निवृत्त्यर्थम् । मुष्टिग्रहणं दर्भाणां बन्धनं गमयति । इष्यतिर्गतिकर्मा । होतरप इष्याप: प्रति मनसा गच्छेत्यप इष्येत्यस्यार्थः । अथवा हे होतरानेतव्या अप उद्दिश्य प्र देवत्रेत्यादिका ऋच इष्य पठेति । अपः प्रति अभीष्टं सम्यक्प्रार्थयेत्यर्थो वा । लोकेऽपीषितमभीष्टं कर्म सम्यक्क्रियते । मैत्रावरुणस्य मैत्रावरुणर्त्विक्संबन्धिन्, चमसहोमार्थोऽध्वर्युश्चमसाध्वर्युस्तत्संबोधनं चमसाध्वर्यो, इति । हे मैत्रावरुणस्य चमसाध्वर्यो स्वेन चमसेन सहाऽऽगच्छ । तथैकधनाः स्थाल्यः सन्ति येषां त एकधनिनः । हे एकधनिन एकधनास्थालीवाहिनः स्वस्वस्थालीसहिता आद्रवताऽऽगच्छतेत्यर्थः । नेष्टः पत्नीं पन्नेजनीं स्थालीं धारयमाणामुदानयेत्यर्थः । स्पष्टमाहामुमर्थमापस्तम्बः—नेष्टर्युदेहीति नेष्टा पत्नीमुदानयत्येहुदेहीति वा पन्नेजनीः स्थालीं धारयमाणामिति । उन्नयति चमसेषु सोमरसमृत्विनश्चोदकादिति उन्नेता । हे उन्नेतर्होतृचमसेन वसतीवरीभिश्च सह चात्वालं प्रति चात्वालाभिमुखमुप चात्वालसमीप एवाऽऽस्स्वोपविशेत्यर्थः ।

मैत्रावरुणचमसाध्वर्युश्चमसमादायाऽऽद्रवति ।

अप इष्य होतरिति होतृप्रैषार्थस्य व्याख्यानसापेक्षत्वाभावात्स्पष्टत्वाच्चानुक्तिः । मैत्रावरुणस्य चमसाध्वर्यवाद्रवेति प्रैषे चमसेन सहाऽऽद्रवणस्यानुक्तत्वात्केवलस्याऽऽद्रवणं स्यात्तन्मा भूत्किं तु चमसेन सहैवाऽऽद्रवणं यथा स्यादित्येतादृशार्थविशेषं प्रदर्शयितुमिदं सूत्रम् । मैत्रावरुणस्य चमसाध्वर्युर्मैत्रावरुणचमसाध्वर्युश्चमसं मैत्रावरुणस्य । स्वस्य मैत्रावरुणचमसाध्वर्युत्वान्मैत्रावरुणचमसस्यैवाऽऽदानम् ।

त्र्यवरार्धा अयुज एकधनास्थालीरादायाऽऽद्रवन्ति।

तिस्रोऽवरो न्यूनोऽर्धो भागो यासां तास्त्र्यवरार्धाः। अर्धशब्दो भागवाची। अयुजो विषमाः। एकधनास्थालीरिति एकमेव पदम्। एकधनासंज्ञकानामपां स्थालीर्यथायथं परिकर्मिण आदायाऽऽद्रवन्ति। बहुकर्तृकत्वाद्बहुवचनम्। एकैकां स्थालीं प्रत्येकैकपरिकर्मी न त्वेकेन द्वे स्थाल्यौ द्वाभ्यां हस्ताभ्यामादातव्यौ। वामहस्तेन जलाहरणस्य सर्वदाऽपि स्मृतौ निषिद्धत्वस्योक्तत्वात्तदर्थं पुरुषभेद आवश्यक एव। अयुज इत्यनेन समसंख्याव्यावृत्तिः। अयुक्त्वावधिनियम आपस्तम्बेनोक्तः—एतस्यैव हविर्धानस्य पश्चादक्षं त्रीनेकधनान्धटान्पञ्च सप्त नवैकादश वेति। बौधायनोऽपि प्रैषविशेषमेवोक्तवान्—अयुज एकधनाश्चस्त्र्यवमानेकादशपरमानिति। त्रिप्रभृतीनां विषमसंख्यानां संस्थावशाद्विनिवेश उक्थ्ये पञ्च, षोडश्यां सप्त, अतिरात्रे नव, अप्तोर्याम एकादशेति।

प्रेष्योदेहीति नेष्टा पत्नीमुदानयति।

प्रैषेणैव नेष्टृकर्तृकत्वे सिद्धे पन्नेजनीग्रहणार्थनयनमेव नेष्टृशब्दार्थ इति प्रदर्शयितुं नेष्टृग्रहणम्। नेष्टा पत्नीमुत्थाप्याऽऽनयति। उच्छब्दादुत्थाप्याऽऽनयति। पूर्वमेव केनचिदपि निमित्तेनोत्थितामपि उपवेश्य मन्त्रेणोत्थाप्यैवाऽऽनयतीत्यर्थः। पन्नेजनीं स्थालीं धारयमाणामित्यापस्तम्बः। पत्नूत्तरेणाऽऽग्नीध्रीयं परीत्य गमनं सर्वत्र यथोत्तरेणान्तर्वेदि संचरो भवतीति, इति संचरणार्थस्थलाविशेषवचनादिति केचित्, तत्तुच्छम्। वैसर्जनहोमादिषु तद्देशागमनविधानस्य वैयर्थ्यापत्तेः। अतो यत्र विधानं तत्रैव नान्यत्रेति द्रष्टव्यम्। एतेन वैसर्जनमार्गेण पत्न्यानयनमिति प्राचीनोक्तिः परास्ता। पत्न्यनेकत्वे सर्वा अपि पर्यायेणोदानयति। मा मा हिंसीरिति मन्त्रान्तः। उन्नेतुः कर्मणः प्रैषेणैव स्पष्टतयाऽर्थावगमादकथनम्। अत्र विशेषमाहाऽऽपस्तम्बः—तीर्थेनाभिप्रव्रजन्तीति। चात्वालोत्करयोरन्तरालं तीर्थं तेन सर्वे गच्छन्तीत्यर्थः।

यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात्तदपोऽध्वर्युर्गृह्णीयात्।

यत्र यस्मिन्प्रदेशेऽपां ग्रहणार्थं स्थितः सन्प्रातरनुवाकमनुब्रुवतो होतुः प्रातरनुवाकमुपशृणुयात्तत्र तस्मिन्प्रदेशेऽपोऽध्वर्युर्गृह्णीयादित्यर्थः। वहन्तीनामित्यापस्तम्बः। अध्वर्युग्रहणं नेष्टृनुवृत्तिं वारयितुम्। अपां ग्रहणकाले प्रातरनुवाकाश्रवणे दोषमाह स एव—यदि न शृणोति बधिरो ह भवति वाचो ह विच्छिद्यत इति। वाचो ह विच्छिद्यते मूको भवतीत्यर्थः।

ननु यदि तावति देश आपो न स्युस्तदा किं कर्तव्यमित्याकाङ्क्षायामुपायमाह—

यदि दूरे स्युरुद्(दु)ष गृह्णीयाद्यत्र होतुः शृणोति।

यदि प्रातरनुवाकश्रवणं यत्र स्थितस्य न जायते तावति दूरे प्रदेश आपः

स्युस्तदोदू(दु)ह्य यत्र स्थितस्य प्रातरनुवाकश्रवणं मायेत तावत्परिमिते समीपे प्रदेशे ताभ्योऽह्योऽप आनीय तत्र स्थापयित्वा गृह्णीयात् । तथा च श्रवणमेवाऽऽवश्यकम् । मैत्रायणीयब्राह्मणे यन्नोपशृणुयाद्बधिरः स्यादिति दोषश्रवणादिति भावः । सामान्यप्रतिज्ञेयम् ।

कथमित्याकाङ्क्षायामाह—

अप्सु तृणं प्रास्य देवीराप इत्येतच्चतुर्गृहीतं जुहोति ।

या ग्रहीतव्या आपस्तासु, दर्भानियमार्थं तृणवचनं, प्रास्य प्रक्षिप्य । एकवचनादेकमेव तृणं, जात्यभिप्रायं चैकवचनम् । एतच्छब्दः सुपां सुलुगित्यनेन लुप्तसप्तमीको द्रष्टव्यः । तेनैतस्मिन्नित्यर्थो भवति । तथा च तृणमभिलक्षीकृत्यैव जुहोतीति सिद्धं भवति । अपरं चतुर्गृहीतं गृहीत्वेति पूर्वं गृहीतं चतुर्गृहीतमेव तस्यैवार्थादेव लाभे चतुर्गृहीतवचनमन्यत्रापि राजसूयेऽभिवासितैर्वायव्यैरपां ग्रहान्गृह्णाति देवीरापो अपां नपाद्राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहेति सारस्वतीष्वप्सु हुत्वैतेनैव गृह्णात्यर्थेऽतः स्येति चैवमितराास्वित्यनेन विहितेऽप्सु होमे चतुर्गृहीतलाभार्थम् । भागः स्थ स्वाहेति मन्त्रान्तः ।

शेषं वा करोति ।

चतुर्गृहीतं सर्वं जुहोति शेषं वा करोति चतुर्थं भागं हुत्वा भागत्रयमवशेषयतीत्यर्थः । अब्ग्रहणानुकूलत्वाय स्वल्पस्यैव होतव्यत्वात् । सर्वस्य होमेऽपि अञ्जनमात्रार्थं तु अवशेषणीयमेव । तत्सर्वं जुहोतीति वक्ष्यमाणसूत्रे सर्ववचनेन स्वल्पाज्यावशेषः कर्तव्य एवेत्यर्थबोधनात् । अञ्जनपदार्थस्य बिन्दुमात्राज्यसाध्यत्वं सर्वत्रेति जुह्वा ध्रुवां त्रिः समनक्तीत्यस्मिन्सूत्रे प्राचीनैर्व्याख्यातृभिरुक्तं चास्ति । अतोऽत्र कार्यसत्त्वादञ्जनपर्याप्तमवश्यमवशेषणीयमेवेति ।

यदि वा पुरा तृणं भवति तस्मिन्नेव जुहोति ।

तृणप्रासनात्पुरा पूर्वमेव स्वतस्तृणमुपस्थितं भवति तदा तत्संस्तम्भयित्वा तस्मिन्नेव तज्जुहोति न तु तृणप्रासनमाहुत्यर्थं कर्तव्यमित्यर्थः ।

कार्षिरसीति दर्भैराहुतिमपप्लावयति ।

दर्भैरिति वचनाद्विस्तंसनं मुष्टेः । आहुतिमाहुतिसंबन्धि आज्यमपप्लावयति अपोहति ग्रहणप्रदेशाद्दूरी करोतीति यावत् । मृध्रमिति मन्त्रान्तः ।

समुद्रस्य वोऽक्षित्या उन्नय इत्यघृतलिप्तानां मैत्रावरुणचमसेनोन्नयति ।

आहुतेरपप्लावनमदृष्टार्थं न भवति किंतु अघृतलिप्तग्रहणानुकूलतारूपदृष्टप्रयोजनमिति प्रदर्शयितुमघृतलिप्तानामिति । तेनाऽऽहुतेरपप्लावनेनाघृतलिप्तानां ग्रहणमसंभवि चेत्तदा

पुनर्मन्त्रेणाऽऽहुतेरपप्लावनमिति सिद्धं भवति। मैत्रावरुणचमसेनोन्नयति उद्धरतीत्यर्थः। अत एवावयवषष्ठ्या उपादानम्। तेन मैत्रावरुणचमसेन यावतीनामपामुन्नयनं भवति तावतीरुन्नेया इति सिध्यति। नच मैत्रावरुणचमसेनाम्यस्मिन्पात्रे सर्वासामघृताच्छिंसानामपामुद्धरणं षष्ठी तु द्वितीयार्थे भविष्यतीति वाच्यम्। एकधनापन्नेजनीग्रहणार्थेऽस्य उपयोगस्य सत्त्वात्। सर्वग्रहणासंभवेन षष्ठ्या द्वितीयार्थकत्वकल्पनाया अत्यन्तविरुद्धत्वात्प्रकृतानुपयोगाच्च। एतावानेव मन्त्रः।

एतेनैव मन्त्रेणैकधनासु।

गृह्णातीत्येव शेषः। समुद्रस्येत्येतेनैव मन्त्रेणैकधनासु एकधनार्थासु स्थालीषु गृह्णातीत्यर्थः। सप्तमीनिर्देशादन्येन पात्रेण ग्रहणं गम्यते। एवकारः सोमस्य त्वा मूजवतो रसं गृह्णामीत्यापस्तम्बोक्तस्येन्द्राय वो जुष्टान्गृह्णामीतिबौधायनोक्तस्य सूत्रान्तरोक्तानां मन्त्राणां च निरासाय। तेन तदुक्तो विधिस्तु अस्माकमप्यभिमत एवेति दर्शितं भवति। तेन स्थालीभिरपि ग्रहणं पक्षे सिद्धं भवति।

वसुभ्यो रुद्रेभ्य आदित्येभ्य इति पत्नी पन्नेजनीर्गृह्णाति।

अध्वर्युव्यावृत्त्यर्थं पत्नीग्रहणम्। पादौ निज्येते प्रक्षाल्येते याभिस्ताः पन्नेजन्यस्ता वसुभ्य इति मन्त्रेण पान्नेजनीस्थाल्या गृह्णातीत्यर्थः। पन्नेजनं च पत्नीसंस्कारः। तेन सर्वाभिरपि पत्नीभिः स्वस्वस्थाल्या ग्रहणं कर्तव्यम्। प्रत्यङ्तिष्ठन्तीत्यापस्तम्बः। पन्नाय वः पन्नेजनीर्गृह्णामीत्येव मन्त्रान्तः। तथैव पेठतुर्बौधायनभारद्वाजौ।

ये स्थालीराहरन्ति त आनयन्ति।

यो यो यां यां स्थालीमाहरति स स तां तामानयति न वैपरीत्येन नचान्यो यः कश्चनेति। मैत्रावरुणचमसस्याऽऽनयनं तदीयचमसाध्वर्युत्वात्तत्कर्तृकमित्यर्थत एव सिद्धम्। ये स्थालीराहरन्ति त आनयन्तीति स्थालीविषय एव नियमान्न होतृचमसवसतीवर्याहरणवदुन्नेतृकर्तृकत्वस्याऽऽनयने नियमः। तेन वसतीवर्यानयनं परिकर्मिकर्तृकं होतृचमसानयनं तदीयचमसाध्वर्युकर्तृकमिति सिद्धं भवति।

तेनैव मन्त्रेण नेष्टा पत्नीमुदानयति।

तेनैवेत्येवकारेणेह्युदेहीति पाक्षिकमापस्तम्बोक्तं पाठान्तरं व्यावर्त्यते। अथवा तेनेत्यनेन मार्गः परामृश्यते। तेन येन मार्गेणाऽऽनीता तेनैव मार्गेणेत्यर्थो भवति। अनेनाऽऽगमनमार्गाधीन एव प्रत्यागमनमार्गो न तु ऐच्छिकत्वमिति प्रदर्श्यते। मन्त्रेणेत्यत्राऽऽगमने दृष्टस्यैव मन्त्रस्य ग्रहणम्। मन्त्रेणेति वचनं तूष्णींत्वव्यावृत्त्यर्थं पन्नेजनीग्रहणार्थानयनविषयकप्रैषवत्प्रत्यागमनविषयकप्रैषाभावेन नेष्टुरप्राप्तौ सत्याम-

ध्वर्योरेव यजुर्वेदेनाध्वर्युः करोतीति परिभाषया प्राप्तिः स्यात्सा मा भूत्किं तु नेष्टुरेव प्राप्तिर्यथा स्यादित्येतदर्थम् ।

पूर्वेण द्वारेण सदः प्रविश्याग्रेण प्रशास्त्रीयं धिष्णियं परीत्यापरेण नेष्टुर्धिष्णियं वसुभ्यो रुद्रेभ्य आदित्येभ्य इति पत्नी पन्नेजनीः सादयति ।

सदःपर्यन्तं मार्गः स एवानन्तरं तेनैव मार्गेणेत्यनेन प्राग्वंशपर्यन्तो मार्गोऽपि प्राप्तः सोऽनेन निवार्यते । अग्रेणेत्यनयाऽपरेणेत्यनया चोभयक्रिययोस्तत्तत्पदार्थाभ्यां सांनिध्यं बोध्यते । ननु अत्र प्रशास्तृधिष्ण्यविषये तद्धितान्तं विशेषणं नेष्टृधिष्ण्यविषये नेष्टृसंबन्धित्वं विशेषणम्, एवं च किमनयोर्वैरूप्यमिति चेत् । उच्यते—प्रशास्तृधिष्ण्यविषये तत्तत्तयैव निर्वाहो नतु तस्य सांनिध्यमपि नेष्टृधिष्ण्यविषये तु नेष्टृसांनिध्यमपि आवश्यकमित्येवंरूपं वैरूप्यमस्त्येवेति प्रदर्शयितुमेकत्र तद्धितान्तत्वेनापरत्र संबन्धित्वेन विशेषणोपादानात् । धिष्णियधिष्ण्यशब्दौ पर्यायौ । तेन घटकलशशब्दवल्लाघवगौरवविचारोऽत्र नेति द्रष्टव्यम् । पर्यायशब्दानां गुरुलाघवचर्चा नाऽऽद्रियत इति व्याकरणपरिभाषाऽपि । वसुभ्यो रुद्रेभ्य आदित्येभ्य इति ग्रहणलिङ्गकत्वाद्गृह्णामीत्यन्तो ग्रहणे सादनलिङ्गकत्वाद्यज्ञाय वः पन्नेजनीः सादयामीत्येतावानेव सादन इत्येवं स्यात्तन्मा भूत्किं तु वसुभ्यो रुद्रेभ्य आदित्येभ्य इत्यादिरेवोभयत्र ग्रहणे सादयामीत्यत्र गृह्णामीत्यूहेन सादने गृह्णामीत्यत्र सादयामीत्यूहेनैकस्यैव मन्त्रस्य विनियोगो यथा स्यादित्येवमर्थम् । तथा चैवं द्वयोर्मन्त्रयोः पाठः—वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीर्गृह्णामीति ग्रहणमन्त्रपाठः । वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पन्नेजनीः सादयामि यज्ञाय वः पन्नेजनीः सादयामीति सादनमन्त्रपाठः । पत्नी यथेतमेत्य प्राग्वंशे प्रविशतीति नेष्टा सदस्येवोपविशति ।

वसवो रुद्रा आदित्या एता वः पन्नेजनीस्ता रक्षध्वमिति वा ।

स्पष्टम् ।

चात्वालमितरे यन्ति ॥ ३ ॥

पत्नीनेष्टुन्नेतृहोतृचमसाध्वर्युवसतीवरीप्रत्यानयनार्थपरिकर्मिव्यतिरिक्ता अध्वर्युब्रह्मयजमाना मैत्रावरुणचमसाध्वर्युरेकधनिनश्च ।

सं वो दधातु वरुणः समिन्द्रः सं धाता सं बृहस्पतिः । त्वष्टा विष्णुः प्रजया सꣳ रराणो यजमानाय द्रविणं दधातु यथाधुरं धुरो धूर्भिः कल्प-

न्तामित्युपरि चात्वाले होतृचमसं मैत्रावरुण-
चमसं च सꣳस्पर्श्य वसतीवरीर्व्यानयति ।

कल्पन्तामित्यन्तेन मन्त्रेण चात्वालस्योपरि होतृचमसं मैत्रावरुणचमसं च सम्य-क्स्पर्शयित्वा वसतीवरीसंज्ञका अपो व्यानयति होतृचमसमैत्रावरुणचमसयोः परस्परं ताभ्यामेवाऽऽनयतीत्यर्थः । विशब्दात्परस्परमानयनम् । संस्पर्श्येत्ययं ल्यप्समानका-लिकत्वार्थे मुखं व्यादाय स्वपितीतिवत् । तेन यावत्पर्यन्तं परस्परमानयनं तावत्पर्यन्तं संस्पर्श इति सिध्यति । अयमर्थः स्पष्टः सूत्रान्तरे—उपरिचात्वाले संस्पृष्टयोर्होतृचमस-मैत्रावरुणचमसयोर्वसतीवरीरध्वर्युर्व्यानयतीति । संस्पृष्टयोरिति सति सप्तमी । तेन समानकालिकता लभ्यते । णिच्प्रयोगादन्यकर्तृकता संस्पर्शने । असंभवपरिहाराय युक्तैवान्यकर्तृकता । संशब्दाद्दक्षिणहस्तगृहीतस्य होतृचमसस्य प्राग्दण्डस्योत्तराङ्गं वामहस्तगृहीतस्य मैत्रावरुणचमसस्य प्राग्दण्डस्य दक्षिणाङ्गं यथा संश्लिष्टं भवति तथा स्पर्शः कर्तव्य इति बोध्यते । सामान्यप्रतिज्ञेयम् ।

कथमित्याकाङ्क्षायां विशेषमाह—

होतृचमसे वसतीवरीणां निषिच्य[1] मैत्रावरुण-
चमस आनयति मैत्रावरुणचमसाद्धोतृचमसे ।

वसतीवरीणामित्यवयवषष्ठी । वसतीवरीणामवयवं होतृचमसपर्याप्तं होतृचमसे निषिच्य स्रावयित्वा तस्मान्मैत्रावरुणचमस आनयति अर्धं तस्मान्मैत्रावरुणचमसादर्धं होतृचमसे । आनयतीत्ययं व्यानयनपदार्थः । पञ्चमीश्रवणात्पात्रान्तरेण व्यानयनं न तु ताभ्यामेव व्यानयनम् । वः संदधात्विति लिङ्गाद्व्यानयने मन्त्रः । होतृचमसान्मैत्राव-रुणचमस आनयने मैत्रावरुणचमसाद्धोतृचमस आनयने च मन्त्रः । निषेचने न मन्त्रः । तस्य व्यानयनरूपत्वाभावात् । अत एव धात्वन्तरं प्रयुक्तम् । निशब्दात्पूरणं सूचितं भवति । स्रावणशब्दात्स्वल्पं स्वल्पं विच्छिद्य विच्छिद्याऽऽनयनमस्कन्दनाय । अत्राऽऽ-पस्तम्बो विशेषमाह—समन्या यन्तीत्यभिज्ञाय होतृचमसान्मैत्रावरुणचमस आनयति मैत्रावरुणचमसाद्धोतृचमस एतद्वा विपरीतमिति ।

होतृचमसं मैत्रावरुणचमसं च प्रचरण्या समनक्ति
सं वोऽनक्तु वरुण इति मन्त्रादिं संनमति ।

सं वो दधात्वित्येतस्य स्थाने सं वोऽनक्त्विति मन्त्रादिं प्रयोजयति । दधात्विति प-दस्य स्थानेऽनक्तु इति पदं प्रयुनक्तीति तात्पर्यार्थः । होतृचमसमैत्रावरुणचमसश-ब्दाभ्यां तद्गता आपो लक्ष्यन्ते । सं वोऽनक्त्विति मन्त्रलिङ्गात् । तथा चापामेवाञ्जनं न

१ ख. म. ड. निःषिच्य ।

पात्रयोः। द्रव्यभेदान्मन्त्रावृत्तिः। यस्यां प्रथमतश्चतुर्गृहीतं गृहीतं सैवात्र प्रचरणी नान्येति। तेन या वैसर्जनहोमार्था साऽत्र न भवतीति सिद्धं भवति। मन्त्रादीनिति-बहुवचनान्तः पाठोऽपपाठ एव।

होतुरन्तिकमायन्ति।

अन्तिकं समीपम्। उन्नेत्राद्यर्थमन्तिकागमनवचनम्। अध्वर्योस्तु प्रश्नविधेरेव समीपे गमनं सिध्यति। अत्र क्रमविशेषो मानवसूत्रे—हविर्धानमभ्युदानयन्त्यग्रतो मैत्रावरुणचमसीया होतृचमसीया वसतीवरीरनुपूर्वं सवनीयकलशानिति।

अध्वर्योऽवेरपा३ इति होताऽध्वर्युं त्रिः पृच्छति।

अध्वर्यो किमसि लब्धवानप इति प्रश्नार्थः। प्रश्ने प्लुतिः।

उतेमनन्नमुरुतेति त्रिः प्रत्याह।

उतेमनन्नमुरुतेत्यन्तं प्रतीकग्रहणम्। उतेमनन्नमुरित्यन्तमेव प्रत्युत्तरवाक्यम्। उतेमाः पश्येति तस्यैव व्याख्यानम्। अत एव वावैतदाहेति विवरणप्रवादः संगच्छते। बाह्वृच्येऽप्येवमेव व्यक्तमुक्तम्—यथोतेमनन्नमुरित्यध्वर्युः प्रत्याहोतेमाः पश्येत्येवमेव तदाहेति। तथा च श्रुतिद्वयानुरोधेनोतेमाः पश्येत्यस्योतेमनन्नमुरित्येतद्व्याख्यानमेव न तु तावदन्तमेकमेव वाक्यमिति निरसितुम्। यत्रेति शब्दद्वयं तत्राऽऽद्यस्य वाक्यस्य द्वितीयं वाक्यं व्याख्यानं न तु वावैतदाहेत्यस्य व्याख्यानपरता। प्रकृत इतिकारद्वया-भावात्प्रतिवचनार्थमेकमेव वाक्यम्। वावैतदाहेत्यस्यार्थस्तु बाह्वृच्ये। आद्यवाक्य-स्योत्तरं वाक्यं व्याख्यानरूपमेव। तेनोतेमनन्नमुरित्येतावत एव वाक्यस्य प्रयोग इति न किंतु सर्वमेवैतद्वाक्यमाहेति भावः। वावशब्दोऽवधारणे। केवलं लब्धवानस्मीत्येता-वदेव न भवति उतापि तु ता अनन्नमुरुपसंप्राप्ता एव। दूरवर्तित्वेऽपि सत्त्वमात्रेण लाभो भवति तदुपसंप्राप्तिर्लाभादतिरिच्यते। हे होतर्न केवलं मद्वचनमात्रेण विश्वसिहि किं त्विमाः पुरोवर्तिनः पश्येत्युतेमनन्नमुरुतेमाः पश्येत्यस्याध्वर्युप्रवक्तव्यस्यार्थः। क्रमेण प्रश्नप्रतिवचने। एकैकप्रश्नोत्तरमेकैकं प्रतिवचनं न तु प्रश्नत्रयानन्तरं प्रतिवचनत्रयमिति।

यमग्ने पृत्सु मर्त्यमिति प्रचरण्या क्रतु-
करणं जुहोति यदि शेषो भवति।

प्रचरणीग्रहणं परिभाषार्थं वैसर्जनहोमव्यतिरिक्तेषु सर्वेषु कर्मस्वपीयमेव प्रचरणी दाक्षिणहोमे तु वैसर्जनहोमीयेति। अस्ति च दाक्षिणहोमे यथा वैसर्जनानीत्यतिदेश-स्तेनैव वैसर्जनहोमीयप्रचरणीप्राप्तिः। क्रतुव्या(र्या)वृत्तिः क्रियतेऽनेनेति क्रतुकरणम्। समाख्या संव्यवहारार्था पञ्चदशाब्दे सदः क्रतुकरण९ हुत्वेत्यादौ। शेषं वा करोतीति पूर्वत्र पक्षान्तरमुक्तं तत्कल्पे शेषः संभवति तदा शिष्टं सर्वमेव जुहोति। शश्वतीरिष इति मन्त्रान्तः। जुहोतिचोदितत्वात्स्वाहाकारः।

यदि शेषो न भवति तदोपायमाह—

अविद्यमानेऽन्यच्चतुर्गृहीतं गृहीत्वा तत्सर्वं जुहोति ।

आज्यशेषाकरणेन कृतस्य शेषस्य नाशेन वाऽविद्यमानं स्रुचि आज्यं चेत्तदाऽन्यच्चतुर्गृहीतमाज्यं गृहीत्वा तदाज्यं सर्वमेव जुहोति । चतुर्गृहीतवचनं तदीयैकदेशस्य विनियोगेऽपि चतुर्गृहीतमेव ग्राह्यं न तु विनियुक्तावशेषानुसारेणेत्येतदर्थम् । अग्रे प्रयोजनाभावाद्विनियोगाभावाच्च सर्वहोमे सिद्धेऽत्र वचनं बिन्दुमात्रमपि यथा नावशिष्टं भवति तथा सर्वस्य होम इत्यर्थविशेषज्ञापनार्थम् । तच्छब्दोपादानं यदन्यद्गृहीतं तन्निरवशेषमेवात्र होतव्यमित्येतदर्थम् । तेनान्यत्रानियमः सिद्धो भवति ।

दक्षिणस्य हविर्धानस्य प्रधुरे प्रचरणीᳲ सादयति ।

सोमसंबन्धिदशापवित्रद्रूयव्यावारणचमसादिकमपि प्रचरणीवदत्रैव संसादनीयमिति-ज्ञापनार्थं हविर्धानग्रहणम् ।

यं कामयेत क्लीबः स्यादित्यधस्तात्तस्य ।

यो यजमानो यं शत्रुं क्लीबो नपुंसकः स्यादिति कामयेत तस्य यजमानस्य कृते दक्षिणहविर्धानस्याधस्तात्प्रचरणीं सादयेदित्यर्थः । अथवा तस्य प्रधुरस्याधस्तादित्यर्थः ।

पूर्वेण द्वारेण हविर्धानमपः प्रपादयति ।

प्रपादयतीत्यन्तर्भावितो णिच् । तेन परिकर्मिकर्तृकमिदम् । सर्वासामपां सहप्रवेशानुगुण्यसिद्धमेतत् ।

तासु दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्यां
पुरोक्षᳲ होतृचमसमास्पृष्टᳲ सादयति ।

तासु प्रपादितास्वप्सु मध्ये । हविर्धानग्रहणं यथा सोमाख्यं हविर्निधीयते तथैवेदमपि हविरेव समीपे निधीयते, अस्ति च सोममिश्रणद्वारा सोमाख्यप्रधानहविःसंबन्धाद्धविष्ट्वं, फलं तु होतृचमसस्थानामपां नाशे वसतीवरीश्चात्वाले नीत्वा सं वो दधात्विति होतृचमसे वसतीवरीणां निषिच्य मैत्रावरुणचमसे किंचिदानीय मैत्रावरुणचमसाद्धोतृचमसे होतृचमसं प्रचरण्या समज्य पुरोक्षᳲ सादयतीत्येवंरीत्योत्पत्तिः, मैत्रावरुणचमसस्थानामपां न समञ्जनं जातत्वादित्येतादृशार्थविशेषं ज्ञापयितुं *हविर्धानग्रहणम् । उत्तरस्यां वर्तन्यामुत्तरवर्तनीसमीपे । उत्तरवर्तनीसमीपप्रदेशोऽक्षस्य पश्चादपि तद्व्यावर्तयितुं पुरोक्षमिति । उत्तरवर्तनीसमीपरहितमक्षपुरोवर्तिनं प्रदेशं व्यावर्तयितुमुत्तरस्यां वर्तन्यामिति । होतृचमसं होतृचमसस्था अपः । चमसद्वारैव स्पृष्टत्वं न तु साक्षात्स्पृष्टत्वमसंभवात्स्कन्दनप्रसङ्गाच्च । आस्पृष्टमत्यन्तं स्पृष्टमीषत्स्पृष्टं वा ।

---

* हविर्धानग्रहणमित्यधिकम् ।

उत्तरास्मिन्हविर्धाने यथावकाशमितराः ।

उत्तरहविर्धानसमीपे यथावकाशमितरा होतृचमसस्थव्यतिरिक्ताः सर्वाः । एकधनानां पश्चादक्षमेवाऽऽसादनं वसतीवरीणां तु पुरोक्षम् । तथा चाऽऽपस्तम्बः—उत्तरस्य हविर्धानस्याधस्तात्पुरोक्षं वसतीवरीः पश्चादक्षमेकधना इति । तत्र पश्चादक्षं तिस्र एकधनास्थालीरितरास्तु यथावकाशमित्यापस्तम्बतो विशेषः ।

निग्राभ्याः स्थ देवश्रुतः शुक्राः शुक्रभृतः पूताः पूतभृत आयुर्मे तर्पयतेति होतृचमसे यजमानं वाचयति ता निग्राभ्या भवन्ति ॥ ४ ॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्ने प्रथमः पटलः ।

तत्रस्थ एव होतृचमसे होतृचमससमीपे, सामीप्येन प्रेक्षणं लक्ष्यते । तथा च बौधायनः—ताः प्रेक्षमाणं यजमानं वाचयतीति । यजमानग्रहणं पत्नीव्यावृत्त्यर्थम् । अन्यमपि विशेषमाह स एव—उरोर्वोरमिवोपनिगृह्य तासु निग्राभ्यासु यजमानं वाचयतीति । उपनिग्रहणं कृताकृतं यासां निमित्तं होतृचमसे वाचनं कृतं ता आपो निग्राभ्या निग्राभ्याभिधा भवन्तीत्यर्थः । अभिधायाः प्रयोजनं श्वात्राः स्थ वृत्रतुर इति निग्राभ्याभिरुपसृजतीत्यादावेतासां संप्रत्ययः । शुक्राः शुक्रभृतः पूताः पूतभृत इति शाखान्तरोपात्तांशरहितेन स्वशाखास्थेन विकल्पते ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्रश्नस्य प्रथमः पटलः ॥ १ ॥

अथाष्टमप्रश्ने द्वितीयः पटलः ।

दधिग्रहेण प्रचरति ।

गृह्यत इति ग्रहः । दधिरूपो ग्रहो यस्मिन्कर्मणि तदेतादृशं दधिग्रहनामकं कर्म तेन प्रचरति तदनुतिष्ठतीत्यर्थः । अत्र प्रचारशब्देनानुष्ठानरूप एवार्थो गृह्यते न तु यागः । वषट्कारसाध्यत्वाभावात् । ग्रहशब्देनात्र द्रव्यमुच्यते । सामान्यप्रतिज्ञेयम् ।

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीति दधिग्रहपात्रे दधिग्रहं गृह्णात्यपेन्द्र द्विषतो मन इति हरति प्राणाय त्वाऽपानाय त्वेति जुहोति ।

यत्पूर्वस्मिन्दिने कृतं तद्ध्यत्र । दधिग्रहं गृह्णातीत्यत्र दधिग्रहशब्दो द्रव्यपरः । अग्निहोत्रमधिश्रयतीतिवत् । दधि गृह्णातीत्येतावतैव सिद्धौ ग्रहवचनं दशापवित्रकरणकपरिमार्जनस्य प्राप्तये । हरति आहवनीयं प्रति होमार्थम् । दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति तं जहीति जुहोमीति त्रयाणां मन्त्राणां क्रमेणान्ताः । जुहोतिचोदितत्वादन्तिमस्य होमार्थस्य मन्त्रस्यान्ते स्वाहाकारः । आहवनीयस्य पश्चादुपविश्यैव होमो येन केनचिद्दधिग्रहपात्रकोणेन । अपूर्वत्वान्न दर्विहोमधर्मः । इत आरभ्याऽऽग्रयणात्प्राक्तनान्ग्रहानुपांशुस्वरेण गृह्णीयात् । आग्रयणादूर्ध्वानुपाब्दिमत्स्वरेण । तथा च श्रुतिः—यान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णीयात्तानुपांशु गृह्णीयाद्यानूर्ध्वांस्तानुपब्दिमत इति । करणवदशब्दममनःप्रयोग उपांशु सशब्दमुपब्दिमदिति प्रातिशाख्यसूत्रोक्ताभ्यामेताभ्यां स्वराभ्यां यथायथम् । आग्रयणस्य तूत्तम एव स्वरः । अयं दधिग्रहो न नैमित्तिकः । न च देवतान्तराये विधानान्नैमित्तिकत्वमिति वाच्यम् । यदिशब्दाद्यभावेन निमित्तस्याप्रतीतेः । तथा च नित्यः । तथा च चतुर्थाध्याये चतुर्थपादे जैमिनिः—दधिग्रहो नैमित्तिकः श्रुतिसंयोगात्, नित्यश्च ज्येष्ठशब्दत्वात्, सार्वरूप्याच्च नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसंबन्धादङ्गत्वाच्चान्तरायस्येति । दधिग्रहो नैमित्तिको भवति श्रुतिसंयोगाद्देवतान्तरायनिमित्तश्रुतिसंयोगादिति प्रथमसूत्रार्थः । ज्येष्ठशब्दत्वादित्यत्र शब्दः स्तुतिपरः । ज्येष्ठ इति शब्दः स्तुतिर्यस्य तस्मात् । अथवा ज्येष्ठशब्दत्वाज्ज्येष्ठशब्दवत्त्वादित्यर्थः । अथवा ज्येष्ठशब्दः प्राथम्यवचनः प्रथमं गृह्यमाणत्वात् । तथा च नैमित्तिकत्ववन्नित्यत्वं चेति द्वितीयसूत्रार्थः । सार्वरूप्याच्च प्रजापतिः सर्वा देवता इति सर्वदेवतासारूप्यादपि नित्यत्वमिति तृतीयसूत्रार्थः ।

आज्यग्रहं गृह्णीयात्तेजस्कामस्य सोमग्रहं गृह्णीयाद्ब्रह्मवर्चसकामस्येति ।

काम्याविति शेषः ।

तयोर्दधिग्रहेण कल्पो व्याख्यातः ।

तयोराज्यसोमग्रहयोः । दधिग्रहस्य यः कल्पः प्रकारः । औदुम्बरं चतुःस्रक्ति दधिग्रहपात्रमित्यस्यात्र प्राप्तिः । उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीत्यादिः प्राणाय त्वाऽपानाय त्वेति जुहोतीत्यन्तश्चैवानयोर्भवतीत्यर्थः ।

दधिग्रहं गृह्णीयात्पशुकामस्येति नित्ये काम्ये ।

दधिग्रहं गृह्णीयादिति वाक्येन नित्ये विधौ तस्यैव दधिग्रहं गृह्णीयात्पशुकामस्येति वाक्यान्तरेण फलश्रवणेन काम्ये विधौ च दधिग्रह एव भवति नेतराावित्यर्थः । अथ वा

नित्य इत्यत्र भावप्रधानो निर्देशः । नित्य इत्यनन्तरमपिशब्दोऽध्याहार्यः । तथा चायमर्थो भवति—दधिग्रहस्य नित्यत्वेऽपि दधिग्रहं गृह्णीयात्पशुकामस्येति फलश्रवणात्काम्यत्वेऽपि प्रवर्तत इति । तेन दधिग्रहस्योभयरूपत्वे सिद्ध आज्यग्रहसोमग्रहयोः काम्यत्वमेवेति अर्थादवगम्यते । चकारोऽपभ्रष्टो द्रष्टव्यः । आज्यग्रहसोमग्रहयोः काम्यत्वात्प्रकृतावेव निवेशो न विकृतौ काम्यस्य दधिग्रहस्यापि सति कामे प्रकृतावेव निवेशः । नित्यस्य दधिग्रहस्य तु उभयत्रापि निवेश इति द्रष्टव्यम् । आज्यग्रह आज्यमपूर्वमैष्टिकमेव वा । अपूर्वपक्षे पात्रेणैव ग्रहणम् । ऐष्टिकपक्षे स्रुवेण यावद्दधिग्रहपात्रपूरणमाज्यग्रहणात्पूर्वं ग्रहपात्रसादनान्ते चोदकस्पर्शः । अत्र कमिधातुश्रवणात्सत्यां कामनायां तेनत्काम आज्यग्रहं ग्रहीष्ये ब्रह्मवर्चसकामः सोमग्रहं ग्रहीष्ये पशुकामो दधिग्रहं ग्रहीष्य इति यथाकामं यजमानेन संकल्पः कर्तव्यः । समस्ते क्रतावर्थं श्रूयमाणं यजमानः कामयते तथा नित्येषु यज्ञाङ्गेषु यानि तु कामयतिः श्रावयतीति सूत्रात् ।

सोमग्रहं ग्रहीष्यन्राजानमपादत्ते यावन्तमेकग्रहायाऽऽप्तं मन्यते ।

अपेत्युपसर्गाद्राशीभूताद्राज्ञोऽपादानीभूतादादानं कार्यं न तु कृत्स्नस्य राज्ञ आदानमिति । अथ वाऽपेत्युपसर्गो दार्ढ्यमाचष्टे यथा दृढेन मुष्टिनाऽऽदानं भवति तथा ग्रहीतव्यः सोम इति । तत्र ग्रहीतव्यस्य राज्ञः प्रमाणमाह—यावन्तमेकग्रहायाऽऽप्तं मन्यत इत्यनेन । एकग्रहायाऽऽप्तं राजानमपादत्त इत्येतावत्येव लाघवाद्वक्तव्ये गुरुसूत्रकरणमपात्तेन पर्याप्तिर्न भवति चेत्तदाऽन्योऽपि पर्याप्तो ग्राह्यो न तु प्रथमापादान एव पर्याप्तो ग्राह्य इति नियम इति ज्ञापनार्थम् । गृह्यन इति ग्रहो रसः । एकशब्दः केवलार्थकः केवलं ग्रहाय रसायाऽऽप्तं पर्याप्तं मन्यत एतावता सोमेन रसो लब्धो भवतीति निश्चीयते । पात्रस्यातीव पूरणं भवतु वा मा वेति तावत्परिमितः सोमोऽपादातव्य इत्यर्थः । अर्थादेवैकग्रहायाऽऽप्तस्य सोमस्यापादाने सिद्ध एकग्रहायाऽऽप्तं मन्यत इति वचनं वक्ष्यमाणं सर्वान्पूर्णान्वृष्टिकामस्य ग्रहान्गृह्णीयादिति काम्यं ग्रहाणां पूर्णत्वं नात्र भवति किं तु कामाभावे यथोपर्यवग्रहणं धाराग्रहाणां तद्वदत्रापीति ।

प्रत्युपनह्येतरं निदधाति ।

इतरमेकग्रहार्थं गृहीतादवशिष्टं प्रत्युपनह्य पुनर्बद्ध्वा स्वस्थाने निदधातीत्यर्थः । प्रत्युपनह्येति वचनाद्बन्धनं विस्रस्यैवापादानमिति । हस्तगृहीतसोमः सन्नेव प्रत्युपनहनं कृत्वा निदधाति । यद्येतादृशः सन्न शक्नुयात्तदाऽन्यस्मै प्रदाय प्रत्युपनह्य निदधाति ।

तमुपरे न्युप्य वसतीवरीभिरुपसृज्याबीवृधं व इत्यभिमन्त्र्य ।

तमपात्तमुपर उपरं प्रथिष्ठं मध्ये पञ्चमामितिलक्षणलक्षिते न्युप्य निक्षिप्य वसतीवरीभिरुपसृज्य मिश्रयित्वा मिश्रितमबीवृधं व इति मन्त्रेणाभिमन्त्रयेतेत्यर्थः । सवनाय सोममिति मन्त्रान्तः ।

तिस्रो यह्वस्य समिधः परिज्मन्देवा अकृण्वन्नु-
शिजो अमर्त्यवे। तासामेकामदधुर्मर्त्ये भुजं लोकमु
द्वे उपजामीनं ईयतुरिति ग्राव्णा यथार्थमभिषुणोति।

ग्राव्णोपांशुसवनव्यतिरिक्तानामुपात्तानां चतुर्णां मध्ये येन केनचिद्यथार्थं यथाप्रयोजनं यावतो रसस्य प्रयोजनं तावद्रसनिष्पत्तिपर्यन्तमिति यावत्, अभिषुणोति रसानां रसोत्पादानुगुणं शिथिलं कण्डनेन करोतीत्यर्थः ।

आ मा स्कानिति योऽभिषूयमाणस्य प्रथमोंऽशुः
स्कन्दति तमभिमन्त्रयते प्रत्याहरति वा ।

तं स्कन्नम् । प्रथमग्रहणाद्द्वितीयादिस्कन्दने नैतत्प्रायश्चित्तं तत्र तूष्णीमेव स्कन्नस्य प्रत्याहरणमात्रं कर्तव्यम् । निर्बधीरिति मन्त्रान्तः ।

द्रप्सश्चस्कन्देति विप्रुषोऽनुमन्त्रयते ।

विप्रुषो बिन्दवः । सप्तहोत्रा इति मन्त्रान्तः । विप्रुट्सत्त्व इदमनुमन्त्रणं नासत्त्वे ।

सर्वाभिषवाणामेष कल्पः ।

सर्वेषामंशुप्रभृतिग्रहसंबन्धिनामभिषवाणां महाभिषवस्य चैष उपसर्जनादिविप्रुडनुमन्त्रणान्तः कल्पो विधिर्भवतीत्यर्थः ।

एतस्मिन्नेवैषोऽभिषवमन्त्रः ।

सर्वाभिषवाणामेष कल्प इत्यनेन तिस्रो यह्वस्येत्यस्य मन्त्रस्यापि प्राप्तावेतद्व्यतिरिक्तेष्वंशुप्रभृतिग्रहसंबन्ध्यभिषवेषु महाभिषवे चैतस्य मन्त्रस्य निवृत्तिः क्रियते । एष तिस्रो यह्वस्येत्यभिषवमन्त्र एतस्मिन्नेवाभिषवे भवति नान्येष्वभिषवेष्वित्यर्थः ।

अथ परिभाषामाह—

स१ सहिरण्येन पाणिना गृहीत्वा सहिरण्येन प्राङ्-
मुखस्तिष्ठन्दक्षिणार्धपूर्वार्धे जुहोत्युत्तरार्धपूर्वार्धे वा ।

तमभिषुतं सोमं गृहीत्वा पात्रे गृहीत्वा, सहिरण्येन पाणिनेति सोमक्रये व्याख्यातम् । सहिरण्येन पाणिना गृहीत्वेत्येतस्मात्सूत्रादुत्तरत्रानुवृत्त्यैव लाभे पुनः सहिरण्येनेति वचनं हिरण्यश्रयणार्थम् । तेन सहिरण्येनेति ग्रहविशेषणमेव भवति । हिरण्यसाहित्याद्धिरण्यश्रयणमेव विहितं भवति । सहिरण्येनेति तृतीया साहित्यार्थे । तेन सहिरण्येन ग्रहेण सह तिष्ठन्नित्यर्थो भवति । दक्षिणार्धपूर्वार्धे आग्नेय्याम् । उत्तरार्धपूर्वार्धे ऐशान्याम् ।

---

१ अ. म. यज्ञस्य । २ क. भुजमु लो' । ३ क. ङ. झ. म. ढ. 'कामिद्वे । ख. ग. 'कमिद्वे उ° । ४ क. उपजामिमीय° । ५ ख. 'जाम ई' । ग. °जानीम ई° ।

यत्रैवं तत्र सर्वसोमाहुतीः ।

यत्र यासु सोमाहुतिषु एवं प्राङ्मुखस्तिष्ठन्नित्यादिः प्रकारस्तत्र सर्वस्य तत्तद्ग्रहपात्रस्थस्य सोमस्याऽऽहुतयः सर्वसोमाहुतयः सर्वसोमस्य होमः कर्तव्यो न तु शेषः स्थापनीय इति । यत्रैवं तत्रेति वचनादेतादृशे प्रकार एवायं सर्वस्य सोमस्य होमविधिरन्यत्र यथावचनमिति । यत्र यस्मिन्देशे दक्षिणार्धपूर्वार्धरूप उत्तरार्धपूर्वार्धरूपे चैवं होमस्तत्र तस्मिन्नेव देशे सर्वाः सोमाहुतयो होतव्या इति वाऽर्थः । सर्वसोमाहुतीरित्येतदनन्तरं पूर्वसूत्राज्जुहोतीत्यनुवर्तनीयम् । नचाग्रिमेण हुत्वेतिशब्देनैवान्वयोऽस्त्विति वाच्यम् । हुत्वेत्यस्यानन्वयापत्तेः । नचान्वयार्थमुत्तरसूत्रेणैव संबन्धेऽपि तद्दोषतादवस्थ्यमिति वाच्यम् । विशेषविधानार्थानुवादकत्वेनोपपत्तिसंभवेन तद्दोषतादवस्थ्याभावात् । अनुवादप्रयोजनं तु होम एव मुख्यः शेषकरणं गौणं तस्य भक्षणार्थत्वात् । तथा च शेषकरणं स्वल्पस्य सोमस्य भूयसो होम इति ।

हुत्वा शेषं वा करोति ।

स्पष्टम् ।

पूर्वेण द्वारेण सदः प्रविश्याग्रेण होतारं पुरस्तात्प्रत्यङ्ङासीनो नृचक्षसं त्वेत्यवेक्ष्य मन्द्राभिभूतिरिति भक्षयति ।

अनुक्ते कर्तरि यजुर्वेदेनाध्वर्युरिति परिभाषयाऽध्वर्युरेव कर्तेति । सदसि भक्षयन्तीति श्रुतेर्भक्षणार्थं सदसि प्रवेशः । अग्रेण होतारमिति विधानाद्धोत्रा स्वधिष्ण्यस्य पश्चादध्वर्योः सोमभक्षणपर्यन्तमुपवेशनं कर्तव्यम् । अथवा पूर्वेण द्वारेण सदः प्रविश्याग्रेण होतारमित्यत्र हौत्रशास्त्राविरोधायाग्रेण होतारं पूर्वेण द्वारेण सदः प्रविश्येत्येवमेवान्वयोऽङ्गीकर्तव्यः । तथा चायमर्थो भवति अग्रेण होतारं सदो गत्वा पूर्वेण द्वारेण सदः प्रविश्येति । एवं चाग्रेण होतारमित्यस्याऽऽसीन इत्यत्रान्वयस्यैवाभावान्न होतृशास्त्रेण विरोधः । नचैवं पुरस्तात्पदस्य वैयर्थ्यं शङ्क्यम् । पुरस्तादित्यस्य सदसः पुरस्ताद्भागपरत्वेन वैयर्थ्याभावात् । इदमेव पुरस्तात्पदं ज्ञापयति सदसो धिष्ण्येभ्यो होतुर्वा पश्चान्न गच्छेदिति । अर्थाद्धातृधिष्ण्यस्यैवावधित्वं सर्वभक्षेषु न तु तत्तद्धिष्ण्यस्य । आग्नीध्रे सदसि भक्षयन्तीति विरोधापत्त्या तदसंभवात् । अतो होतुर्मुख्यत्वात्प्रथमोपस्थितत्वाच्च तद्धिष्ण्यस्यैवावधित्वं युक्तमिति भावः । ननु अग्रेण होतारमितिवचनं व्यर्थं हविर्धाने पूर्वेण प्रविष्टस्य हविर्धानस्यापरेण द्वारेण प्रवेशं व्यावर्तयितुमिति चेत्तस्य नासश्स्थिते सोमेऽध्वर्युः पूर्वेण द्वारेण हविर्धाने प्रविश्यापरेण निष्क्रामेदित्यनेन निषेधेनैव सिद्धेरिति चेन्न । होतु

---

१ क. ख. 'त्यादिप्र' ।

सामीप्येनैव गमनार्थं तस्याऽऽवश्यकत्वात् । प्रथमः रुचेषमित्यन्तः । आयुषे वर्चस इत्यन्तो द्वितीयः । वक्ष्यमाणस्य मन्त्रस्य प्रदर्शनमात्रमत्र क्रियते तेन वसुमद्गणस्येत्ययं मन्त्रोऽत्रापि भवति । अवेक्षणप्रभृतिना भक्षमन्त्रेण प्रतिपद्यत इति वक्ष्यमाणवचनाल्लिङ्गात्सामर्थ्याच्च । वसुमद्गणस्य सोमदेवत इति प्रातःसवने सर्वसोमान्भक्षयन्तीति सर्वशब्दविरोधोऽप्येवं रीत्या परिहृतो भवति । अन्यथौदुम्बरीं स्पृष्ट्वोद्गायेदित्यनेन विरोधं परिहर्तुं सर्वां वेष्टयितव्येति सर्वशब्दसंकोचवत्संकोच आपद्येत ।

अथ परिभाषामाह —

स्वयमाहरन्भक्षमवेक्षणप्रभृतिना भक्षमन्त्रेण प्रतिपद्यते ।

यो यो यत्र कुत्रचित्स्वयमेवाऽऽहरन्भक्षमवेक्षणमवेक्ष्येति विहितं कर्म तत्प्रभृति आदिर्यस्य सोऽवेक्षणप्रभृतिः । एतादृशेन मन्द्राभिभूतिरिति भक्षलिङ्गकेन मन्त्रेण स स प्रतिपद्यते भक्षयतीत्यर्थः । आहरन्प्रतिपद्यत इत्येतादृशसूत्रादाहरणभक्षणयोरेककर्तृकत्वावगमादुत्तरत्रान्येनाऽऽह्रियमाणमिति विशेषविधानाच्चैवात्र स्वयमाहरणसिद्धौ स्वयमितिवचनं यो यो भक्षणकर्ता स स स्वकीयभक्षं स्वयमेवाऽऽहरन्नवेक्षणप्रभृतिना भक्षमन्त्रेण प्रतिपद्यत इत्येतादृशार्थलाभार्थम् । तेन प्रतिप्रस्थात्रादीनामपि स्वस्वभक्षाहरणेऽयमेव विधिरिति सिद्धं भवति । अथ वा स्वयमाहरन्निति भक्षविशेषणम् । स्वयमाहर इति विजुपे छन्दसीति विचं प्रकृत्यान्येभ्योऽपि दृश्यन्त इत्यनेन हृञ्धातोर्विच् । स च कर्तरि कृदित्यनेन कर्तरि । स्वयमाहर्यत्र स स्वयमा*हरः स्वयमाहरणकर्ता यत्रेति तदर्थः । तं स्वयमाहरं भक्षमवेक्षणप्रभृतिना भक्षमन्त्रेण प्रतिपद्यत इति । नकारश्छान्दसः । अथ वा सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां चेति शास्त्रेण च्छान्दसः क्त्वार्थपूर्वकाले शतृप्रत्यय इति ज्ञेयम् । एतेनाऽऽहरणभक्षणयोरेककालता वारिता भवति । स्वकर्तृकाहरणेऽवेक्षणप्रभृतिर्मन्त्रसाध्यविधिरेवान्यकर्तृकाहरणे प्रतीक्षणादिस्तादृश एव । सदः प्रविश्य पुरस्तात्प्रत्यङ्ङासीन इत्येतत्कर्मद्वयस्य मन्त्रसाध्यत्वाभावादुभयसाधारणत्वमेव । अग्रेण होतारमित्यस्य तु अस्मिन्नेव भक्षे संभवादत्रैव नान्येषु भक्षेषु । भक्षमन्त्रेणेत्यत्र भक्षग्रहणं भक्षयामीत्यन्तस्य विनियोगं प्रदर्शयितुम् । अवेक्षणप्रभृतीति वचनं प्रतीक्षणप्रतिग्रहणाभावेऽपि भक्षेहीत्यादि प्रकृत्य यत्र क्व च भक्षयेदेवमेवैतान्मन्त्राञ्जपेदिति भारद्वाजोक्तं तन्मन्त्रजपं व्यावर्तयितुम् । अत्रोपह्वानं भवत्येव । नानुपहूतेन सोमः पातव्य इति श्रुतावापस्तम्बसूत्रे च निषेधात् । तच्चोपह्वानमध्वर्योरेव । तस्य होमाभिषवकर्तृत्वेन मुख्यत्वात् । प्रतिभक्षितृमस्त्व उपह्वानं तु अन्योन्यमेतदंश एव विधानं प्रतिप्रस्थातुरध्वर्योरुक्तहेतोरुपह्वानं प्राप्तं तद्बाधनाय यत्र क्व चैककाले भक्षयेयुरन्योन्यास्मिन्नुपहवमिच्छेरन्निति सूत्रम् ।

* अजितियोगविभागात्समासान्तोऽच्प्रत्ययो ज्ञेयः पद्मनाभवत् ।

अन्येनाऽऽहरणे भक्षणे विशेषमाह—

भक्षेहीत्यन्येनाऽऽह्रियमाणं प्रतीक्षतेऽश्विनोस्त्वा बाहुभ्या१ सघ्यासमिति प्रतिगृह्य नृचक्षसं त्वेत्यवेक्ष्य मन्द्राभिभूतिरित्यनुद्रुत्य वसुमद्गणस्य सोमदेवत इति ॥ ९ ॥ प्रातःसवने सर्वसोमान्भक्षयन्ति नराशꣳसपीतस्येति नाराशꣳसान् ।

आह्रियमाणमिति शानचा समकालिकत्वं प्रतीक्षणस्य बोध्यते । अत्र प्रतिशब्देन संमुखीकरणं तदर्थमीक्षत इत्यर्थः । एहीति लिङ्गात् । प्रतीक्षत इत्येकवचनात्स्वभक्षप्रतीक्षणकर्ताऽध्वर्युरेव न ब्रह्मादयः स्वस्वभक्षप्रतीक्षणकर्तार इति । अथ वा प्रतीक्षन्त इति बहुवचनान्त एव पाठो युक्तः । एकवचनान्तः पाठ उत्तरत्र बहुवचनेन विरोधादयुक्त एव । न च वैपरीत्यमेव किं न स्यादिति शङ्क्यम् । भक्षणविधेः सर्वेषामपेक्षितत्वेन वैपरीत्यस्य वक्तुमशक्यत्वात् । प्रतीक्षणक्रियाया अन्यकर्तृकाहरणाधीनत्वादव्यवधानासंभवेन ल्यप्प्रत्ययान्ततायां अभावः । अथवाऽऽर्षत्वमेवैकवचनस्य कल्पनीयम् । अत्र यदुक्तं तद्ग्राह्यम् । अवनतः सन्नीक्षित्वेत्यवेक्ष्येत्यस्यार्थः । अनुद्रवणं पूर्वमेव व्याख्यातम् । सर्वे च ते सोमाश्च सर्वसोमास्तान् । भक्षयन्तीति बहुवचनोपात्ता अध्वर्युप्रतिप्रस्थातृब्रह्मयजमानाः । सदस्यश्चेत्यस्याप्यत्र ग्रहणम् । होत्रादीनामपि अयमेव मन्त्रश्चमसभक्षणे । तेषां व्याख्यातो भक्षमन्त्र इति वक्ष्यमाणवचनात् । मन्त्रग्रहणादनुद्रवणान्तो विधिः परं नास्तीत्ययं विशेषोऽग्रे वक्ष्यते । अत्र सर्वग्रहणं यत्रैककालिकमेककर्मसंबद्धं बहुकर्तृकानेकसोमभक्षणं तत्रायं विधिरिति कादाचित्कशङ्कानिरासार्थम् । दृशेऽसीत्यन्तः प्रथमो मन्त्रः । द्वितीयस्तु तावानेव । तृतीयस्य त्वेषमित्यन्तः । चतुर्थस्य वर्चस इत्यन्तः । पञ्चमस्य पाठस्तु वसुमद्गणस्य सोमदेवते मतिविदः प्रातःसवनस्य गायत्रछन्दस इन्द्रपीतस्य मधुमत इति उपहूतस्योपहूतो भक्षयामीति । नराशꣳसपीतस्य सोमदेवते मतिविदः प्रातःसवनस्य गायत्रछन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति नाराशंसभक्षणमन्त्रपाठः । भक्षस्य स्वयमाहरणेऽन्येनाऽऽहरणे च भक्षणमन्त्र इयान्भेदः—अनुद्रवणराहित्येन स्वयमाहरणे भक्षणमन्त्रपाठः, अन्येनाऽऽहरणेऽनुद्रवणसहितः पाठ इति । भक्षेहीत्यनुवाकस्य भक्षसमाख्या साक्षात्परम्परासाधारण्येनैवोपपादनीयेत्येवं तृतीयाध्याये द्वितीयपादे जैमिनिरप्याह—लिङ्गसमाख्यानाभ्यां भक्षार्थताऽनुवाकस्य, तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वादिति सूत्राभ्याम् । लिङ्गं भक्षेहीति भक्षशब्दः समाख्या[नं] भक्षानुवाक इति प्राचीनसमाख्या । एताभ्यां भक्षेहीत्यनुवाकस्य कृत्स्नस्यापि भक्षार्थता स्यादिति प्रथमसूत्रार्थः । तस्य भक्षानुवाकस्य रूपं तत्तन्मन्त्रगततत्तत्क्रियाबोधकमसाधारणं लिङ्गम्, उपदेशस्तत्तन्मन्त्रस्य विनियोजकं वाक्यं, लिङ्गाभावेऽपि एताभ्यामपकर्षो विभज्य

विनियोगः, अर्थस्य ग्रहणादेरविधानेऽपि चोदितत्वादनुष्ठेयत्वादिति [द्वितीय]सूत्रार्थः तथा च भक्षेहीत्यादीनां हिन्व म इत्यन्तानां संमुखीकरणार्थेक्षणादावेव विनियोगः। मन्द्राभिभूतिरित्येतस्यैव भक्षे विनियोग इति। मन्द्राभिभूतिरित्ययं मन्त्रस्तृप्यत्वित्यन्त एवेति केचित्। तन्न। गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगादिति तृतीयाध्यायद्वितीयपादगतजैमिनिन्यायविरोधापत्तेः। तृप्यत्वित्यनेन भक्षगुणाभिधाना-न्मन्द्रादिरेक एव मन्त्रः स्यात्। तयोस्तृप्तिभक्षयोरेकोऽर्थः कार्यकारणभावरूपः संबन्धस्तस्य संयोगः सत्त्वं तस्मादित्यर्थः। भवति च तृप्तेः कार्यत्वं भक्षस्य तृप्तिनिष्पा-दकत्वात्कारणत्वम्। तृप्तेरननुष्ठेयपदार्थत्वात्तृप्तिविशिष्टभक्षप्रकाशन एव विनियोग इति।

रुद्रवद्गणस्य सोमदेवत इति माध्यंदिने सवने सर्वसोमान्भक्षयन्ति नराशꣳसपीतस्येति नाराशꣳसानादित्यवद्गणस्य सोमदेवत इति तृतीयसवने सर्वसोमान्भक्षयन्ति नराशꣳसपीतस्येति नाराशꣳसान्।

रुद्रवद्गणस्य सोमदेवते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति माध्यंदिने सवने सर्वसोमभक्षणमन्त्रपाठः। नराशꣳसपीतस्य सोमदेवते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति नाराशंसभक्षणमन्त्रपाठः। आदित्यवद्गणस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य मधुमत उपहूतस्यो-पहूतो भक्षयामीति तृतीयसवने सर्वसोमभक्षणमन्त्रपाठः। नराशꣳसपीतस्य सोमदेवते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति नाराशंसभक्षणमन्त्रपाठः। सर्वग्रहणप्रयोजनं पूर्ववद्द्रष्टव्यम्। एवमेव पेठतुर्मन्त्रान्बौधायनभारद्वाजौ।

यत्प्राग्वसुमद्गणात्तत्सर्वत्रानुषजति।

वसुमद्गणस्येति मन्त्रात्प्राग्यो मन्द्राभिभूतिरित्यादिरायुषे वर्चस इत्यन्तो मन्त्रस्तत्स मन्त्रः सर्वत्र रुद्रवद्गणादित्यवद्गणयोर्नराशंसमन्त्रत्रयेऽप्यपि चानुषजति योजयति न तु वसुमद्गणस्यैव शेषभूतोऽयं मन्त्र इत्यर्थः। यदित्यत्र सुपां सुलुगित्यनेन सोर्लुक्। एवं तदित्यत्रापि। अथवाऽयमर्थः—वसुमद्गणात्प्राग्यत्कर्म भक्षेहीत्यनुद्रवणान्तं तत्कर्म वसुमद्गणवद्रुद्रवद्गणादित्यवद्गणनराशंसेभ्योऽपि प्रागनुषजति अनुवर्तयतीत्यर्थः। एकव-चनं छान्दसम्। अथवा भक्षेहीत्यारभ्य वसुमद्गणात्प्राग्यत्कर्म तत्सर्वत्र सर्वसवनवि-षयेऽपि भवति न तु प्रातःसवनमात्रविषय इत्यर्थः। अत्रानुपूर्व्यर्थकः। षजधातुर्भवती-त्यर्थे। धातूनामनेकार्थत्वमङ्गीकृतं चास्ति वैयाकरणैर्भूधातौ। तन्न्यायेनानापत्त्याऽत्रापि स्वीकर्तव्यमेवेति ज्ञेयं सुधीभिः। अनैन्द्रेष्वपीन्द्रपीतस्येत्येव। ऊहाव्यन्तत्सर्वसोमानि-

त्यनेनानूहितस्यैव भक्षकरणत्वप्रतिपादनाच्च । नचानैन्द्रेषु सोमेष्विन्द्रेण पीतत्वाभावा-द्विरुद्धमेतदिति वाच्यम् । इन्द्रेण पीतः सोमो यस्मिन्सवन इति बहुव्रीहिसमासाश्रयणेन सवनविशेषणत्वस्यैवाङ्गीकारेण विरोधाभावात् । तथा च तृतीयाध्याये द्वितीयपादे जैमिनिः सर्वेषां त्वैकमन्त्र्यं त्वैतिशायनस्य भक्तिपावनत्वात्सवनाधिकारो हीति । सर्वेषां भक्षाणामैकमन्त्र्यमेको मन्त्रो येषां त इत्येकमन्त्रास्तेषां भाव ऐकमन्त्र्यमनेकदेवतानां भक्षाणामपि ऐकमन्त्र्यमेकदेवतामन्त्रवत्त्वमेव सर्वेषां मन्त्राणां भक्तिपूर्वकपानत्वं सोमस्येन्द्रकर्तृकमेव तत्त्वात्सवनाधिकारो हि यस्मात्सवनत्रयमप्याधिकृत्येन्द्रपीतस्येत्येव पाठो यस्मादतो भक्तिपूर्वकपातव्यत्वादैकमन्त्र्यमेव सर्वेषां मन्त्राणामैतिशायनमुनिमत इति सूत्रार्थः । सूत्र ऐतिशायनग्रहणं पूजार्थम् । एतेन जैमिन्युक्तं लिङ्गविशेषनिर्देशात्स्वसमानविधानेष्वनैन्द्राणाममन्त्रत्वमिति सूत्रेण पाक्षिकममन्त्रकभक्षणं पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वादिति सूत्रेणोहनं च निरस्यते । ऊहनिरासेन पात्नीवते तु पूर्ववत्, त्वष्टारं तूपलक्षये*त्पानात्, त्रिशच्च परार्थत्वात्, वषट्कारश्च कर्तृ(पूर्व)वत्, छन्दःप्रतिषेधात्तु(धस्तु) सर्वगामित्वात्, ऐन्द्राग्ने तु लिङ्गभावात्स्यादितिचतुर्थाध्यायद्वितीयपादगतसूत्रषट्कविषयास्तु अर्थादेव निरस्ता भवन्ति । अतोऽनैन्द्रानपीन्द्रपीतस्येत्येव भक्षयतीति सिद्धं भवति । नरस्य होतुराशंसो यासां वेति नरेण कृतो नरकृतो नरकृत आशंसो यासां ता इति वा नराशंसा देवता एताभिर्देवताभिः पीतः सोमो नराशंसपीतः । तत्रेन्द्राग्नी विश्वे देवा इति प्रातःसवनसंबन्धिनाराशंसदेवते, इन्द्रो मरुत्वान्महेन्द्र इति माध्यंदिनसवनसंबन्धिनाराशंसदेवते, विश्वे देवास्तृतीयसवनसंबन्धिनाराशंसदेवता, एता नाराशंससंज्ञका देवताः । एताभिः पीतः सोमो नराशंसपीत एव भवति । एतादृशरीत्यैव नराशंसपीतस्य सोमदेवत इति भक्षमन्त्रोपपत्तिर्नान्यथेति । प्रकम्पनेनापि यागसिद्धेस्तत्पीतोऽपि भवति । पितृपीतस्येत्यत्र पितृभिः पीतः पितृपीतस्तस्येत्येव व्युत्पत्तिर्न तु पितृभिः पीतः सोमो यस्मिन्नित्येवमिन्द्रपीतशब्दवद्व्युत्पत्तिः । बह्वृचश्रुतौ छन्दोगश्रुतौ च तेषु पितृभिर्भक्षितस्येति पठित्वा पितृलिङ्गत्वोपपादनात् । ते बह्वृचश्रुतावुक्ताः—ऊमा वै पितरः प्रातःसवन ऊर्वा माध्यंदिने काव्यास्तृतीयसवने तदेतत्पितॄनेवामृतान्सवनभाजः करोतीति । सवनभाजः सवने सोमभागिनः करोतीत्यर्थः । छन्दोगश्रुतावपि त्रयो ह नु वै पितरोऽवमा और्वाः काव्या इत्यादिनोक्ताः । बाह्वृच्यरीत्योमा ऊर्वा इत्याद्ययोः सवनयोः पितरः, छन्दोगरीत्याऽवमा और्वा इति । अत्र विकल्पः । तृतीयसवन उभयमतेऽपि काव्या एव पितरः । तेनेदमुक्तं भवति पितरश्च नाराशंसदेवता इति । नाराशंससंख्या बाह्वृच्ये द्विनाराशंसं प्रातःसवनं द्विनाराशंसं माध्यंदिनं सवनं सकृन्नाराशंसं

* जैमिनिसूत्रे पानादिति नोपलभ्यते । अत्र प्रमादपतितमिति भाति ।

तृतीयसवनमिति । आपस्तम्बोऽपि द्विनाराशंसे पूर्वे सवने भवत एकनाराशंसं तृतीयसवनमिति । लाट्यायनद्राह्यायणावपि सविशेषमाहतुः—द्वितीयाः सवनेषु नाराशंसाः पूर्वयोश्च तृतीयाविति । पूर्वयोः सवनयोर्द्वितीयतृतीयौ नाराशंसौ तृतीयसवने द्वितीय एवेत्यर्थः (?) । आचार्यस्तु तत्तत्प्रयोगनिरूपण एव वक्ष्यति । प्रातःसवने नाराशंसद्वयं माध्यंदिने सवने नाराशंसद्वयं तृतीयसवने सकृन्नाराशंसं न सोमं भक्षयित्वाऽऽचामेयुः । अनुच्छिष्टत्वात् । यथाऽनाचमनमुक्त्वाऽऽहाऽऽश्वलायनो न सोमेनोच्छिष्टा भवन्तीत्युदाहरन्तीति । पात्रेण चाऽऽस्यस्पृष्टेनैव भक्षणम् । तस्योच्छिष्टत्वमङ्गीकृत्य भक्षितानां मार्जालीये प्रक्षालनमिति प्रक्षालनेन शुद्धिवचनात् । मानवेऽपि यतिपात्रमधिकृत्योक्तं तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वर इति । तथोद्गातृसदस्ययोरेकं चमसमुक्त्वाऽऽहतुर्लाट्यायनद्राह्यायणौ[यदि]बीभत्सेयातां नानाचमसौ स्यातामिति । तथा होतृचमसेन सोमं भक्षयत इत्येव कात्यायनः । तस्मान्नोच्छिष्टत्वेऽपि दोष इति । अन्यत्तु मतं नैकानि पात्रोच्छिष्टत्वे लिङ्गानि भवितुमर्हन्ति । कुतः, क्षालनवचनं तावदाज्यलेपान्प्रक्षाल्येत्यादिवल्लेपापनयनार्थतयाऽप्युपपन्नम् । चमसदृष्टान्तोऽपि तदभिप्राययुक्तो भिक्षापात्राधिकारात् । बीभत्सावचनमपि समानद्रव्यत्वादुपपन्नम् । बीभत्सत एव हि पीतशिष्टात्कमण्डलूदकादाचार्यस्य चमसेनेति चासिद्धत्वेव तेनैव कमण्डलूदकेनास्यस्पृष्टेनापि भक्षणोपपत्तेः । तथा कमण्डलुसाम्यमेव चमसस्य ख्यापितं बौधायनेन—

यथा हि सोमसंयोगाच्चमसो मेध्य इष्यते ।
अपां तथैव संयोगान्नित्यं मेध्यः कमण्डलुः ॥
तस्मा शौचं ततः पानं तत आचमनं स्मृतम् । इति ।

तस्माद्द्राजिनादिवत्पात्राद्गृहीत्वा पात्रेण वाऽनास्यस्पृष्टेन युक्तं भक्षणम् । हन्तैवं सोमश्च पीतो भवति पात्रं चानुच्छिष्टमित्युभयमपि संपद्यत इति । मुख्यपक्षे तु यद्यपि नेदं संमतं तथाऽपि प्रमादादुद्धृतस्य पाने किंचिदङ्गहानमात्रं न तु प्रधानबाधः । प्रतिपदोक्तप्रायश्चित्तस्येहाभावात् । सामान्यप्रायश्चित्तमेवेति संक्षेपः । स्यादेतत् । अस्यैव पक्षस्य मुख्यत्वम् । कुत इति चेत् । उच्यते—चमसं भक्षयेदिति वाक्यात्तावदास्यसंस्पर्शो लभ्यते । चमसमित्यस्य तत्स्थे लक्षणा न तु तत उद्धृते । लक्षणायामपि संनिकृष्टार्थपरित्यागेन विप्रकृष्टार्थग्रहणायोगात् । उक्तं हि शंकरभगवत्पादैः—लक्षणायामपि संनिकर्षविप्रकर्षौ स्त एवेति । किं च चमसप्रातिपदिकमात्रादप्युक्तोऽर्थो लभ्यते । अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसजिति सूत्रे चम्यते भक्ष्यतेऽस्मिन्सोम इति चमसशब्दस्य बह्वीपुणादिवृत्तिषु व्युत्पादितत्वात् । धातुवृत्तिकारैरपि

---

१ ख. ग. यजति । २ क. °पि न सं° ।

चमु अदन इति धातावेवमेवोक्तत्वाच्च । चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वादित्यत्र समाख्यया भक्षं व्युत्पादयद्भिर्मीमांसकैरप्येवमेवोक्तत्वात् । रुद्रदत्तेनापि एतदेवास्य ब्रह्मचमसत्वं यच्चम्यते तस्मिन्सोमो ब्रह्मणेत्युक्तत्वात् । रामस्वामिग्रन्थेऽप्येवमभिधानाच्च । अपि च भक्षितानां मार्जालीये प्रक्षालनमिति सूत्रमपीह मानम् । क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य इत्यधिकरणे क्तविधानात् । किं च भक्षितानामुच्छिष्टानां मार्जालीये प्रक्षालनमिति भारद्वाजसूत्र उच्छिष्टानामित्युक्तिरपीह मानम् । अपि च द्राह्यायणलाट्यायनसूत्रयोर्यदि बीभत्सेयातां नानाचमसौ स्यातामिति बीभत्सोक्तिरपीह लिङ्गम् । उद्धृत्यपक्षे बीभत्सायां निर्मूलत्वापत्तेः । किं च दशपेयो भवतीत्यस्य वेदभाष्ये दशभिर्ब्राह्मणैरेकस्मिन्पात्रे पातव्यः सोमोऽस्मिन्नित्यादिग्रन्थोऽप्यत्रानुकूलः । उच्छिष्टं चम्वोरित्यादिमन्त्राणामृग्भाष्येऽप्येवम् । अपि चाशुद्धमिति चेन्न शब्दादित्युत्तरमीमांसासूत्रस्य कल्पतरुग्रन्थेऽपि स्पष्टमेवेति दिक् ।

वाग्देवी सोमस्य पिबत्विति सार्वत्रिकमेके समामनन्ति ।

सर्वत्र सर्वभक्षणमन्त्रस्थाने भवः सार्वत्रिकः । एतादृशममुं मन्त्रं समामनन्त्याचार्याः । सर्वेषां वसुमद्गणादीनां स्थाने वाग्देवी सोमस्य पिबत्विति मन्त्रो भवतीति निष्कृष्टोऽर्थः । भक्षेहीत्यादीनां सर्वेषामपि भक्षसमाख्यया भक्षत्वेन सजातीयत्वात्सजातीयस्य सजातीयं निवर्तकं भवत्येव, तथा च भक्षेहीत्यादीनां सर्वेषामपि निवृत्तिरिति प्राहुः । तन्न । तेषां मन्त्राणां प्रयोजनस्य भिन्नत्वेन तन्निवर्तकत्वासंभवात् ।

हिन्व मे गात्राहरिव इति सोमं भक्षयित्वाऽऽत्मानं प्रत्यभिमृशन्ते ।

सोमं भक्षयित्वेति वचनमेतस्य मन्त्रस्य मा मे वाङ्नाभिमतिगा इति जरणलिङ्गत्वात्स्वयमाहृतभक्षणे वाग्देवीतिमन्त्रेण भक्षणे चाप्यात्मप्रत्यभिमर्शनं भवतीति प्रदर्शयितुम् । अन्यथाऽऽन्याहृतभक्षभक्षणे दीर्घमन्त्रकरणकभक्षपक्षे चैव सर्वभक्षमन्त्रविनियोगसत्त्वात्तत्रैवायं प्रत्यभिमर्शः स्यादिति द्रष्टव्यम् । आत्मशब्देन हृदयम् ।

दह्रं विपापं परमेऽश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् ।
तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ॥

इत्युपनिषदि परमात्मनः सर्वव्यापित्वेऽपि उपासनोपयोगित्वेन हृदयस्यैवाधिष्ठानत्वोपवर्णनात् । नाभिर्वाऽत्र मन्त्रलिङ्गात् । आत्मनः साक्षादभिमर्शासंभवात्प्रतिशब्द आत्मानुसंधानसमकालं हृत्पुण्डरीकावरणत्वगभिमर्शनं विदधाति । अतिगा इति मन्त्रान्तः ।

मार्जालीये पात्रं प्रक्षाल्याऽऽयतने सादयति ।

मार्जालीयशब्दः प्रागेव व्याख्यातः । पात्रं भक्षपात्रं, प्रक्षालनं दर्भैर्न तु केवलं हस्तेनैव । न मांसधौतस्य देवा अश्नन्तीत्यग्निहोत्रप्रकरण आपस्तम्बेन निषेधात् ।

प्रशब्दात्समीचीनं क्षालनं, प्रक्षाल्येत्यत्रान्तर्भावितो णिच्। तेन प्रक्षालनं परिकर्मिकर्तृकमिति सिद्धं भवति। बौधायनेन तु ऋतुपात्रयोः शुक्रपात्रस्य च प्रक्षालने प्रतिप्रस्थातृकर्तृकतोक्ता सा वैतेष्वङ्गीकर्तव्या। आयतने सादनमध्वर्युकर्तृकमेव। यजुर्वेदेनाध्वर्युरिति परिभाषासूत्रात्। आयतने स्वस्वस्थाने।

सर्वसोमानामेष कल्पः।

मार्जालीये पात्रं प्रक्षाल्याऽऽयतने सादयतीत्येष सर्वसोमानां कल्पः। भवतीति शेषः। पूर्वत्राध्वर्योरेवोपक्रान्तत्वादध्वर्युसंबन्धिसोमानामेव कल्प इति स्यात्तन्मा भूत्किं तु सोमभक्षणकर्तृसर्वर्त्विक्संबन्धिसोमानामप्येष कल्पो यथा स्यादित्येतदर्थं सर्वग्रहणम्। सर्वेषां सोमाः सर्वसोमास्तेषां सर्वसोमानामिति समासः। सोमानामिति बहुवचनं तत्तद्देवतोद्देशेन गृहीतत्वेन भेदात्। सर्वत्रेत्येतावतैव सिद्धे गुरुभूतसूत्रकरणं सुराग्रहव्यावृत्त्यर्थम्। तेन सुराग्रहे पात्रप्रक्षालनमायतने सादनं च न भवति। अथवा सर्वसोमानामेष कल्प इत्यस्यायमर्थः पूर्वेण द्वारेण सदः प्रविश्याग्रेण होतारं पुरस्तात्प्रत्यङ्ङासीनो नृचक्षसं त्वेत्यवेक्ष्य मन्द्राभिभूतिरिति भक्षयतीत्यादिरायतनसादनान्त एष कल्पः प्रकारः सर्वसोमानां भवतीति। सोमभक्षणकर्तृसर्वर्त्विक्संबन्धित्वे कल्पस्य सिद्धेऽर्थात्तत्तदृत्विक्कर्तृकताऽपि सिद्धा भवति।

ग्रहेषु तु सहिरण्यता।

अत्र तुशब्दोऽवधारणार्थे। भवतीति शेषः। तेनेत्थं वाक्यं भवति ग्रहेष्वेव सहिरण्यता भवतीति। या पूर्वत्र सहिरण्यता सामान्यत उक्ता सा ग्रहेषु सोमग्रहपक्षे सोमग्रहेंऽश्वदाभ्यादिषु चैव नान्यत्र चमसेष्वित्यर्थः। तेन सहिरण्येन प्राङ्मुखस्तिष्ठन्नित्येतत्सूत्रोक्तं सहिरण्येनेत्यनेनांशेन प्रापितं हिरण्यश्रयणमात्रं चमसेषु न भवति। अन्यत्प्राङ्मुखस्तिष्ठन्नित्यादि तु चमसेष्वस्त्येवेति सिद्धं भवति। पूर्वसूत्रात्सर्वसोमानामित्यनुवर्तनीयमेव। तेन सुराग्रहेषु न सहिरण्यता।

होमाभिषवाभ्यां च भक्षो नान्यतरेण कर्मणा।

सर्वसोमानामित्यनुवर्तत एव। चस्त्वर्थे। भक्षस्तु होमाभिषवाभ्यामित्यन्वयः। भवतीति शेषः। तथा च चमससाधारणता सिद्धा भवति। होमश्चाभिषवश्च होमाभिषवौ ताभ्यां होमाभिषवाभ्याम्। प्रत्येकं निमित्तत्वं खण्डयितुं नान्यतरेण कर्मणेति। एतेनाध्वर्युप्रतिप्रस्थातृनेष्टुन्नेतृणां होमाभिषवाभ्यां समुच्चिताभ्यामेव भक्षणं लभ्यते नान्यतरेणेति। अभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीतिश्रुत्योभयसमानकर्तृकत्वेन भक्षणस्योक्तत्वादिति भावः। तेन प्रातःसवनमाध्यंदिनसवनसंबन्धिनोः

---

१ ख. °ग्रहांश्व°।

सवनमुखीयचमसयोर्ब्रह्मोद्गातृयजमानचमसेष्वतिग्राह्येषु चाध्वर्योः सत्यप्यभिषवे होमाभावाद्भक्षनिवृत्तिः । एवं प्रतिप्रस्थातृनेष्टुन्नेतॄणामप्येतेषु होमाभावाद्भक्षनिवृत्तिः । अदाभ्यग्रहादौ तु सत्यपि होमेऽभिषवाभावान्न भक्षः । तथा चमसेषु चमसाध्वर्यूणामित्यादि यथायथं द्रष्टव्यम् । तृतीयसवनसंबन्धिसवनमुखीयचमसे तु होमस्यापि सत्त्वाद्भवत्येव भक्षः ।

दधिग्रहस्यांशोरदाभ्यस्य च समानं पात्रम् ।

समानशब्दस्तुल्यार्थे न तु एकमित्यर्थ इति, तेन पात्रत्रयमेवेति । अमुमर्थं सूचयितुमेवासमासेन त्रयाणां निर्देशः । उक्तं चांश्वदाभ्यपात्रतः पार्थक्यमापस्तम्बेन—उत्तरेऽंसे दधिग्रहपात्रमौदुम्बरं चतुःस्रक्त्येवंरूपमेवांश्वदाभ्ययोरिति । तत्राऽऽपस्तम्बमत एवं प्रयोगभेदः—दधिग्रहस्यैकं पात्रमंश्वदाभ्ययोरेकमिति पात्रद्वयम् । आचार्यमते दधिग्रहस्यैकमंशोरेकमदाभ्यस्यैकमिति पात्रत्रयमित्येवं प्रयोगभेदः । आपस्तम्बमते यदि सोमग्रहं गृह्णीयादेतदेव बिभृयादिति सूत्रात्सोमग्रहपक्षे त्रयाणामप्येकमेव पात्रम् । आचार्यमते तु अत्रापि पात्रत्रित्वमेव ज्ञेयमिति त्रयाणां निर्देशः । तुल्यत्वं सजातीयत्वेन तच्च सजातीयत्वमौदुम्बरत्वचतुःस्रक्तित्वाभ्याम् । अंशोः पात्रं दधिग्रहपात्रसमीप एव प्रयुनक्ति । एवमदाभ्यस्य । ते च दधिग्रहपात्रस्योत्तरतः पुरतो योदक्संस्थे प्राक्संस्थे वा प्रयोज्ये । दधिग्रहस्येति सोमग्रहाज्यग्रहोपलक्षणम् । आज्यग्रहपक्षे तत्पात्रस्य प्रतिपत्तिरग्नावनुप्रहरणं तद्धोमान्त एव । सोमग्रहपक्षे तु अवभृथ एव तस्य प्रतिपत्तिः सोमलिप्तत्वात् । वक्ष्यति चावभृथे यत्किंचित्सोमलिप्तमिति । दधिग्रहपात्रस्यापि असोमलिप्तत्वाद्बौधायनापस्तम्बोक्तरीत्या प्रहरणमेव ।

अंशुना प्रचरति ।

अंशुनाऽंशुसाध्येन कर्मणा प्रचरति अंशुसाध्यं कर्मानुतिष्ठतीति यावत् । सामान्यप्रतिज्ञेयम् । इयं प्रतिज्ञा सूत्रान्तरोक्तपाक्षिकत्वव्यावृत्त्यर्था । अयं चांशुग्रहो न सवनाङ्गं किं तु सोमाङ्गमेव । तेन प्रतिसवनं नाऽऽवृत्तिः । प्रदर्शयिष्यति चाऽऽचार्योऽभिषवादिमाध्यंदिनꣳ सवनं तायत इत्यभिषवादिपदेन । जैमिनिरपि अहेष्टकमौपानुवाक्यं सवनचितिशेषत्वादिति । औपानुवाक्यमनारभ्याधीतम् ।

राजानमपादत्ते यावन्तमेकग्रहायाऽऽप्तं मन्यते प्रत्युपनह्येतरं निदधाति तमुपरे न्युप्य वसतीवरीभिरुपसृज्य सकृदभिषुत्य प्राण्यापान्य प्राणान्वामदेव्यं मनसा गायमानो गृह्णाति ।

राजानमपादत्ते तमुपरे न्युप्य वसतीवरीभिरुपसृज्येत्येतद्वचनमवावृधं व इत्यभि-

---

१ ख. ग. सद्धाषाढ° ।

मन्त्रणनिवृत्त्यर्थम् । यावन्तमेकग्रहायाऽऽर्तं मन्यते प्रत्युपनह्येतरं निदधातीत्यवश्यं वक्तव्यमेव । अन्यथैकग्रहपर्याप्तग्रहणस्यापि निवृत्तिः स्यात् । तथा च काम्यं पूर्णग्रहणमपि कदाचित्स्यात्तद्वारणायेदमवश्यं वक्तव्यमेव । प्रत्युपनह्येतरं निदधातीत्यपि मध्यपतितत्वादवश्यं वक्तव्यमेव । अन्यथैतस्यापि निवृत्तिः स्यात् । राजानमपादत्त इत्यारभ्य वसतीवरीभिरुपसृज्येत्यन्तस्य पुनर्वचनं सप्रयोजनमेव । सकृदभिषुतस्य प्राण्यापान्य प्राणान्वामदेव्यं मनसा गायमानो गृह्णातीत्यत्र सकृदभिषुतस्येत्यस्य गृह्णातीत्यत्रैवान्वयः । सति निमित्त आ मा स्कान्द्दप्सश्चेत्येतावभिषवोत्तरं करोति । सकृदभिषुतस्येति द्वितीयार्थे षष्ठी । षष्ठ्यन्तपाठो ब्राह्मणाभिप्रायेण । षष्ठीस्वीकारे प्रकृतेऽवयवरूपार्थकत्वं विनाऽन्यस्यासंभवेनाभिषुतसोमैकदेशस्यैवैतादृशार्थेन ग्रहणं स्यात्, एकदेशस्योपयोगाभावेन त्याग एव स्यात्स च विरुध्येत् । अतो द्वितीयार्थिकैव षष्ठी । सकृदभिषुतस्येत्येवाऽऽपस्तम्बः । सकृदेकवारं प्राणान्प्राण्य यावच्छ्वासं बहिर्गमयित्वा प्राणानपान्य प्रत्याहृत्य कया न इति वामदेवेन दृष्टं साम वामदेव्यं, मनसेति वचनादोष्ठताल्वादिव्यापारो निवर्त्यते । यद्यपि तृचे गीतं साम तथाऽपि सामप्रतिनिधित्वेन तद्योनिभूताया एकस्या एव ऋचो ग्रहणस्याग्रिमसूत्रे वक्ष्यमाणत्वादेकर्चमेवेदं सामेति गम्यते । यद्यपि अत्रानवानता स्पष्टतया नोक्ता तथाऽपि अनवानं गृह्णातीति अंशुप्रकरणे श्रुतावुक्तत्वाद्यद्यनवानं न शक्नुयाद्ग्रहीतुमित्यग्रिमवचनेनोक्तप्रायत्वाच्चानवानमेवांशोर्ग्रहणम् । अनवानमनुच्छ्वसन् । यद्यपि सामवेदेनोद्गातेति उद्गातुः सामगानं तथाऽपि ग्रहग्रहणस्याध्वर्युकर्तृकत्वाद्गायमान इति शानचा गायनग्रहग्रहणयोः समानकालिकत्वश्रवणाद्वसतीवरीभिरुपसृज्येति समानकर्तृकत्वश्रवणाच्चाध्वर्योरेव गानम् । नचांशुग्रहग्रहणाङ्गत्वाद्राजोपादानादिवसतीवरीभिरुपसृज्येत्येतदन्तमप्युद्गातुरेवास्त्विति वाच्यम् । यत्र साम्नः संबन्धस्तत्कर्मोद्गातृकर्तृकमित्यस्य नियमस्य परिमाणात्सामकरणकस्तुतिविधायके नवभिरध्वर्युरुद्गायतीति वाक्ये व्यभिचारदर्शनेन यदध्वर्युरंशुं गृह्णन्नार्धयेदुभाभ्यां नर्ध्येताध्वर्यवे च यजमानाय च यदर्धयेदुभाभ्यामृध्येतानवानं गृह्णाति सैवास्यर्धिरिति श्रुतितः स्पष्टतयाऽध्वर्योरेवांशुग्रहणकर्तृत्वावगमेन च केवलसामसंबन्धेन सर्वस्मिन्नंशुग्रहग्रहणकर्मणि अश्रुताप्रसिद्धोद्गातृकर्तृकत्वकल्पनाया अत्यन्ताप्रयोजकत्वात् ।

कया नश्चित्र आभुवदिति वा वामदेव्यस्यर्चा ।

कया नश्चित्र आभुवदिति वामदेव्यस्यर्चा वेत्यन्वयः । वामदेव्यस्य कया न इतिऋगुत्पन्नस्यैवेतरवामदेव्यप्रकृतित्वाद्ग्रहणे सिद्धे कया नश्चित्र आभुवदिति प्रतीकग्रहणं

---

१ ख. ग. °वर्तते ।

वामदेव्यसाम्नि तद्योन्यां वा तिसृष्वृक्षु यस्याः कस्याश्चिदेकस्या अनियमेन ग्रहणं स्यात्तन्मा भूत्किं त्वेतस्या एव ग्रहणं यथा स्यादित्येतदर्थम् । अत्र मनसा गायमान इति शानचो वर्तमानार्थकत्वात्तत्समकालमुपयामगृहीतोऽसीत्यस्योच्चारणस्योपांशुस्वरेण मनसा वाऽप्यसंभवेनार्थादेव निवृत्तिः ।

यद्यनवानं न शक्नुयाद्ग्रहीतुमा नः प्राण एतु परा-वत इति हिरण्यꣳ शतमानमभिव्यन्य वरे दत्ते गृह्णाति ।

यदीत्यनेन व्याननाद्यभिधानात्तस्य नैमित्तिकत्वं प्रदर्श्यते । अनवानं न शक्नुयाद्ग्रहीतुमित्यनेन निमित्तं प्रदर्श्यते । न शक्नुयान्न समर्थो भवेदित्यर्थः । शतं मानानि यत्र तच्छतमानम् । मानस्वरूपं तु स्मृतौ—

द्विगुञ्जं कथितं मानमेकगुञ्जमथापि वा । इति ।

शक्ताशक्तत्वेनानयोर्व्यवस्था । मीयतेऽनेनेति मानमिति व्युत्पत्त्या यवसर्षपवटबीजादिपरोऽपि मानशब्दः । अयं पक्षोऽत्यन्ताढ्यस्य । एतादृशं हिरण्यं सुवर्णं तदभि तदुपरि व्यननं श्वासस्य निर्गमनप्रत्याहरणयोर्मध्यावस्थया धारणम् । अभिव्यननोत्तरं वरे दत्ते, यजमानेनेत्येव शेषः । तस्यैव दानेऽधिकारात् । उक्तं चैतत्सूत्रकृता दर्शपूर्णमासयाजमानसूत्रे—द्रव्यप्रकल्पनं यजमानस्य दक्षिणादानं ब्रह्मचर्यं जपाश्चेति । आश्वलायनेनाप्युक्तं ददातीति यजमानमिति । कात्यायनेनाप्युक्तं दान वाचनान्वारम्भवरवरणव्रतप्रमाणेषु यजमानं प्रतीयादिति । तृतीयाध्यायेऽष्टमे पादे जैमिनिनाऽप्युक्तं स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात्, वचनादितरेषां स्यादितिसूत्राभ्याम् । परिक्रयो दक्षिणादानादिरूप ऋत्विजां स स्वामिनो यजमानस्य कर्म साङ्गस्य कर्मणस्तदर्थत्वात्तस्वाम्यर्थत्वात् । परिक्रयस्य स्वामिकर्तृकत्वाभावेऽङ्गानां तत्कर्तृकत्वानुपपत्तेरिति प्रथमसूत्रार्थः । इतरेषामृत्विजां तु वचनात्स्यात्, इतरकर्तृकं दानं तु वचनाद्भवेत् । अनड्वान्होत्रा देय इत्यादिकमुदाहरणं ज्ञेयं स्वकीयं द्रव्यं होत्रा दापनीयं वचनादिति हृदयमिति द्वितीयसूत्रार्थः । वरस्वरूपमापस्तम्बः—गौर्वै वरोऽतिवरोऽन्यो धेनुर्वरोऽतिवरोऽन्योऽनड्वान्वरोऽतिवरोऽन्य इति । त्रीन्वरान्दद्यादित्यत्रैतदुपयुज्यते । सूत्रान्तरे गौर्वरो ब्राह्मणस्य ग्रामो राजन्यस्याजां(ना) वैश्यस्येति । प्रकारान्तरमपि स्मृतौ—

वरोक्तौ गां विजानीयाच्चतुर्वर्षामरोगिणीम् ।
दक्षिणानां वरिष्ठो यो वरं तमपरेऽब्रुवन् ॥ इति ।

दक्षिणानां दक्षिणात्वेन दीयमाना हिरण्यादयस्तेषां मध्ये यो वरिष्ठो बहुमूल्यत्वेन श्रेष्ठस्तं पदार्थं वरशब्दवाच्यमपर आचार्या अब्रुवन्नित्यर्थः । गुञ्जामात्रं सुवर्णं वर इति पैङ्ग्यः । एतेषां पक्षाणां शक्ताशक्तत्वेन व्यवस्था । गृह्णाति अंशुमिति शेषः ।

तस्यैवोपक्रान्तत्वात् । हिरण्येऽभिव्यानने कृते ग्रहग्रहणकाल उच्छ्वासकृतो दोष आयुर्हीनतारूपः स विनश्यतीत्यर्थः । तथा च श्रुतिः—अनवानं गृह्णाति सैवास्य-र्धिर्हिरण्यमभिव्यनित्यमृतं वै हिरण्यमायुः प्राण आयुषैवामृतमभिधिनोति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठतीति ।

तꣳ सहिरण्येन शतमानेन सꣳस्पर्श्य हिरण्येनापिदधाति ।

तमंशुं हिरण्येन सहितं सहिरण्यमेतादृशं शतमानमन्यद्धिरण्यं तेन संस्पर्श्य सम्यग्घिरण्येन स्पर्शयित्वा हिरण्येनापिदधाति । अत्र सहशब्दोपादानाच्छतमानहि-रण्यसाहित्यार्थमन्यद्धिरण्यं ग्राह्यमिति गम्यते। तच्चात्र रजतरूपमेव न तु सुवर्णरूपम् । बौधायनीयेऽत्र स्पष्टमेव रजतसंबन्धो दृश्यते । शतमानेनेत्यत्रापि तद्विशेष्यत्वेन हिरण्यशब्दोऽन्वेति । इदं च शतमानं हिरण्यं पूर्वशतमानतो भिन्नमेव । पुनः शतमानशब्दोपादानात् । अन्यथा सहिरण्येन तेनेति तच्छब्देन ग्रहणं कृतं स्यात् । न च शतमानशब्दोपादानं रजते शतमानत्वलाभार्थमिति वाच्यम् । शतमानशब्दस्य रजतेऽन्वयासंभवेन तल्लाभासंभवात् । रजते शतमानशब्दस्यान्वयस्तु सशतमानहिरण्ये-नेत्येवंप्रकारकसमासेनैव भवति नान्यथा । न हि प्रकृते तथा समासोऽस्ति । न च विनिगमनाविरहादभिव्याननसंस्पर्शापिधानेषु रजतरूपं गौणं हिरण्यं साहित्यार्थं मुख्यमिति वैपरीत्यमेवास्त्विति वाच्यम् । सुवर्णात्मकहिरण्यस्यैव मुख्यत्वेन तस्यैव मुख्यकार्य उपयोगः । रजतरूपहिरण्यस्य तु गौणत्वेन साहित्यरूपगौणकार्य एव तस्योपयोग इत्येवं रीत्या विनिगमकलाभेन वैपरीत्यस्य वक्तुमशक्यत्वात् । न च रजते हिरण्यत्वे किं प्रमाणमिति वाच्यम् । रजतꣳ हिरण्यमभवत्, तद्दुर्वर्णꣳ हिरण्य-मभवत्, तत्सुवर्णꣳ हिरण्यमभवत्, सर्वꣳ हिरण्यꣳ रजतमित्यादिश्रुतीनां रजतꣳ हिरण्यं मध्यमायामिति सूत्रस्य च मानत्वात् । सꣳस्पर्श्येति णिजन्तप्रयोगाद्धिरण्येन संस्पर्शनमन्येन कारणीयं न तु अध्वर्युणा संस्पर्शः कर्तव्य इति बोध्यते । स्वार्थे णिज्वा । अस्मिन्पक्षेऽध्वर्योरेव । संशब्दात्सर्वावयवावच्छेदेन स्पर्शः । पुनर्हिरण्यग्रहणं रजतव्यावृत्त्यर्थम् । अपिदधातीति वचनात्परिमण्डलाकृतित्वं तस्य गम्यते । अंशुहो-मोत्तरं गृहे तन्नियोजयितव्यमेव दानावचनात् । अभिव्यानने मन्त्रः । प्राणाय त्वेति मन्त्रान्तः ।

इन्द्राग्नी मे वर्चः कृणुतामिति हरति ।

इत आरभ्य नित्यो विधिः । हरति आहवनीयं प्रति । अश्विनेति मन्त्रान्तः ।

दधन्वेवा यदीमन्वित्यनवानं जुहोति ।

अनवानमित्युपलक्षणं प्राणनापाननयोः । प्रजापतिरत्र देवता । एतत्सर्वं स्पष्टमा-हाऽऽपस्तम्बः—दधन्वेवा यदीमन्वित्यनिरुक्तया प्राजापत्यया प्राण्यापान्य व्यानञ्जुहो-

तीति । अनिरुक्तया लिङ्गरहितयेत्यर्थः । दृष्टश्चायमर्थः श्रुतौ सौत्रामण्यां कुविदङ्गे-त्यनिरुक्तया प्राजापत्यया गृह्णातीति । व्याननं परमापस्तम्बीयानामेव नास्माकं ग्रहण एव सूत्रकृता तदभिधानात् । अनवानं होमाशक्तौ पूर्वोक्तमेवाभिव्याननाद्येव प्रायश्चि-त्तम् । तथा चाऽऽपस्तम्बः—यदि न शक्नुयादगृहीतुं होतुं वा वरे दत्ते गृह्णीयाज्जुहु-याद्वेति । अत्रैतद्व्याख्यातृभिरभिव्याननादिभिः पूर्वोक्तैः समुच्चय एवोक्तः । चक्रमिवा-भवदिति मन्त्रान्तः ।

अद्भिः प्रतिप्रस्थाताऽध्वर्युं प्रत्युक्षति ।

अद्भिरिति वचनं संस्कारानिवृत्त्यर्थम् । अध्वर्युग्रहणं यजमानब्रह्मपत्नीव्यावृत्त्यर्थम् । आभिमुख्येनोक्षणं प्रत्युक्षणम् । इदं नित्यमेव । नैमित्तिकत्वबोधकपदाभावात् । शेषक-रणपक्षे पूर्ववद्भक्षः ।

अदाभ्येन प्रचरति ।

अदाभ्यसंज्ञकेन कर्मणा प्रचरति अदाभ्यसंज्ञकं कर्मानुतिष्ठतीति यावत् । अदाभ्यनिर्वचनं श्रुतौ—यद्वै देवा असुरानदाभ्येनादभ्नुवन्तददाभ्यस्यादाभ्यत्वमिति । सामान्यप्रतिज्ञेयम् । इयं प्रतिज्ञा सूत्रान्तरोक्तपाक्षिकत्वव्यावृत्त्यर्था ।

अथ विशेषविधिमाह—

वसवस्त्वा प्रवृहन्त्वित्येतैरुपनद्धस्य राज्ञस्त्रीनꣳशूनसꣳस्पृष्टान्प्रवृह्यान्य-स्मिन्पात्रे दध्नो निग्राभ्याणां वा निःषिच्य[1] मान्दासु ते शुक्र शुक्रमाधूनोमीति तस्मिन्नेतैरेतानꣳशूꣳस्त्रिः प्रदक्षिणमनुपरिप्लावयति ।

एतैरितिवचनमेकमन्त्रत्वनिरासार्थम् । उशिक्त्वं देव सोमेति येऽदाभ्या अꣳशवस्तेषा-मेकैकमनुसवनमपिसृजतीतिवक्ष्यमाणसूत्रादेव त्रित्वे सिद्धे त्रीनितिवचनमेकैकमꣳशुमपि-सृजतीत्यस्य पृथक्पृथगपिसर्जनं मन्त्रावृत्त्या प्रतिसवनमित्येतादृशस्यार्थस्यापि संभवेन द्व्यादिसंख्याया अपि संभवात्तद्वारणार्थम् । त्रीणि, ईनि येषां ते त्रियस्तांस्त्रीन् । त्रिश-ब्देनात्र पर्वत्रयं विवक्षितम् । इट किट कटी गतावित्यत्र दीर्घेकारधातोः प्रश्लेष इति पक्षमाश्रित्य तादृशधातोः संपदादित्वात्क्विप् । त्रिशब्देकारदीर्घेकारात्मकधातोरकः सवर्णे दीर्घ इति सवर्णदीर्घः । ह्रस्वस्य पिति कृति तुगिति तुगागमस्तु न भवति ह्रस्वे-काराभावात् । त्रीश्च त्रीश्च त्रीश्च त्रियस्तांस्त्रीन् । ये गत्यर्थास्ते प्राप्त्यर्था इति शास्त्रेण त्रीणि पर्वाणि येषां प्राप्तानीत्यर्थो भवति । तथा च त्रिपर्वांशूनां ग्रहणार्थं वचनमितीदं वा प्रयोजनं द्रष्टव्यम् । अस्ति च सूत्रान्तरमुपष्टम्भकमस्मिन्नर्थे—मान्दासु त इति तस्मिंस्त्रिपर्वणोऽꣳशूꣳस्त्रिः प्रदक्षिणमनुपरिप्लावयतीति । अंशवः काण्डानि । असंस्पर्शो-

१ क. ग. निषिच्य ।

पायमाह बौधायनः—अङ्गुल्यवकाशेषु कृत्वेति । अङ्गुल्यन्तरे द्वौ द्वौ कुर्वीतेति कात्यायनः । सव्ये पाणावतिषजति द्वौ द्वावसंश्लिष्टाविति कठश्च । उपेहीति मन्त्रान्तः । प्रवृहणमपकर्षणम् । ननु ग्रहग्रहणस्याग्रे विधास्यमानत्वाद्दधिनिग्राम्यान्यतरनिषेचनस्या-दाम्यपात्रे ग्रहणेऽग्रे ग्रहणासंभवादर्थादेवान्यस्मिन्पात्र इतीदं वचनं व्यर्थमिति चेत्स-त्यम् । अन्यस्मिन्यस्मिन्कस्मिंश्चित्पात्रे ग्रहणं न तु वायव्यत्वचमसत्वाद्यन्यतमरूपत्व-नियम इत्यनियमज्ञापनार्थत्वेन वैयर्थ्याभावात् । सामान्यतः पात्रशब्दादाकारस्या-नियमः । दध्यत्र लौकिकमेतदर्थमेव कृतम् । निग्राभ्या होतृचमसस्था यजमानावे-क्षिता निःषिच्य स्रावयित्वा तस्मिन्पात्रे निषिक्ते दधि निग्राभ्यानिषेचनपक्षे तास्विति-वचनलिङ्गव्यत्ययो ज्ञेयः । एतैरिति वचनमेकेनैव मन्त्रेण परिप्लावनमवशिष्टानामेकाद-शानां विकल्पार्थेतेति स्यात्तद्व्यावर्तयितुम् । एतस्मादेव वचनादेकेकेन मन्त्रेणैकैका क्रियेत्यपि एकमन्त्राणि कर्माणीतिपरिभाषानुरोधेन सिध्यति । एतान्पूर्वगृहीतान् । पारि-भाषयैव प्रादक्षिण्ये सिद्धे प्रदक्षिणवचनमनुकूलत्वार्थम् । यथा दधिहोमानुकूलं द्रवी-भूतं भवति तथा परिप्लावयतीत्यर्थः । अनुशब्द आनुकूल्यमनुलक्ष्यैव परिप्लावनमित्यर्थं बोधयितुम् । परिशब्दः समन्तभावाय । तेन परिभाषासिद्धं प्रादक्षिण्यं सिद्धं भवति ।

चतुः पञ्चकृत्वः सप्तकृत्वो वाऽवशिष्टा विकल्पार्थाः ।

त्रिवारं परिप्लावनेन द्रवीभूतताया असंपन्नत्व एते कल्पाश्चतुश्चतुर्वारं पञ्चकृत्वः पञ्चवारं सप्तकृत्वः सप्तवारम् । आवृत्तिबोधकौ सुच्कृत्वसुच्प्रत्ययौ । त्रिरिति पक्षे त्रिभिर्मन्त्रैः क्रियात्रयम् । चतुरिति पक्षे चतुर्भिर्मन्त्रैश्चतस्रः क्रियाः । एवं पञ्चकृत्वः सप्तकृत्व इति पक्षयोरपि । तत्र त्रिरित्यादिपक्षेषु नवाष्टौ सप्त पञ्चेति क्रमेण मन्त्रावशेषः । येऽवशि-ष्टास्त एतेषु चतुष्पक्षेषु यथायथं विकल्पार्था भवन्ति । अवशिष्टा विकल्पार्था इति वचनं वसवस्त्वा प्रवृहन्तु गायत्रेण छन्दसेत्येतैः प्रतिमन्त्रमित्यनेन सर्वपक्षेष्वपि सर्वमन्त्रविनियोगस्याऽऽपस्तम्बेनोक्तस्य निवृत्त्यर्थम् । एतद्वा अपां नामधेयं गुह्यं यदा-धावा मान्दासु ते शुक्र शुक्रमाधूनोमीत्याहापामेव नामधेयेन गुह्येन दिवो वृष्टिमवरुन्ध इति श्रुतावाधावशब्दस्यापां नामधेयत्वमुक्तम् । बौधायनेनाऽऽधवनलिङ्गकत्वान्मन्त्रा-णामपि आधावसंज्ञा कृता द्वादशभिराधावैराधुनोतीति सूत्रेण । आपस्तम्बेनांशूनाम-प्याधवनसंज्ञा कृता—आधवनानंशून्प्रज्ञातान्निधायोशिक्त्वं देव सोम गायत्रेण छन्द-सेत्येतैः प्रतिमन्त्रमनुसवनमेकैकं महाभिषवेष्वपिसृजतीति ।

ग्रहणमन्त्रानाह—

शुक्रं ते शुक्रेण गृह्णाम्यग्निः प्रातःसवने विश्वे

१ क. ग. कुरुत इति । २ क. ग. निषिच्य ।

देवा इदं तृतीयꣳ सवनं कवीनामित्येनाभि-
गृह्णाति सर्वासामन्तत उपयामा भवन्ति ।

एताभिर्ऋग्भिरुपयामगृहीतोऽसीत्यन्ताभिः स्वल्पं स्वल्पं गृह्णातीत्यर्थः । शुक्रं त इत्येतस्यापि त्रिष्टुप्छन्दोरूपत्वादन्तत एवोपयामः । सर्वासामित्यनेन शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिरित्येतस्य ऋक्त्वं विना ग्रहणासंभवादवश्यमृक्त्वस्य स्वीकारः । तत्र ऋचः पादबद्धत्वात्कथमत्र पादकल्पना किं वा तस्यां सत्यां छन्दो भवतीति शङ्कायामुच्यते—शुक्रं ते शुक्रेण गृह्णाम्यह्न इत्येकः पादः । रूपेण सूर्यस्य रश्मिभिरिति एकः । तत्राऽऽद्यः पादो यणादेशेनैकयभावं गताभ्यामिकाराकाराभ्या-मेकादशाक्षरः । द्वितीयः पादः सूर्यशब्दान्तर्गतयवर्णे रिय इत्यक्षरद्वित्वभावनया दशाक्षरः । तथा च त्रिष्टुभो रुद्रा इति पिङ्गलसूत्रादेकादशाक्षरा त्रिष्टुबिति श्रुतेश्च त्रिष्टुभो लक्षणं सिध्यति । एकस्याक्षरस्य न्यूनत्वान्निचृत्त्रिष्टुब्भवति । ऊनाधिकेनैकेन निचृद्भुरिजाविति पिङ्गलसूत्रात् । रिय इति द्वित्वभावनायां घृणिरिति द्वे अक्षरे सूर्य इति त्रीणि आदित्य इति त्रीणि एतद्वै सावित्रस्याष्टाक्षरं पदꣳ श्रियाऽभिषिक्तमिति श्रुतिः पाद इयादिपूरण इति पिङ्गलसूत्रे(त्रं) च प्रमाणम् । प्रसिद्धं चैतद्गायत्र्यां ण्यमित्यस्य णियमिति द्वित्वभावनया द्वित्वम् । स्पष्टं च न्यासादौ । एवं च निचृत्त्रि-ष्टुब्लक्षणाक्रान्तत्वादेतस्यापि मन्त्रस्य ऋक्त्वमस्त्येवेति सिद्धम् । रश्मिभिः सह भक्षाः स्याम सुमतौ स्याम वसीयो नयन्तु इति मन्त्रान्ताः ।

आऽस्मिन्नुग्रा अचुच्यवुरिति हरति ।

आहवनीयं प्रति हरति । असश्चतेति मन्त्रान्तः ।

ककुहꣳ रूपं वृषभस्य रोचते बृहदित्यभिमन्त्रयते ।

स्पष्टम् ।

सोमः सोमस्य पुरोगा इति जुहोति प्रज्ञातानꣳशून्निदधाति ॥ ६ ॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्ने द्वितीयः पटलः ।

येन क्रमेण प्रवृद्धास्तेनैव क्रमेण प्रज्ञातानंशूननुसवनमभिषवार्थं निदधाति । सोमाय स्वाहेति मन्त्रान्तः । अत्र निःशेषमेव होमः । अभिषवाभावेन भक्षणरूपप्रतिपत्तेरसंभ-वात् । अंश्वदाभ्ययोर्विशेषमाहाऽऽपस्तम्बः—भ्रातृव्यवताऽदाभ्यो ग्रहीतव्यो बुभूषता— शुस्तौ न सर्वत्र ग्रहीतव्यौ वाजपेये राजसूये सत्रे सहस्रे सर्ववेदसे वा योऽस्य सुप्रियः सुविचित इव स्यात्तस्य ग्रहीतव्याविति । काम्यत्वे प्रकृतावेव निवेशः । वाजपेयादि-

---

१ ख. ग. 'न्दोनुरु' ।

ष्वेव विकृतिष्वेव ग्रहीतव्यौ न सर्वासु प्रकृतिविकृतिषु ग्रहीतव्याविति । योऽस्याध्वर्योः सुप्रीतः सुपरीक्षितः स्याद्यजमानः कल्याणगुणो यदि तस्य सर्वास्वेव प्रकृतिविकृतिषु विनाऽपि कामं ग्रहीतव्याविति ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखया-
जिद्विषाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्र-
श्नस्य द्वितीयः पटलः ॥ २ ॥

अथाष्टमप्रश्ने तृतीयः पटलः ।

देवस्य त्वेत्युपांशुसवनं ग्रावाणमादाय
वाचं यच्छत्याऽऽग्रयणस्य ग्रहणात् ।

ग्रावाणमितिवचनमुपरनिहितग्रावचतुष्टयतो भिन्नत्वेऽपि अत्राप्याकारस्तद्वदेव, एतद्भेदनेऽपि प्रायश्चित्तमपि तदेवेति प्रदर्शयितुम् । आदायेत्यत्रत्यल्यप्समानकालिकत्वार्थको मुखं व्यादाय स्वपितीतिवत् । तमाददानो वाचं यमित्वेत्यापस्तम्बेन स्पष्टमेवायमर्थ उक्तः । अत आपस्तम्बसूत्रसमानार्थकत्वोपवर्णनमेव युक्तं न तु तद्भिन्नत्वाद्युपवर्णनं युक्तम् । अत्र वाग्यमनविधानेनान्यत्र मध्ये यावदुपयुक्तव्याकृतवागुच्चारणे न दोषः । अत्र तु तदुच्चारणेऽपि दोष इति विशेषोऽवगम्यते । इदं व्याख्यानं सर्वत्र द्रष्टव्यम् । आदानप्रभृति वाचं यच्छति नियमयति आग्रयणग्रहणपर्यन्तम् । आ, आग्रयणादिति पदच्छेदः । आदद इत्यन्तो मन्त्रस्य ।

ग्रावाऽसीत्यभिमन्त्रयते ।

वृष्टिवनिमित्यन्तो मन्त्रस्य ।

तमधिषवण ऊर्ध्वसानुं निधायेन्द्राय त्वा वृत्रघ्न इत्ये-
तैर्मन्त्रैः राजानमभिमिमीते यथा क्रयेऽन्यदुपसमूहनात् ।

तमुपांशुसवनम् । अधिषवणे चर्मणि । अधिषवणग्रहणेन सूत्रान्तरोक्त उपरो व्यावर्त्यते । ऊर्ध्वसानुमूर्ध्वाग्रं निधाय स्थापयित्वेन्द्राय त्वा वृत्रघ्न इत्यादिभिः पञ्चभिर्मन्त्रै राजानमभिमिमीते । एतच्छब्दोपादानप्रयोजनं पूर्ववत् । मन्त्रैरिति वचनं सर्वैर्मन्त्रैरेकैकं मानमित्यपि पक्षान्तरमस्तीतिज्ञापनार्थम् । श्रुतौ पञ्चकृत्वो यजुषेत्येकवचनमेवास्मिन्पक्षे प्रमाणम् । अभिशब्द ऊर्ध्वसानोरुपांशुसवनस्योपर्येव मानार्थो यथा क्रय

इति । क्रयातिदेशात्पञ्चकृत्वो यजुषा मिमीते पञ्चकृत्वस्तूष्णीमिति विधिना मानं भवति । अतिदेशाभावे पञ्चभिर्मन्त्रैरेकैकेन मन्त्रेणैकैकमित्येवं पञ्चवारं मीत्वा तैरेव तथैव पुनर्मानं पञ्चवारमित्येवं दशवारं मानं स्यात्तन्मा भूदित्येतदर्थं यथा क्रय इति वचनम् । अन्यदुपसमूहनादिति वचनं क्रयेऽवशिष्टानां पृथग्गृहीतानामत्रापि तेनैव पुनरत्र ग्रहणं स्यात्तन्मा भूत्किं तु दशस्वेव मानेषु निःशेषमंशुक्षेपणं यथा स्यादित्येतदर्थम् । तेनायमर्थो भवति मितमवशिष्टं च राजानमेकीकृत्य दश जूटिका बद्ध्वा समन्त्रं पञ्च जूटिका अमन्त्रं च पञ्च जूटिका इत्येवं मिनोतीति । उपसमूहनादन्यदिति पर्युदासेन सहिरण्येन पाणिनैकैकयाऽङ्गुल्या प्रसारितया सर्वास्वङ्गुष्ठमुपनिगृह्णाति यथा प्रथमं न तथा पञ्चमं तथैव दशममित्येतत्सर्वमतिदिश्यते । वाससः आस्तरणं परं न भवति तमभिषवण ऊर्ध्वसानुं निधायेतिविशेषविधिना तद्बाधात् ।

अधिषवणस्यैकदेशे राजानमपोहू(ह्)याऽऽदत्ते यावन्तमेकग्रहायाऽऽप्तं मन्यते मत्युपनह्येतरं निदधाति तमुपरे न्युप्य वसतीवरीभिरुपसृज्य श्वात्राः स्थ वृत्रतुर इति निग्राभ्याभिरुपसृजति ।

अधिषवणचर्मण एकदेशे रिक्ते प्रदेशे राजानमपोहू(ह्)य मितप्रदेशादपसार्य तस्मादादत्ते । यावन्तमेकग्रहायेत्यादिवसतीवरीभिरुपसृज्येत्यन्तस्य पूर्ववद्व्याख्यानम् । निग्राभ्याः पूर्वं व्याख्याताः । ताभिरुपसृजति मिश्रयति । सोमः पिबत्विति मन्त्रान्तः । निग्राभ्यैकदेशेन यावन्महाभिषवमुपसर्जनम् । उत्तमेऽभिषवे समाप्तिः । आपस्तम्बेन स्पष्टमेवोक्तं—तासामेकदेशेनोपसृज्येति । होतृचमसे निग्राभार्थमवशेषयन्पात्रान्तरे निग्राभ्या अवनीय होतृचमसे त्रिः प्रदक्षिणमनुपरिप्लावयति । यदा यदा निग्राभोपायनं तदा तदा तदर्थं पात्रान्तरस्थानां निग्राभ्याणां तावत्परिमितानां होतृचमस आनयनम् । होतृचमसस्थानां सर्वासामपि निग्राभोपायने निग्राभ्यासु पुनः पुनर्निग्राभ्योपायनमसंगतं स्यात् । निग्राभ्याणां निःशेषत्वे वसतीवरीभिरभिपूरणं तासां तद्योनित्वात् । मन्त्रोऽत्र नैव भवति । व्यानयनरूपक्रियाया एवाभावेन तदर्थत्वस्यैवासंभवात् ।

यत्ते सोम दिवि ज्योतिरित्यभिमन्त्रयते ।

दात्रेऽवोच इति मन्त्रान्तः ।

अभिमन्त्रणमेके पूर्व[१] समामनन्ति ।

निग्राभ्योपसर्जनक्रियापेक्षया पूर्वत्वम् । अर्थान्निग्राभ्योपसर्जनक्रियाया आनन्तर्यम् । विपरीतमेके समामनन्तीत्येतावतैव यद्यपि सिध्यति तथाऽपि मन्त्रवैपरीत्यमात्रमत्र शङ्कितं स्यात्तन्मा भूत्, किं तु क्रियावैपरीत्यमपि यथा स्यादित्येतदर्थमावश्यकमेवेदृशं सूत्रम् ।

१ ख. ग. 'वेदं सू° ।

उपसृष्टस्य राज्ञः षडꣳशूनसꣳस्पृष्टान्प्रवृह्य प्रज्ञातान्निधायेतरानादायोपरिष्टाद्ग्रावाणं धारयन्नधस्तादꣳशून्प्रागपागुदगधरागिति होतृचमसे त्रिः प्रदक्षिणमनुपरिप्लावयति स निग्राभो भवति ।

निग्राभ्याभिरुपसृष्टस्यासंस्पर्शः षण्णामपि प्रज्ञातनिधानं प्रवृद्धक्रमेण । इतरान्प्रवृद्धव्यतिरिक्तानन्यान्बहुवचनात्त्रिप्रभृतीन् । उपरिष्टादित्यत्र होतृचमसस्येति शेषः । ग्रावाणमुपांशुसवनम् । अधस्ताद्ग्राव्णोऽधस्तात्षडꣳशुव्यतिरिक्तान्पूर्वगृहीतानꣳशूनुपांशुसवनसंश्लिष्टान्धारयन्प्रागपागिति मन्त्रेण त्रिवारं प्रदक्षिणमनुपरिप्लावयति । प्रदक्षिणमनुपरिप्लावयतीति कृतव्याख्यानम् । अत्र प्रदक्षिणशब्दबोधितमानुकूल्यं यथा घर्षणेन तेषामंशूनां तासु निग्राभ्यासु रससंबन्धो भवति तथेत्येवंरूपं ज्ञेयम् । ननु अंशूनामेव संनिहितत्वात्तेषामेवोपरिष्टादित्यत्र संबन्धः, तथा च गृहीतानामंशूनामुपरिष्टाद्ग्रावाणं धारयन्नित्यर्थो भवति, एवं च पूर्वत्रानुपात्तस्य होतृचमसस्य शेषोऽसंगत एवेति चेन्न । तथा सति अधस्तादंशूनित्येतस्य वैयर्थ्यापत्तेः । यो निग्राभ्यास्वालोडनेनोत्पन्नो रसः स निग्राभसंज्ञको भवति । अम्ब निष्वरेति मन्त्रान्तः ।

तानुपरे न्युप्य वसतीवरीभिरुपसृज्य मा भेर्मा संविक्था इति ग्रावाणमुद्यम्य धिषणे वीडू सती इत्यधिषवणफलके अभिमन्त्रयते ।

तान्निग्राभसंज्ञकरससहितान् । मा भेर्मा संविक्था इत्येतावानेव मन्त्रः । मा मा हिꣳसिषमित्यन्तो धिषणे इति मन्त्रः । वसतीवरीभिरुपसर्जनानन्तरं मा भेरिति ग्रावाणमुद्यम्य धिषणे इत्यधिषवणफलके अभिमन्त्रयते । द्विवचनलिङ्गात्संभवाच्च सकृदेव मन्त्रः ।

अनागसस्त्वा वयमिन्द्रेण प्रेषिता उप वायुष्टे अस्त्वꣳशभूर्मित्रस्ते अस्त्वꣳशभूर्वरुणस्ते अस्त्वꣳशभूरहतः सोमो राजेति यत्र मूलं तृणं काष्ठं वा पश्यति तस्मिन्देशे समे प्रहरति ।

यत्र यस्मिन्राज्ञो मूलाद्यन्यतमं समुचितं वा पश्यति तस्मिन्नेव देशे प्रथमं प्रहरति । सम इति वचनात्समानंशून्कृत्वा प्रहरति । यत्र मूलयुक्ता भूयिष्ठा अंशवो भवन्ति तादृशे देशे प्रहरतीति यावत् । काष्ठं लघुकाष्ठखण्डम् । लोष्टमित्यपपाठः । लोष्टस्य राज्ञि संसर्गस्यायुक्तत्वात्तस्य परित्याज्यत्वात् । यदि वा पुरा तृणं काष्ठं मूलं वा स्यात्तस्मिन्प्रहरेदित्यापस्तम्बसूत्रसंवादात् । यदि मूलं न विन्देत्तृणं दारु वाऽन्तर्दध्यादिति मानवसूत्रसंवादाच्च । यदि मूलं मूलभागं सोमस्य न विन्देन्न लभेन्न जानीयात् ।

---

१ क. ज. झ. ञ. ड. लोष्टं ।

संनिहितस्य सोमस्य मूलालाभो ह्यज्ञाननिबन्धनस्तथा च छमधात्वर्थोऽत्र ज्ञानम् । तथा च न विन्देन्मूलं पश्यति तस्मिन्प्रदेशे प्रथमं प्रहरति(?) । तथा च मानवसूत्रम्— मूलेऽभिषुणोतीति । सोमस्य मूलभागे प्रथमोऽभिषवार्थः प्रहारो नाग्र इत्येतस्यार्थः । यदि सोमस्य मूलं न पश्यति तदा तृणं चेत्पश्यति तत्राभिषुणोति । तृणाभावे काष्ठ-खण्डं वा पश्यति तृणकाष्ठयोरप्यभावे तृणं दारुखण्डं वाऽन्तर्धायाभिषुणोतीत्यर्थः । तत्र प्रहारे मृत्तिका संतता स्यान्न जानीयादित्यर्थः । तर्हि तस्मिन्सोमे तृणं दर्भादि दारु काष्ठखण्डं वाऽन्तर्धायाभिषुणुयादिति मानवसूत्रार्थः ।

तृणमन्तर्धायाभिषुणोतीत्येकेषाम् ।

मूलाद्यन्यतमाभावे द्वितीयादिप्रहारे चापि तृणमन्तर्धायैवाभिषुणोतीत्येकेषामाचा-र्याणां मतमित्यर्थः । एकेषामितिश्रवणान्मूलाद्यन्यतमाभावे द्वितीयादिप्रहारे चापि तृणान्तर्धानस्यानियतत्वम् । तृणमित्युपलक्षणं दारुखण्डस्य ।

अष्टौकृत्वोऽग्रेऽभिषुत्य निग्राभमुपैति यथा पुरस्तात् ।

अष्टौकृत्वोऽष्टवारम् । अष्टौकृत्व इति संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति कृत्वसुच्प्रत्ययः । छान्दसो विभक्त्यलुक् । अग्र इति वचनं द्वितीयतृतीयपर्याययोर्व-क्ष्यमाणविकल्पापेक्षया । सति निमित्त आ मा स्कान्द्रप्सश्चस्कन्देत्येतयोः कृतयोर्निग्रा-भमुपैति पूर्ववदित्यर्थः ।

अपात्तानामꣳशूनां द्वाभ्यामुपाꣳशुपात्रम-
पिधायोत्तरतः प्रतिप्रस्थातोपयच्छति ।

अपात्तानां पूर्वगृहीतानां प्रज्ञातक्रमेणासंश्लिष्टतया स्थापितानां षडंशूनां मध्य आद्यौ द्वावंशू ताभ्यामसंश्लिष्टाभ्यां द्वाभ्यां दक्षिणेन हस्तेनोपाꣳशुपात्रमपिधायोत्तरतः पात्रस्योत्तरत आसीनः प्रतिप्रस्थातोपयच्छति तत्पात्रं धारयतीत्यर्थः ।

वाचस्पतये पवस्व वाजिन्निति तस्मि-
न्नञ्जलिनाऽध्वर्युः सोममासिञ्चति ।

तस्मिन्नंशुद्वयान्तर्हित उपांशुपात्रे प्रतिप्रस्थात्रा धृते । अञ्जलिनेति वचनमेकहस्ते-नाऽऽसेचनं व्यावर्तयितुम् । अध्वर्युग्रहणं प्रतिप्रस्थातृव्यावृत्त्यर्थम् । न चापिधानो-पयमनासेचनक्रियाणामेकेन कर्तुमशक्यत्वादेवाऽऽसेचनस्याध्वर्युकर्तृकत्वं सिध्यत्येवेति किमर्थमध्वर्युग्रहणमिति वाच्यम् । उपयच्छतीत्यन्तर्भावितणिच्कल्पनया क्रियात्रयस्यै-ककर्तृकत्वसंभवेन प्राप्तौ तां वारयितुमध्वर्युग्रहणस्याऽऽवश्यकत्वात् । अत्रोपयामो न भवति वचनाभावात् । पवित्रमपि अन्तर्यामान्तानां ग्रहाणां न भवतीत्यत्र ज्ञापकमग्रे

१ क. ग. 'र्थोऽत्राज्ञा' ।

वक्ष्यते । एतस्य सादने निषेधं तु स्वयमेव वक्ष्यति । एतत्स्पष्टमाहाऽऽपस्तम्बः—पवित्रमुपयामः सादनं च न विद्यत इति । नमस्तिपूत इति मन्त्रान्तः ।

एवं विहितो द्वितीयस्तृतीयश्चाभिषवः ।

एवं निग्राभ्योपसर्जनादिना निग्राभोपायनान्तेन प्रकारेण । अन्यत्स्पष्टार्थम् ।

तत्र वैकल्पिकं विशेषमाह—

अपि वैकादशकृत्वो द्वितीयमभिषुणोति द्वादशकृत्वस्तृतीयम् ।

अष्टावष्टौकृत्वोऽभिषुत्यमितिब्राह्मणानुसारेण सर्वेषु अभिषवेष्वष्टकृत्वोऽभिषव उक्तस्तस्यायं विकल्पोऽपि वेति ।

अपोद्धृत्य पूर्वावंशू अन्याभ्यां द्वितीये पात्रमपि-
चायोपयच्छत्यन्याभ्यां तृतीये देवो देवानामिति
द्वितीये सोममासिञ्चति मधुमतीर्न इषस्कृधीति तृतीये ।

अथ द्वितीयतृतीययोरभिषवयोर्नियतो विशेष उच्यतेऽनेन । सूत्रार्थस्तु स्पष्ट एव ।

न सादयति ।

गृहीतं ग्रहं, सर्वग्रहाणां परिमार्जनं यथायोनिसादनं चेत्यैन्द्रवायवग्रहणमुक्त्वा परिभाषाकरणादेव पूर्वेषां ग्रहाणां सादनाभावे ज्ञाते न सादयतीति निषेधोऽप्राप्तस्यापि ग्रहधर्मत्वेन प्राप्तिशङ्कानिरासार्थम् । प्रतिषेधः(ध)संनियोगशिष्टत्वात्परिमार्जनमपि न भवति । न च सोमग्रहपक्षे सोमग्रहेऽश्वदाभ्ययोश्चापि आसादनस्य निषेध एतद्ग्रहासादननिषेधवत्कुतो न कृत इति शङ्कनीयम् । एतेषां ग्रहाणामनारभ्याधीतत्वेनापूर्वत्वात्प्राप्तिशङ्काया एवाभावात् । अथवोपांशुव्यतिरिक्तेष्वधाराग्रहेष्वपि पक्षे तूष्णीं सादनमपि भवतीतिज्ञापनार्थम् । तत्संनियोगशिष्टत्वात्परिमार्जनमपि । अन्तर्यामग्रहेऽप्येवं द्रष्टव्यम् ।

स्वांकृतोऽसीत्युत्तिष्ठति ।

स्पष्टम् ।

उर्वन्तरिक्षमिति गच्छति ।

अन्विहीति मन्त्रान्तः । अत्र पठित एवान्विहीत्यन्तः ।

उत्तरेण होतारमतिक्रम्य ॥ ७ ॥ मन-
स्त्वाष्टित्युत्तरं परिधिसंधिमन्ववतिष्ठते ।

गत्वेति परित्यज्यातिक्रम्येत्येवं वचनं होतुरुत्तरप्रदेशमदूरमतिक्रम्यैवाग्रिमदेशं

१ ख. ग. °ति । प्रतिप्रस्थातुर्ग्रहमादाय स्वांकृतोऽसीत्युत्तिष्ठति । स° ।

गच्छति न तु होतुरुत्तरप्रदेशे गमनवेलायां पादौ निधातव्यावित्यर्थविशेषद्योतनार्थम् । उत्तरं परिधिसंधिमित्यत्र द्वितीयाऽनोः कर्मप्रवचनीयत्वात्तद्योगेन ।

उत्तरं परिधिसंधिमन्ववहृत्य स्वाहा त्वा सुभवः सूर्यायेति दक्षिणाप्राञ्चमृजुं दीर्घꣳ संततं जुहोति ।

तमेव संधिमन्ववहृत्येत्येतावतैव सिद्धे पुनरुत्तरं परिधिसंधिमितिवचनमन्ववस्थानान्ववहरणयोः समकालत्वं ज्ञापयति । अववहृत्यावनतः सन्प्रहं प्रवेश्येत्यर्थः । दक्षिणाप्राञ्चमाग्नेयीदिक्पर्यन्तमित्यर्थः । अथोदग्नौ वायवीं दिशमारभ्य धाराकरणम् । ऋजुमिति वक्रताव्यावृत्त्यर्थम् । अग्न्यन्तप्रदेशे वायवीं दिशमारभ्याग्न्यन्तप्रदेश एवाऽऽग्नेयीदिक्पर्यन्तं दीर्घता । अग्नेर्मध्य एव वायवीं दिशमारभ्याग्नेर्मध्य एवाऽऽग्नेयीदिक्पर्यन्तं होमे ह्रस्वता । एतस्या निरासार्थं दीर्घवचनम् । संततवचनं मध्ये विच्छेदव्यावृत्त्यर्थम् । स्वाहा त्वा सुभवः सूर्यायेति मन्त्रादौ स्वाहाकारसत्त्वेऽपि अन्तेऽपि भवत्येव स्वाहाकारः । न ह्यस्मिन्मन्त्रे पुरस्तात्स्वाहाकारस्य पठितत्वात्पुरस्तात्स्वाहाकृतिरेव सूर्यो नोपरिष्टात्स्वाहाकृतिः, न ह्येकस्यैव पुरस्तात्स्वाहाकृतित्वमुपरिष्टात्स्वाहाकृतित्वं भवति, अतः कथमत्रान्ते स्वाहाकार इति वाच्यम् । अनेकपदैर्मध्ये व्यवधानात् । यत्र देवतापदस्वाहापदयोरव्यवधानं तत्परमेवेदं श्रुत्युक्तं पुरस्तात्स्वाहाकारत्वमुपरिष्टात्स्वाहाकारत्वं व्यवस्थया भविष्यति न सर्वत्रेति । यत्रानेकपदव्यवधानं तत्र पूर्वस्य स्वाहाकारस्य प्रदानार्थकत्वं नेत्येवमेव गम्यते । अन्यथा स्वाहाऽऽधिमाधीताय स्वाहेत्यन्तिमस्वाहाकारस्य वैयर्थ्यापत्तेः । न च स्वाहाऽऽधिमाधीताय स्वाहेत्यादिमन्त्रत्रयस्य प्रत्येकं मन्त्रद्वित्वपरत्वं शङ्क्यम् । एकविꣳशतिं वैश्वदेवानि जुहोतीत्येकविंशतिसंख्याविरोधापत्तेः । अतो मन्त्रास्त्रय एव । इदमेव लिङ्गमादिमः स्वाहाकारो देवतापदाव्यवहितपूर्व एव ग्राह्यो न तु मन्त्रादिर्व्यवहित इति । दिश इति पुरस्तात्प्रतिदिश इति दक्षिणत आदिश इति पश्चाद्विदिश इत्युत्तरत उद्दिश इति मध्ये स्वाहेति सर्वत्रानुषजतीति वसाहोमप्रकरणस्थे सूत्रे सर्वत्रेतिपदेन घृतं घृतपावान इति मध्यस्वाहाकारवति मन्त्रेऽपि तदन्ते स्वाहाकारप्रापणार्थं कृतेनाप्येतादृशार्थः स्पष्टीकृतो भवति । मध्यमे स्वाहाकारे बर्हिरनुप्रहरतीति लिङ्गमप्यत्र भवति ।

देवेभ्यस्त्वा मरीचिपेभ्य इति मध्यमं परिधावभ्यन्तरं लेपं निमार्ष्टि ।

स्पष्टम् ।

यदि कामयेत वर्षुकः पर्जन्यः स्यादिति ब्राह्मणव्याख्यातम् ।

यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचा हस्तेन निमृज्याद्वृष्टिमेव नियच्छति यदि कामयेतावर्षुकः स्यादित्युत्तानेन निमृज्याद्वृष्टिमेवोद्यच्छतीति ब्राह्मणे व्याख्यात-

मुक्तं निर्माणेने कामनाभेदेन हस्तस्य नीचत्वमुत्तानत्वं चेत्यर्थः । एतयोर्नित्यत्वमपि । लेपः पात्रबहिर्भागे लग्नः ।

आग्रयणस्थाल्या१ संपातमवनयति ।

अवयवार्थिकायाः षष्ठ्या अश्रवणात्सर्वसंपातावनयनम् । आपस्तम्बेन सर्वमाग्रयणस्थाल्या१ संपातमवनीयेति स्पष्टमेवोक्तमेतत् ।

एष ते योनिः प्राणाय त्वेति पात्र१ सादयति ।

सर्वसंपातावनयनाद्रिक्तमेव पात्रं सादयति । अर्थादायतन एव । स्पष्टमेवोक्तमापस्तम्बेन—एष ते योनिः प्राणाय त्वेति रिक्तं पात्रमायतने सादयति तस्मिन्नंशुमवास्य तं तृतीयसवनेऽपिसृज्याभिषुणुयादिति ।

तस्मिन्न१शुमवदधाति स परिशेत आतृतीयसवनात् ।

तृतीयसवनार्थ एवायमंशुः । तेन यावानुपात्तस्तृतीयसवनार्थं पर्याप्तो भवेत्तावानेवोपादातव्य इति । एवं च चतुरधिकपर्वैवायमंशुः । अन्यत्र सामान्यतस्त्रिपर्वाणो द्विपर्वाण एव वांऽशवः । त्रिपर्वाणो द्विपर्वाणो वांऽशवो ग्रहीतव्या इति शास्त्रान्तरे श्रवणादिति सिद्धं भवति । एतद्विनाशेऽन्यो ग्रहीतव्यः । तृतीयसवन आदित्यग्रहोत्तरमेतस्यांशोर्नाशश्चेत्तदाऽन्यस्य सोमस्याभावात्समीपवर्तिनं सोमं श्येन केनचित्पुरुषेण सोमविक्रयिणा वाऽऽहार्य तस्मै किंचिद्दत्त्वाऽभिषोतव्यः । तदभावे फाल्गुनान्यभिषोतव्यानीत्यादिकं प्रायश्चित्तं च सिद्धं भवति ।

अभिचरतस्तु ग्रहं गृहीत्वाऽमुष्य त्वा प्राणे
सादयामीति सादयेत्त१ सावित्रेणाऽऽदा-
यामुं जह्यथ त्वा होष्यामीत्यभिमन्त्र्य मदिर्षिणो
मादिरस्य मदे मृषाऽसावस्त्विति जुहोति ।

अभिचरतीत्यभिचरंस्तस्याभिचरतो द्वेष्यमुद्दिश्याभिचारं कुर्वतो यजमानस्येत्यर्थः । तुशब्दोऽत आरभ्य वक्ष्ये बाहौ वा तं जुहोतीत्यन्तं कर्म नैमित्तिकं भवतीति प्रदर्शयितुम् । ग्रहमुपांशुं देवस्य त्वेत्युपांशुसवनं ग्रावाणमादायेत्यादिना मधुमतीर्न इषस्कृधीत्यन्तेन विधिना गृहीत्वा, अमुष्येत्यस्य स्थाने शर्मान्तं षष्ठ्यन्तं द्वेष्यस्य नाम गृहीत्वा प्राणे सादयामीति आयतन एव सादयेत् । सादननिषेधेऽपि अभिचाराय सादनं विधीयते । अमुष्य प्राणे त्वां सादयामीति मन्त्रार्थः । तं सादितमुपांशुं देवस्य त्वा सवितुः प्रसव इति सावित्रस्तेनाऽऽदद इत्यन्तेनाऽऽदायोत्थानाद्यनवस्थानान्तं कुर्यात् । अमुं जहीत्यत्रामुमित्यस्य स्थाने शर्मान्तं द्वितीयान्तं द्वेष्यस्य नाम ग्राह्यम् । यथाऽमुकशर्माणं जह्यथ त्वा होष्यामीति । अथशब्दो मन्त्र आनन्तर्यार्थः । सादना-

१ ज. स. ब. ॰शेरत ।

व्यवहितोत्तरममुं जहि तस्य हननानन्तरमेव त्वा होष्यामीत्यमिमन्त्रगमन्त्रार्थः । प्रह-र्षिण इति मन्त्रेऽसावित्यस्य स्थाने शर्मान्तं प्रथमान्तं नाम ग्राह्यम् । यथा प्रहर्षिणो मदिरस्य मदे मृषाऽमुकशर्माऽस्त्विति । स्वाहा त्वा सुभव इत्यस्य स्थानेऽ-यमभिचारार्थो होममन्त्रः । होमानन्तरं लेपनिमार्जनादि संपातावनयनान्तं कृत्वैव ते योनिः प्राणाय त्वेत्यासादनमन्त्रमपोह्यामुष्य त्वा प्राणे सादयामीति मन्त्रमुक्त्वा तत्पात्रं सादयित्वा तस्मिन्नंशुमपिदधातीति । अत्राऽऽपस्तम्बेन विशेष उक्तः—ततो जुहुया-त्प्रहर्षिणो मदिरस्य मदे मृषाऽसावास्त्विति निह्नस्तिष्ठन्हुत्वाऽमुष्य त्वा प्राणे सादया-मीति सादयेदिति ।

आ होतोरमाणन्नासीत ।

आ होतोः सादनप्रभृति होमपर्यन्तमप्राणञ्श्वासं बहिरनिर्गमयन्नासीतोपविशेदि-त्यर्थः । भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्निति सूत्रेण तोसुन्प्रत्ययः । इदं च होमपर्यन्तमुपवेशनं संनिहितद्वेष्यविषयम् । दूरस्थस्याग्रे विशेषान्तरस्याभिधास्य-मानत्वात् ।

यदि दूरे स्यादा तमितोस्तिष्ठेत् ।

आ तमितोर्यावद्ग्लम् । अप्राणन्निति अनुवर्तते । दूरे द्वेष्यस्य सत्त्वे होमपर्यन्तमे-वाप्राणन्निति न किं तु ततोऽप्यधिकम् । तस्यावधिस्तु यावद्ग्लमप्राणत्वमिव यावद्ग्लं होमदेश एव तिष्ठन्ताऽपि ।

द्वेष्यस्य नाम गृह्णाति ।

अस्मिन्नाभिचारिके कर्मणि अमुष्यामुमसावित्येतेषां स्थाने क्रमेण षष्ठीद्वितीयाप्रथ-माभिर्विभक्तिभिर्द्वेष्यस्य नाम गृह्णातीत्यर्थः ।

देवाꣳशो यस्मै त्वेडे तत्सत्यमपरिप्लुता भङ्ग्येन हतोऽसौ फडिति
योऽस्याꣳशुराश्लिष्ट उरसि वक्षे बाहौ वा तं जुहोति ।

हे देव हेंऽशो यस्मै यदर्थं त्वामहमीडे प्रार्थयामि तत्सत्यमपरिप्लुताऽपरिप्लुतमप्र-तिहतमस्तु भङ्ग्येन भङ्गाय शत्रोर्नाशाय हितं कर्म भङ्ग्यं तेन भङ्ग्येनानेन वक्ष्यमा-णेन कर्मणा हतोऽमुकशर्माऽस्तु इति मन्त्रार्थः । फडिति फट्कारः स्वाहाकारप्रत्या-म्नायः । योऽस्योपांशुग्रहणस्याभिषवदशायामभिहतोऽशुरुत्प्लुत्याभिषुण्वता, उरसि वक्षे बाहौ वाऽऽश्लिष्टो भवेत्तं हुते ग्रहे सादिते च पात्रेऽनेन मन्त्रेण फडित्यन्तेन जुहो-तीत्यर्थः । यदि न श्लिष्टो भवेत्तदा नैव होम इत्यर्थसिद्धम् । तस्मिन्नंशुमवदधाति स परिशेत आतृतीयसवनादित्यन्त आभिचारप्रयुक्तविधिविशिष्टकर्मणि निर्वृत्त एवायमं-

१ अ. म. ॰षेरत ।

शुहोम इति ज्ञापयितुमेवैतत्पूर्वं द्वेष्यस्य नाम गृह्णातीतिसूत्रप्रणयनम् । एतदन्तं नैमित्तिकम् ।

अथ प्रकृतमुच्यते—

महाभिषवाय पर्युपविशन्ते पुरस्तादध्वर्युर्दक्षिणतः प्रतिप्रस्थाता पश्चान्नेष्टोत्तरत उन्नेता ।

सवनार्थत्वात्सर्वाध्वर्युकर्तृकत्वाच्च महत्त्वमभिषवस्य । चतुर्थी तादर्थ्ये महाभिषवार्थमित्यर्थः । परि परस्पराभिमुखामित्यर्थो न तु समन्तमिति । तस्य पुरस्तादित्यादिवक्ष्यमाणेनैव सिद्धेः । विदिग्व्यावृत्त्यर्थं पुरस्तादित्यादिकम् । महाभिषवाय पर्युपविशन्ते सर्वेऽध्वर्यवो दिक्षु क्रमेणेत्येतावतैव सेत्स्यति सति गुरुसूत्रकरणं क्रमेणोपवेशनार्थं पुरस्तात्प्रथममध्वर्युरुपविशति ततो दक्षिणतः प्रतिप्रस्थाता ततः पश्चान्नेष्टा तत उत्तरत उन्नेतेति । पुरस्तादित्यादयः प्रदेशा राजानमपेक्ष्य ज्ञेया अभिषवानुकूलत्वाय ।

राजानमपादत्ते यावन्तं प्रातःसवनायाऽऽप्तं मन्यते मत्युपनह्येतरं निदधाति तमुपरे न्युप्योशिक्त्वं देव सोमेति येऽऽदाभ्या अंशवस्तेषामेकैकमनुसवनमपिसृजति यत्ते सोमादाभ्यं नाम जागृवीति चोपांशुपावनानां द्वौ द्वौ ।

तमुपरे न्युप्येत्यन्तं कृतव्याख्यानम् । पूर्वत्रैकग्रहायाऽऽप्तमित्युक्तं स्थितं तत्रायं विशेषोऽत्र प्रातःसवनायाऽऽप्तं मन्यत इति । प्रतिग्रहमभिषवशङ्कां दूरीकर्तुं वा यावन्तं प्रातःसवनायाऽऽप्तं मन्यत इति वचनम् । ये, आदाभ्या इति पदच्छेदः । तद्धिताभावः पूर्वसवर्णदीर्घो वाऽऽर्षः । आदाभ्या अदाभ्यसंबन्धिनो येऽशवस्तेषां मध्य एकैकमेकमेकमंशुं सवनं सवनमनु अनुसवनं प्रवृहणक्रमेणापिसृजति प्रातःसवनार्थमपात्तेन राज्ञा संस्पर्शयति । अत्रापिसर्जनं राज्ञि मेलनं न भवति किं तु संस्पर्शनमेव । अन्यथा तानुपरे न्युप्येति उत्तरत्रोक्तस्योपरे निवपनस्यासंगतत्वापत्तेः । अपेहीत्यन्तास्त्रयो मन्त्राः । तेषां मध्ये प्रथमेन मन्त्रेण प्रथममंशुं प्रातःसवनेऽपिसृजति । द्वितीयेन द्वितीयं द्वितीये । तृतीयेन तृतीयं तृतीय इति केचित् । तन्न । वसवस्त्वा प्रवृहन्त्वित्येतैरुपनद्धस्य राज्ञ इतिवदत्रैतैरितिवचनाभावेनैकमन्त्रत्वमेव सूत्रकाराभिमतमित्यवगमात् । यदि सूत्रकारस्य मन्त्रनानात्वमभिमतं भवेत्तदैतैरिति पूर्ववद्ब्रूयादेव । बाधूलेन—उशिक्त्वं देव सोम गायत्रेण छन्दसाऽग्नेः प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीहीत्येतेनैकैकमंशुमनुसवनमपिसृजतीत्येकमन्त्रत्वं स्पष्टमेवोक्तम् । यत्ते सोमादाभ्यमित्ययमपि आदाभ्यांश्वपिसर्जन एव । चकारेण समु-

षपस्यैवावगमात्मन्त्रलिङ्गाच्च । पूञ्पवने इत्यस्माद्धातोः करणाधिकरणयोश्चेति ल्युट् । ततो भावे घञ् । पूयते ग्रहणकाले यैस्ते पवनाः । पवना एव पावनाः । उपांशोः पावना उपांशुपावना उपांशुसंज्ञकस्य ग्रहस्य पावना इत्यर्थः । तेषां मध्ये द्वौ द्वौ प्रवृहणक्रमेणापिसृजति तूष्णीमेव मन्त्रानुपदेशात् । अत्रापि उक्तेन हेतुनाऽपिसर्जनं संस्पर्शनमेव । अथ वा द्वौ द्वावित्यत्र चकारोऽन्वेति । तथा चैवमर्थो भवति—उशिक्त्वमिति आदाभ्यांश्वपिसर्जनमन्त्रः । यत्ते सोमादाभ्यं नाम जागृवीत्युपांशुपावनाख्यांशुद्वयापिसर्जनमन्त्र इति । प्रत्यंशु मन्त्रावृत्तिः ।

तानुपरे न्युप्य वसतीवरीभिरुपसृज्य दक्षिणैः पाणिभिर्ग्रावभिर्यथार्थमभिषुत्य निग्राभमुपयन्ति यथा पुरस्तात् ।

तानादाभ्योपांशुपावनानंशूनुपरे न्युप्योपरस्थराज्ञः समीपे न्युप्य वसतीवरीभिरुपसृज्य, दक्षिणैः पाणिभिरित्यत्र दक्षिणग्रहणं द्वाभ्यां पाणिभ्यामभिषुण्वन्तीतिसूत्रान्तरमतव्युदासार्थम् । नन्विदं सोमग्रहार्थाभिषव एव वक्तव्यं सर्वाभिषवाणामेष कल्प इत्यनेनात्रापि प्राप्नोत्येवेति चेत् । उच्यते—महाभिषवव्यतिरिक्तस्थले दक्षिणपाणिनियमं वारयितुमेवात्र दक्षिणैः पाणिभिरितिसूत्रे कृतमिति ज्ञेयम् । तेनात्र दक्षिणस्य पाणेरसामर्थ्येऽपि विरम्य विरम्य दक्षिणेनैवाभिषोतव्यम् । अन्यत्र दक्षिणस्यासामर्थ्ये वामेनापि सोमग्रहांशूपांशुसवनार्थसोमाभिषवो भवति । इदमपि सिद्धं भवति महाभिषवे सर्वथा दक्षिणस्यासामर्थ्ये वामेनात्रापि भवति परं तु नियमोल्लङ्घननिमित्तं त्रयस्त्रिंशतं यज्ञतनूहोमः प्रायश्चित्तार्थे कर्तव्यः सर्वप्रायश्चित्तं च । महाभिषवव्यतिरिक्तेष्वभिषवेषु नियमाभावात्प्रायश्चित्तहोमो नेति । महाभिषवे एवं दक्षिणानियम इत्यत्र लिङ्गं नरो यत्ते दुदुहुर्दक्षिणेनेति मन्त्रगतं बहुवचनम् । नृशब्दस्य प्रथमाबहुवचनं नर इति । पाणिवचनं सहिरण्यत्वप्रदर्शनार्थम् । तथा चाऽऽपस्तम्बः—हिरण्यपाणिरभिषुणोति गृह्णाति जुहोतीत्यत्यन्तप्रदेश इति । प्रदेशो विधानम् । अत्यन्ताय प्रदेशोऽत्यन्तप्रदेशः । सोमाभिषवादीन्हिरण्यपाणिः करोतीति सार्वत्रिको विधिरित्यर्थः । ग्रावभिरुपांशुसवनादन्यैश्चतुर्भिर्यथार्थं यथाप्रयोजनं सर्वेऽभिषुत्य निग्राभमुपयन्ति । बहुवचनात्सर्वे । यथा पुरस्तादित्यनेनांश्वादानादिः स निग्राभो भवतीत्यन्तो विधिः प्राप्यते । यंशुप्रवृहणं नात्र भवति तस्योपांशुमात्रार्थत्वात् । आ मा स्कान्द्रप्सश्चेत्येते अध्वर्योरेवेति केचित् ।

एवं विहितो द्वितीयस्तृतीयश्चाभिषवः ।

एवं वसतीवर्युपसर्जननिग्राभोपयमाभ्यां विहितो द्वितीयस्तृतीयश्चाभिषवो भवतीत्यर्थः । सक्रि लिमित्त आ मा स्कान्द्रप्सश्चेति ।

निरभिषुत५राजानमाधवनीये स५सिञ्चन्ति ।

निष्पीड्य सिञ्चन्तीत्यर्थः । अत्राऽऽपस्तम्बेन विशेष उक्तः—अभिषुतमध्वर्युरञ्ज-लिना स५सिञ्चति तमुन्नेताऽन्तरेणेषे अपोद्धृत्योत्तरत आधवनीयेऽवनयत्येष एवापा५ सोमस्य च पन्था इति । अस्यार्थः—एवं त्रिरभिषुतमञ्जलिनोद्‌चने संसिञ्चति गृह्णाति तं गृहीतमुन्नेताऽन्तरेषे यः पन्थास्तेनोद्धृत्योद्‌चनमुत्तरत आधवनीयस्य गत्वा तस्मिन्न-वनयति । उपसर्जनार्थानां वसतीवरीणामभिषुतस्य सोमस्य चैष एव पन्था इति । इदमप्यविरोधात्स्वीकर्तव्यमेव । तत्रोद्‌चने संसिञ्चनमात्रमध्वर्युकर्तृकम् । सूत्रविरुद्ध-त्वादाधवनीयेऽवनयनमापस्तम्बानामिव केवलाध्वर्युकर्तृकं न भवति किं तु सर्वाध्वर्यु-कर्तृकं संसिञ्चन्तीति बहुवचनात् । अत एव केवलोन्नेतृकर्तृकताऽपि वारिता भवति ।

एवं विहितो द्वितीयस्तृतीयश्च पर्यायः ।

संसिञ्चनान्तेन विधिना विहितो द्वितीयस्तृतीयश्च पर्यायः । तथा च त्रिपर्यायो महाभिषवो भवतीति । आपस्तम्बोऽपि अमुमर्थं स्पष्टमाह—त्रिपर्याय इति ।

उत्तमेऽभिषवे सुसंभृत५राजानं कृत्वा पवित्रेण प्रपीड्यो-परे ग्रावणः संमुखान्कृत्वा तेभ्य ऋजीषं व्यपोहति ।

सुष्ठु संभृतं निःशेषं संभृतं राजानमाधवनीये कृत्वा पवित्रेण दशापवित्रेण ऋजीष-माधवनीय एव प्रपीड्योपरे ग्रावणः पूर्ववत्संमुखान्कृत्वा तेभ्यो ग्रावभ्यो ग्रावार्थं प्रपी-डितमृजीषं व्यपोहति विभजतीत्यर्थः । उत्तमेऽभिषवे निग्राभोपायने जाते होतृचमसी-यानां निग्राभोपायनार्थैरंशुभिः सह होतृचमसस्थानां निग्राभ्याणां समाप्तिः ।

ऋजीषमुखान्करोति ।

विभक्तमृजीषं मुखेषु येषां त ऋजीषमुखा एतादृशान्ग्रावणः करोति । ग्रासमेभ्यः प्रयच्छतीति विज्ञायत इत्यापस्तम्बः । ग्रासो भक्षः ।

प्राञ्चमुद्गातारो द्रोणकलशं ग्रावस्वध्यूहन्ति ।

प्राञ्चमिति द्रोणकलशविशेषणं छन्दोगोक्तस्योदञ्चं वेति पक्षान्तरस्य व्यावृत्त्यर्थम् । उद्गातार उद्गातृप्रस्तोतृप्रतिहर्तार एव न सुब्रह्मण्योऽपि । छन्दोगसूत्रे बहुवचनेन तेषामेव ग्रहणात् । ग्रावसु संमुखीकृतेषु द्रोणकलशं प्राञ्चमध्यूहन्ति । उपरि प्रतिष्ठा-पयन्ति ऋतपात्रमसीत्यादिस्वसूत्रोक्तेन विधिना ।

अधोक्षमुपकर्षन्ति ॥ ८ ॥

अक्षस्याध इत्यधोक्षम् । अव्ययीभावसमासोऽयम् । अक्षस्याधोभागेन ग्रावसु प्रति-ष्ठापयितुमुपकर्षन्ति । उद्गातार इति पूर्वसूत्रादनुवर्तते ।

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो

अभुते मृतास इद्वहन्तस्तत्समाशतेति तस्मिन्नुदी-
चीनदशं पवित्रमुद्गातारो वितत्य धारयन्ति ।

तस्मिन्कलश उदीचीनदशमुदग्दशं पवित्रं वितत्य विस्तार्य कोणान्धारयन्ति यथाऽ-धस्ताद्ग्रहा गृह्येरन्नित्यर्थः । उद्गातृविधिप्रदर्शनमनेकसामशाखाभेदेन पाठान्तरसत्त्वे पक्षे तृचविनियोगसत्त्वे पवित्रस्य प्राग्दशात्वे चापि अयमेव पाठोऽभिप्रेत एकैवर्गभिप्रे-तोदग्दशात्वमेवाभिप्रेतं पवित्रस्येत्येतदर्थम् ।

एतयैवाध्वर्युरभिमन्त्रयते ।

एतयैव पवित्रं त इत्येतयैवर्चेत्यर्थः । यथोद्गातृभिर्वितत्य धारणं कृतं तयैवेति निष्कृ-ष्टोऽर्थः । अनेन सामशाखान्तर्गतैवात्र विनियुज्यते नाऽऽरण्यकान्तर्गतेति बोध्यते तथा च एवं कर्मस्विति प्रवर्ग्यसूत्रबोधितं शान्तिकरणं न भवति । वितत्यमानमिति शेषः । पवित्रमिति लिङ्गात् ।

तस्य यजमानो नाभिं करोति ।

तस्य दशापवित्रस्य । तां विततनकाले दशापवित्रस्य नाभिं करोतीत्येतस्याध्वर्युकर्तृ-कताऽत एवोक्ता न चेदेतस्यानर्थक्यप्रसङ्गात् । तथा चाध्वर्युर्यजमानो वा नाभिं करो-तीति विकल्पः सिद्धो भवति । अथ वाऽन्तर्भावितो णिजर्थः । तथा चाध्वर्युप्रेरणं यजमानकर्तृकं सिद्धं भवति । नाभिशब्दः पूर्वमेव व्याख्यातः ।

होतृचमसेन चास्मिन्संततां धारा१ स्रावयति ।

स्रावयतीत्यनन्तरं चकारोऽन्वेति । तथा चायमर्थो भवति—यजमानो नाभिं करोति स एव धारां स्रावयति चेति । चकारस्य मध्ये पाठेन श्रुतिरेवेयमनूदितेत्यनुमीयते। अवधारणार्थो वा चकारः । यजमान इत्यनुवर्तत एवास्मिन्पक्षेऽपि । स्पष्टः सूत्रार्थः ।

आधवनीयादुन्नेतोदञ्चनेन होतृचमस आनयति ।

उन्नेतृग्रहणं परिकर्मिचमसाध्वर्युव्यावृत्त्यर्थं नत्वध्वर्युव्यावृत्त्यर्थं तस्य कार्यान्त-रव्यापृतत्वेनासंभवादेव व्यावृत्तेः । उदञ्चनं नाम सोमग्रहणार्थश्चमस एव । तथा चोद-ञ्चनं चमसमिति बह्वृचाः । आपस्तम्बोऽत्र विशेषमाह—संतता धारा स्रावयितव्या कामो हास्य समर्धुको भवतीति विज्ञायते यं द्विष्यात्तस्य विच्छिन्द्यादिति । अस्य यजमानस्य कामाः समृध्येरन्निति फलार्थवादः ।

*स्रवन्त्या धाराया ग्रहान्गृह्णाति ।

---

* स्रवन्त्या इति युक्तम् ।

---

१ क. °भेता प्राग्द° ।

भाभिदेशेन स्रवन्त्या धारया इत्यर्थः । स्रवन्त्या धारया इत्यपादाने पञ्चमी । स्रवन्त्या धारायाः सकाशादंशुप्रान्तान्ग्रहान्गृह्णातीत्यर्थः । अण्व्या धारया ग्रहान्गृह्णातीत्यैन्द्रवायवादिषु धारायामणुत्वविशेषणादन्तर्यामे महत्येव धारा । मीमांसकमते तु अन्तर्यामस्य धारामहत्त्वं नास्तीति द्रष्टव्यम् । एतदन्ता परिभाषा धाराग्रहाणाम् ।

उपयामगृहीतोऽस्यन्तर्यच्छेत्यन्तर्यामम् ।

सादयस्वेत्यन्तः । गृह्णातीति पूर्वसूत्रादनुवर्तते ।

तस्योपाꣳशुना कल्पो व्याख्यातः ।

उत्थानगमने एव पर्यवसानमेतस्य सूत्रस्य । परं त्वत्रोत्थानमन्त्रस्यान्ते विशेषः स्वांकृतोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति । अन्यथोपांशुग्रहस्य स्वांकृतोऽसीत्येतावत एव ग्रहणे मधुमतीरित्यस्य प्रकरणपठितस्य वैयर्थ्यापत्तेः ।

उपांशुना कल्पो व्याख्यात इत्यनेन प्राप्तमुत्तरेण होतारमतिक्रम्येत्यादिकं तद्बाधकं विशेषमाह—

दक्षिणेन होतारमतिक्रम्य वाक्त्वाऽष्ट्विति दक्षिणं परिधिसंधिमन्ववतिष्ठते दक्षिणं परिधिसंधिमन्ववहृत्य स्वाहा त्वा सुभवः सूर्यायेति प्राञ्चमुदञ्चमृजुं दीर्घꣳ संततं जुहोति ।

वाक्त्वाऽष्ट्वित्ययं मनस्त्वाऽष्ट्वित्यनेन स्वशाखास्थेन मन्त्रेण विकल्पते । अथ वोत्थानमन्त्रशेष एव मनस्त्वाऽष्ट्वित्ययं मन्त्रः । स्वाहा त्वा सुभवः सूर्यायेति पुनर्मन्त्रवचनं पूर्वमन्त्रतोऽन्तकृतवैजात्यं द्योतयति । तथा च देवेभ्यस्त्वा मरीचिपेभ्य इति होममन्त्रस्यैव शेषो विनियोगान्तरासंभवादिति सिद्धं भवति । प्राञ्चमुदञ्चमैशानीदिक्पर्यन्तम् । उपांशुना कल्पो व्याख्यात इत्यनेनैव सिद्ध ऋजुं दीर्घं संततमिति वचनं यं कामयेत प्रमायुकः स्यादिति जिह्मं तस्य जुहुयाद्यं द्विष्यात्तस्य ह्रस्वं विच्छिन्नं जुहुयादिति सूत्रान्तरोक्तकाम्यतानिरासार्थम् ।

न परिधौ लेपं निमार्ष्टि नाऽऽग्रयणस्थाल्याꣳ संपातमवनयति ।

तेन सर्वस्य होमः । सशेषहोमपक्षे संपातावनयनरूपप्रतिपत्तेरभावाद्ध्रस्वं भवत्येव ।

एष ते योनिरपानाय त्वेति पात्रꣳ सादयति ।

पात्रमन्तर्यामपात्रं, सादनमायतने ।

साꣳशुमवदधाति ।

स्पष्टम् ।

---

१ ख. °स्थानाग° । २ ख. °त्यर्थं मन्त्रः । स्वा° ।

ते अन्तरेण व्यानाय त्वेत्युपाꣳशुसवनं
ग्रावाणꣳ सꣳस्पृष्टमुपाꣳशुपात्रेण सादयति ।

ते उपांश्वन्तर्यामयोः पात्रे ।

यं कामयेत प्रमायुकः स्यादित्यसꣳस्पृष्टौ तस्य सादयेद्यं
कामयेत सर्वमायुरियादिति सꣳस्पृष्टौ तस्य सादयेत् ।

यं यजमानं प्रमायुकोऽल्पायुः स्यादिति कामयेत तस्य यजमानस्य क्रतावसंस्पृष्टा-वुपांशुसवनेनासंस्पृष्टावुपांश्वन्तर्यामावध्वर्युः सादयेत् । यं यजमानं सर्वं पूर्णमायुरिया-दिति कामयेत तस्य क्रतौ संस्पृष्टावध्वर्युः सादयेत् । तत्र न हि निन्दा निन्दितुं प्रवर्ततेऽपि तु स्तुत्यं स्तोतुमिति न्यायेन पूर्वपक्षनिन्दाया उत्तरपक्षस्य प्राशस्त्ये तात्पर्यम् । परिक्रियलब्धोऽध्वर्युः कथमनिष्टं यजमानस्य कामयीत तस्मादर्थवादादु-भयोरसंस्पृष्टतया सादनमप्रशस्तत्वान्नैव कार्यमिति । उत्तरः काम्यः कल्पो नित्योऽपि । अयं प्रश्नः केवलेनोपांशुपात्रमात्रसंस्पर्शात्मकेन नित्येन कल्पेन विकल्पते । अत्र कमिधातुश्रवणेऽपि न संकल्पः कामनाया यजमानगतत्वाभावात् । यं द्वेष्यं यजमानं यजमानः कामयेतेति यजमानगतैव चेदेवंरीत्या कामना तदा कामनाप्रयुक्तः संकल्पो भवत्येव ।

उभावुदिते जुहोत्यत्वरमाणः ।

तमोपघाते प्रातरनुवाकसमाप्तावपि यस्य कर्मकरणविषये त्वरा नास्ति सोऽत्वरमाण एतादृशोऽध्वर्युरुभावुपांश्वन्तर्यामावुदिते सूर्ये सति जुहोतीत्यर्थः ।

त्वरमाणस्त्वनुदित उपांशुमुदितेऽन्तर्यामम् ।

तुशब्दः पूर्वापेक्षया वैलक्षण्यार्थः । त्वरायां सत्यामपि उदित एवान्तर्यामं गृह्णाति, उभयोरुदिते ग्रहणेऽपि स्वकाले सवनसमापनकरणसामर्थ्यवत्ताऽपि अनुदित एवोपांशुर्ग्राह्य इति द्विविधोऽत्र नियमः । अनयैव रीत्योभयोरुपादानं सार्थकं नान्यथेति द्रष्टव्यम् ।

उभावनुदित इत्येकेषाम् ॥ ९ ॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्ने तृतीयः पटलः ।

अस्मिन्पक्षेऽपि ऐन्द्रवायवादीना ग्रहणमुदित एव यथा भवति तदनुरोधेनानुदितेऽ-न्तर्यामग्रहणम् ।

रेखामात्रस्तु दृश्येत रश्मिभिस्तु दिवाकरः ।
उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत् ॥

इत्यग्निहोत्रहुत एवोदितकालोऽत्र । स्पष्टोऽर्थः ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्निचित्कवाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्निचित्कपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्र-
श्नस्य तृतीयः पटलः ॥ ३ ॥

अथाष्टमप्रश्ने चतुर्थः पटलः ।

रथंतरसाम्न्यैन्द्रवायवाग्रान्गृह्णीयात् ।

रथंतरं साम यस्मिन्स सोमो रथंतरसामा तस्मिन्रथंतरसाम्न्यैन्द्रवायू देवता यस्य ग्रहस्य स ऐन्द्रवायवः । सोऽग्रे प्रथमो ग्रहणे येषां त ऐन्द्रवायवाग्रा एतादृशान्ग्रहान्गृह्णीयादित्यर्थः । प्रथमे प्रयोगे रथंतरसामैवेत्येकेषामाचार्याणां मतम् । तथा चाऽऽपस्तम्बः—न रथंतरसामानमकृत्वा बृहत्सामानमाहरेदित्येक इति । एक इतिवचनान्नायं नियम इति गम्यते ।

बृहत्साम्नि शुक्राग्रान् ।

शुक्रः शुक्रग्रहोऽग्रे येषां ते शुक्राग्रा एतादृशान्ग्रहान्बृहत्साम्नि सोमे गृह्णीयादित्यर्थः । अस्मिन्पक्षेऽन्तर्यामोत्तरमादौ शुक्रमेव गृहीत्वा हिरण्येन श्रीत्वाऽन्यस्य हस्ते तं दत्त्वैन्द्रवायवं गृहीत्वा तं परिमृष्टमायतने सादयित्वा शुक्रं गृहीत्वा तं परिमृष्टमायतने सादयित्वा मैत्रावरुणं गृहीत्वा शृतशीतेन पयसा श्रीत्वा सादयित्वा मन्थिग्रहणादीत्येवं प्रयोगक्रमः । नचात्र ज्योतिष्टोमात्कर्मान्तरविधिः । ज्योतिष्टोमस्य रथंतरसामेति-विशेषणासंभवात्तत्र सामान्तरसत्त्वेन व्यावर्तकत्वाभावात्सकलज्योतिष्टोमव्यापनासंभवाच्च । अतः सामर्थ्याभावान्न ज्योतिष्टोमस्य रथंतरसामनिमित्त ऐन्द्रवायवाग्रता-विधिः । नापि बृहत्सामनिमित्ते शुक्राग्रताविधिरिति वाच्यम् । यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान्ग्रहान्गृह्णीयाद्यदि बृहत्सामा शुक्राग्रानिति श्रुतौ यदिशब्दाज्ज्योति-ष्टोमप्रकरण एतस्याः श्रुतेः पाठाच्च सोमशब्देन ज्योतिष्टोमस्यैवानुवादात् । विशेषणत्वं तु अयोगव्यवच्छेदेन परस्परविरोधिरथंतरबृहत्सामव्यवच्छेदेन चोपपन्नं द्रष्टव्यम् । तथा च द्वितीयाध्याये तृतीयपादे जैमिनिः—गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयेत्सं-योगस्याशेषभूतत्वात् । एकस्य तु लिङ्गभेदात्प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वादिति-सूत्राभ्याम् । एकस्यैव क्रतोरग्निष्टोमस्य लिङ्गभेदाद्रथंतरसामा बृहत्सामोभयसामेत्येवंरू-

चस्य लिङ्गस्य स्वरूपस्य भेदादग्रताप्रयोजनार्थमुच्यते नैकत्वमेकक्रतुपरत्वमेव । एतेषामुदाहृ-
तानां गुणवाक्यत्वाद्गुणा ऐन्द्रवायवाग्रत्वादयस्तदर्थानि वाक्यानि गुणवाक्यानि तस्मा-
द्धेतोरेकक्रतुपरत्वमेवेति द्वितीयसूत्रार्थः । [प्रथम] सूत्रार्थस्तु रथंतरसामत्वादिः क्रतु-
संयोगात् । पूर्वक्रतुसंबन्धात्कर्मान्तरमेव प्रयोजयेद्योधयेत् । कुतः संयोगस्य रथं-
तरसामेति सामसंयोगस्याशेषे कृत्स्ने क्रतौ भूतत्वादवगतत्वाच्चस्य च ज्योतिष्टोमे
संभवाभावादिति ।

उभयसाम्नि याथाकामी ।

उभयं साम रथंतरबृहदात्मकं यस्मिन्सोमे स उभयसामा तस्मिन्याथाकामी यथा-
कामं यथेच्छमैन्द्रवायवाग्रता शुक्राग्रता वा भवतीत्यर्थः । एतस्य प्रकृतावसंभवेन सर्व-
पृष्ठाप्तोर्यामादौ निवेशः ।

ऐन्द्रवायवान्गृह्णीयाद्वैकारिके पृष्ठसंयोगे ।

कण्वरथंतराख्यविकारसिद्धे पृष्ठसंयोगे पृष्ठसंबन्धे यस्मिन्सोमे सति यथा सप्तदश-
प्रश्नान्तर्गतदशमे खण्डेऽग्निष्टोमेन कण्वरथंतरसाम्ना वैश्यः पुष्टिकामो यजेतेत्यादौ
यथा वा राजनसाम्नि महाव्रत ऐन्द्रवायवाग्रानेव गृह्णीयादित्यर्थः ।

ऐन्द्रवायवाग्राञ्ज्येष्ठबन्धुर्गृह्णीतेति नित्ये काम्ये ।

ज्येष्ठबन्धुरित्यनन्तरं कनीयसाऽनतिक्रान्त इति शेषः । वाग्वा एषा यदैन्द्रवायवो यदै-
न्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानुप्रयन्तीत्युपक्रम्य तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्त
इत्यैन्द्रवायवाग्रतोपसंहारेणैन्द्रवायवग्रहस्यैव प्रथमपाठेन च नित्ये ज्येष्ठबन्धुर्गृह्णीतेति
शाखान्तरे फलश्रवणेन काम्ये विधौ चैन्द्रवायवाग्रतैव भवतीत्यर्थः । ज्येष्ठबन्धुरित्यस्य
ज्येष्ठभ्रातेत्यर्थः । अस्मिन्नर्थे श्रुतिरस्ति न ज्यायाꣳसं कनीयानतिक्रामतीति । एतस्य
काम्यत्वमैन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेतेत्युपक्रम्य न ज्यायाꣳसं कनीयानतिक्रामती-
त्युपसंहारात् । कनीयःकृतातिक्रमपरिहार एवात्र कामना ।

ऐन्द्रवायवाग्रान्गृह्णीयादामयाविन इति ब्राह्मणव्या-
ख्यातानि काम्यानि ग्रहणानि तेषां याथाकामी ।

आमयावी रोगी । अन्तर्यामस्य धाराग्रहत्वेऽपि न तत्पूर्वमैन्द्रवायवग्रहणं किं तु
स्वस्थान एवैन्द्रवायवः । न चैन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पे-
रन्निति तदनन्तरं काम्याग्रताविधानमिति सर्वादितः प्रतिकर्ष इति वाच्यम् । प्रस्तुत-
धाराग्रहाणामेवाग्रताविशिष्टानां फलसंबन्धात् । तदाह दशमाध्याये पञ्चमे पादे जैमिनिः—
कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यादिति । शुक्राग्रत्वे तु न स्वस्थानस्थितिः ।
अप्राप्तशुक्राग्रताया एव फले विधानात् । तस्मादादित एव प्रतिकर्षः । तथा च दश-

माध्याये पञ्चमे पादे जैमिनिः—परेषु चाग्रशब्दः पूर्ववत्स्यात्तदादिष्विति । ऐन्द्रवायव-वादिधाराग्रहाणां प्रकृतत्वात्तदाश्रितैव शुक्राग्रता फले विधीयत इति न सर्वादितः प्रतिकर्षः । तथा च दशमाध्याये पञ्चमे पादे जैमिनिः—पुरस्तादैन्द्रवायवाग्रस्य कृतदेशत्वादिति । गृह्णीरन्निति बहुवचनात्सत्रपरता मैत्रावरुणाग्रतायाः । आश्विनाग्रत्वे-ऽप्यानाय स्वेत्युपांशुसवनसादनोत्तरमेवाऽऽदौ मैत्रावरुणचमसीयैकधनैकदेशानामाधवनीयेऽवनयनं कृत्वा तिरःपवित्रं पूतभृति तदेकदेशमवनीय द्रोणकलशादुपस्तीर्य पूतभृत उन्नीय द्रोणकलशादभिघारयतीति स्वोक्तप्रकारेण बहिष्पवमानात्पूर्व-मेव ग्रहणं वाचनिकम् । अथवाऽन्तर्यामहोमोत्तरमेव मैत्रावरुणचमसीयाश्चैक-धनैकदेशाश्चाऽऽधवनीयेऽवनीयेत्यादि आश्विनग्रहग्रहणान्तं कृत्वैन्द्रवायवग्रहणादि ध्रुवग्रहणान्तं कृत्वा धारां विरम्य प्रपीड्य पवित्रं तन्निधाय सवनीयपशूपा-करणादि समानम् । शुक्राग्रतायां प्रकारः प्रागेवोक्तः । मन्थ्यग्रतायामादौ मन्थिनं गृहीत्वैन्द्रवायवं गृहीत्वा तत्सादनानन्तरं मन्थिनं सादयित्वा मैत्रावरुणशुक्रसादना-नन्तरमाग्रयणग्रहणसादनादि । आग्रयणाग्रोक्थ्याग्रतयोः प्रथममेतयोर्ग्रहणमनन्तरमै-न्द्रवायवादीनाम् । एतेषां पक्षाणामिष्टविषयकत्वात्काम्यत्वम् ।

मैत्रावरुणाश्विनशुक्रमन्थ्याग्रयणोक्थ्याग्रतास्वरूपमाह—

पुरस्तादैन्द्रवायवाद्गृह्यन्ते सन्नो साद्यन्ते ।

सन्न ऐन्द्रवायवे सन्ने । सादनं चाविशेषत्वादिति जैमिनिरपि । अवदानवद्ग्रहणस्य न प्रदानोपक्रमत्वं सर्वेषु गृहीतेषु पश्चात्तदनुष्ठानात् । नातः प्रदानापकर्षः । तथा च जैमिनिः—प्रदानं चापि सादनवदिति ।

प्रकृतं प्रयोगमाह—

ऐन्द्रवायवं गृह्णाति ।

सामान्यप्रतिज्ञानं काम्यविषयकत्वशङ्कां निवर्तयितुम् ।

आ वायो भूषेत्यनुद्रुत्य पात्रमुपयच्छत्युप-
यामगृहीतोऽसि वायवे त्वेति तस्मिन्गृह्णाति ।

उपयमनं नाम धारायाः समीपे नियमनं धारणमिति यावत् । तस्मिन्धाराया अव-स्ताद्धृते पात्रे चतुर्थभागन्यूनं पात्रार्धमितं सोमं गृह्णातीत्यर्थः ।

पात्रमपयम्येन्द्रवायू इत्यनुद्रुत्य पुनरेवोपयच्छत्युपया-
मगृहीतोऽसीन्द्रवायुभ्यां त्वेति तस्मिन्पुनर्गृह्णाति ।

अपयम्य धारातो दूरीकृत्योपर्यर्धं गृह्णाति । पुनरेवोपयच्छतीतिवचनं पात्रभेदशा-ङ्कानिरासार्थम् । पुनरेवोपयच्छतीत्यनेनैव सिद्धे तस्मिन्पुनर्गृह्णातीतिवचनमैन्द्रवायवग्र-

हणकाले पुनरुपयमनमात्रं वायव्यपात्रस्य, ऐन्द्रवायवग्रहणं तु भिन्नपात्र इति पुनः शङ्कायास्तादवस्थ्यं स्यात्तद्वारयितुम् । तस्मिन्पुनर्गृह्णातीत्येतावतैव सिद्धे पुनरेवोपयच्छतीतिवचनं धारातो दूरीकृतस्यापि पात्रस्य ग्रहणसमय एव धाराया अधस्तादेव नयनं केवलं स्यात्तन्मा भूत्किं तु मध्ये धारासमीपे मन्त्रपठनकाल एव धारणं यथा स्यादित्येतदर्थम् । वायोर्द्विवारग्रहणविषये ब्राह्मणम्—तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते तस्मात्सकृदिन्द्राय मध्यतो गृह्यते द्विर्वायवे द्वौ हि स वराववृणीतेति ।

पदव्यापूतं पवित्रं तेन परिमृज्यैष ते योनिः
सजोषाभ्यां त्वेत्यायतने सादयति ।

अव्यापूतमित्यनेन द्रोणकलशोपरि धृतस्य व्यावृत्तिः क्रियते । तेनेति वचनाद्दशाभिरेव परिमार्जनमापस्तम्बोक्तं मानवसूत्रोक्तं च निवार्यते । आयतने स्वस्थाने । ग्रहेषु तु सहिरण्यतेति पूर्वोक्तया परिभाषया सर्वेषु ग्रहेषु हिरण्यश्रयणम् । एतस्य कृताकृतत्वमग्रे वक्ष्यते ।

परिभाषामाह—

पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टादुपयामा ऋचा ।

ऐन्द्रवायवग्रहणोत्तरं परिभाषाकरणादैन्द्रवायव एतस्या न प्रवृत्तिः । तथा चोपयामेनैवैन्द्रवायवग्रहणमुपरिष्टादुपयामस्त्वेऽपि । अनुद्रुत्येत्यस्यात्र पठित्वेत्येवार्थो न तूपयामेन सह योजनार्थः । अन्यथा मन्त्रोपयामसंधानसमकालतया ग्रहण एव संभवेन पात्रोपयमनरूपक्रियाया मध्ये विहिताया निरर्थकत्वापत्तेः । अनुद्रुत्येत्यस्य पठित्वेत्यर्थस्वीकारे पाठसमकालपात्रोपयमने कालभेदसंभवेन निरर्थकत्वाभावात् । ल्यपः समकालत्वमेवार्थो न तु आनन्तर्यमर्थः । अन्यथा तद्दोषतादवस्थ्यापत्तेः । पुरस्तादुपयामा येषां ग्रहाणां ते पुरस्तादुपयामाः, येषां ग्रहाणां मन्त्रेषु पुरस्तात्पूर्वमुपयामगृहीतोऽसीति पठितस्त इति यावत् । एतादृशा ये ग्रहास्ते यजुषा गृह्यन्ते यजुःकरणकग्रहणा भवन्तीत्यर्थः । उपरिष्टादुपयामा येषां ग्रहाणां त उपरिष्टादुपयामाः, येषां ग्रहाणां मन्त्रेषूपरिष्टादनन्तरमुपयामगृहीतोऽसीति पठितस्त इति यावत् । एतादृशा ये ग्रहास्त ऋचा गृह्यन्त ऋक्करणकग्रहणा भवन्तीत्यर्थः । पुरस्तादुपयामा यजुरन्ते गृह्यन्त उपरिष्टादुपयामा ऋगन्ते नतूपयामेनेत्यर्थः । एतेन कदाचन प्रयुच्छसीति शुनातक्ष्यं दधि यज्ञो देवानां प्रत्येतीति य आदित्यस्थालपात्रे सोमस्तत्र सर्वे गृह्णातीत्यादित्यग्रहीयदधिग्रहणमवधिसोमग्रहणयोरुपयामपाठाभावादुपयामेन ग्रहणं सिध्यति । षोडशे प्रश्ने षोडशे खण्डे विपुतंस्तद्रु इत्यं आनन्देरसमिति तेषां मध्ये सौर्यं सतमं मध्यमं गृह्णाति

वाचस्पतिं विश्वकर्माणमूतय इति विश्वजिति वैश्वकर्माणं महीमू षु मातरमित्यपरेद्युरा-दित्यमित्येतत्सूत्रेण विहिते प्रथमे विषुवति गृह्यमाणे सौर्येऽतिग्राह्ये विश्वजिति गृह्यमाणे वैश्वकर्मणेऽतिग्राह्ये उत्तरे विषुवति आदित्येऽतिग्राह्ये चोपयामपाठाभावादुपयामेनैव ग्रहणम् । उपयाम उपयामगृहीतोऽसीत्यंशः । उपयामशब्देन पात्ररूपा पृथिव्युच्यते । तथा च श्रुतिः—उपयामगृहीतोऽसीत्याहेयं वा उपयामस्तस्मादिमां प्रजा अनुप्रजा-यन्त इति । उपयामेन पृथिव्यैव गृहीतोऽसि हे सोमेति मन्त्रार्थः ।

सर्वग्रहाणां परिमार्जनं यथायोनिसादनं च ।

ग्रहाणामिति बहुवचनेनैव सिद्धे सर्वग्रहणं परिभाषार्थम् । तेन धाराग्रहव्यतिरि-क्तोक्थ्यादिग्रहेष्वपि परिमार्जनं सिद्धं भवति । अत्र परिभाषाकरणात्पूर्वेषु ग्रहेषु न परिमार्जनम् । ग्रहं संमार्ष्टीत्यत्रैकत्वश्रवणादेकस्यैव ग्रहस्य संमार्ग इति तु न भवति । ग्रहमात्रोद्देश्यत्वात्सर्वग्रहेषु संमार्गः । एकत्वस्यापि विधाने तु ग्रहोद्देशेन संमार्गैकत्वो-भयविधाने वाक्यभेदापत्तेः । तस्मादेकत्वानुवाद एव । तथा च तृतीयाध्याये प्रथमे पादे जैमिनिः—एकत्वयुक्तमेकस्य श्रुतिसंयोगादिति । न्यायप्रदर्शनार्थं च सर्वग्रहणम् । सूत्रार्थस्तु ग्रहं संमार्ष्टीत्यत्रैकत्वश्रवणादेकस्यैव ग्रहस्य संमार्गो न सर्वेषां श्रुतावेकत्व-स्यैव संबन्धादिति । परिमार्जनं यदुव्याप्तनं तेन । पूर्वत्र तस्यैवोक्तत्वात् । ग्रहग्रहणं चमसव्यावृत्त्यर्थम् । एकत्वाविवक्षावत्स्वरूपाविवक्षा नैव भवति किं तु विवक्षैव स्वरू-पस्य । उद्देश्यं विना विध्ययोगेन तत्स्वरूपस्याविवक्षायां कारणाभावात् । तथा च चमसेषु न संमार्ग इति । तथा च तृतीयाध्याये प्रथमे पादे जैमिनिः—संस्काराद्वा गुणानामव्यवस्था स्यात्, व्यवस्था वाऽर्थस्य श्रुतिसंयोगात्तस्य शब्दप्रमाणत्वादिति सूत्राभ्याम् । संस्कारात्संमार्गरूपसंस्काराद्गुणानां ग्रहत्वचमसत्वादिगुणानामव्यवस्थैव स्यान्न तु ग्रहत्वचमसत्वस्वरूपव्यवस्थाऽत्र । तेन चमसानामपि संमार्ग इति प्रथमसू-त्रार्थः । उत्तरसूत्रे वाशब्दः पूर्वपक्षव्यावर्तकः । व्यवस्थैवात्रार्थस्य ग्रहचमसत्वधर्मद्व-यावच्छिन्नार्थद्वयस्य ग्रहचमसात्मकस्य श्रुतिसंयोगाद्ग्रहं संमार्ष्टीत्येव श्रुतिसंबन्धो न तु चमसं संमार्ष्टीति श्रुतिसंबन्धस्तस्माद्ग्रहश्रुतिसंबन्धात्तस्य ग्रहश्रुतिसंबन्धस्य शब्द-प्रमाणत्वाच्छब्दैकगम्यत्वादिति द्वितीयसूत्रार्थः । योनिशब्देन कारणीभूतमत्रायतन-योर्ग्रहणम् । योनिश्च योनिश्च योनी योनी अनतिक्रम्य यथायोनि । तथा च यथा-करणमत्रं यथायतनं चेत्यर्थः । योनिशब्दस्य कारणवाचित्वं प्रसिद्धम् । स्थानवा-चित्वं तु योनिष्ट इन्द्र निषदे अकारीति श्रुतेर्हे इन्द्र तवोपवेशनाय स्थानं मया कृत-मित्यर्थात् । ग्रहणकाले पूर्वं बुध्नस्योदकेऽवधानं बौधायनेनोक्तं तदपि दृष्टप्रयोजनसं-भावनायां कर्तव्यं सर्वत्र । अत्र परिभाषाकरणादन्तर्यामान्तेषु ग्रहेषु न परिमार्जनम् । चकार अग्रुपयामयोरनुद्रवणसमुच्चयार्थः ।

अयं वां मित्रावरुणेति मैत्रावरुणꣳ राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः। तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीमिति तꣳ शृतशीतेन पयसा श्रीत्वा सादयति।

इत्यनुद्रुत्य पात्रमुपयच्छतीति सर्वग्रहेष्वनुवर्तते। मैत्रावरुणमित्यनन्तरं गृहीत्वेति शेषः। अयं वां मित्रावरुणेत्यादिषु तत्तत्प्रतीकेन तत्तल्लिङ्गकग्रहणमन्त्रोपहिताः सर्वे मन्त्रा गृह्यन्ते। तं मैत्रावरुणं शृतशीतेन शृतं पक्वं तच्छीतं तेन पयसा पूर्वसंपादितदोहेन श्रीत्वा मिश्रयित्वेत्यर्थः। शृतेनेत्येतावत्युच्यमाने पक्वार्थमत्रैव दोहः स्यात्तदर्थं शीतेनेति। शीतेनेत्येतावत्युच्यमाने तापो न स्यात्तदर्थं शृतेनेति। शृतशब्दः पाकपरः शृतं पाक इति पाणिनिस्मरणात्। यथादैवतमत्रेण तत्तन्मन्त्रान्ते, तत्तद्देवतालिङ्गकग्रहणमन्त्रस्तत्तद्ग्रहणे तत्तद्देवतालिङ्गकसादनमन्त्रस्तत्तद्ग्रहसादन इति सर्वग्रहोपयोगिविधिः। मैत्रावरुणग्रहेऽयं वां मित्रावरुणेति उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वेति एष ते योनिर्ऋतायुभ्यां त्वेति मैत्रावरुणग्रहे मन्त्राः। एष ते योनिर्ऋतायुभ्यां त्वेति सादनमन्त्रः।

अयं वेन इति शुक्रꣳ हिरण्येन श्रीणाति।

शुक्रमित्यनन्तरं गृहीत्वेति शेषः। अत्र हिरण्येन श्रीणातीति पुनर्विधानात्पूर्वत्र हिरण्यश्रयणस्यानित्यता। उपयामगृहीतोऽसि शण्डाय त्वा, एष ते योनिर्वीरतां पाहीति ग्रहणसादनौ मन्त्रौ।

तं प्रत्नथेति मन्थिनम्।

गृहीत्वेति शेषः।

मनो न येषु हवनेषु जुहद्विपः शच्या वनुथो द्रवन्ता। आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीताऽऽदिशं गभस्ताविति सक्तुभिर्मन्थिनꣳ श्रीणात्यात्मानमनभिध्वꣳसयन्नितराꣳश्च ग्रहान्।

उपयामगृहीतोऽसि मर्काय त्वा, एष ते योनिः प्रजाः पाहीति ग्रहणसादनौ। सक्तवो यवपिष्टानि। तत्रैव तस्य रूढः। तद्यवं प्राविशदिति लिङ्गाच्च। अत्र सक्तवः श्रौताग्नौ भर्जनाविधानाद्बहिरेव विहारादुत्पादयितव्याः। बौधायनेन लौकिकसक्तुनिष्पादनमेवोक्तं तच्च पूर्वेद्युरेव। तदर्थं पयश्च सक्तूंश्च कुरुतेति प्रैष एवोक्तः। आत्मानमनभिध्वंसयन्नविकिरन्। इतरान्ग्रहांश्चानभिध्वंसयन्नविकिरन्नित्यर्थः। आत्मानमनभि-

१ ग. ङ. ज. झ. ञ. मकूवा

ध्वंसयन्नितरांश्च ग्रहानितिवचनादेवं ज्ञायते प्रवाते देशे प्रायेण सक्तुध्वंसनं स्यादेव तत्र सोमस्यान्येषां हविषां च परस्परं संसर्जने दोषावहं स्यादिति । तेनान्यानि हवींषि स्पृष्ट्वा प्रक्षालितपाणिभिरेव राजा स्प्रष्टव्यः । राजानं स्पृष्ट्वाऽन्यानि हवींषि । तथा च बाधूलादिसूत्रे नास्पृष्टोदकाः सोमेनेतराणि हवींष्यालभेरन्निति । कात्यायनसूत्रे च—आज्यमालभ्योपस्पृशेदथः सोममालप्स्यमानस्तथेति । छन्दोगसूत्रे च — न राजानमालभ्यानुपस्पृश्याप आज्यमालभेरंस्तथाऽऽज्यꣳ राजानꣳ सर्वत्रेति । आश्वलायनेनापि तत्र तत्र राजसंस्पर्शनोपस्थितेः प्राक्स्पृष्टोदकमिति उदकस्पर्शो विहितः । पृतन्तानामुपांशुस्वरः ।

ये देवा दिव्येकादश स्थेति स्थाल्याग्रयणमा-
ग्रयणोऽसीति वा पुरस्तादुपयामेन यजुषा ।

स्थालीग्रहणं तां विश्वे देवा आग्रयणस्थाल्योर्जमदुहन्नित्यादर्थवादबोधितोर्ग्दोहभावनाऽऽग्रयणग्रहणकाले कर्तव्येति स्फोरणाय । स्थाल्या गृह्णाति । वायव्येन जुहोति । तस्मादन्येन पात्रेण पशून्दुहन्ति । अन्येन प्रतिगृह्णन्ति । अथो व्यावृतमेव तद्यजमानो गच्छतीतिश्रुतिचोदितस्थालीकरणकग्रहानुकरणाय च । ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थाप्सुषदो महिनैकादश स्थ ते देवा यज्ञमिमं जुषध्वमुपयामगृहीतोऽसीति प्रथमे पक्षे मन्त्रः । उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणेति द्वितीये पक्षे मन्त्रः । एतेनोपरिष्टादुपयामस्यैवाऽऽग्रयणोऽसीत्ययं शेष इति शङ्का निरस्ता । आग्रयणोऽसीति पुरस्तादुपयामेन यजुषा वेत्यन्वयः । पुरस्तादुपयामेनेति विशेषणात्पूर्वमन्त्रस्यकस्यादुपरिष्टादुपयामत्वं सूचितम् । स्पष्टमाहाऽऽपस्तम्बः—ये देवा दिवीत्युपरिष्टादुपयामया पुरस्तादुपयामेन वा यजुषेति । पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टादुपयामाश्चेत्यनेनैव सिद्धेऽत्र पुरस्तादुपयामेनेति वचनमेकस्यैवोपयामस्य मध्यपातिन उभयान्वयित्वादुभयमन्त्रस्यापि सोपयामत्वमिति, तेनोपयामद्वयपाठाभावादेकस्य सोपयामत्वं कस्योपयामरहितत्वं तथा च यस्योपयामरहितत्वं तस्योपयामेनैव ग्रहणं स्यान्नतु ऋग्यजुरन्यतरान्त इति तद्व्यावर्तयितुम् । तेनोभयपक्षेऽपि तत्तन्मन्त्रान्त एव ग्रहणं न त्वेकत्रोपयामेनैकत्र मन्त्रान्त इति सिद्धं भवति ।

द्वाभ्यां धाराभ्यां गृह्णाति ।

सामान्यप्रतिज्ञेयं द्वयोर्धारयोः साहित्यार्था ।

य आग्रयणस्थाल्याꣳ सोमस्तस्यैकदेशमन्य-
स्मिन्पात्रे *निषिच्य द्वितीयां धारां करोति ।

---

* सूत्रपुस्तकेषु निःषिच्येति पाठः ।

अनेन ज्ञायत उपांशुपात्रस्य बिलं विस्तीर्णं निम्नतरं चेति । इदमपि ज्ञायतेऽर्धस्य होमोऽर्धस्य स्थाल्यामवनयनमिति । एकदेशश्चतुर्थांशरूपः । अन्यस्मिन्नस्मिन्कस्मिंश्चित्पात्रे निषिच्य स्रावयित्वा तेन द्वितीयां धारां करोतीत्यर्थः ।

विदघती सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्रिपकः । अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गादिति पुरोरुचमभिचरतः कुर्यात् ।

उपयामम‍न्त्रात्प्रागुच्यते यर्क्तस्याः पुरोरुगिति संज्ञा । यत्राभिचारनिमित्ते ग्रहग्रहणे विशेषभूताया ऋचो ग्रहणं क्रियते तत्र पुरोरुगिति संज्ञयोपादानम् । दृष्टं चैतच्छ्रुतावभिचर्यमाणस्योक्थ्याग्रतायाम्—उक्थ्याग्रान्गृह्णीताभिचर्यमाणः सर्वेषां वा एतत्पात्राणामिन्द्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणातिप्रयुङ्क्ते सरस्वत्यभिनो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै सरस्वती वाचैवैनमतिप्रयुङ्क्ते मा त्वत्क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छतीति । अभिचरतीत्यभिचरंस्तस्याभिचरतो द्वेष्यमुद्दिश्याभिचारं कुर्वतः । एतादृशस्य यजमानस्येमां पुरोरुचं कुर्यात् । रुग्णवत्पदघटितत्वादिति भावः । अत्र श्रुतावुपयामपाठाभावादुपयामेनैव ग्रहणं नर्गन्त इति द्रष्टव्यम् ।

त्रिꣳशाग्रयणेति भ्रातृव्यवतः ।

भ्रातृव्यः शत्रुस्तद्वतः । पूर्वः कल्पस्तस्यैवापकाराय । अयं तु तत्कृतापकारप्रतीकारायेति भेदः । अत्राऽऽग्रयणोऽसीत्ययमुपरिष्टादुपयामस्यैव शेषः । पूर्ववद्विकल्पबोधकपदाभावात् । आग्रयणोऽसीत्यस्मिन्मन्त्रे भ्रातृव्यकर्तृकापकारप्रतीकारबोधकपदाभावेन तदुपयोगासंभवाच्च । सादनमन्त्रः पूर्ववदेव ।

आग्रयणं गृहीत्वा हिमिति त्रिर्हिं करोति शनैरग्रेऽथोच्चैरथ सूच्चैः सोमः पवत इति त्रिराह शनैरग्रेऽथोच्चैरथ सूच्चैः ॥ १० ॥

आग्रयणं गृहीत्वेतिवचनं नैमित्तिक आग्रयणग्रहण एव वक्ष्यमाणमभिमन्त्रणान्तमिति शङ्कां व्यावर्तयितुम् । तेन नित्येऽपि आग्रयणग्रहण इदं भवत्येवेति सिद्धं भवति । हिंकारस्य हिं हुं हामितिनानारूपत्वादिष्टरूपग्रहार्थः पाठो हिमिति । अग्र उच्चैरितिश्रवणाच्छनैःशब्द स्वरे वर्तते । शनैरुच्चैः सूच्चैरितिशब्दैर्मन्द्रमध्यमकुष्टस्वरा उच्यन्ते । शनैरुच्चैः सूच्चैरित्येतावतैव हिंकारत्रयस्य स्वरत्रये लब्धेऽग्रशब्दोऽथशब्दद्वयं चेदं ज्ञापयति प्रथमं त्रिः शनैरनन्तरमेवोच्चैस्तदनन्तरमेव सूच्चैरिति न तु एकवारं शनैस्तत उच्चैस्ततः सूच्चैरित्येतादृशक्रमेणेति । एतेनाधीत्प्रतिस्वरं त्रिरावृत्तिरपि सिद्धा भवति । सुष्ठुच्चैः सूच्चैरुच्चैरपेक्षया सुष्ठुता । सोमः पवत इत्यत्राप्येवमेव द्रष्टव्यम् ।

अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते
यजमानाय पवत इष ऊर्जे पवतेऽद्भ्य ओष-
धीभ्यः पवते वनस्पतिभ्यः पवते द्यावापृ-
थिवीभ्यां पवते सुभूताय पवते ब्रह्मवर्च-
साय पवते यजमानाय पवते मह्यं ज्यैष्ठ्याय
पवत इति सोममभिमन्त्र्य वाचं विसृजते ।

सोमं गृहीतम् । अभिमन्त्रणाव्यवहितोत्तरमेव वाचं विसृजते । तत एष ते योनि-र्विश्वेभ्यस्त्वा देवेभ्य इति सादनम् । वाचं विसृजत इत्यनेन वाग्विसृष्टा मयेति भावना कर्तव्येति बोध्यते न तु वाग्विसर्गार्थं सर्वथा भाषणं मध्ये कर्तव्यमिति । आग्रयण-निर्वचनं श्रुतौ—वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत साऽमन्यत वागन्तर्यन्ति वै मेति साऽऽग्रयणं प्रत्यागच्छत्तदाग्रयण-स्याऽऽग्रयणत्वमिति ।

अतिग्राह्यान्गृह्णाति ।

अतिग्राह्यसंज्ञकान्ग्रहान्गृह्णातीत्यर्थः । सामान्यप्रतिज्ञेयम् । इयं च प्रतिज्ञा सूत्रा-न्तरोक्तपाक्षिकत्वव्यावृत्त्यर्था । न चोक्थ्ये गृह्णीयाद्विश्वजिति सर्वपृष्ठे ग्रहीतव्या इति विशेषवचनं यद्विषये तत्रैव नान्यासु विकृतिष्वतिदेशः, अन्यथोक्थ्ये गृह्णीयाद्विश्वजिति सर्वपृष्ठे ग्रहीतव्या इत्युभयत्रैवातिदेशः कुतो व्यर्थः स्यात् । अग्निष्टोमे तु ग्रहीतव्या इति वाक्यं तु नियतत्वार्थमपेक्षत एवेति वाच्यम् । गुणकामप्रवृत्त्यर्थं समानविधान-स्याऽऽवश्यकतया पुनःश्रवणस्य समानविधानार्थत्वेनान्यत्रातिदेशनिवृत्त्यभावात् । तथा चैकादशाध्याये प्रथमे पादे जैमिनिः—अन्यतिग्राह्यस्य विकृतावुपदेशादप्र-वृत्तिः स्यादिति ।

अग्न आयूंषि पवस इत्याग्नेयमुत्तिष्ठन्नोजसा
सहेत्यैन्द्रं तरणिर्विश्वदर्शत इति सौर्यम् ।

उपयामगृहीतोऽस्यग्नये त्वा तेजस्वते । एष ते योनिरग्नये त्वा तेजस्वत इत्याग्ने-यस्य ग्रहणसादने । उपयामगृहीतोऽसीन्द्राय त्वौजस्वते, एष ते योनिरिन्द्राय त्वौज-स्वत इत्यैन्द्रस्य । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वते, एष ते योनिः सूर्याय त्वा भ्राजस्वत इति सौर्यस्य । ऋगन्ते ग्रहणम् ।

ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्च-
र्मेव रोदसी । अदृश्रमस्य केतवो वि रश्मयो
जनां१ अनु । भ्राजन्तो अग्नयो यथेति वैताभ्याम् ।

---

१ क. ग. वाक्ये ।

यदि यजमानः कामयीत तदाऽध्वर्युरिदमहममुमामुष्यायणममुष्याः पुत्रममुष्या विश उत्खिदामीति मन्त्रेण ध्रुवमुत्खिद्य तस्मात्स्थानादपनीयेदमहममुमामुष्यायणममुष्याः पुत्रममुष्यां विशि सादयामीति मन्त्रेण तं ध्रुवं पुनस्तत्रैव सादयेत् । य एव शत्रुर्ग्रामे तं ग्रामान्निरू(रु)ह्य पर्यस्य यः सुहृद्भिर्ग्रामात्तं ग्रामे शत्रोः स्थानेऽनेन विधिना करोति । उत्खेदनमूर्ध्वग्रहणम् । उत्खेदनार्थे मन्त्रेऽमुमित्यस्य स्थाने शत्रोर्नामग्रहणम् । आमुष्यायण इति तस्य गोत्रप्रयुक्तं नाम । आमुष्यायण इति पितुर्नामधेयेनेत्युक्तमेव प्राक् । अमुष्य पुत्रमित्यत्रत्यामुष्यशब्देन तस्य पितुर्नाम्नो ग्रहणम् । अमुष्या विश इत्यत्रामुष्यशब्देन ग्रामनाम्नो ग्रहणम् । विट्शब्दो ग्रामवाची । सूत्र इदानीमिदमहममुष्याऽऽमुष्यायणममुष्याः पुत्रममुष्या विश उत्खिदामीति पाठो दृश्यते सोऽपपाठ एवेति भाति । कथमिति चेत् । उच्यते—अमुष्येति षष्ठ्यन्तस्यान्वयासंभवाच्छत्रोर्नाम्नोऽसंग्रहात्पितुर्नामग्रहणं विना केवलमातृनामग्रहणस्यासमञ्जसत्वाच्चेति द्रष्टव्यम् । तत्र विश इत्यन्तस्याऽऽपस्तम्बपाठानुसारेणैव पाठो युक्त इदमहममुमामुष्यायणममुष्य पुत्रममुष्या विश इति । तथा चैतादृशो मन्त्रो भवति—इदमहं विष्णुगुप्तं चैन्यं चित्रसेनस्य पुत्रं काश्या विश उत्खिदामीति । आपस्तम्बपाठस्तूद्वहामीति । अत्र विरोधाभावात्साऽऽदर्तव्य उदूहामीति पाठः । अथवेदमहममुष्येत्यस्मिन्मन्त्रे षष्ठी द्वितीयार्थे द्रष्टव्या । इदमहममुमामुष्यायणममुष्याः पुत्रममुष्यां विशि सादयामीत्ययमपि पाठः पूर्वमन्त्रवदपपाठ एव पूर्वोक्तहेतुभिः । अत्रापि पाठ आपस्तम्बपाठानुसारेणैव कृत्स्नस्यैव मन्त्रस्य भेदाभावात् । तथा चैवं मन्त्रो भवति—इदमहं मित्रगुप्तं सैन्यं शूरसेनस्य पुत्रं काश्यां विशि सादयामीति । इदंशब्देन पात्रं निर्दिश्यते । अमुमामुष्यायणममुष्याः पुत्रममुष्या विश उत्खिदन्तु इदं पात्रमहमुत्खिदामीति मन्त्रार्थः संपन्नो भवति । उत्तरमन्त्रस्य तु अमुमामुष्यायणममुष्य पुत्रममुष्यां विशि सादयितुमिदं पात्रमहं सादयामीति । अत्रापि षष्ठी द्वितीयार्थे च द्रष्टव्या । पुनःशब्दः प्रथमसादनदेश एवेदं सादनमिति प्रदर्शयितुं न तु नित्यसादनस्यैतत्पूर्वत्र सद्भावं सूचयितुमुत्खेदनविधिबलादेव तस्य सिद्धेः । य एव ग्राम इत्यादिना फलं प्रदर्श्यते । अत्राऽऽपस्तम्बेन विशेष उक्तः—यद्येवं कुर्यादायुः प्रजानां विचालयेत्तृणमेतेन मन्त्रेणोपर्युपर्यतिहरेदिति । एतेनेदमहमित्येतेन । उपर्युपरि ध्रुवस्थाल्या धुनमारभ्याऽऽबिलं तृणमवगमयेदित्यर्थः ।

ध्रुव९ सादयित्वा राजानमतिपावयति
यावन्तं प्रातःसवनायाऽऽप्तं मन्यते ।

ननु ध्रुव९ सादयित्वेति वचनं व्यर्थम् । नैमित्तिककर्माधिकारनिवृत्त्यर्थमिति चेत्कामनावाक्येनैव फलसिद्धौ तदन्तमेव नैमित्तिकमित्येतादृशार्थप्रदर्शनस्यैव पुनःफलप्रदर्शनप्रयोजनत्वेनावश्यं वक्तव्यतया तेनैव तत्सिद्धेरिति चेत्सत्यम् । व्यापत्तौ माध्यंदिने

सवने यदि ध्रुवः स्कन्देदायुर्दा असि ध्रुवायुर्मे धेहीत्यादि प्रायश्चित्तं कृत्वा तं सादनमन्त्रेण सादयित्वैव राजातिपावनादि करोतीति । एवमेव तृतीयसवने । राजानमतिपावयति । द्रोणकलश इति शेषः । तस्यैवोपस्थितत्वात्प्रयोजनसद्भावाच्च । अथ वा कालाव्यवधानार्थमिदं वचनम् । अतिपावयतीत्यत्रातिराधिक्यार्थः । यावन्तं प्रातःसवनायाऽऽलं मन्यत इत्येतत्साहचर्यात् । पावयतीति शब्दाद्दशापवित्रेण धारास्रुतस्यैव यावत्प्रयोजनमवनयनं न धारास्रुततो भिन्नस्य । अत एवाग्रे वक्ष्यति विरमति धारा प्रपीड्य पवित्रं निदधातीति । द्रोणकलशेऽधिकसोमानयने प्रमाणविशेष उक्तः कात्यायनेन—अर्धार्धपूर्णं द्रोणकलशं कृत्वेति । बौधायनेन तु द्रोणकलशमुपर्यर्धं कृत्वेत्युक्तम् । राजानमपादत्ते यावन्तमेकग्रहायाऽऽलं मन्यत इतिवद्गुरुसूत्रकरणप्रयोजनं द्रष्टव्यम् ।

विरमति धारा प्रपीड्य पवित्रं निदधाति ।

विरमति धारेत्यनेन तदन्तं सांतत्यं बोध्यते । तेन ग्रहग्रहणव्यतिरिक्तकालेऽपि धाराकरणं सिद्धं भवति । पवित्रं दशापवित्रं प्रपीड्य द्रोणकलश एव प्रपीड्य पवित्रनिधानं दक्षिणहविर्धान एवेत्यत्र ज्ञापकमुक्तमेव ।

मैत्रावरुणचमसीयाश्चैकधनैकदेशाश्चाऽऽधवनी-
येऽवनीय तिरःपवित्रं पूतभृत्येकदेशमवनयति ।

मैत्रावरुणचमसीया इत्यत्र चकारो मैत्रावरुणचमसीयानामेकधनैकदेशानां च सहैवावनयनार्थः । मैत्रावरुणचमसीयानां सर्वासामेवावनयनम् । एकधनैकदेशावनयनं यथार्थम् । तथा चाऽऽपस्तम्बः—एकधनानां यथार्थं सर्वाश्च मैत्रावरुणचमसीया आधवनीयेऽवनीयेति । यावतीभिर्वर्धितं रसं प्रातःसवनाय पर्याप्तं मन्यते तावतीरवनयतीत्यर्थः । तिरोऽन्तर्हितं पवित्रं यस्यां क्रियायां यथा भवति तथा पूतभृति आधवनीयैकदेशमवनयति अवनतो भूत्वा प्रापयति पवमानग्रहार्थम् । एकदेश आश्विनग्रहग्रहणपर्याप्तः । शुक्रामन्थिसहचारिचमसगणप्रभृतीनामुन्नयननिर्वाहार्थमेवाऽऽधवनीयं पूतभृत्यवनीय दशाभिः कलशं मृष्ट्वा न्युब्जतीति चमसगणोन्नयनात्पूर्वं विहितमवनयनं सूत्रकृता । आश्विनग्रहग्रहणस्य स्वल्पप्रयोजनत्वात्स्वल्पमेवावनयनम् । चमसोन्नयनात्पूर्वमेवाऽऽधवनीयावनयस्य विधास्यमानत्वात्केवलमाश्विनग्रहग्रहणमात्रार्थता गम्यते ।

अत ऊर्ध्वं पूतभृति तिरःपवित्रमेवावनीयते ।

आधवनीयं पूतभृत्यवनीय दशाभिः कलशं मृष्ट्वा न्युब्जतीत्यत्र । नन्वेवं छायवास्त्रापि तिरःपवित्रमित्येव वक्तव्यमेतावतैवार्थसिद्धौ किमर्थं स्वराप्रयोजनार्थं गुरुसूत्रकरणम् । माध्यंदिनसवनतृतीयसवनार्थमिति चेत्तस्य प्रातःसवनेन कल्पो व्याहन्यात

इत्यतिदेशादेव माध्यंदिनसवनसिद्धेस्तृतीयसवने तस्य माध्यंदिनसवनेन कल्पो व्याख्यात इति प्रातःसवनातिदेशवन्माध्यंदिनसवनातिदेशात्सिद्धेरिति चेन्न । पूतभृति आधवनीयैकदेशावनयने तिरःपवित्रताया अनावश्यकताद्योतनार्थत्वेन सार्थकत्वात् । तर्हि पूतभृतः पूतभृत्त्वसंज्ञाया अनुपपत्तिरिति चेत् । उच्यते—न हि वयमपूतसोमाव-नयनं ब्रूमो येनेयमनुपपत्तिर्भवेत्किं तु आधवनीयस्थसोमैकदेशं तिरःपवित्रं पात्रान्तरेऽ-वनीय तं पूतं सोमं तेन पात्रेणानन्तर्हितपवित्र एव पूतभृत्यवनयतीत्येवं ब्रूम इति अवेहि । एवं च सूत्रं सप्रयोजनं पूतभृत्त्वसंज्ञाया अपि नानुपपत्तिरिति सुस्थम् ।

पवमानग्रहान्गृह्णाति ।

पवमानस्य ग्रहाः पवमानग्रहाः । ते चोत्तरसूत्रे वक्ष्यन्ते तान्गृह्णातीत्यर्थः । इयं च संज्ञा पवमानग्रहान्कलशाञ्छुक्रामन्थिनावाग्रयणमुक्थ्यं च ग्रहावकाशैरुपस्थायेत्यादौ संप्रत्ययार्था । पवमानस्य ग्रहाः पवमानग्रहा इत्येतादृश एव समासः । पवमानग्रहान-गृहीत्वा पवमानोपाकरणे दोषश्च ब्राह्मणे प्रदर्शितः—पवमानस्य ग्रहा गृह्यन्तेऽथ वा अस्यैते गृहीता द्रोणकलश आधवनीयः पूतभृत्तान्यदगृहीत्वोपाकुर्यात्पवमानं विच्छि-न्द्यात्तं विच्छिद्यमानमध्वर्योः प्राणोऽनु विच्छिद्येतेति ।

उपयामगृहीतोऽसि प्रजापतये त्वेति द्रोण-
कलशमभिमृशेदिन्द्राय त्वेत्याधवनीयं वि-
श्वेभ्यस्त्वा देवेभ्य इति पूतभृतम् ।

उत्तरयोरप्युपयामगृहीतोऽसीत्यनुवर्तते । तथा चाऽऽपस्तम्बः स्पष्टमाह—पुरस्ता-दुपयामाः सर्व इति । प्रथमवदुत्तरयोरप्युपयामानुषङ्ग इति भावः । एतैर्मन्त्रैरभिमर्शन-मेवात्र ग्रहणम् । अत एव सादनमपि न । एतैरभिमर्शने पूर्वोक्तदोषौ न भवतः पशु-प्रजालाभश्च परं भवतीति । तथा च ब्राह्मणम्—उपयामगृहीतोऽसि प्रजापतये त्वेति द्रोणकलशमभिमृशेदिन्द्राय त्वेत्याधवनीयं विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं पवमानमेव तत्संतनोति सर्वमायुरेति न पुराऽऽयुषः प्रमीयते पशुमान्भवति विन्दते प्रजामिति । अत्र न परिमार्जनमधाराग्रहत्वादिति केचित् । तन्न । सर्वग्रहाणां परिमार्जनमिति सर्व-ग्रहणविरोधापत्तेः ।

निःसर्पन्तः समन्वारभन्ते ॥ ११ ॥

निरित्युपसर्गोऽत्र बहिरर्थे । तथा च बहिः सर्पन्त इत्यर्थो भवति अर्थाद्धविर्धानात् । निःसर्पन्त इति शतृप्रत्ययाद्बहिःसर्पणसमकालं समन्वारम्भः । क्रमेणायमन्वारम्भो न त्वेकदाऽसंभवात् । निःसर्पन्त इति प्रस्तोत्रादीनां विशेषणम् । अध्वर्योऽस्तु न । समन्वारम्भस्यान्यस्यैवाभावात् । संशब्दोऽन्वारम्भे दार्ढ्यमाचष्टे यथा सर्पतां समन्वा-

रब्धानां मध्येऽपच्छेदो न भवेत् । समन्वारब्धानां सर्पतामुद्गाताऽपच्छिद्येत यज्ञेन यजमानो व्यृध्येतादक्षिणः स यज्ञक्रतुः संस्थाप्योऽथान्य आहृत्यस्तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यात्त एनमृत्विजो याजयेयुरित्यादिप्रायश्चित्तश्रवणात् । ब्रह्मयजमानापच्छेदे विशेषप्रायश्चित्तस्यानुक्तेरनुद्रवणविशिष्टयज्ञतनूहोमात्मकसामान्यप्रायश्चित्तमेव । तथा चैतयोरपि सम्यगन्वारम्भः ।

अध्वर्युं प्रस्तोताऽन्वारभते प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गातोद्गातारं ब्रह्मा ब्रह्माणं यजमानो यजमानं ब्रह्मेत्येकेषाम् ।

पूर्वसूत्रे सामान्यतः समन्वारभन्त इत्युक्तं तत्र के समन्वारभन्त इत्याकाङ्क्षायामिदं सूत्रम् । ननु अध्वर्युं प्रस्तोताऽन्वारभते तं प्रतिहर्ता तमुद्गाता तं ब्रह्मा तं यजमानो यजमानं ब्रह्मेत्येकेषामिति तस्य तस्य तच्छब्देनैव ग्रहणसिद्धौ पुनर्निर्देशो व्यर्थः । नायं व्यर्थः । एवमुच्यमाने तच्छब्दस्य सर्वनामत्वेन मुख्यपरामर्शित्वान्मुखतःप्रवृत्तस्वरूपमुख्यत्वमादायाध्वर्योरेव परामर्श इत्यपि स्यात्तद्व्यवच्छेदाय पुनर्निर्देश आवश्यक इति चेदध्वर्युं प्रस्तोतृप्रतिहर्त्रुद्गातृब्रह्मयजमाना अन्वारभन्त इत्येतावद्देशेन लघुसूत्रेणैवाध्वर्युपरामर्शसिद्धौ पुनर्निर्देशस्यानावश्यकत्वस्यैव सिद्धत्वेन वैयर्थ्यस्य तदवस्थत्वादिति चेत्सत्यम् । तथा सत्येककालेऽपि अन्वारम्भः स्यात्तद्वारणार्थमवश्यमपेक्षितत्वेन वैयर्थ्याभावात् । एवं चाध्वर्युपरामर्शवारणार्थं पुनर्निर्देश आवश्यक एवेति सुस्थम् । अध्वर्युं निष्क्रामन्तं प्रस्तोता संतनुयात्तमुद्गातोद्गातारं प्रतिहर्ता तं ब्रह्मा ब्रह्माणं यजमान इति च्छन्दोगोक्तः क्रमः । अन्वक्छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्याविति आश्वलायनोक्तः प्रशास्ता चापि निवारितो भवति । पुनरन्वारभत इति वचनमनुवादः । अथ वा निःसर्पन्तः समन्वारभन्त इति स्वतन्त्रो विधिरितिज्ञापनायैतद्वचनम् । के समन्वारभन्त इति आकाङ्क्षापूरणाय पवमानसंबन्धिन इति शेषः । तथा च च्छन्दोगोक्तः क्रम आश्वलायनोक्तः प्रशास्ताऽपि सर्पणे लब्धो भवति । स च च्छन्दोगेभ्यः पश्चात् । अन्वक्छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्यावित्याश्वलायनसूत्रात् । उत्तरसूत्रोक्तः क्रमस्तु स्वतन्त्रतया पक्षान्तराभिप्रायक एव । अत एव केवलमन्वारभत इति शब्दान्तरं प्रयुक्तम् । अस्मिन्कल्पेऽपि अन्वारम्भे दृढत्वमस्त्येव । अपच्छेदे प्रायश्चित्तश्रवणात् । उभयकल्पेऽप्यन्वारम्भो दक्षिणहस्तेनैव । अन्वारम्भस्यैव प्रथमोपस्थितत्वेन मुख्यत्वात् । मुख्ये मुख्यदक्षिणहस्तसंबन्धस्यैव युक्तत्वात् । यस्मिन्नन्वारम्भे दार्ढ्यं स द्विविधो विशिष्टः केवलो वा । दक्षिणहस्तकृत एव चेदन्वारम्भो विवक्षितस्तदा विशिष्टान्वारम्भः । एतदन्वारम्भस्वीकारे सव्यहस्तेनैव सर्पणार्थहोमः ।

केवलान्वारम्भस्वीकार आदौ प्रथमं सर्पणार्थान्वारम्भस्यैवोपस्थितत्वेन मुख्यत्वान्मुख्येन दक्षिणेन हस्तेनैवान्वारम्भमात्रं कृत्वा होमकाले दक्षिणहस्तकृतान्वारम्भे सत्येव सव्यहस्तेन दृढमन्वारम्भं कृत्वा दक्षिणहस्तकृतान्वारम्भं विसृज्य दक्षिणहस्तेनैव सर्पणार्थे होमं कृत्वा सव्यहस्तकृतान्वारम्भे सत्येव दक्षिणहस्तेन दृढमन्वारम्भं कृत्वा सव्यहस्तान्वारम्भं विसृज्य गायत्रः पन्था इत्यादि । प्रथमपक्ष एव सुगमः । उभयपक्षेऽपि अपच्छेदो नैव यथा भवति तथा सावधानेन कर्तव्यम् । तत्र दक्षिणहस्तस्य मुख्यत्वमेकाङ्गवचने दक्षिणं प्रतीयादनादेश इत्याश्वलायनवचनात् ।

यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥

इतिच्छन्दोगपरिशिष्टाच्च । ब्रह्माणं यजमानो विपरीतं वेत्येवमुच्यमाने सर्वेषां वैपरीत्यं स्यात्तन्मा भूदित्येतदर्थं यजमानं ब्रह्मेत्येकेषामित्येवं वचनम् ।

निःसृप्य यस्ते द्रप्सः स्कन्दतीति तिस्रो यस्ते द्रप्सः स्कन्दति यस्ते अꣳशुः स्वः परश्च यो दिवः पुरः । अयं देवो बृहस्पतिः सं तत्सिञ्चतु राधसेति वैप्रुषान्सप्तहोतारं च हुत्वोदञ्चः सह बहिष्पवमानाय सर्पन्ति ।

निःसृप्येतिवचनं कालाव्यवधानार्थम् । तेनोद्गातृभिः स्वसूत्रोक्तो होमः पूर्वमेव कर्तव्यो नतु मध्य इति । समानकर्तृ[क]त्वार्थं च । तेन ये निःसर्पणकर्तारस्ते वैप्रुषसप्तहोतृहोमकर्तारस्त एव च बहिष्पवमानार्थकसर्पणकर्तार इति । मन्त्रत्रयग्रहणार्थं तिस्र इति । ऋक्त्वज्ञानाय स्त्रीलिङ्गनिर्देशः । जुहोत्यन्तास्त्रयो मन्त्राः । चतुर्थः सौत्रः । वैप्रुषानित्यनन्तरं होमानिति शेषः । स्कन्नानां विप्रुषां देवत्राकरणार्था वैप्रुषा नामैते होमाश्चत्वारः । सप्तहोताऽत्र होमार्थत्वात्सग्रहः । मनसाऽनुद्रुत्येतिवचनाभावात्सवनस्वर एवात्र । आपस्तम्बस्तु मनसाऽनुद्रुत्येत्यत्रापि पठितवान् । सप्तहोतारमित्यत्र चकारोऽपभ्रष्टो द्रष्टव्यः । हुत्वा सर्पन्तीत्यन्वयात्सर्प्स्यतां सर्वेषामेव होमः । एतेन वैप्रुषान्होमाञ्जुहोत्यध्वर्युर्वेति कात्यायनोक्तं पक्षान्तरं निरस्तं द्रष्टव्यम् । मैत्रावरुणस्य सर्पणपक्षे तस्याप्येवमेव । सामशाखिनि यजमान उद्गातृभिर्ब्रह्मणा च स्वसूत्रोक्तरीत्यैव होमः कर्तव्यो न त्वध्वर्युसूत्रोक्तरीत्याऽपि । ऋक्शाखिनि यजमाने ब्रह्मणोद्गातृभिश्च स्वसूत्रोक्तरीत्यैव होमः कर्तव्यः । मैत्रावरुणसर्पणपक्षे तेनाप्येवमेव नत्वध्वर्युसूत्रोक्तरीत्याऽपि । सामशाखिनर्क्शाखिना वाऽपि यजमानेन सत्याषाढसूत्रानुसारेणानुष्ठाने क्रियमाणे होमद्वयमुद्गातृब्रह्मयजमानैर्मैत्रावरुणेन च कर्तव्यम् । अध्वर्युणा तु सर्वत्रा-

१ क. ग. °तारश्च हु° ।

ध्वर्युसूत्रोक्तरीत्यैवेति ज्ञेयम्। उदञ्च उदङ्मुखाः। प्रह्वा इत्यनेन सर्पण ऋजुता व्यावर्त्यते। बहिष्पवमानायेति प्रयोजनप्रदर्शनाय। तेन बहिष्पवमानार्थोपवेशनपर्यन्तमन्वारम्भ इति अवगतं भवति। बहिः स्तूयमानं यत्पवमानं तद्बहिष्पवमानं बहिर्बहिर्भावं गतानपि पुनातीति बहिष्पवमानमिति वा। सर्पणे विशेषमाहाऽऽपस्तम्बः— त्सरन्त इव रेहाणा इव न्यञ्च्य शीर्षाणि कृत्वा सर्पन्ति मृगमिव दिहक्षवो व्याधा मृग इव हि यज्ञ इति। त्सरन्तश्छद्मना गच्छन्त इव गच्छन्ति। तथा रेहाणा हिंसन्त इव तथाऽवनतशिरसश्च मृगं दिहक्षवो द्रष्टुमिच्छन्त इव यथा व्याधाः। व्याधा अत्रोपमानमृत्विज उपमेयाः। तथा मृग उपमानं यज्ञ उपमेयः। मृगरूपत्वं यज्ञस्य ब्राह्मण आम्नातम्—यज्ञो देवेभ्यो निलायत कृष्णो रूपं कृत्वेति। कृष्णो मृगः।

गायत्रः पन्था वसवो देवता त्वकेणापरिवरेण
पथा स्वस्ति वसूनशीय। वागग्रेगा अग्र एत्वृजुगा
इत्यध्वर्युः पूर्वो बर्हिर्मुष्टिमीषदिव विधून्वन्सर्पति।

मन्त्रद्वयस्य करणत्वं वाचनिकम्। पूर्वः पूर्वस्मिन्निति पूर्वः सुपां[सु]लुगित्यनेनेन सप्तम्याः सुः। प्रदेश इति योग्यतया विशेष्यमत्र द्रष्टव्यम्। मुष्टिग्रहणाद्दर्भाणां बन्धनम्। ईषदिवेत्यस्येषत्सदृशामित्यर्थः। तेन धूनने मध्यमावस्था बोधिता भवति। विधून्वन्निति शतृप्रत्ययेन धूननसर्पणयोः समकालता। मन्त्रोऽप्यध्वर्योरेव। तत्राध्वर्युग्रहणम् " अध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य इत्याहुर्वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान्पशुषु प्रजां मयि च यजमाने चेत्याह वाचमेव तद्यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्ग्रहान्गृहीत्वा बहिष्पवमानं सर्पन्ति " इत्यर्थवादस्फोरणाय। पूर्व इत्यनेनान्वारम्भाविच्छेदानुरोधेन त्रिचतुष्पदानि पुरतः पूर्वमादौ गच्छति। एतत्सर्पणमेकवचनादध्वर्योरेव। मन्त्रोऽपि सर्पणार्थत्वात्तस्यैव। ततः सर्वे उदञ्चः प्रह्वा गच्छन्ति। यजमाने चेति मन्त्रान्तः।

दक्षिणेन चात्वालमुपविश्यान्तर्वेदि चात्वा-
लमवेक्षमाणा बहिष्पवमानेन स्तुवते।

दक्षिणेन चात्वालं चात्वालस्य दक्षिणेऽदूरे। अन्तर्वेदीत्यनन्तरं भवेयुरिति शेषः। तथा चायमर्थो भवति—आदौ चात्वालसामीप्यानुरोधेनैवोपविश्य पश्चादन्तर्वेदि सर्वे भवेयुरित्यर्थः। उत्तरवेद्यंसस्योत्तरतः प्रक्रमत्रिपदात्मको यदि तदैतत्सप्रयोजनं द्रष्टव्यम्। न च दक्षिणेन चात्वालमन्तर्वेद्युपविश्य चात्वालमवेक्षमाणा बहिष्पवमानेन स्तुवत इत्येवमेवान्वयः कुतो न स्वी क्रियत इति वाच्यम्। क्त्वाप्रत्ययस्योत्तरेण वाक्येनानन्वयापत्तेः। तथा हि उपवेशनं सर्वविषयकं स्तवनं तूद्गातृमात्रविषयकं तथा चोप-

विष्टानां सर्वेषां स्तवनकर्तृत्वाभावेनानन्वय इति । न चोपवेशनस्योद्गातृमात्रविषयकत्वमस्त्विति वाच्यम् । इतरेषामुपवेशनाभावापत्तेः । अत उक्तरीतिरेव सम्यक् । चात्वालमवेक्षमाणा इति वर्तमानशानचा चात्वालावेक्षणबहिष्पवमानस्तवनयोः समकालता । अनेन द्यावापृथिव्योः संधिमीक्षमाणा इति च्छन्दोगोक्तं व्यावर्त्यते । स्तुवत इत्यनन्तरमुद्गातार इति शेषः । उपवेशनोत्तरमन्वारम्भो न । सत्रे सर्वेषां यजमानत्वात्सर्वेषां होत्रादीनामपि सर्पणम् । अत्र यजमानं ब्रह्मेत्ययमेव पक्ष आश्वयणीयोऽन्वकृच्छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्यौ तावन्तरेणेतरे दीक्षिता इत्याश्वलायनसूत्रैकवाक्यत्वाय । न च सर्वे याजमानमार्त्विज्येनाविप्रतिषिद्धं कुर्युरिति द्वादशाहीयसूत्राद्धोतुः सर्पणं न भवति, तस्य हविर्धानोपवेशनात्मकेनाऽऽर्त्विज्यकर्मणा विरोधादिति वाच्यम् । यत्तु वै स्वयं होता यजमानः स्यात्सर्पेद्वेवोपगात्रं ह्यस्येति बह्वृचब्राह्मणं भवतीति आपस्तम्बोक्तेन विशेषेणैतस्य सामान्यस्य बाधात् । विनाभमान आर्त्विज्यं बलीय इति आपस्तम्बीयं द्वादशाहस्थमेतस्य विशेषविधायकस्य सामान्यसूत्रं द्रष्टव्यम् । तत्रेतरेषां छन्दोगब्रह्मणोर्मध्य एव समावेशः । अन्वकृच्छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्यौ तावन्तरेणेतरे दीक्षिता इत्याश्वलायनसूत्रात् । तत्रेतरेषु मुख्यगौणत्वानुरोधेन क्रमः । तत्रापि मैत्रावरुणस्य होतुरपेक्षया गौणत्वेऽपि च्छन्दोगपश्चाद्भावित्वं तस्यैव । अन्वकृच्छन्दोगान्मैत्रावरुणो ब्रह्मा च नित्यौ तावन्तरेणेतरे दीक्षिता इत्याश्वलायनसूत्रात् । मैत्रावरुणस्य पश्चाद्भाविन इतरे । तेषां क्रमः—मैत्रावरुणं होता होतारं प्रतिप्रस्थाता प्रतिप्रस्थातारं ब्राह्मणाच्छंसी ब्राह्मणाच्छंसिनमच्छावाकोऽच्छावाकं नेष्टा नेष्टारमाग्नीध्र आग्नीध्रं ग्रावस्तुद्ग्रावस्तुतमुन्नेतोन्नेतारं पोता पोतारं सुब्रह्मण्यः सुब्रह्मण्यं गृहपतिर्यजमानो गृहपतिं यजमानं ब्रह्मेति । मैत्रावरुणं गृहपतिर्यजमानो गृहपतिं यजमानं होतेत्येवं वा । सूत्रे सत्रे सदस्यस्य परिसंख्यातत्वान्नात्र स भवतीति द्रष्टव्यम् ।

वायुर्हिं कर्तेति प्रस्तोत्रे बर्हिर्मुष्टिं प्रयच्छ-
न्स्तोत्रमुपाकरोत्यसर्ज्यसर्जि वागसर्ज्यैन्द्रं ९
सहोऽसर्ज्युपावर्तध्वमभिसर्प यजमानेति ।

हस्तस्थितमुष्टिं प्रस्तोत्रे प्रयच्छति । प्रयच्छन्नेव स्तोत्रमुपाकरोति । प्रयच्छन्निति शतृप्रत्ययाद्बर्हिर्मुष्टिप्रदानस्तोत्रोपाकरणयोः समकालता । उपाकरोति उपक्रमयति । वायुर्हिं कर्तेति बर्हिर्मुष्टिप्रदानमन्त्रः । बर्हिर्मुष्टिप्रदानसमकालमेवासर्ज्यसर्जीतिस्तोत्रोपाकरणम् । अथ वा वायुर्हिं कर्तेति स्तोत्रोपाकरणस्यैव मन्त्रः । बर्हिर्मुष्टिप्रदानं तूष्णीमेव । तद्दानसमकालमेव वायुर्हिं कर्तेति स्तोत्रोपाकरणम् । असर्ज्यसर्जीति उपाकरणस्यैव द्वितीयो मन्त्रः । तेन मन्त्रद्वयकरणकमुपाकरणमिति सिद्धं भवति । उपावर्तध्वमित्ययमपि मन्त्र उपाकरणार्थः सर्वेषु पवमानेषु अधिकः ।

उपावर्तध्वमित्यनन्तरमितिशब्दाध्याहारः। अभिसर्प यजमानेतीत्येतदनन्तरं संप्रेष्यतीत्यध्याहारः। अथ वा स्तोत्रोपाकरणार्थः प्रैष एवायमुपावर्तध्वमित्येतदन्त उद्गातॄणाम्। अभिसर्प यजमानेति यजमानं प्रति प्रैषः। उपावर्तध्वं स्तवनायोप समीपमावर्तध्वं संमुखा भवतेत्यर्थः। उप समीप उपविष्टाः सन्तो बहिष्पवमानमारभध्वमिति वाऽर्थः। हे यजमानाभि उद्गातॄणां संमुखं प्रणवोपगानार्थं सर्पाऽऽगच्छेत्यर्थः। एतेन ज्ञायतेऽन्वारम्भविसर्गोत्तरमपि यत्रान्वारम्भविसर्गः कृतस्तं यजमानः प्रैषपर्यन्तं तत्रैवोपविष्टो भवेदिति।

सर्वान्पवमानानेवम्।

सर्वान्पवमानानेवं वायुर्हिं कर्तेत्यादिनाऽभिसर्प यजमानेत्यन्तेन प्रकारेणेत्यर्थः। एतेनेदं ज्ञायत इतरेषु स्तोत्रेषु यजमानेन स्वायतन आसीनेनैवोपगानं कर्तव्यमिति।

उपावर्तध्वमिति बर्हिर्भ्यामितराणि स्तोत्राणि।

उपार्तध्वमित्यन्तप्रदर्शनम्। तेन वायुर्हिं कर्तेत्यादि सर्वं भवति। एतेनाभिसर्प यजमानेत्येतद्व्यावृत्तिः सिध्यति। अथ वोपावर्तध्वमित्येतावतैवोपाकरणम्। अस्मिन्पक्षे वायुर्हिं कर्तेत्यभ्यासर्ज्यसार्जे वागसर्ज्यैन्द्रः सहोऽसर्गीत्येतदन्तस्यांशस्य च निवृत्तिः। अभिसर्प यजमानेत्यस्य निवृत्तिस्त्वत्राप्यस्त्येव। बर्हिर्भ्यामिति बर्हिर्मुष्टिबाधनार्थम्। इतराणि आज्यानि पृष्ठानि अग्निष्टोमसामषोडश्यादीनि च स्तोत्राणि उपाकरोतीति शेषः। बहिष्पवमानस्तवन उद्गातृभिः क्रियमाण उपगातृभिरुपगानं कार्यम्। तथा च श्रुतिः—नाध्वर्युरुपगायेद्वाग्वीर्यो वा अध्वर्युर्यदध्वर्युरुपगायेदुद्गात्रे वाचं संप्रयच्छेदुपदासुकाऽस्य वाक्स्यादिति। अध्वर्योरुपगाननिषेधादुपगानमस्ति तच्च ऋत्विक्कर्तृकमेवेति। स्पष्टमेतत्सर्वमुपगातृसंख्यां चाऽऽहाऽऽपस्तम्बः—स्तूयमानं यजमान उपगायति चत्वारोऽवरार्ध्या उपगातारो नाध्वर्युरिति। अस्यार्थः—स्तूयमानं बहिष्पवमानं यजमानस्तावदुपगायति ऋत्विजोऽपि चतुरवरा उपगायन्तीति। ऋत्विजामुपगातृत्वेऽध्वर्योरप्यविशेषादुपगानकर्तृत्वप्राप्तौ नाध्वर्युरिति निषेधः। उपगानप्रकारमप्याह भरद्वाजः—यजमानपञ्चमा उपगायन्ति हो इत्यृत्विज उपगायन्त्योमिति यजमान इति। तृतीयाध्याये सप्तमे पादे जैमिनिरपि उपगाश्च लिङ्गदर्शनादिति। नाध्वर्युरुपगायेदिति निषेधः प्राप्त्यभावेऽनुपपन्न इत्यध्वर्युभिन्नानामुपगातृत्वाल्लिङ्गदर्शनादिति सूत्रार्थः। चशब्दोऽन्ये न भवन्तीत्यस्यार्थस्यानुकर्षणार्थः। के चन च्छन्दोगा वैपरीत्येनाऽऽहुर्हो इति यजमान ओमित्यृत्विज इति। सूत्रान्तरे नाध्वर्यव उपगायेयुरिति निषेधादध्वर्युवर्गव्यतिरिक्ता उपगातारः। उत्तरमीमांसायां तु गुणोपसंहारपाद ऋत्विज उपगायन्तीति वचनमेवोदाहृतम्। उपगानप्रकारश्छन्दोगसूत्रे—अपरेणोद्गातॄंस्त्र्यवरार्धा उप*गातारश्चतुरवरार्धानेके षट्परार्ध्या(र्धा)स्त एतेनाक्षरेणोपगायेयुर्हो इति मन्दस्वरेण

* अभिमार्थानुरोधेनोपगातार इत्यत्रोपगा इत्यपेक्षितम्।

संततः सहवाच्येष्वारमन्त इति । अस्यार्थः–उद्गातॄनपरेणोद्गातॄणां पश्चिमे प्रदेशे समीप एव । त्र्यवोऽवरोऽर्धो भागो येषां ते त्र्यवरार्धाः । उपगा उपगातारः । एक आचार्या उपगांश्चतुरवरार्धान्मन्यन्ते । षट्परार्धा इत्यनेन बहुत्वसंख्यावधिः प्रदर्श्यते[१] । ते यदि त्र्यवरार्धाश्चतुरवरार्धा वा षट्परार्धास्त इत्यर्थः । एतेन वक्ष्यमाणेनाक्षरेण । तदक्षरमाह हो इति । मन्द्रस्वरेण संततमविच्छिन्नं हो इत्यक्षरेणोपगायेयुः । सहवाच्यानि निधनानि तेष्वारमन्तः । अन्तर्निधनेष्वपि आरमणम् । एतेनाक्षरेण प्रस्तावादिभक्त्यन्तरालानि च्छादयन्त उपगायेयुरिति निष्कृष्टोऽर्थः । ओमिति यजमानस्योपगानमप्येवमेव । निधनात्पूर्वं नोपगानं विच्छेदाभावात् । एवं सर्वस्तोत्रेषु ।

स्तूयमानं बहिष्पवमानं ब्राह्मणाः सम-
भिसर्पन्ति द्वेष्यं परिबाधन्ते ॥ १२ ॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्ने चतुर्थः पटलः ।

स्तूयमानं बहिष्पवमानं सन्तं ब्राह्मणाः सं संगत्याभिमुखाः सर्पन्ति बहिष्पवमानगातृसमीप उपविशन्तीत्यर्थः । इदं सर्पणं पावित्र्याय । तथा च श्रुतिः–तस्मादेवं विद्वाा बहिष्पवमान उपसद्यः पवित्रं वै बहिष्पवमान आत्मानमेव पवयत इति । स्तूयमानमिति वर्तमानशानचा समकालिकत्वं बोध्यते । तेन स्तवनसमकालं गातृसमीप उपवेशनमिति सिद्धं भवति । तच्च प्रथमर्चि प्रथमकर्प्रस्तावानन्तरं वा उपस्थितत्वात् । तावत्पर्यन्तं तु समीप उपवेशनाभावेऽपि श्रवणं यत्रोपविष्टानां जायेत तावत्येव दूर उपवेशनं न तु श्रवणं यत्रोपविष्टानां न जायेत तावति दूरे । अन्यथा कृत्स्नबहिष्पवमानश्रवणजन्यं श्रुतिबोधितं पावित्र्यरूपं फलं न स्यादिति द्रष्टव्यम् । उद्गातृभिर्निनीतेनोदकेन सर्वपापक्षयार्थं मार्जनं कुर्युस्तदश्वमेधावभृथतुल्यमित्यभियुक्ताः केचन प्राहुः । केवलं पापक्षयार्थत्वमेवेति न किं तु द्वेष्यपरिबाधनमपि फलमित्याह द्वेष्यं परिबाधन्ते द्वेष्यः शत्रुस्तस्य परिबाधनं परिपीडनम् ।

इत्यपोकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्निचित्वाजपेययाजिसर्वतोमुखया-
जिद्विसाहस्राग्निचित्पौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथ-
दीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसू-
त्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंताप-
शामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्र-
श्नस्य चतुर्थः पटलः ॥ ४ ॥

---

१ ख. ते । य' । २ क. ख. 'पदेश' ।

अथाष्टमप्रश्ने पञ्चमः पटलः ।

अग्नीदग्नीन्विहर बर्हिः स्तृणाहि पुरोडाशा* अलं कुरु प्रतिप्रस्थातः पशुनेहीति स्तुत उत्तिष्ठन्संप्रेष्यति ।

अलं कुर्वित्यन्त आग्नीध्रं प्रति प्रैषः । प्रतिप्रस्थातः पशुना सह, आ, इहि आगच्छेति । पशुनेहीत्यत्रोमाङोश्चेति पररूपम् । स्तुत इत्यनेन प्रैषकालः प्रदर्श्यते । उत्तिष्ठन्निति शत्रोत्थानप्रैषयोः समकालत्वं न त्वङ्गाङ्गिभाव उत्थानमन्त्रयोः । तेन मन्त्रान्ते कर्मसंनिपातो न भवतीति बोध्यते । तथा जैमिनिरपि तृतीयाध्याये द्वितीये पादे तथोत्थानविसर्जने इति नवमेन सूत्रेणाऽऽह । सूत्रार्थस्तु—उत्तिष्ठन्नग्नीदग्नीन्विहरेति मतं कृणुतेति वाचं विसृजतीत्युभयत्र कालार्थ एव संयोगो नाङ्गाङ्गीभाव इति । तथाशब्दस्तथाऽऽह्वानमपीति चेत्पूर्वाधिकरणताकालार्थसंयोगार्थकत्वानुवृत्त्यर्थः ।

हविर्धाने प्रविश्य विष्णो त्वं नो अन्तम इति ग्रहानुपतिष्ठते पात्राणि च संमृशति ।

पूर्वेणापरेण वेतिविशेषानुक्तेरन्यतरेण द्वारेण प्रवेश इति । येन प्रवेशस्तेनैव निर्गमनम् । द्वारसमीपेऽतिसंमर्दे वातायनेनापि अत्र प्रवेशः । द्वारेणेत्यनुक्तेः । ग्रहा ऐन्द्रवायवाद्यर्थं गृहीताः सोमरसास्तान् । पवमानग्रहाणामप्यत्र ग्रहणम् । पात्राणि सोमवन्ति तेषामेवारिक्तानि चेति कश्चित्तन्न । यदेवास्य शयानस्योपशुष्यतीति वाक्यशेषविरोधात् । चकारो मन्त्रानुकर्षणार्थः । संशब्दाद्धस्ततलेन स्पर्शः पात्रबिलेषु मन्त्रावृत्त्या । अक्षितमिति मन्त्रान्तः । एतत्फलं ब्राह्मणे—पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पुनरेत्योपतिष्ठते यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्य प्र ते धारा मधुश्चुत उत्सं दुह्रते अक्षितमित्याह यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाऽऽप्याययतीति । चिरकालं पात्रस्थितः सोमः शयान इत्युच्यते ।

आग्नीध्रीयादाग्नीध्रोऽङ्गारानाहृत्य तैरेव मन्त्रैर्यथान्युप्तं धिष्णियान्विहरति ।

अङ्गारा धूमरहिता अग्न्यवयवा अर्थात्सर्वधिष्णियविहरणपर्याप्तास्तान्पात्रे गृहीत्वाऽऽहृत्य तैरेव मन्त्रैर्धिष्णियनिवपनार्थैरेव मन्त्रैः । यथा*न्युप्तं नितरामुप्तं न्युप्तं न्युप्तमनतिक्रम्य यथान्युप्तं यथा निवपने नितरामिति तथैव विहरणेऽपीति बोधयितुम् ।

* अत्र यथान्युप्तमितिवचनमिति अपेक्षितम् ।

१ क. ग. °न्त्रान्तक° । २ क. ग. °र्थकत्वा° ।

तेन प्रतिधिष्ण्यमङ्गारत्रित्वं सिद्धं भवति । अनेनैच्छिकत्वं व्यावर्त्यते । धिष्णियानग्नीन्विहरति तत्र तत्र स्थापयति । आहवनीयेऽग्निसंसर्गदोषापत्तेर्न विहरणम् । आग्नीध्रीयात्तूष्णीमेवाऽऽग्नीध्रोऽङ्गारानाहृत्य विभूरसीति मन्त्रेणाऽऽग्नीध्रीय एकमङ्गारं निक्षिप्य वह्निरसीति मन्त्रेण होत्रीये निक्षिप्य व्यवायदोषपरिहारार्थमङ्गारैः सहैवोत्तरेणाऽऽग्नीध्रीयं परीत्यान्तरा यूपमङ्गारान्हरन्क्रमेण यूपं गत्वा दक्षिणेन मार्जालीयं धिष्ण्यं प्रशास्तृधिष्ण्यसमीपमागत्य श्वात्रोऽसीति निक्षिप्य यथेतं प्रत्येत्य ब्राह्मणाच्छंसिधिष्ण्यादिष्वच्छावाकधिष्ण्यान्तेषु तत्तन्मन्त्रेण निक्षिप्य यथेतं पूर्ववन्मार्जालीयं धिष्णियं गत्वा शुन्ध्यूरसीति मार्जालीये सर्वान्निक्षिपेत् । प्रत्यङ्मुखोदङ्मुखत्वयोर्विकल्पो निवपनवत् । धिष्णियानामग्नीनां सर्वेषां प्रज्वलनं व्याघारणार्थम् । धारयन्ति धिष्णियानिति तृतीयसवने धारणावचनादितरयोः सवनयोर्व्याघारणोत्तरं नाशेऽपि न दोष इति गम्यते । यथान्युप्तमित्यनेनेदमपि गम्यते पांसुधिष्णियेष्वेव विहरणं न त्वनुद्देश्येषु बहिष्पवमानास्तावादिष्वपि । तथा चाऽऽपस्तम्बः— पांसुधिष्णियेषु निवपति तेनाऽऽनुपूर्व्येण यथान्युप्ता भवन्तीति । तैरेव मन्त्रैरिति वचनं तूष्णींत्वनिवृत्त्यर्थम् । आग्नीध्रग्रहणमध्वर्युव्यावृत्त्यर्थम् । अत्र रौद्रानीकवन्मन्त्रानुषङ्गः कृताकृतः । वचनाभावात् ।

अध्वर्युश्चतुश्चमसे राजानं गृहीत्वा पञ्चगृहीतं चाऽऽज्यं पुरस्तात्प्रत्यङ्ङासीनस्तैरेव मन्त्रैर्यथान्युप्तं धिष्णियान्व्याघारयति ।

अध्वर्युग्रहणमाग्नीध्रव्यावृत्त्यर्थम् । चतुश्चतुर्वारम् । चमस एकादशचमसव्यतिरिक्ते । अदनसाधनत्वाच्चमसत्वम् । पञ्चगृहीतं चाऽऽज्यमित्यत्र चकारः साहित्यार्थः। तेनाध्वर्युणैवोभयोराहरणं कर्तव्यमिति सिद्धं भवति । आज्यमित्यनन्तरं गृहीत्वेत्यनुवर्तते । चमसे राज्ञो ग्रहणं परिप्लवया । आज्यग्रहणं प्रचरण्यां यया क्रतुकरणं हुतं तस्यां न दक्षिणहोमार्थायाम् । अत्र ज्ञापकमुक्तमेव प्रचरणीं प्रथमा[१] स्रुचं प्रयुनक्तीत्यस्मिन्सूत्रे । पुरस्ताद्धिष्ण्यपुरोभागे प्रत्यङ्प्रत्यङ्मुख आसीन उपविष्टस्तैरेव मन्त्रैर्निवपनक्रमेणैव धिष्णियानग्नीन्व्याघारयति । अत्राऽऽसीनवचनाद्विहरणे तिष्ठताऽपि पक्षे गम्यते । पुरस्तादितिवचनं धिष्ण्यदक्षिणपार्श्वे प्राङ्मुखोपवेशनं व्यावर्तयितुम् । प्रत्यङ्ङिति वचनं विहरणे प्रत्यङ्मुखताया अनियमं व्यावर्तयितुम् । तेनोदङ्मुखताऽपि पक्षे विहरणे भवति । तैरेव मन्त्रैरिति वचनमापस्तम्बोक्ततूष्णींत्वपक्षव्यावृत्त्यर्थम् । अत्रापि रौद्रानीकवन्मन्त्रानुषङ्गः कृताकृतो वचनाभावात् । अन्त्यमन्त्रे तु भवत्येव श्रुतौ पठितत्वात् । द्विविधोऽत्र नियमः—तैरेव मन्त्रैरिति तैर्मन्त्रैरेवेति । प्रथमनियमे विभवे प्रवाहणाय स्वाहेत्यादिबौधायनोक्तपाक्षिकमन्त्रान्तरनिवृत्तिः फलम् ।

---

१ ख °वतीत्यर्थः । अ° ।

द्वितीय आपस्तम्बोक्ततूष्णींत्वनिवृत्तिः फलम् । व्याघारणशब्दचोदितत्वात्त दर्विहोमधर्मः । अत्र राजा परिप्लवया द्रोणकलशाधवनीयपूतभृदन्यतरस्थो ग्राह्यो विशेषवचनाभावात् । यदि द्रोणकलशस्थस्यैव ग्रहणमिष्टमभविष्यत्तदाऽध्वरो यज्ञोऽयमस्तु देवा इति वक्ष्यमाणाघारार्थद्रोणकलशादानकपरिप्लवाकरणकसोमग्रहणवद्द्रोणकलशाच्च परिप्लवया राजानमित्यत्राप्यवक्ष्यत् । अतोऽत्रानियम एवेति । आपस्तम्बस्तु अत्र द्रोणकलशादेव व्याघारणार्थं सोमस्य ग्रहणमाह ।

सोमेनाऽऽहवनीयमाग्नीध्रीयꣳ होत्रीयं मार्जालीयं चाऽऽज्येनेतरान् ।

सोमेन व्याघार्याणामयं विवेको न तु व्याघारणक्रमनियमः । यथान्युप्तं धिष्ण्यान्व्याघारयतीत्यनेनैव क्रमस्य सिद्धत्वात् । तस्मान्निवपनक्रमेणाऽऽहवनीयाग्नीध्रीयहोत्रीयानन्तरं प्रशास्त्रीयादिमार्जालीयान्तान्व्याघारयति । उत्तरवेदिराहवनीयायतनं तस्याः प्रथमं न्युप्तत्वात्प्रथममाहवनीयव्याघारणमेव । आज्येन प्रचरणीगताज्येन । प्रचरण्यैवेतरान्प्रशास्त्रीयादीनच्छावाकीयान्तान्धिष्ण्यानित्यर्थः ।

अतिहाय वषट्करोति ।

मार्जालीयधिष्ण्यमतिहाय ततः किंचिदुपसृत्य वषट्करोति वषडित्येके समामनन्ति वौषडित्येके वाषडित्येके वषाडित्येक इति याजुषहौत्रे वक्ष्यमाणानां चतुर्विधानां वषट्काराणां मध्येऽन्यतरेण वषट्कारेण वषट्करोतीत्यर्थः । अथवा तं तं धिष्ण्यमतिहाय वषट्करोतीत्यर्थः[१] ।

व्याख्यातः सोमस्य भक्षः ।

पूर्वेण द्वारेण सदः प्रविश्याग्रेण होतारं पुरस्तात्प्रत्यङ्ङासीनो नृचक्षसं त्वेत्यवेक्ष्य मन्द्राभिभूरिति भक्षयतीत्यनेनोक्तमित्यर्थः । अत्रापि भवत्येवोपह्वानं प्रतिभक्षितुरभावेऽपि । नानुपहूतेन सोमः पातव्य इति निषेधात् । हिन्व म इत्यात्माभिमर्शनं मार्जालीये पात्रं प्रक्षाल्याऽऽयतने सादयति । व्याघारणशब्देन विहितत्वात्तस्य च होमत्वाभावात्तन्निमित्तकस्य भक्षस्याप्राप्तिः स्यात्तां वारयितुमिदं सूत्रम् ।

संततमनुपृष्ठ्यं बर्हिः स्तीर्त्वाऽऽग्नीध्रः पुरोडाशानलं करोति ।

मध्यमणिन्यायेनाऽऽग्नीध्रशब्दस्योभयोरन्वयः । अथवाऽऽग्नीध्रशब्दस्य संततमित्यतस्मात्प्रागन्वयः । अत्राऽऽग्नीध्रग्रहणं पृष्ठ्यास्तरणपुरोडाशालंकरणयोः प्रकृतावध्वर्युकर्तृकताया एव दृष्टत्वेन तदनुरोधेनात्रापि स्यात्प्रैषस्याऽऽस्मार्थत्वमादायोपपत्तेरिति शङ्कां निरसितुम् । संततवचनं विच्छेदनिवृत्त्यर्थम् । अनुपृष्ठ्यं पृष्ठ्यायामेवेत्यर्थः ।

१ ख. °र्थः । अस्मिन्पक्षे होमानामनेकेषां मध्ये वषट्कारैर्व्यवधानात्पर्यकं होमस्य निमित्तत्वम् । तेन प्रतिहोमशेषं प्रतिग्रहणं च भक्ष इति सूत्रादिति द्रष्टव्यम् । व्या° ।

तेन तूष्णीं दक्षिणां तूष्णीमुत्तरामिति निवर्तते। बर्हिर्वचनं शुष्कदर्भवाच्योऽपस्तरणनिवृत्त्यर्थम्। यज्ञस्येति मन्त्रेण गार्हपत्यादुपक्रम्याऽऽहवनीयायतनपर्यन्तम्। तथा चाऽऽपस्तम्बः—यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्येति गार्हपत्यात्प्रक्रम्य संततमनुपृष्ठ्यं बर्हिः स्तृणात्याहवनीयादिति। अत्र धानादिष्वपि पुरोडाशशब्दप्रवृत्तिर्बहुवचनात्। बर्हिरास्तरणात्पूर्वं केचित्कर्मणे वामिति पाणिप्रक्षालनमिच्छन्ति। देवो वः सविता मध्वाऽनक्तु इति धानालंकरण ऊहः। प्रकृतिवदितरेषाम्। आमिक्षावाजिनयोर्नालंकरणम्। अलंकरणं कृत्वाऽऽग्नीध्रो विरमति। अत्र विशेषमाह बौधायनः—अथैव आग्नीध्रो जघनेन गार्हपत्यमुपविश्य पाञ्यां पश्चयोपस्तृणीते मध्यतः पुरोडाशमुपस्तीर्णाभिघारितमुद्वासयति पुरस्ताद्धाना दक्षिणतः करम्भं पश्चात्परिवापमामिक्षामुत्तरत इति।

एति पशुना।

सवनीयपशुना सहेति आगच्छति प्रतिप्रस्थातेति शेषः। तं प्रत्येव प्रैषात्।

या वां कशा मधुमतीत्याश्विनं ग्रहमध्वर्युर्गृह्णाति।

उपयामगृहीतोऽस्यश्विभ्यां त्वेति ग्रहणमन्त्रः। ऐन्द्रवायवादित्रिद्धाराग्रहत्वाभावेऽपि ग्रहत्वमस्त्येवेति दर्शयितुं ग्रहवचनम्। तेन ग्रहं संमार्ष्टीति संमार्गोऽत्रापि सिद्धो भवति। अध्वर्युग्रहणं प्रतिप्रस्थातृव्यावृत्त्यर्थम्।

ग्रहणप्रकारमाह—

परिप्लवया द्रोणकलशादुपस्तीर्य पूतभृत उन्नीय द्रोणकलशादभिघारयति।

परिप्लवयेत्युत्तरत्राप्यनुवर्तते। तेन परिप्लवयैवोन्नयनमभिघारणं च भवति। उदञ्चनव्यावृत्तये परिप्लवयेति वचनम्। द्रोणकलशवचनमाधवनीयव्यावृत्तये। द्रोणकलशादित्यनन्तरं सोमं गृहीत्वेति शेषः। उच्छब्द आधिक्यार्थकः। यद्यपि मन्त्रपाठक्रम आश्विनस्तृतीयस्तथाऽपि तस्माद्बहिष्पवमाने स्तुत आश्विनो गृह्यत इति श्रौतक्रमस्य मन्त्रपाठक्रमापेक्षया प्रबलत्वाद्दशैतानध्वर्युः प्रातःसवने ग्रहान्गृह्णाति यदाश्विनो दशमो गृह्यते तं तृतीयं जुहोतीति श्रुतेश्चात्राऽऽश्विनग्रहणमिति। जैमिनिरपि—क्रमकोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्चेति। उक्तोपासादितग्रहाणां मध्ये दशमस्थान आश्विनग्रहणं तृतीयस्थाने होम इति यदाश्विनो दशमो गृह्यते तं तृतीयं जुहोतीतिश्रुतिगतदशमतृतीयशब्दयोरर्थो ज्ञेयः। उपस्तरणाभिघारणशब्दाभ्यामिदं ज्ञायत उन्नयनं मुख्यमेते अङ्गे। मुख्यमुन्नयनमुपर्यर्धपर्यन्तम्। वृष्टिकामामयाविनोः पूरणपर्यन्तम्। उपस्तरणाभिघारणे स्वल्पसोमेनेति।

---

१ ख. ग. ङ. ज. ञ. एति। २ ख. °दश्च°।

इमं विधिमन्यत्राप्यतिदिशति—

सर्वग्रहाणामेष कल्पः ।

ऋतुग्रहन्यायप्रशुक्रग्रहसोमातिरेकग्रहषोडशिप्राजापत्यादीनामित्यर्थः । एष उक्त एव कल्पः प्रकारो भवतीत्यर्थः । ग्रहाणामिति बहुवचनादेव सर्वग्रहलाभे सर्वग्रहणमाश्विनग्रहस्याध्वर्युग्राह्यत्वात्तत्र परिभाषाकरणादध्वर्युमात्रग्राह्यग्रहविषयत्वं प्रसक्तं तद्व्यावर्तयितुं *सर्वग्रहणम् ।

तꣳ सादयित्वा त्रिवृता यूपं परिवी-
याऽऽग्नेयं पशुꣳ सवनीयमुपाकरोति ।

यथायोनिसादनं चेति परिभाषयैव सिद्धे सादने तꣳ सादयित्वेतिवचनं सादनयूपपरिव्ययणयोः कालाव्यवधानार्थम् । एष ते योनिर्माध्वीभ्यां त्वेति सादनमन्त्रः । प्रातर्युजौ विमुच्येथामित्यर्थं या वां कशेत्यनेन विकल्पते । प्रातर्युजौ विमुच्येथामित्यनेन ग्रहण एष ते योनिरश्विभ्यां त्वेत्येव एव सादनमन्त्रः । पूर्वां रशनामुदु(द्दु)ह्य त्रिवृता त्रिगुणया रशनया निरूढपशुबन्धोक्तकल्पेन देवस्य त्वेतिरशनादानादिना नाभिदघ्ने यूपं परिवीयाऽऽग्नेयं पशुं सवनीयमुपाकरोतीत्यर्थः । न चैतस्या रशनायाः पश्वङ्गतैवास्तु यूपाङ्गत्वे त्वदृष्टार्थत्वापत्तेरिति वाच्यम् । यूपाङ्गत्वेऽपि दार्ढ्यरूपदृष्टसंभवात् । द्वितीयाश्रुतेश्च यूपार्थत्वस्यैव रशनापरिव्याणस्य युक्तत्वात् । तथा च चतुर्थाध्याये चतुर्थपादे जैमिनिः—पश्वङ्गं रशना स्यात्तदङ्गमविधानादिति । केचित्पूर्वामेव रशनामादाय परिव्ययन्ति । तन्न । पुनस्त्रिवृद्वचनवैयर्थ्यापत्तेः । पूर्वामुदु(द्दु)ह्येत्येव कात्यायनबौधायनाभ्यां स्पष्टतयोक्तेश्च । सा च सवनीयपश्वङ्गत्वेऽपि नाऽऽवर्तते यूपसंस्कारत्वात् । स्वरुस्तु पूर्व एव मन्त्रेणाऽऽदायावगूह्यः । प्रतियूपं स्वरव इति वचनाल्लिङ्गात्समानो यूपः स्वरुरिति अग्निष्टोम एव स्पष्टवचनाच्च । देवस्य त्वेत्यादि सर्ववगूहनान्तमुन्मार्जनाग्रप्रेक्षणवर्जं वा । पशुरजोऽभिप्रेतः । जात्यन्तरावचनादाग्नेयमजमग्निष्टोम आलभन्त इति श्रुत्यन्तराच्च ।

तस्य रूपनियमो न विद्यते ।

तस्य सवनीयपशो रूपनियमो लोहत्वादिरूपनियमो न विद्यते नास्त्यत्रेत्यर्थः । इदमपि अग्नीषोमीयप्रकृतित्वे लिङ्गम् ।

हुतायां वपायां प्रसृप्स्यन्तो ग्रहावकाशैरुपस्थाय सम्प्रसर्पन्ति ।

उत्तरपरिवाप्यहोमश्चात्वाले मार्जनं च भवत्येव । तयोर्वपाहोमाङ्गत्वात् । वरदानमपि भवति । पश्वे(श्वै)कादशिनीसूत्रे वरदानस्य तदङ्गत्वविधानाल्लिङ्गात् । सुब्रह्मण्या-

---

* सर्वग्रहणमित्यधिकम् ।

ह्वानं नात्र । अवचनात् । प्रसृप्स्यन्तः सदसि स्वस्थानं प्रति उपवेशनार्थं गमनं प्रसर्पणं तत्करिष्यन्तः । अवकाशयन्तेऽर्थं प्रकाशयन्त इत्यवकाशा मन्त्राः । ग्रहाणामवकाशा ग्रहावकाशा ग्रहाणामवकाशः प्रकाशो येष्विति वा । द्वौ समुद्राविस्यारभ्य स्पयः स्वस्तिरित्यतःप्राग्ग्रहावकाश इति संज्ञा मन्त्राणां तैर्द्रोणकलशप्रभृतीनुपस्थाय संप्रसर्पन्ति समेताः सदः प्रविशन्तीत्यर्थः । सामान्यप्रतिज्ञेयम् । प्रसृप्स्यन्त इति वचनात्सोमातिरेकनिमित्तकोक्थ्यग्रहणे प्रसर्पणाभावाद्ग्रहावकाशोपस्थाननिवृत्तिः । बहुवचनादध्वर्युप्रतिप्रस्थातृयजमाना आध्वर्यवेण विधानेनोपस्थानसर्पणे कुर्वन्ति । उन्नेतुरप्याध्वर्यवेण विधानेनोपस्थानसर्पणे । उपवेशनं सदस्यवैतस्यापि । सदस्यस्याप्येवमेव । नेष्ट्राग्नीध्रयोरुभयान्वितयोर्हौत्रेणाऽऽध्वर्यवेण वा । प्रसृप्स्यन्त इत्यनेन ये ये प्रसर्पणकर्तारस्तेषामिदमुपस्थानं, तेन ब्रह्मणोऽपि प्रसर्पणकर्तृत्वादुपस्थानं, होत्रादीनामुद्गात्रादीनां च कर्म शाखानुसारेणेति यथाबथं द्रष्टव्यम् ।

द्वौ समुद्राविति द्रोणकलशाधवनीयौ ।

सकृदुक्तेन मन्त्रेण द्वौ युगपदुपतिष्ठन्त इत्यर्थः । सेतुनाऽतियन्त्यन्यमिति मन्त्रान्तः ।

द्वे द्रधसी इति पूतभृतम् ।

उपतिष्ठन्त इति शेषः । जार्या इति मन्त्रान्तः ।

परिभूरग्निमिति सर्वसोमम् ।

उपतिष्ठन्त इत्येव शेषः । तस्य त इदमुन्मृज इति मन्त्रान्तः । सर्वश्चासौ सोमश्च सर्वसोमस्तम् । अत्र सर्वशब्दः प्रकारकात्स्न्र्यमाचष्टे सर्वान्नं भक्षयतीतिवत् । सर्वसोम इति द्रव्यैकत्वात्सकृन्मन्त्रमुक्त्वा सर्वस्य सोमस्योपस्थानम् । सर्वग्रहणं ग्रहद्रोणकलशाधवनीयपूतभृत्स्थसोमोपस्थानार्थम् ।

प्राणाय म इत्युपांशुपात्रमपानाय म इत्यन्तर्यामं व्यानाय म इत्युपांशुसवनं ग्रावाणं वाचे म इत्यैन्द्रवायवं दक्षक्रतुभ्यां म इति मैत्रावरुणं चक्षुर्भ्यां म इति शुक्रामन्थिनौ श्रोत्राय म इत्याश्विनमात्मने म इत्याग्रयणमङ्गेभ्यो म इत्युक्थ्यमायुषे म इति ध्रुवं वीर्याय म इत्यतिग्राह्यांस्तेजसे म ओजसे मे वर्चसे म इति चैतैर्यथारूपं वर्चोदा वर्चसे पवस्वेति सर्वत्रानुषजति ॥ १३ ॥

यथारूपमित्यस्यानन्तरमुपतिष्ठन्त इत्येव शेषः । अन्तर्यामशब्दे पात्रलक्षणा । हुतत्वाद्ग्रहाय । आदिवृद्ध्यभावश्छान्दस इति वा । तेनान्तर्याममिति रूपं भवति ।

१ ख. 'द्गृहस्येति' क' ।

पात्रमित्यध्याहारो योग्यतया । चक्षुर्भ्यां म इत्यत्रापि वर्चोदा वर्चसे पवस्वेत्येव । वर्चोदा वर्चसे पवस्वेति सर्वत्रानुषजतीति सूत्रे सर्वत्रेति पदेनात्राप्येकवचनपाठस्यैव प्रापणात् । द्रव्यपृथक्त्वान्मन्त्रावृत्तिः । चक्षुर्भ्यामिति परस्परापेक्षं द्विवचनमस्मिन्कल्पे द्रष्टव्यम् । सूत्रस्वरससिद्धमिदं व्याख्यानम् । वर्चोदौ वर्चसे पवेथामिति श्रुत्युक्तो द्विवचनयुक्तः पाठोऽनेन विकल्पते । अस्मिन्कल्पे द्विवचनलिङ्गत्वात्सकृदेव मन्त्रः । वीर्याय मे वर्चोदा वर्चसे पवस्वेतिमन्त्रावृत्त्याऽतिग्राह्यान् । तेजसे मे वर्चोदा वर्चसे पवस्व । ओजसे मे वर्चोदा वर्चसे पवस्व । वर्चसे मे वर्चोदा वर्चसे पवस्वेति क्रमेणातिग्राह्याणां त्रयाणामेते त्रयो मन्त्रा वीर्याय म इत्यनेन विकल्पिताः । एतैरितिवचनमेकमन्त्रत्वनिरासार्थम् । अर्थादेव क्रमे सिद्धे यथारूपमितिवचनं वाजपेय ऐन्द्रातिग्राह्यस्थानीयपञ्चैन्द्रातिग्राह्येषु द्वितीयमन्त्रस्यैवाऽऽवृत्तिर्न त्वन्तिमस्यैवेतिप्रदर्शनार्थम् । अस्मच्छब्दादेशभूतान्म इति शब्दादनन्तरं वर्चोदा वर्चसे पवस्वेत्ययमंशः सर्वत्र सर्वेषु मन्त्रेषु अनुषजति अनुषक्तो भवतीत्यर्थः ।

विष्णोर्जठरमसीति द्रोणकलशमिन्द्रस्य जठरमसी-
त्याधवनीयं विश्वेषां देवानां जठरमसीति पूतभृतं
वर्चोदा मे वर्चसे पवस्वेति सर्वत्रानुषजति ।

स्पष्टम् ।

कोऽसि को नामेति सर्वꣳ राजानमविशेषेण ।

उपतिष्ठेन्त इत्येव । तस्य त इदमुन्मृज इति मन्त्रान्तः । सर्वग्रहणप्रयोजनं पूर्ववत् । न विद्यते ऐन्द्रवायवत्वादिधर्मभेदनिमित्तकावृत्तिरूपो ग्रहत्वकलशस्थत्वधर्मभेदनिमित्तकावृत्तिरूपो वा विशेष उपस्थाने यस्मिन्मन्त्रे स मन्त्रोऽविशेषस्तेनेत्यर्थः । तेनेदं सिद्धं भवति सकृदुक्तेनैव मन्त्रेण सर्वराज्ञ उपस्थानं न प्रत्येकधर्ममादाय भेदेनोपस्थानमिति । एतेन पूर्वस्मिन्सर्वराजोपस्थान आवृत्तिरवगता भवति ।

बुभूषन्ब्रह्मवर्चसकाम आमयाव्यन्नाद्यकामोऽभिचरन्वाऽवेक्षेत ।

बुभूषन्नवेक्षेत ब्रह्मवर्चसकामोऽवेक्षेत, आमयाव्यवेक्षेत, अभिचरन्नवेक्षेतेति स्वशाखागता एते कल्पाः । अन्नाद्यकामोऽवेक्षेतेति कल्पः शाखान्तरीयः । अत्र काम्यकल्पप्रदर्शनात्पूर्वत्रोपस्थाने काम्यत्वं न । इदमित्येतस्य स्थाने तत्तत्कामोल्लेखः कार्यः— तस्य ते भूतिमुन्मृजे तस्य ते ब्रह्मवर्चसमुन्मृजे तस्य त आयुरुन्मृजे तस्य तेऽन्नाद्यमुन्मृजे तस्य तेऽमुष्य प्राणानुन्मृज इति । बौधायनोऽप्यन्नाद्यकामनां विना भूत्यादिकामनाप्रयुक्तमन्त्रविकारान्स्पष्टमेव प्रदर्शितवान् । कामाभावे त्वविकृतो मन्त्रः । अत्र काम-

नायां सत्यामवेक्षणमपि कार्यं कामनाया अभाव उपस्थानमात्रं नावेक्षणमित्ययं विशेषः। अयमर्थः शब्दान्तरप्रयोगादेकवचनाच्च प्रतीयते। इदमवेक्षणं यजमानस्यैव, सामान्यतः फलस्य यजमानगतत्वमेवेति सर्वमतसिद्धत्वात्समस्ते क्रतावर्थे श्रूयमाणं यजमानः कामयते यानि तु कामयतिः श्रावयतीति सूत्राच्च। यदि ऋत्विग्गतमपि स्यात्तदाऽवेक्षेरन्निति ब्रूयात्। एतेनाध्वर्युपरत्वमपि निरस्तम्। अत्र पाठोऽक्षरप्रदर्शनार्थः। तत्तत्कामनोद्देशेन संकल्पं कृत्वाऽवेक्षणं यजमानेन कार्यम्। यजमानः कामयते यानि तु कामयतिः श्रावयतीति सूत्रात्।

एतदन्ता महावकाशसंज्ञका मन्त्रा इत ऊर्ध्वं ये मन्त्रास्ते प्रसर्पणार्थास्तेषां विनियोगमाह—

स्फ्यः स्वस्तिरित्युत्करे वेदिकरणानि संन्यस्तानि यथारूपम्।

येः स्फ्यादिभिर्वेदिः कृता तानि वेदिकरणानि सम्यङ्न्यस्तानि संन्यस्तानि एतादृशानि यथारूपं यथालिङ्गमुपतिष्ठन्त इत्यर्थः। स्फ्यः स्वस्तिरित्यनेन स्फ्यम्। विघनः स्वस्तिरित्यनेन विघनम्। पर्शुर्वेदिरित्यनेन पर्शुम्। परशुर्नः स्वस्तिरित्यनेन परशुमिति यथारूपशब्दार्थः। संशब्दः पृथग्भावेन न्यासार्थः। न्यस्तानीति शब्दो निधानव्यावृत्त्यर्थः। नीत्युपसर्गोऽसंसर्गार्थः। उत्करे स्फ्यादीनां न्यसनं परिकर्मिकर्तृकम्। संन्यस्तानीतिशब्दस्वरसात्। अन्यथा संन्यस्येति ब्रूयात्। इत आरभ्य प्रसर्पणमोपवेशनं, तेन माध्यंदिनसवनतृतीयसवनयोः प्रसर्पणाभावाद्वेदिकरणोपस्थानादि सदसो दक्षिणार्धस्य प्रेक्षणं यावत्तावन्न भवति प्रातःसवनप्रसर्पणेनैव कार्यसिद्धेरिति भावः। महावकाशोपस्थानं तूत्तरयोः सवनयोर्वचनाद्ग्रहसंस्कारत्वाच्च भवत्येव।

यज्ञिया यज्ञकृतः स्थेति सर्वाणि।

उपतिष्ठन्त इत्येव। ह्वयध्वमित्यन्तः। पूर्वं व्यष्टिरूपतयोपस्थानमिदं समष्टिरूपतयेति भेदोऽनयोः। सर्वाणि स्फ्यादीनि चत्वारि।

उप मा द्यावापृथिवी इति द्यावापृथिवी।

उपतिष्ठन्त इति शेषः सर्वत्र। द्यावापृथिव्यावभिसंधायोपतिष्ठन्त इत्यर्थः।

उपास्ताव इति यत्र बहिष्पवमानेन स्तुवते।

यत्र बहिष्पवमानेन स्तुवत इत्यास्तावशब्दार्थप्रदर्शनार्थम्। तमुपतिष्ठन्त इति शेषः।

उपकलश इति द्रोणकलशमुपसोम इति सोममुपाग्निरित्यग्निमुपदेवा इति देवानुपयज्ञ इति यज्ञमुपमा होत्रा उपहवे ह्वयन्तामिति होत्रकान्।

उपतिष्ठन्त इत्येव। सोमोऽभिषुत एव प्रकृतत्वात्। स चैकादशग्रहकलशत्रयस्थः। अग्निरौत्तरवेदिक एव। तस्यैव सौत्ययागाधिकरणत्वेन प्रधानत्वात्। देवा अत्र

त्रयस्त्रिंशत् । ते चैकादश प्रयाजा एकादशानुयाजा एकादशोपयाजाः प्रजापतिश्च वषट्कारश्चेति । प्रकृतग्रहादीनामप्यत्र देवता विवक्षिताः । यज्ञशब्देन यज्ञसाधनानि हविराज्यादीनि । होत्रका मैत्रावरुणादयः । द्रोणकलशसांनिध्यात्सर्वाण्यपि कर्मोपयुक्तपदार्थानामेवोपस्थानान्येतानि । माशब्दनिवृत्त्यर्थं तत्र तत्रोपेत्यस्य पाठः । अधिकृतेन बुद्धिस्थेनापि तेनाऽऽकाङ्क्षानिवृत्तेरुपदेवा उपयज्ञ इति लिङ्गाच्च । न चायं समाधिरुपसर्गस्य संभवति । उपसृष्टस्यैवाऽव्याख्यातस्य धातोरर्थविशेषसमर्पकत्वादिति भावः । एतेन यदाद्यन्तयोः श्रुतत्वान्माशब्दमप्यनुषजन्ति केचित्तन्निरस्तम् ।

ह्वयता२ँ ह्वयेता२ँ ह्वयन्तामिति यथारूप२ँ सर्वत्रानुषजति ।

ह्वयतेः संनिहितस्यापि वचनस्य वैरूप्यात्कचित्कचिदयोग्यान्वयः स्यादतः कथमनुषङ्गः सेत्स्यतीति शङ्का न कार्या सामर्थ्याद्विपरिणतान्वयस्यैवाङ्गीकारादिति भावः । उक्तश्च विपरिणतान्वयः शाण्डिल्यकैरर्थाद्विभक्तिविपरिणाम इत्यनया परिभाषया । सर्वत्र सर्वेषु मन्त्रेषु यथारूपं देवतागतैकत्वाद्यनुरूपं क्रियापदमनुषजति अनुषक्तं भवतीत्यर्थः । आस्तावकलशसोमाग्नियज्ञानामेकवचनप्रतिपाद्यत्वाद्ह्वयतामिति । द्यावापृथिव्योर्द्विवचनप्रतिपाद्यत्वाद्ह्वयेतामिति । देवानां बहुवचनप्रतिपाद्यत्वाद्ह्वयन्तामिति । यद्यपि उपस्थेयक्रमानुसारेण ह्वयेतां ह्वयतां ह्वयन्तामिति पठितुं शक्यं तथाऽपि वचनक्रमानुसारेणापि पाठे बाधकाभावात्तथोक्तिः । अन्तिममन्त्र उपहव इत्येतस्य शब्दस्याधिकत्वात्तदनुरोधेन ह्वयतेः पुनः पाठः ।

नमोऽग्नये मखघ्ने मखस्य मा यशोऽर्यादित्याहवनीयमुपतिष्ठते ।

ब्राह्मणानुकरणार्थमुपतिष्ठत इत्यस्यात्रोपस्थानमर्थो न भवति किं तु नमस्कार एव नमःपदघटितत्वान्मन्त्रस्य । तथा च नमःपदस्य मन्त्रादावेव सत्त्वात्तदारभ्यैव नमस्कारार्थं नतिमुद्राकरणं तच्च मन्त्रसमाप्त्यन्तम् । तथा च नमस्कारस्य बाह्यचेष्टात्वेन मन्त्रान्ते क्रियां वारयितुमेव चैतस्य वक्ष्यमाणमन्त्रयोश्च कृत्स्नः पाठः । अनेन तेभ्य एव नमस्कृत्य सदः प्रसर्पत्यात्मनोऽनार्त्यै इति श्रुत्यर्थः सिद्धो भवति । चतुर्थो मन्त्रस्तु सौत्र एव । पुनरुपतिष्ठत इति वचनादेवं ज्ञायते स्फ्यप्रभृतिहोत्रकान्तानामुपस्थानमेकं कर्मेतिद्योतनार्थम् । तेन हविर्धानपूर्वद्वारस्थितैरेवोपस्थानं कार्यं न तु तत्तत्समीपं गत्वोपस्थानमिति सिध्यति ।

नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रम् ।

आग्नीध्रमग्निमाहवनीयसांनिध्यात् । उदकस्पर्शः । उपतिष्ठत इत्येव शेषः । पूर्ववदत्रापि व्याख्यानं द्रष्टव्यम् ।

---

१ म. °पि द्वेधा व्या° ।

नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीयम् ।

होत्रीयशब्दोऽत्र तत्स्थलक्षणयाऽग्निपर एव । आग्नीध्रसांनिध्यात् । स्थानोपस्थानापेक्षयाऽग्न्युपस्थानस्यैव युक्तत्वात् । तथा च होत्रीयाग्नेरेतावत्पर्यन्तं धारणं सिद्धं भवति । एवं मार्जालीयाग्नेरपि द्रष्टव्यम् । धिष्ण्यपर एव वा । तयोरप्युपस्थानदर्शनात् । अस्मिन्कल्पे न धारणम् ।

नमो यमाय मखघ्ने नमस्कृत्या मा पाहीति मार्जालीयम् ।

गतम् ।

दृढे स्थः शिथिरे इत्यधिषवणफलके ।

उपतिष्ठत इत्येव । अꣳहसस्पातमिति मन्त्रान्तः ।

द्यावापृथिवी समीक्षत इत्येकेषाम् ।

स्पष्टम् ।

सूर्यो मा देवो दिव्यादꣳहसस्पात्विति सूर्यं वायुरन्तरिक्षादिति वायुमग्निः पृथिव्या इत्यग्निं यमः पितृभ्य इति यमं सरस्वती मनुष्येभ्य इति सरस्वतीं पातु पात्विति सर्वत्रानुषजति ।

सरस्वतीमित्यनन्तरमुपतिष्ठत इत्येव । सर्वत्र वायुरन्तरिक्षादित्यादिषु मन्त्रेष्वित्यर्थः । वीप्साऽर्थाध्याहारनिरासार्था । अꣳहस इत्येतस्य शब्दस्यानुवृत्तिं वारयितुमनुषङ्गवचनम् । यमः पितृभ्य इत्यत्र नोदकस्पर्शः । पितृणामप्रधानत्वात् । अत एव न प्राचीनावीतमपि । पात्विति क्रियापदमनुषजति अनुषक्तं भवतीत्यर्थः ।

देवी द्वाराविति द्वार्यौ नमः सदस इति सदो नमः सदसस्पतय इति सदसस्पतिं नमः सखीनां पुरोगाणां चक्षुष इत्यृत्विजो नमो दिव इति दिवं नमः पृथिव्या इति पृथिवीम् ।

द्वार्यौ सदसो द्वारस्थूणे । मा मा संताप्तमिति मन्त्रान्तः । सदसस्पतिशब्देन ब्रह्मोच्यते । तथा चाऽऽपस्तम्बः स्पष्टमेव पठितवान्—नमः सदसस्पतय इति ब्रह्माणमिति । ऋत्विजः स्वस्वव्यतिरिक्ताः पञ्चदश । सदस्यपक्षे षोडश ।

अहे दैधिषव्येति यत्र निषत्स्यन्भवति ततस्तृणं लोष्टं वा निरस्याप उपस्पृश्योन्नितत उदुद्रुतश्च गेषमित्युपविशति ।

यत्र यस्मिन्स्थले निषत्स्यन्नुपवेशनं करिष्यन्भवति ततस्तस्मात्प्रदेशात्तृणं यत्किंचिल्लोष्टं क्षुद्रमृत्पिण्डस्तं वाऽहे दैधिषव्येति निरस्य । परिभाषयोत्तरतः । अङ्गुष्ठोप-

कनिष्ठिकाभ्यामित्याश्वलायनः । उन्निवत उदुद्रुतश्च गेषमिति तत्रोपविशति । तत्राध्वर्युप्रतिप्रस्थात्रोः स्थाननियमः सूत्रान्तरे प्रदर्शितः—दक्षिणमेवाध्वर्युर्द्वारबाहुं मिश्रयमाण उपविशत्युत्तरं प्रतिप्रस्थातेति । सदस्येवोपवेशनम् । उन्नेतुः प्रतिप्रस्थातुरुत्तरत एव । उन्नेतुर्हविर्धान एवोपवेशनमिति पक्षे होत्रकोपस्थानान्तमेव कृत्वाऽहे दैधिषव्येति तृणं लोष्टं वा यत्र निषत्स्यन्भवति ततो निरस्याप उपस्पृश्योन्निवत इत्युपविशतीत्येतावानेवोन्नेतुर्विधिः । मध्यतनमाहवनीयोपस्थानादि पृथिव्युपस्थानान्तं तस्य न भवति । एतेषां सदःप्रसर्पण एव संभवात् । यजमानस्य स्थानं याजमानसूत्रे प्रदर्शयिष्यति सूत्रकारः । ब्रह्मसूत्रे ब्रह्मणः स्थानं प्रदर्शयिष्यति । सदस्यस्थानं सूत्रान्तर उक्तं दक्षिणेनौदुम्बरीं सदस्य इति । बौधायनोऽपि—दक्षिणत उदङ्मुखो ब्रह्मा च सदस्य इत्युपविशत इति । औदुम्बरीमेवोद्गातारः पर्युपविशन्तीति पूर्वसूत्रादौदुम्बरीशब्दोऽत्रानुवर्तते । पाकतर इति पूर्वस्यान्तः । अथाह इत्युत्तरस्यान्तः ।

सदः प्रसृप्य दक्षिणार्धे परेक्षेताऽऽगन्त पितर इति ।

अत्र पूर्वं क्रियाप्रदर्शनमनन्तरं मन्त्रप्रदर्शनमित्येवं वैपरीत्यं ब्राह्मणानुसारेण । परेक्षणं कृत्स्नमन्त्रसमाप्तिपर्यन्तं न तु मन्त्रान्तेन संनिपातोऽत्रेतिप्रदर्शनार्थं वा । सदः प्रसृप्य सदसि उपवेशनान्तां प्रसर्पणक्रियां संपाद्य प्राचीनावीत्युपवीती वा बद्धाञ्जलिः परेक्षते तत्रैव तिष्ठन्निति परेत्युपसर्गार्थः । पितॄणां पूजार्थत्वाद्बद्धाञ्जलिता । तथा च ब्राह्मणम्—तेभ्य एव नमस्कृत्य सदः प्रसर्पत्यात्मनोऽनार्त्या इति । भूयास्तेति मन्त्रान्तः । प्राचीनावीतपक्षे यज्ञोपवीत्यप उपस्पृशेत् । प्रसृप्स्यन्तो ब्रह्मवकाशैरुपस्थाय संप्रसर्पन्तीत्युपक्रमे बहुवचनम् । उत्तरत्रानुव्रजति उपतिष्ठते समीक्षते यत्र निषत्स्यन्भवति उपविशतीत्येतेष्वेकवचनम् । एताभ्यां पक्षद्वयं ज्ञाप्यते बहुवचनात्सर्वेषामुपस्थानकर्तृत्वमेकवचनादध्वर्योरेवोपस्थानकर्तृतेति । अस्मिन्पक्षे फलं तु ऋत्विग्गामित्वेनानुष्ठानोपयोगितया यजमानस्येष्टमित्यृत्विग्गाम्येव युक्तम् । तथा च तृतीयाध्यायेऽष्टमे पादे जैमिनिः—कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात्स्यादिति । फलं मा मा संतासमित्यसंतापनादिकं फलं कर्मार्थं कर्मानुष्ठानौपयिकं स्वामिनं प्रति यजमानं प्रति आत्मीयकर्माविघातरूपार्थवत्त्वात्स्वेष्टानुगुणत्वरूपप्रयोजनवत्त्वात्तेषामृत्विजां भवति ऋत्विग्गामित्वेनैव स्वेष्टं भवति । एवं चाऽऽत्मनेपदानुगुण्यादृत्विग्गामीत्येव युक्तम् । ऋत्विक्फलं करणेष्वर्थवत्त्वादिति पूर्वाधिकरणे ममाग्ने वर्च इत्यादिकरणमन्त्रगं वर्चआदिकं फलं तद्यजमानगाम्येवेति सिद्धान्तितं तद्वैलक्षण्यद्योतनाय तुशब्द इति सूत्रार्थः । असहितेनैवाध्वर्युणाऽऽहवनीयाद्युपस्थानं द्यावापृथिव्योः समीक्षणमिति पक्षे समीक्षणं लोष्टनिरसनमपामुपस्पर्शनमुपवेशनं दक्षिणार्धपरेक्षणं च कर्तव्यमितरैस्तु सहितैरेवेति प्रदर्शनार्थं वा ।

अत्र पशुं विशास्ति ।

अन्तर्भावितो णिजत्र ज्ञेयः । तेन शमितारं पशुं विशासयतीत्यर्थो भवति । एतेन शमितः पशुं विशाधीत्ययं प्रैषोऽप्यत्रैवाध्वर्युणा वक्तव्य इत्यपि सिद्धं भवति । तेन हविष्कृता वाचं विसृज्य पशुं विशास्तीतिपशुसूत्रोक्तविशसनकालो बाध्यते । अत्रास्मिन्काल एव पशुं विशास्ति न तु पशुपुरोडाशसंबन्धिहविष्कृदेहीतिप्रैषकरणवाग्विसर्गोत्तरकाल इति ।

श्रप्यमाणः सर्वाणि सवनानि परिशेते तृतीयसवने वा श्रप्यते ॥ १४ ॥

श्रप्यमाण इति पशोर्विशेषणम् । सर्वाणि सवनानि परिशेत इत्यनेन मन्दज्वालयाऽङ्गयागकालपर्यन्तं यथा सुशृतो भवति दग्धो विशीर्णो वा न भवति तथा परिशेते श्रप्यमाण एव स्थितो भवतीति बोध्यते । परिशेरत इति पाठे बहुवचनस्य च्छान्दसतैव ज्ञेया, श्रप्यमाण इत्येकवचनेन विरोधात् । तृतीयसवने वा श्रप्यत इत्यस्मिन्पक्षेऽपि विशसनमत्रैव श्रपणमात्रं तृतीयसवनारम्भकाल आरम्भणीयमिति ।

इत्पोकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्निचित्कराजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्रश्नस्य पञ्चमः पटलः ॥ ५ ॥

अथाष्टमप्रश्ने षष्ठः पटलः ।

पुरोडाशानासाद्य तैः समवदाय प्रचरति ।

प्रतिप्रस्थात्रा हृतान्पुरोडाशानध्वर्युरासाद्य तैः पुरोडाशैः सहैवावदाय प्रचरति । आसाद्येत्यत्रान्तर्भावितो णिज्वा ज्ञेयः । तथा च प्रतिप्रस्थात्राऽऽसादनं कारयितव्यमिति सिध्यति । तथा चाऽऽपस्तम्बः—अत्र प्रतिप्रस्थाता सवनीयानासादयतीति । सहावदानांश एव विधिः । प्रचरतिस्त्वनुवादः । प्रचरणस्यानेककर्तृसाध्यत्वेऽपि समवदानस्याध्वर्युमात्रकर्तृकत्वेन प्रचरणसमवदानयोरर्थब्बोधितानेककर्तृसामानाधिकरण्यासंभवादनुपपन्नं वाक्यं स्यात्तामनुपपत्तिं वारयितुमेकवचनम् । प्रतिप्रस्थात्रा हरणे कारणं नासश्चस्थिते सोमेऽध्वर्युः प्रत्यङ्ङतदोऽतीयादिति निषेध एव । आग्नीध्रो

---

१ अ. म. 'शेरते ।

वाऽऽसादयति। तथा च बौधायनः—अथैतानि संपरिगृह्य पूर्वया द्वारोपनिर्हृत्योत्तरेण सदः परीत्योत्तरेणाऽऽग्नीध्रीयं धिष्ण्यं पर्याहृत्यान्तर्वेद्यासादयतीति। अथैष आग्नीध्रो जघनेन गार्हपत्यमुपविश्य पात्र्यां पञ्चधोपस्तृणीत इत्यादेरुद्वासनप्रतिपादकात्पूर्वसूत्रादस्मिन्सूत्र आग्नीध्रानुवृत्तेराग्नीध्रकर्तृकता द्रष्टव्या। तूष्णीमेवात्र सर्वेषां सादनम्। तूष्णीमेवाऽऽमिक्षावाजिने मध्ये वेदेरासाद्य दक्षिणस्यां वेदिश्रोण्यामासादयति। ततस्तूष्णीमेवोत्करे वाजिनमासादयति। समवदाय प्रचरतीत्यनेन प्रत्येकयागो व्यावर्त्यते।

तत्प्रकारमाह—

जुहूपभृतोरुपस्तीर्यावदायाभिघार्य प्रातः प्रातः सावस्येन्द्राय पुरोडाशानामनुब्रूहि प्रातः प्रातः सावस्येन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति संप्रेष्यति।

जुह्वामवदायोपभृत्यवद्यतीत्येतावतैवोपस्तरणाभिघारणयोः सिद्धौ जुहूपभृतोरुपस्तीर्यावदायाभिघार्येत्येवं सूत्रकरणं प्रत्यभिघारणं प्रस्तरबर्हिःसमञ्जनं च परिसंख्यातुम्। यत्र प्रधानार्थस्विष्टकृदर्थावदानयोर्मध्ये प्रधानयागकृतकालव्यवधानं तत्रैव स्विष्टकृद्यागार्थद्रव्यस्य प्रत्यभिघारणम्। यत्र न तथा तत्र न प्रत्यभिघारणमिति ज्ञापकबलात्कल्प्यते। जुह्वामुपभृति चोपस्तीर्यावदायाभिघार्येत्येवमुच्यमान उपस्तरणावदानाभिघारणानि जुह्वां कृत्वोपभृति कर्तव्यानीत्येवं काण्डानुसमयोऽपि स्यात्स मा भूत्किं तु पदार्थानुसमय एव यथा स्यात्तदर्थं जुहूपभृतोः समासेन निर्देशः। तथा च जुह्वामुपस्तीर्योपभृत्यनन्तरमेवोपस्तीर्य जुह्वां धानाकरम्भपरिवापपुरोडाशामिक्षाभ्यः क्रमेण चतुरवत्तिनां द्विर्द्विः पञ्चावत्तिनां त्रिस्त्रिः प्रकृतिवदवदायानन्तरमेवोपभृति सर्वेभ्य उत्तरार्धेभ्यश्चतुरवत्तिनां सकृत्सकृत्पञ्चावत्तिनां द्विर्द्विः स्विष्टकृते तथैवावदाय जुहूस्थं सकृदुपभृत्स्थं द्विरित्येवमभिघारयतीत्येवं प्रयोगः सिद्धो भवति। अभिघार्येति ल्यपाऽत्रावत्ते संप्रेष्यतीत्ययमेक एव पक्षो न तु अवदास्यन्नवद्यन्नित्येतावपि पक्षाविति बोध्यते। ततः प्रातः प्रातः सावस्येति पुरोनुवाक्यासंप्रैषं दत्वाऽत्याक्रम्याऽऽश्राव्य प्रत्याश्राविते प्रातः प्रातः सावस्येति याज्यासंप्रैषं ददाति। यागः प्रकृतिवत्। अवदाने प्रत्यभिघारणे च धानासु यथार्थमूहः। इन्द्रदेवतोद्देशेन यागेऽपि निर्वापकालिकं देवतानां भेदमादाय तत्तद्द्रव्ययागेषु अनुमन्त्रणमन्त्रगता आशिषः समुच्चीयन्ते। तथा च सवनीयान्प्रकृत्य भरद्वाजः—सर्वं देवताग्रहणमाशिषस्तु समुच्चीयेरन्संसृष्टे च नानाद्रव्यत्वादिति। चकारोऽप्यर्थे। स च पदार्थसंभावनायाम्। संसृष्ट इत्यनन्तरं याग इति शेषः। नानाद्रव्यत्वादिति हेतुराशीःसमुच्चये। नानाद्रव्यत्वान्नानादेवतद्रव्यत्वादित्यर्थः। निर्वाप इति शेषः। इदं वरुणप्रघासादौ प्रधानयोराशीःसमुच्चयसिद्ध्यर्थम्। अत्र तूभयनिमित्तम्। तत्रानुमन्त्रणपाठ एवं सिध्यति—इन्द्रस्याहं देवयज्ययेन्द्रियाव्यन्नाद इन्द्रियाव्यन्नादोऽ-

स्माद् इन्द्रियाव्यस्माद् इन्द्रियावी भूयासमितीन्द्रयाजिनः । जेमानमिति महेन्द्रयाजिनः । जेमानं महिमानं गमेयमिति । सर्वं ऐन्द्रा एवेति पक्षे तु पञ्चस्वपीन्द्रियावीतीन्द्रयाजिनः सकृदेव । महेन्द्रयाजिनस्तु पञ्चमस्येन्द्रियावीत्यस्य स्थाने जेमानमिति । सकृत्पक्षे सकृदिन्द्रियावीत्युक्त्वा जेमानमिति ।

औपभृतं जुह्वां पर्यस्याग्नयेऽनुब्रूह्य-
ग्नये प्रेष्येति स्विष्टकृति संप्रेष्यति ।

स्विष्टकृत्पदराहित्यं प्रैषयोः प्रदर्शयितुं प्रैषपाठः । स्विष्टकृतीति वचनमेतस्य यागस्यापि प्रधानत्वं स्यात्स्विष्टकृत्पदसंघटितप्रैषाभावात्तन्निवर्तयितुम् । तथा च सकृदवदानद्विरभिघारणे अग्नेरहं देवयज्ययाऽऽयुष्मान्यज्ञेन प्रतिष्ठां गमेयमित्यनुमन्त्रणं च स्विष्टकृद्वद्भवति । प्रयोजनाभावान्न प्रत्याक्रमणं मध्य औपभृतमुपभृति भवमौपभृतम् । अत्र भवनं सत्ता विद्यमानत्वमिति यावत् । जुह्वां पर्यस्योपभृतैव निक्षिप्येत्यर्थः । पर्यस्येत्यस्य ल्यप आनन्तर्यमर्थः । तेन पर्यसनानन्तरमेव प्रैषो न तु आपस्तम्बोक्तवत्पर्यसनसमकालमिति द्रष्टव्यम् । ब्रू प्रे, इत्यनयोः प्लावनम् । ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेरिति पाणिनिसूत्रात् । एवं सर्वत्र ज्ञेयम् ।

प्राशित्रमिडा च क्रियेते प्राशित्रमवदाय नेडामवद्यति ।

ननु अत्र प्राशित्रं क्रियत इत्येतावदेव वक्तव्यं निरवदाय होत्र इडामादधातीति वक्ष्यमाणसूत्रादिडावदानं सेत्स्यत्येवं तथा चैतावतैव कार्यद्वयसिद्धौ किमर्थमिडावदानविधानं तन्निषेधश्च क्रियत इति चेत्सत्यम् । यजमानभागपरिसंख्यार्थं तत्करणात् । न च न यजमानभागमवद्यतीतिसूत्रेणैव निषेधः सिध्यत्येव तथा च दोषनादवस्थ्यमिति वाच्यम् । कृत्स्नतन्त्रे तस्य न यजमानभागमवद्यतीत्यनेनाप्रवृत्तेर्बोधनेन सवनीयपुरोडाशयागस्य पाशुकतन्त्रमध्ये प्रवृत्तस्य तत्तन्त्रोपजीव्यत्वेन कृत्स्नतन्त्रत्वादत्रापि न यजमानभागमवद्यतीत्यस्य निषेधस्याप्रवृत्त्या यजमानभागावदानप्राप्तौ तत्परिसंख्यार्थमेतस्याऽऽवश्यकत्वेन तद्दोषनादवस्थ्याभावात् । वैश्वानरे हविरिति आग्नेयात्प्राशित्रावदानमिति पक्षे परिवापस्यैव विरुज्य प्राशित्रावदानमन्येषामविरुज्यैव । आग्नेयात्प्राशित्रमवद्यतीत्येकेषामित्यस्मिन्पक्षे परिवापादेव प्राशित्रं नान्येभ्यः । आज्यादिहविर्भ्यो यच्छाय गोसारं कल्पयित्वाऽऽज्यलिप्तौ पाणी प्रक्षाल्य सौमिकं कर्म प्रतिपद्यत इति सर्वत्र ।

द्विदेवत्येषु मरुत्वतीययोरादित्यग्रहे सा-
वित्रे हारियोजने च याज्यानुवाक्ये ।

चकारः प्रत्येकं संयाज्यानुवाक्ये इति प्रतियागं द्वयं द्वयमित्यभिप्रायेण । याज्यानुवाक्यावतां झटितीयत्तापरिज्ञानार्थमिदं सूत्रम् ।

---

१ ख. 'द्यानं द्वि' । २ ग. ढ. क्रियते ।

याज्यैवेतरासु सोमाहुतिषु ।

स्पष्टोऽर्थः ।

उभयीष्वाश्रुतप्रत्याश्रुते याज्यासंप्रैषश्च व्याख्यातः ।

उभयीषु याज्यापुरोनुवाक्यायुक्तासु केवलासु च । आश्रुतमाश्रावणं प्रत्याश्रुं प्रत्याश्रावणं याज्यायाः संप्रैषो याज्यासंप्रैषश्च व्याख्यात आश्रुतप्रत्याश्रुतयाज्यासंप्रैषात्मकसमुदायो व्याख्यातो दार्शपौर्णमासिकपरिभाषयोक्त इत्यर्थः ।

पुरोनुवाक्यावतीषु पुरोनुवाक्यासंप्रैषः ।

व्याख्यात इत्यनुवर्तते । अमुष्मा अनुब्रूहीति यथादेवतमिति दार्शपौर्णमासिकप्रकरणस्थसूत्रेणोक्त इति तदर्थः ।

ग्रहं चमसं वाऽऽदायाऽऽश्रावयति यथा दर्शपूर्णमासयोः ।

यद्ग्रहं वा चमसं वाऽनन्वारभ्याऽऽश्रावयेत्स्वादियात्तस्मादन्वारभ्याऽऽश्राव्यश्स्वादेव नैतीतिश्रुतावन्वारम्भशब्दार्थ आदानमेव न त्वन्वारम्भमात्रमिति भावः । यथा दर्शपूर्णमासयोरित्यनेनाऽऽश्रावयोश्रावयोमाश्रावयेतिवैकल्पिकाश्रावणत्रयस्य संग्रहः क्रियते । अन्यथा प्रजापतिर्देवासुरानसृजत तदनु यज्ञोऽसृज्यतेत्यस्मिन्ननुवाके सोमप्रकरणसंबन्धिनि आश्रावयेत्येवंरूपस्यैवाऽऽश्रावणस्योक्तत्वेन तस्यैव प्राप्तिरापद्येत तन्निवारणार्थमतिदेशवचनमावश्यकम् । अत्र ब्राह्मणे विशेषः—यो वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठन्नाश्रावयेदेषा वा अध्वर्योः प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात्प्रतिष्ठाया इयात्तस्मात्समानत्र तिष्ठता होतव्यं प्रतिष्ठित्यै यो वा अध्वर्योः स्वं वेद स्ववानेव भवति स्रुग्वा अस्य स्वं वायव्यमस्य स्वं चमसोऽस्य स्वं यद्ग्रहं वा चमसं वाऽनन्वारभ्याऽऽश्रावयेत्स्वादियात्तस्मादन्वारभ्याऽऽश्राव्यश्स्वादेव नैतीति ।

आग्नीध्रागारे दक्षिणामुखस्तिष्ठन्नाग्नीध्रः स्फ्यं धारयन्प्रत्याश्रावयति तद्व्याख्यातम् ।

आग्नीध्रागारे प्रत्याश्रावणं यथा दर्शपूर्णमासयोरित्येतावतैव सिद्धौ सत्यां पुनर्गुरुभूतवचनमाश्रावणप्रत्याश्रावणादिविषये विधेरन्यथा करणे चेत्तदा प्रायश्चित्तं सोमतन्त्रसंबन्ध्येव भवति न तु दार्शपौर्णमासिकं सामान्यं सर्वप्रायश्चित्तमितिज्ञापनार्थम् । दक्षिणामुखतातिष्ठत्तास्फ्यधारणकतानां सर्वासां विधानमपूर्वत्वार्थम् । तेनात्रेध्मसंनहननिवृत्तिः । आग्नीध्रग्रहणं तूभयप्रायश्चित्तप्राप्त्यर्थम् । अध्वर्युर्ग्रहं चमसं वाऽऽश्रावयति तद्व्याख्यातम् । अध्वर्युग्रहणमुत्तरसूत्रार्थं तच्च विपरिणामेन ।

संप्रैषास्त्वेकधना याज्याः ।

एकं प्रधानमेव धनं स्वरूपं भेदकमिति यावत्तद्येषां ते ह्येकधनाः । धनशब्दस्य स्वरूपपरत्वं सूत्रार्थानुगुण्यात्स्वी क्रियते । अथ वा धीयते वर्तते स्वरूपं भेदकं येषु इत्यर्थः । पृषोदरादित्वात्साधुत्वम् । तेनात्र स्वरूपभेदाद्भिन्नाभिन्ना एव नत्वेकरूपा इति । यजेरिमे यज्या यजिसंबन्धिन इत्यर्थः । यागसंबन्धिनः प्रैषा इति यावत् । यज्या इत्यत्र दिगादित्वाद्यत्प्रत्ययः । यज्या एव याज्याः स्वार्थेऽण्प्रत्ययः । याज्यासंप्रैषास्तु एकधना इत्यन्वयः ।

तत्राध्वर्युराश्राव्य प्रत्याश्राविते॑ऽमुष्मै प्रेष्येति मैत्रावरुणं प्रेष्यति स होतारं चोदयति ।

पूर्वत्राध्वर्युग्रहणं प्रतिप्रस्थात्रुपलक्षणार्थम् । याज्याविषयकप्रैषेषु इदं सूत्रम् । अमुष्मा इत्यत्र चतुर्थ्यन्तदेवतापदमुच्चारणीयम् । अमुष्मै प्रेष्येति एतत्प्रैषवचनमुपलक्षणं प्रातः प्रातः सावस्य शुक्रवतो मन्थिवतो मधुश्चुत इत्यस्य प्रैषस्याऽऽश्रावणसहितस्य । स मैत्रावरुणो होतारं चोदयति याज्यां वक्तुं प्रेरयतीत्यर्थः । एतदन्तः प्रपञ्चः सोमतन्त्रस्य साक्षाद्दर्शपूर्णमासापेक्षत्वं नास्तीति प्रदर्शयितुम् । एतदभिप्रेत्यैव प्रजापतिर्देवासुरानसृजत तदनु यज्ञोऽसृज्यतेत्यस्मिन्ननुवाके पुनराश्रावणादिप्रपञ्चः ।

वषट्कृते जुहोत्यनुवषट्कृते हुत्वा हरति भक्षम् ।

स्पष्टम् ।

सर्वसोमानामेष कल्पः ।

सर्वे सोमा ऐन्द्रवायवादयस्तेषामित्यर्थः ।

वषट्कृते जुहोत्यनुवषट्कृते हुत्वा हरति भक्ष१ सर्वसोमानामेष कल्प इत्यनेन सर्वत्रानुवषट्कारप्राप्तौ केषुचिदपवादमाह—

द्विदेवत्यर्तुग्रहेष्वादित्यग्रहसावित्रयोश्च नानुवषट्कारो विद्यते कृताकृतः शुक्रामन्थिनोः पात्नीवते च ।

अनुवषट्कारस्य शुक्रामन्थिमात्रविषय एवैतत्कृताकृतत्वम् । मध्यतःकारिचमसार्थं तु स नित्य एव भवतीत्यर्थात् । किमर्थमिदं सूत्रे सामान्यतो ज्ञानाय । कर्मकाल एतत्सूत्रपठनमावश्यकम् । एतदकरणे यजुर्भ्रेषप्रायश्चित्तम् । दक्षिणाग्नौ फलं त्वदृष्टमेवात्र । वषट्कारसाध्यप्रक्षेपावसरसंगत्याऽत्र परिभाषानिरूपणम् ।

द्विदेवत्यैः प्रचरतः ।

प्रासङ्गिकं परिसमाप्तमित उत्तरमनुष्ठेयं कर्मोच्यत इत्यवधानार्थमिदं प्रतिज्ञासूत्रम् । द्विदेवत्यर्तुग्रहेष्वादित्यग्रहसावित्रयोश्च नानुवषट्कारो विद्यत इत्यत्र द्विदेवत्यान्भक्षयन्तीत्यादौ च संज्ञायाः प्रयोजनम् । अर्थः स्पष्टः ।

कथमित्याकाङ्क्षायामाह—

**उपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वेत्यैन्द्रवायवस्यै-
कदेशमादित्यपात्रेण प्रतिप्रस्थाता प्रतिनि*र्ग्राह्यं गृह्णाति ।**

आदित्यपात्रेणेति तृतीया सप्तम्यर्थे । आदित्यपात्रेणैन्द्रवायवपात्रगतसोमैकदेशग्रहणासंभवेन करणार्थकत्वासंभवात् । पूर्वस्य प्रतिरूपतया निकृष्य गृह्यत इति प्रतिनिग्राह्यस्तं गृह्णातीत्यर्थः । प्रतिनिर्ग्राह्यमिति पाठेऽपि अर्थः स एव ।

उपयामगृहीतोऽसि वाऽक्षसदसीति च द्रोणकलशाद्द्वितीयम् ।

उपयामगृहीतोऽसि वाऽक्षसदसीति मन्त्रेण तस्मिन्नेव द्रोणकलशाद्द्वितीयं प्रतिनिग्राह्यं निगृह्य निगृह्य गृह्णातीत्यर्थः । चस्त्वर्थे वा । प्रतिरूपतया नितरां गृह्यत इत्यत्र प्रतिनिग्राह्यशब्दार्थो ज्ञेयः सर्वत्र प्रतिनिग्राह्यशब्दो णमुलन्तो ज्ञेयः । तेन यथासंभवं पौनःपुन्यं ग्रहणे सिद्धम् । परिप्लवया ग्रहणम् । अध्यक्षाभ्यां गृह्णामीति मन्त्रान्तः ।

**ऐन्द्रवायवमध्वर्युरादत्ते द्रोणकलशाच्च परि-
प्लवया राजानं प्रतिनिग्राह्यं प्रतिप्रस्थाता ।**

द्रोणकलशात्परिप्लवया राजानं चेत्यन्वयः । चः समुच्चये । प्रतिनिग्राह्यग्रहणोत्तरमादानवचनादेवं ज्ञायते स्वस्थानस्थितस्यैवैन्द्रवायवस्यैकदेशग्रहणमिति । द्रोणकलशाच्च परिप्लवया राजानमित्यत्राऽऽदत्त इत्यनुवर्तते । प्रतिनिग्राह्यं प्रतिप्रस्थातेत्यत्राप्यादत्त इत्येतस्यानुवृत्तिः । आदानवचनबलादासादनमप्यस्तीति गम्यते । तच्च मन्त्राभावात्तूष्णीमेव । दशापवित्रेण संमार्गोऽपि भवति । सर्वग्रहाणां परिमार्जनमिति सूत्रात् ।

**उपनिष्क्रम्याध्वरो यज्ञोऽयमस्तु देवा इति
परिप्लवयाऽऽघारयति यथोपांशुर्हुतो भवति ।**

उपनिष्क्रम्येत्यत्र हविर्धानादिति शेषः । उपनिष्क्रम्येति वचनमुपनिष्क्रमणाव्यवधानेनाऽऽघारसिद्ध्यर्थम् । परिप्लवयाऽऽघारयतीत्यत्राध्वर्युरित्येव शेषः । आघारार्थराज्ञोऽध्वर्युणैवाऽऽत्तत्वेनार्थादेवाध्वर्योः प्राप्तत्वात् । एतेन प्रतिप्रस्थातुः संनिहितत्वेनानुवृत्तिर्वारिता भवति । परिप्लवयाऽऽघारयतीति वचनं परिप्लवया राज्ञो ग्रहणं व्याघारणार्थचमसे तेन चमसेनाऽऽघारणमिति स्यात्तन्मा भूदित्येतदर्थम् । यथा येन प्रकारेणोपांशुरुपांशुग्रहो हुतो भवति तेन प्रकारेणाऽऽघारयतीत्यर्थः । स च प्रकार उत्तरपरिधिसंधिमन्ववहृत्येत्यादिः संततं जुहोतीत्यन्तः । स्वाहा त्वा सुभवः सूर्यायेति मन्त्रस्तु वैशेषिकेणाध्वरो यज्ञ इति मन्त्रेण बाध्यते ।

---

* प्रतिनिग्राह्यमिति पाठो ज्ञेयः ।

---

१ ग. निष्कृष्य । २ ख. ङ. ज. झ. न. ढ. °निर्ग्राह्यं ।

वायव इन्द्रवायुभ्यामनुब्रूहि वायव इन्द्रवायुभ्यां प्रेष्येति संप्रेष्यति ।

पृष्ठ्याया उत्तरत एव पुरोनुवाक्याप्रैषः । स चाध्वर्योरेव, एकवचनात् । सहिरण्येन प्राङ्मुखस्तिष्ठन्दक्षिणार्धपूर्वार्धे जुहोत्युत्तरार्धपूर्वार्धे वेतिपरिभाषया प्राङ्मुखता तिष्ठत्ता चोभयोः । तेन पृष्ठ्यादक्षिणतोऽपरेणाग्निं तिष्ठद्भ्यां प्राङ्मुखाभ्यां होमः कर्तव्य इति सिद्धं भवति । दक्षिणतोऽध्वर्युरुत्तरतः प्रतिप्रस्थाता पृष्ठ्याया दक्षिणत एव ।

वषट्कृते जुहुतः पुनर्वषट्कृते जुहुतः ।

स्पष्टम् ।

अध्वर्योः पात्रे प्रतिप्रस्थाता संपातमवनयति तस्यैकदेशमध्वर्युः प्रतिप्रस्थातुः पात्रे ।

संपातमवनयतीति वचनात्प्रतिप्रस्थात्रा स्वल्पमवनयनं कर्तव्यम् । एकदेशमवनयतीति वचनादध्वर्युणाऽधिकमवनयनं कर्तव्यम् । प्रतिप्रस्थातुः स्वल्पावनयनमादित्यस्थाल्यां सोमस्य कार्यबाहुल्यानुरोधेन । अध्वर्योरधिकावनयनं भक्षकार्यस्य स्वल्पत्वानुरोधेनेति द्रष्टव्यम् ।

देवेभ्यस्त्वेत्यादित्यस्थाल्यां प्रतिप्रस्थाता संपातमवनयति ॥ १९ ॥

अत्र संपातशब्दस्य स्वल्पशेषपरत्वे प्रतिप्रस्थातुः पात्रे भूयसोऽवशिष्टत्वेन संपातशब्दप्रवृत्त्यसंगतत्वापत्तेः । अतोऽयमर्थः—संपात्य संपात्यावनयनं कर्तव्यमिति । फलमत्राद्दष्टमेव ।

विष्णवुरुक्रमेत्यपिदधाति ।

पूर्वसूत्रात्प्रतिप्रस्थातृशब्दो वचनविपरिणामेनाऽऽदित्यस्थालीशब्दश्चानुवर्तते । उपस्थितत्वादादित्यपात्रेणैवापिधानम् । एतत्सर्वमापस्तम्बेन स्पष्टमुक्तं विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्वेत्यादित्यपात्रेण प्रतिप्रस्थाताऽऽदित्यस्थालीमपिदधातीति । अयं मन्त्र आपस्तम्बेनान्तिमेऽपिधाने विनियुक्तो यथा तथा नास्माकम् । अस्माकं तु सर्वेष्वपिधानेषु सूत्रकृता विनियुक्त इत्येतावान्विशेषः । माऽवरुधदिति मन्त्रान्तः ।

मयि वसुः पुरो वसुरित्यध्वर्युर्होत्रे भक्षं प्रयच्छति ।

ग्रहपात्रस्थावशिष्टसोम[स्य] भक्षणीयत्वाद्भक्षसंज्ञा । अध्वर्युग्रहणं प्रतिप्रस्थातृनिवृत्त्यर्थम् । वाचं मे पाहीति मन्त्रान्तः । अत्र विशेषमाहाऽऽपस्तम्बः—ग्रहमध्वर्युरादाय क्षिप्रꣳ होतारमतिद्रुत्य मयि वसुः पुरो वसुरिति ग्रहꣳ होत्रे प्रयच्छतीति ।

तेनैव होता प्रतिगृह्णाति ।

एतच्च याजुषहौत्रे ज्ञेयम् ।

एवमुत्तराभ्यां यथादैवतं प्रचरतः ।

उत्तराभ्यामित्यनन्तरं ग्रहाभ्यामिति शेषः । उत्तरौ मैत्रावरुणाश्विनौ । यथादैवतमिति वचनमतिदेशान्मित्रावरुणाभ्यामनुब्रूहि मित्रावरुणाभ्यां प्रेष्येति प्रैषयोः प्राप्तिः स्यात्तां वारयितुम् ।

नोत्तरयोर्द्रोणकलशाद्गृह्णाति नोत्तरयोराघारो विद्यते ।

नोत्तरयोर्द्रोणकलशाद्गृह्णातीत्यनेन प्रतिनिग्राह्यग्रहणं व्यावर्त्यते । आघारोऽध्वरो यज्ञोऽयमस्तु देवा इतीतरयोर्ग्रहयोर्न विद्यत इत्यर्थः ।

उत्तरेणोत्तरेण मन्त्रेण सकृद्गृह्णाति सकृज्जुहुतः ।

सकृद्ग्रहण उत्तरोत्तरो मन्त्र उपयामगृहीतोऽस्यृतसदसि । उपयामगृहीतोसि श्रुतसदसीति । सकृज्जुहुत इति वचनमेवमुत्तराभ्यामित्यनेन पुनर्वषट्कारे होमस्य प्राप्तस्य निवृत्त्यर्थम् ।

उत्तरेणोत्तरेणाऽऽदित्यस्थाल्यां प्रतिप्रस्थाता
संपातमवनयति तेनैव सर्वत्रापिदधाति ।

संपातावनयन उत्तरोत्तरो मन्त्रो विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्य इति । विष्णवुरुक्रमेत्येतेनैवापिदधाति । आपस्तम्बेनान्तिमेऽपिधानेऽयं मन्त्रस्तद्व्यावृत्त्यर्थमेवकारः । सर्वत्रोभयत्रेत्यर्थः ।

उत्तरेणोत्तरेणाध्वर्युर्होत्रे भक्षं प्रयच्छत्येतेनैव होता प्रतिगृह्णाति ।

भक्षप्रदान उत्तरोत्तरो मन्त्रो मयि वसुर्विदद्वसुरिति मयि वसुः संयद्वसुरिति ।

दितेः पुत्राणामदितेरकारिषमुरुशर्मणां बृहतां वरूथिनाम् । येषां धामानि निहितानि[1] धामशश्चित्रैर्भजन्ति भुवनानि विश्वेति वा सर्वत्रापिदधाति ।

स्पष्टम् ।

काम्यं कल्पमाह—

यदि कामयेत पापमस्य सश्स्यादिति प्रतिप्रस्थानेन
पूर्वो गृहीत्वा पूर्वस्तिष्ठञ्जुहुयात्पूर्वो हुत्वा सादयेत् ।

यदिशब्दाद्यजमानगतेयं कामना । अस्य देवदत्तस्य द्वेष्यस्य पापं सश्चकस्यादिति यदि यजमानः कामयेत तदा प्रतिप्रस्थानं प्रतिप्रस्थातुः पात्रं तेन तानि त्रीणि वायव्यानि पात्रसादनकाले खरे प्रयुज्यन्ते तैर्द्विदेवत्यग्रहणकाले पूर्वः पूर्वोऽध्वर्योर्द्रोणकलशात्प्रतिनिग्राह्यमन्त्रेणैव गृहीत्वा पूर्वस्तिष्ठञ्जुहुयात्ततो होमानन्तरं संपातमवनीय

---

[1] क. ज. ञ. ड. विहितानि ।

पूर्वः सादयेत् । स्वेन धारणे क्रियमाणेऽग्निकार्यकरणासंभवेनान्यहस्ते प्रदानं यावद्धो-ममिति । वषट्कारसाध्यत्वादेव तिष्ठत्तासिद्धौ तिष्ठन्निति वचनमुत्तरार्थम् । तेनाऽऽसा-दनमपि तिष्ठन्नेव कुर्यादिति सिद्धम् । जुहुयाद्यनेद्यनेतेत्यर्थः । पूर्वो गृहीत्वा पूर्वस्ति-ष्ठन्हुत्वा सादयेदित्येवं लाघवाद्वक्तव्ये पूर्वस्तिष्ठञ्जुहुयादिति पृथग्वचनं संपातावनय-नापिधानयोः सत्त्वं गमयति । पूर्वस्तिष्ठन्हुत्वा सादयेदित्येवमुच्यमाने क्त्वाप्रत्यये-नाव्यवहितत्वबोधनेनैतयोर्निवृत्तिः स्यादतः पृथग्वचनम् । होमोत्तरमासादनमेवाऽऽदौ कृत्वा पुनरादाय संपातावनयनादीति बोध्यते । अत्राऽऽसादनं नामोत्तरवेद्यां निधान-मात्रं न तु स्वायतने निधानम् । हविर्धानप्रवेशं विना तदसंभवात् । हविर्धानप्रवेशक-ल्पनां विना विवाहे तस्या अनुचितत्वात् । तत्र तत्र पूर्वः पूर्व इति वचनादध्वर्योरप्य-नन्तरमेष विधिरिति गम्यते ।

यदि कामयेत समावद्वीर्यो भ्रातृव्येण स्यादिति युगपद्गृहीतो युगपज्जुहुतो युगपत्सादयतः ।

भ्रातृव्येण द्वेष्येण सह समावद्वीर्यस्तुल्यवीर्यः । युगपत्सहैव ।

धाराग्रहकाले गृह्णातीत्येकेषाम् ।

संदंशपतितत्वात्काम्ये विधावेव पक्षान्तरमिदम् । धाराग्रहकाले द्विदेवत्यानां धारया ग्रहणकाल एव तेभ्यः पूर्वमनन्तरं वा प्रतिनिग्राह्यान्प्रतिप्रस्थाता गृह्णातीत्येके-षामाचार्याणां मतमित्यर्थः ।

अत्र पात्राण्युत्सादयति ।

अत्रास्मिन्काम्ये विधावित्यर्थः । अस्मिन्काल इत्यर्थो वा । पूर्वकल्पे नित्यविधि-व्यावृत्तिः । द्वितीयकल्पेऽवभृथकालव्यावृत्तिः । पात्राणि प्रतिनिग्राह्याणाम् । उत्सा-दयति विनाशयतीत्यर्थः । जामदग्न्येन रामेण क्षत्रमुत्सादितं पुरेत्यत्र दृष्ट उत्सादन-शब्दो विनाशार्थकः । पात्राण्युत्सादयतीति विधानादेव पूर्वत्र प्रतिनिग्राह्यार्थं पात्राणि भिन्नानि सन्तीति गम्यते । उत्सादयतीति वचनात्काम्यविधावेवायं प्रकार इति गम्यत ।

यदि कामयेत यो ग्रामे तं ग्रामान्निरू(रु)ह्य यो बहिर्ग्रामात्तं ग्रामे कुर्यादितीदमहममुमामुष्यायणम-मुष्य पुत्रममुष्यै विशो निरूहामीत्यध्वर्युः पात्रं निरू-(रु)ह्येदमहममुमामुष्यायणममुष्य पुत्रममुष्यां विशि सादयामीति प्रतिप्रस्थानꣳ सादयेदयज्ञसंयुक्तः कल्पः ।

अध्वर्युग्रहणं प्रतिप्रस्थातृव्यावृत्त्यर्थम् । प्रतिप्रस्थातुः पात्रं प्रतिप्रस्थानम् । मन्त्र-पाठप्रकारस्तु पूर्ववदत्रापि द्रष्टव्यः । अयज्ञसंयुक्तः कल्प इति सूत्रं कृतव्यानम् ।

१ क. ज. ङ. ञ. ढ. °मुष्याऽऽमु° । २ ङ. ज. घ. ञ. ढ. °मुष्याऽऽमु° ।

आधवनीयं पूतभृत्यवनीय दशाभिः कलशं मृष्ट्वा न्युब्जति।

कलश आधवनीयाख्यस्तं दशाभिः पवित्रस्य दशाभिर्मृष्ट्वा प्रोक्ष्य न्युब्जति न्युब्जं करोतीत्यर्थः। दशाभिस्तं मृष्ट्वा न्युब्जतीति परामर्शेनैवाऽऽधवनीयग्रहणे सिद्धे कलशवचनं पवमानग्रहान्कलशानित्यत्रत्यबहुवचनान्तकलशशब्देनेतरयोरपि संप्रत्ययो यथा स्यादित्येतदर्थम्।

होता ब्रह्मोद्गाता यजमानः सदस्यश्चेति
मध्यतःकारिणो मैत्रावरुणो ब्राह्मणाच्छंसी
पोता नेष्टाऽच्छावाक आग्नीध्रश्च होत्रकाः।

मध्यतः कारिण इति आत्मनोऽधिप्रभृतिषु ऋत्विक्षु गमनागमनयोः प्राधान्यान्मध्येऽन्तरा कर्तुं शीलं येषां ते मध्यतःकारिण इत्यर्थः। प्रधानानां मध्ये निवेशो गुणभूतानां पार्श्वत इति लोकसिद्धमेव। अथ वा मैत्रावरुणादिहोत्रकं मध्यतः कारिणां चमसाध्वर्यवो वषट्कृतानुवषट्कृताञ्जुहुतेत्यत्रैव संप्रत्ययार्था मध्यतःकारिसंज्ञा। होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वेत्यादौ संव्यवहारार्था होत्रका इति संज्ञा।

उभये चमसिनो भवन्ति सर्वेषां प्रतिपुरुषं चमसाध्वर्यवः॥ १६॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्ने षष्ठः पटलः।

उभये मध्यतःकारिणो होत्रकाश्चेत्यर्थः। सर्वेषां चमसिनां प्रतिपुरुषं पुरुषं पुरुषं प्रतीति प्रतिपुरुषं, प्रतिपुरुषमेकैकश्चमसाध्वर्युरेवमेकादश चमसाध्वर्यवो भवन्तीत्यर्थः। सदस्याभावपक्षे दशैव चमसाध्वर्यवो भवन्ति चमसस्यैवाभावात्। द्वाभ्यां हस्ताभ्यां चमसद्वयहोमस्य संभवात्पञ्चभिरेव चमसाध्वर्युभिः सदस्यपक्षे षड्भिरपि कार्यसंभवात्पञ्चषट्संख्याव्यावर्तनार्थं प्रतिपुरुषं चमसाध्वर्यव इति वचनम्। अस्ति चात्र शाखान्तरश्रुतिः—मा हौषीदेक एव द्वाभ्यां हस्ताभ्यां द्वौ चमसाविति। जैमिनिरपि उत्पत्तौ तु बहुत्वश्रुतेरिति, दशत्वं लिङ्गदर्शनादिति सूत्राभ्याममुमर्थमाह। अर्थस्त्वग्रे वक्ष्यते।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्रश्नस्य षष्ठः पटलः॥ ६॥

अथाऽष्टमप्रश्ने सप्तमः पटलः ।

उन्नीयमानेभ्योऽनुब्रूहि होतुश्चमसमनून्नयध्वमुभयतःशुक्रान्कुरुध्वमच्छावाकस्य चमसाध्वर्यो मा त्वमुन्नेष्ठाः प्रतिप्रस्थातः प्रोक्षिताप्रोक्षिताञ्छकलानुपकल्पयोन्नेतः सोमं प्रभावयेति संप्रेष्यति ।

उन्नीयमानेभ्योऽनुब्रूहीत्ययं प्रैषः प्रशास्तारं प्रत्येव । हौत्रशाखानुरोधात् । उन्नीयमानेभ्य इति चमसानां विशेषणम् । तादर्थ्ये चतुर्थी । उन्नीयमानेभ्य इति विशेषणादुन्नयननिमित्तकोऽयं प्रैषः । चमसोन्नयननिमित्तमुन्नीयमानसूक्तं ब्रूहीत्यर्थः । होतुश्चमसमनून्नयध्वं हे ब्रह्मादिचमसाध्वर्यव उन्नेतृसहायभूता होतृचमसमुन्नेतृसहायभूततदीयचमसाऽध्वर्युणोन्नीतमनु पश्चात्त्वं स्वं चमसमुन्नयध्वमित्यर्थः । ब्रह्मोद्गाता यजमानः सदस्यो मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टाऽऽग्नीध्र इत्येवं क्रमोऽत्र । उन्नयने विशेषमाह—उभयतःशुक्रान्कुरुध्वमिति । उभयत आद्यन्तयोः शुक्रो येषु त उभयतःशुक्रा एतादृशान्कुरुध्वमिति । शुक्रो द्रोणकलशस्थः सोमः । अच्छावाकस्याच्छावाकसंबन्धिचमसाध्वर्यो तच्चमसं त्वं मोन्नेष्ठाः । माङ्निषेधे । अच्छावाकचमसोन्नयनं मा कुर्वित्यर्थः । प्रोक्षितौ चाप्रोक्षितौ च प्रोक्षिताप्रोक्षितानेतादृशाञ्शकलान्यज्ञियवृक्षशकलान्पिधानोपयमनसमर्थानुप समीपे कल्पय । उन्नेतः सोमं प्रभावय प्रातःसवनपर्याप्तमेकधनामिश्रणेन कुर्विति प्रैषार्थः ।

होतृचमसमुख्यान्दश चमसानुन्नयत्यन्यानच्छावाकचमसात् ।

होतृचमसो मुख्यो येषां ते होतृचमसमुख्यास्तान् । होतृचमसमनून्नयध्वमित्यत्रत्यानुशब्दार्थोऽनेन प्रदर्शितो भवति । होतृचमसं प्रथममुन्नीयानन्तरमितरान्दश चमसानुन्नयति सर्वत्रेत्यर्थः । दशेति सदस्यपक्षे । अत्र दशेत्यनेन परिसंख्यानात्कस्य चमसस्योन्नयनं वर्जनीयमित्याकाङ्क्षायामन्यानच्छावाकचमसादिति । अच्छावाकचमसादन्यानुन्नयति प्रातःसवनेच्छावाकचमसं नोन्नयतीत्यर्थः । अच्छावाकस्य चमसाध्वर्यो मा त्वमुन्नेष्ठा इत्यस्यार्थोऽनेन दर्शितो भवति ।

परिप्लवयोन्नेता द्रोणकलशादुपस्तीर्य पूतभृत उन्नीय द्रोणकलशादभिघारयति ।

उभयतःशुक्रान्कुरुध्वमित्यस्यार्थोऽनेन दर्शितो भवति । आश्विनग्रहणवदुपस्तरणोन्नयनाभिघारणानीत्येव वक्तव्ये पुनः कृत्स्नं वचनं काण्डानुसमय एवात्र नियत इति-

ज्ञापनार्थम् । परिप्लवयेति वचनमुदञ्चनव्यावृत्त्यर्थम् । नचात्र द्रोणकलशग्रहणं व्यर्थम् । आधवनीयमानस्योत्तानवचनसमकालिकसर्वचमसोपस्तरणाभिघारणोत्तरमपि पूतभृत्यवनयनकाल आधवनीयस्यास्तीतिज्ञापनार्थत्वेन सार्थक्यात् । ननु होतुश्चमसमनूनयध्वमितिबहुवचनबोधितचमसाध्वर्युकर्तृकत्वकेवलोन्नेतृकर्तृकत्वयोः परस्परं विरोध इति चेत्सत्यम् । चमसाध्वर्यूणां सहायत्वमादायैव बहुवचननोपपत्तेः । चमसोन्नयनानन्तरं प्रतिप्रस्थाता प्रोक्षिताप्रोक्षिताञ्छकलानुपकल्पयति । केवलेन हस्तेनैव प्रोक्षणं पवित्रकरणावचनात् । तच्चोत्तानेन हस्तेन ।

उत्तानेन तु हस्तेन कर्तव्यं प्रोक्षणं भवेत् । इति स्मृतेः ।

सर्वचमसानामेष कल्पः ।

सर्वेषां चमसानामेष एवोन्नयनकल्प इत्यर्थः ।

प्रस्थितेष्वेवोन्नीयमाने सूक्ते तस्मिन्प-
रिहिते सावित्रेण ग्रहावाददाते ।

प्रस्थानं नामोत्तरवेद्यां सादनम् । उक्तं च बौधायनेन—समुन्नीयोत्तरवेद्यां सादयतीति । प्रस्थिते[ष्वे]वोन्नीयमाने सूक्त इत्यनन्तरं समापिते सतीति शेषः । अथ वा द्वितीयार्थे सप्तमी । छान्दसत्वात् । तथा चायमर्थो भवति—प्रस्थितेषु सोमेषु सत्स्वेवोन्नीयमानं सूक्तं समापयतीत्यर्थः । समापयतीत्यध्याहार्यं पदमन्वयसिद्धये । उन्नयनमारभ्य यावत्सादनं सूक्तस्य यथा समाप्तिर्भवति तथा प्रशास्त्रा सूक्तं वक्तव्यमिति । तस्मिन्परिहित इति वचनं परिधानोत्तरमेव ग्रहयोरादानं न तु परिधानसमकालमित्येतदर्थम् । तस्मिन्निति तच्छब्देनोन्नीयमानं सूक्तं परामृश्यते । सावित्रो देवस्य त्वेति आदानकरणत्वाददद इत्यन्तो मन्त्रः । ग्रहौ शुक्रामन्थिनौ । आददाते इति द्विवचनम् । अध्वर्युप्रतिप्रस्थातारावितिशेषः ।

कथमित्याकाङ्क्षायामाह—

शुक्रमध्वर्युर्मन्थिनं प्रतिप्रस्थाता ।

स्पष्टम् ।

आददते चमसाꣳश्चमसाध्वर्यवः ।

उत्तरवेद्यां सादितांश्चमसांश्चमसाध्वर्यव आददत इत्यर्थः ।

प्रोक्षिताभ्याꣳ शकलाभ्याꣳ शुक्रामन्थिनावपिधत्तोऽ-
पनुत्तौ शण्डामर्कौ सह तेन यं द्विष्म इत्यप्रोक्षिताभ्या-
मधस्तात्पाꣳसुनपध्वꣳसयतस्ताभ्यां चैवोपयच्छतः ।

प्रोक्षितौ शकलौ द्वावेव । अप्रोक्षितावपि द्वावेव । अन्यथा प्रैषे प्रोक्षिताप्रोक्षिता-

---

१ ख. नसूक्तानं ।

नित्यस्मिन्नसमस्ते पदे बहुत्वस्यापि संभावनायां द्विविधयोः शकलयोर्द्वित्वमेव नियतमि-त्येतादृशमर्थं प्रदर्शयितुमुपकल्पितशकलानां विनियोगं प्रदर्शयितुं च प्रोक्षिताभ्यामिति वचनम्। शकलवचनमसंदेहार्थम्। शुक्रामन्थिनौ ग्रहौ। अपिधत्त इत्यनेन शकलयो-रपिधानयोग्ययोरुपकल्पनं द्योत्यते। अप्रोक्षिताभ्यामितिवचनप्रयोजनं प्रोक्षितवचनव-ज्ज्ञेयम्। अपनुत्तौ शण्डामर्कौ सह तेन यं द्विष्म इत्येष एव मन्त्रः प्रतिप्रस्थातुरपि। अप्रोक्षिताभ्यां शकलाभ्यां पात्राधस्ताद्भागगतान्पांसूनपध्वंसयतोऽपगमयतः। अध्वर्यु-प्रतिप्रस्थाताराविति शेषः सर्वत्रात्र द्विवचनेषु। ताभ्यामप्रोक्षिताभ्यामेवोपयच्छतः। उपयमनं शुक्रामन्थिपात्रयोः कुरुतः। चकारो मन्त्रानुवृत्त्यर्थः। अथवाऽयमर्थः—ताभ्यां प्रोक्षिताभ्यामुपयच्छतः। चकारो हस्तसमुच्चयार्थ इति। अस्ति चापिगृह्य प्राञ्चौ निष्क्रामत इत्यस्यां श्रुतौ ग्रहधातुर्लिङ्गम्। तथा च दक्षिणेन हस्तेनोपरिष्टाद्वामेनाधस्तादित्येवं परिगृह्य प्राञ्चौ प्राङ्मुखौ निष्क्रामत इत्यर्थः सिद्धो भवति। अस्मिन्मन्त्रे सामान्यरू-पेणैव द्वेष्यस्य निर्देशो न नाम्ना। अदःशब्दाभावात्। अपनुत्तौ प्रतिहतौ।

स्तुतोऽसि जनधा देवास्त्वा शुक्रपाः प्रणयन्त्विति शुक्रमध्वर्युर्हरति स्तुतोऽसि जनधा देवास्त्वा मन्थिपाः प्रणयन्त्विति मन्थिनं प्रतिप्रस्थाता।

हविर्धानद्वयाग्रभागं प्रति हरणं संप्रधानस्य तत्रैव करिष्यमाणत्वात्। मन्त्रभेदा-त्पृथङ्निर्देशः।

तावादानावेके समामनन्त्युर्वन्तरिक्षमिति गच्छतः।

तौ स्तुतोऽसि जनधा इति मन्त्रावादानावादानक्रियार्थाविति एके शाखिनः समामनन्ति वदन्तीत्यर्थः। अस्मिन्पक्षे सावित्रस्य निवृत्तिः। आहरणमन्त्रोऽस्मिन्पक्षे उर्वन्तरिक्ष-मिति। गच्छतः शुक्रामन्थिभ्यां सह गच्छत इत्यर्थः। प्रसिद्धत्वादन्विहीति मन्त्रान्तः। आपस्तम्बोऽपि स्पष्टमाह—उर्वन्तरिक्षमन्विहीत्यभिप्रव्रजत इति।

आयुः संधत्तं तं मे जिन्वतं प्राणꣳ संधत्तं तं मे जिन्वतमपानꣳ संधत्तं तं मे जिन्वतं व्यानꣳ संधत्तं तं मे जिन्वतं चक्षुः संधत्तं तन्मे जिन्वतꣳ श्रोत्रꣳ संधत्तं तन्मे जिन्वतं मनः संधत्तं तन्मे जिन्वतं वाचꣳ संधत्तं तां मे जिन्वतमित्यग्रेण हविर्धाने अरत्नी पात्रे वा संधत्तः।

अग्रेण हविर्धाने हविर्धानयोरग्रतः समीप इत्यर्थः। हविर्धानशब्दस्य द्विवचनान्त-त्वेन शकटे एव गृह्येते न तु मण्डपः। दक्षिणहविर्धानाग्रतः समीपेऽध्वर्युरुत्तरहवि-र्धानाग्रतः समीपे प्रतिप्रस्थाता स्थित्वाऽरत्नी पात्रे वोभौ संधत्तो योजयतः संश्लेषयत इत्यर्थः। अरत्नी हस्तौ पात्रे शुक्रामन्थिनोः। ब्रह्म संधत्तमित्येतेन ब्राह्मणोक्तेनायं विकल्पते।

अनाधृष्टाऽसीत्यङ्गुष्ठाभ्यामुत्तरवेदिमाक्रमेते ।

अङ्गुष्ठावत्र पादयोरेव । आक्रमणक्रियासाहचर्यात् । तावानेव मन्त्रः । व्यत्ययेनाऽऽत्मनेपदम् । अर्थादेवोत्तरवेदिं प्रति गमनसिद्धिः ।

तां विपरिहन्तौ विपरिक्रामतः ।

तामुत्तरवेदिं विपरिहन्तौ विपीडयन्तौ विलिखन्ताविति यावत् । विपरिहन्ताविति आर्षः शब्दः । विशेषेण परितोऽर्थादुत्तरवेदेर्विलिखन्तावङ्गुष्ठाभ्याम् । एतादृशावुभावुत्तरवेदिं विपरिक्रामतः । विशेषोऽत्र सांतत्यरूपः । विपरिक्रमणमुत्तरवेदेः सकाशादवतरणम् ।

सुवीराः प्रजाः प्रजनयन्परीहि शुक्रः शुक्रशोचिषेति दक्षिणेनाध्वर्युर्हरति सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेत्युत्तरेण प्रतिप्रस्थाता ।

दक्षिणेनोत्तरेणेत्यत्रोत्तरवेदिमिति पूर्वसूत्रादनुवर्तते ।

जिन्वेथा१ सुपथ्या पथ्वा वीतमिति यजमानोऽनुयन्त्रयतेऽग्रेणाऽऽहवनीयम् ।

ग्रहावित्येव शेषः । प्रकरणाद्द्विवचनलिङ्गाच्च । अवसरख्यापनार्थमत्र याजमानविधानम् । अग्रेणाऽऽहवनीयमिति यजमानपरमेव । अन्यथा पुरस्तात्पदवैयर्थ्यापत्तेः ।

अभितो यूपं पुरस्तात्प्रत्यञ्चाववतिष्ठेते ।

पुरस्तादित्यत्र यूपस्य संनिहितत्वात्तस्यैव वचनविपरिणामेनान्वयः । आहवनीयस्यान्वये पुरस्तात्पदवैयर्थ्यतादवस्थ्यापत्तेः । प्रत्यञ्चौ प्रत्यङ्मुखाववतिष्ठेते अवनतौ किंचित्प्रह्वाविव तिष्ठेते इत्यर्थः ।

पश्चात्प्राञ्चश्चमसाध्वर्यवः ।

पश्चादित्यत्रोत्तरवेदेरिति शेषः । सामर्थ्यात्प्राञ्चः प्राङ्मुखाः । केषांचिदुदङ्गानि वेतिसूत्रादुदङ्मुखताऽपि कदाचित्स्यात्तां वारयितुं प्राञ्च इति । अवतिष्ठन्त इति शेषः । परिभाषयोदक्संस्थतयाऽवस्थानमेतेषाम् ।

संजग्मानौ दिव आ पृथिव्याः शुक्रः शुक्रशोचिषेत्यध्वर्युः संजग्मानौ दिव आ पृथिव्या मन्थी मन्थिशोचिषेति प्रतिप्रस्थाताऽरत्नी पात्रे वा संधत्तः ॥ १७ ॥

ब्राह्मणोक्तौ विसर्गरहितौ संजग्मानौ दिव आ पृथिव्येत्येतदन्तावेव मन्त्रावनैताभ्यां विकल्पेते । अर्थः स्पष्टः ।

---

१ ख. 'त' एता' ।

आयुः स्थ आयुर्मे धत्तमायुर्यज्ञाय धत्तमायु-
र्यज्ञपतये धत्तं प्राणः स्थः प्राणं मे धत्तं प्राणं
यज्ञाय धत्तं प्राणं यज्ञपतये धत्तं चक्षुः
स्थश्चक्षुर्मे धत्तं चक्षुर्यज्ञाय धत्तं चक्षुर्यज्ञपतये
धत्तꣳ श्रोत्रꣳ स्थः श्रोत्रं मे धत्तꣳ श्रोत्रं
यज्ञाय धत्तꣳ श्रोत्रं यज्ञपतये धत्तं तौ देवौ
शुक्रामन्थिनौ कल्पयतं दैवीर्विशः कल्पयतं
मानुषीरिषमूर्जमस्मासु धत्तं प्राणान्पशुषु
प्रजां मयि च यजमाने चेत्यभिमन्त्रयेते ।

तौ देवौ शुक्रामन्थिनाविति लिङ्गाद्ग्रहयोरेवाभिमन्त्रणं नारत्न्योः । तेनारत्निसंधाने ऽप्यभिमन्त्रणं ग्रहयोरेव ।

प्रोक्षितौ शकलावभ्याधत्तः शुक्रस्याधिष्ठान
मसि शुक्रैषा ते समित्तया समिध्यस्वे-
त्यध्वर्युर्मन्थिनोऽधिष्ठानमसि मन्थिन्नेषा
ते समित्तया समिध्यस्वेति प्रतिप्रस्थाता ।

जुहोतिचोदनाभावान्नात्र स्वाहाकारत्यागौ । मन्त्रे समिच्छब्द इन्धनमात्रवाची तेया त्वमग्ने समिधा समिध्यस इति मन्त्रगत समिच्छब्दवत् । तथा च नोहो न मन्त्रलोपः । शकलाभ्याधानमन्त्रयोः शुक्रस्य समिदसि मन्थिनः समिदसीतिब्राह्मणोक्तमन्त्राभ्यां विकल्पेते ।

निरस्तः शण्डो निरस्तो मर्कोऽपनुत्तौ
शण्डामर्कौ सह तेन यं द्विष्म इत्यप्रोक्षितौ
बहिर्वेदि निरस्यतोऽप उपस्पृश्य ।

निरस्तः शण्डः, निरस्तो मर्कः, अपनुत्तौ शण्डामर्कौ सहामुनेतिब्राह्मणोक्तेन विकल्पते । ब्राह्मणोक्तमन्त्रेऽमुनेत्यस्य स्थाने तृतीयान्तं द्वेष्यनाम्नो ग्रहणम् । वेदेर्महावेदेर्वाबहिरिति बहिर्वेदि उत्तरस्यां दिशि अप्रोक्षितौ शकलौ निरस्यतः । अप उपस्पृश्येत्यनन्तरं तिष्ठत इत्यध्याहार्यम् । अयत्रोपस्पृश्येत्यनेनापूर्वमन्यदुपस्पर्शनं विधीयते । छेदनभेदननिरासात्माभिमर्शनेष्वप उपस्पृशेदितिस्मृतितः सिद्धमेवोपस्पर्शनम् । इदं तु निरसननिमित्तकमत्र विधीयते । तेनाध्वर्योरेकं स्मृतिसिद्धं कर्माङ्गत्वेनान्यदिति । तथा च समानकर्तृकत्वानुपपत्तिरपि परिहृता भवति । अप उपस्पृश्य ।

१ ख. °समिधा° । २ ख. यथा । ग. त्वया ।

प्रातः प्रातःसावस्य शुक्रवतो मन्थिवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्य मध्यतः—कारिणां चमसाध्वर्यवो वषट्कृतानुवषट्कृताञ्जुहुत होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा शुक्रस्याभ्युन्नीयोपावर्तध्वामिति संप्रेष्यति।

प्रत्याश्रावणोत्तरमयमुदकस्पर्शः। एकवचनादेकेनैव प्रैषो वक्तव्यः स चाध्वर्युणैवातत्राध्वर्युराश्राव्य प्रत्याश्राविते ऽमुष्मै प्रेष्येति मैत्रावरुणं प्रेष्यतीतिपरिभाषासूत्रात्। अहं चमसं धाऽऽद्यायाऽऽश्रावयति यथा दर्शपूर्णमासयोराग्नीध्रागारे दक्षिणामुखस्तिष्ठन्नाग्नीध्रः स्फ्यं धारयन्प्रत्याश्रावयति तद्व्याख्यातमितिसूत्रादाश्रावणप्रत्याश्रावणे सर्वत्र। हे प्रशास्तः प्रातः प्रातरेव प्रातःसावस्य प्रातःसंबन्धिनः शुक्रग्रहो मन्थिग्रहश्च येषां ते मधु क्षरन्तीति मधुश्चुतः। एवंभूतानिन्द्रायेन्द्रार्थं सोमान्प्रस्थितानुन्नयनदेशाद्धविर्धानादुत्तरवेदिं प्रतिप्राप्तान्याज्यया यागे विनियोक्तुं होतारं प्रेष्येत्यर्थः। एवं चोत्तरवेदिं प्रापितेषु चमसेषु मैत्रावरुणः प्रैषं वदेदिति सिद्धं भवति। अमुष्मै प्रेष्येति मैत्रावरुणं प्रेष्यतीति सूत्रान्मैत्रावरुणं प्रत्येव प्रैषः। पश्चान्मैत्रावरुणो होतारं याज्यां वक्तुं प्रेरयति। स होतारं चोदयतीति सूत्रात्। चोदनं प्रेरणम्। एवं सर्वत्र सामान्यतो ज्ञेयम्। मध्यतःकारिणो होतृब्रह्मोद्गातृयजमानसदस्यास्तेषां चमसाध्वर्यवो वषट्कारानुवषट्कारयोर्जुहुत मैत्रावरुणादय आग्नीध्रान्ता होत्रकशब्दवाच्यास्तेषां चमसाध्वर्यवः प्रथमवषट्कार एव हुत्वा शुक्रो द्रोणकलशस्थः सोमस्तस्मादेकदेशं स्वल्पं होत्रकचमसेष्वभि आभिमुख्येनोन्नीयाऽऽनीयोप समीपमपि आवर्तध्वमागच्छध्वमिति संप्रैषार्थः।

वषट्कृते सर्वे युगपज्जुह्वति।

सर्वेऽध्वर्युप्रतिप्रस्थातारौ मध्यतःकारिचमसाध्वर्यवो होत्रकचमसाध्वर्यवश्च युगपत्सहैव वषट्कृते होत्रा वषट्कृते सति जुह्वतीत्यर्थः।

स प्रथमः संकृतिर्विश्वकर्मा स प्रथमो मित्रो वरुणो अग्निः। स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमाजुहोमि स्वाहेत्यध्वर्युस्तस्मै मित्राय सुतमाजुहोमि स्वाहेति प्रतिप्रस्थाता।

मित्रायेति शाखान्तरीयः पाठः। पारक्षुद्र एव वोभयोरपि[1]। मन्थिहोमे यद्यपि मित्रसंबन्धोऽवगम्यते तथाऽपि तौ देवा अपनुद्याऽऽत्मन इन्द्रायाजुहवुरिति वाक्यशेषाद्याज्याया इन्द्रलिङ्गत्वादिन्द्राय सोमान्प्रस्थितान्प्रेष्येति प्रैष इन्द्रदेवतार्थत्वावगमा-

---

१ ख. 'प तस्स°।

श्चेन्द्र एव देवता भवति । मित्र इतीन्द्रस्यैव विशेषणम् । देवानामधिपत्वेन मित्रत्वात् । तथा चात्र गुणविशिष्टस्येन्द्रस्यैव देवतात्वम् । तेनात्र मित्रायेन्द्रायेदमिति मन्त्रगतदेवतोद्देशेन त्यागो भवति । विशिष्टस्य देवतात्वेऽपि विशिष्टं शुद्धानतिरिक्तमितिपक्षमनुसृत्यैव विशेष्यस्येन्द्रस्य देवतात्वानपायेनं न तौ देवा अपनुद्याऽऽत्मन इन्द्रायाजुहवुरितिवाक्यशेषेणेन्द्रलिङ्गकयाज्ययेन्द्राय सोमान्प्रस्थितान्प्रेष्येतिप्रैषेण च विरोधः । शुक्रामन्थिनोर्याज्यावतोरपि वचनान्मन्त्रवद्धोमौ । तथा चाऽऽपस्तम्बः—शुक्रामन्थिनोः प्रतिनिगद्य होम इति । शुक्रामन्थिनोर्याज्यावतोरपि मन्त्रवद्धोम इत्यर्थः । वषट्कारोस्तीति कृत्वा न कुर्युरपि स्वाहाकारमिति शङ्कानिवृत्तये स्वाहाकारपाठः । वषट्कारस्वाहाकारयोर्यथा समकालता भवति तथा मन्त्रपाठः ।

सानुवषट्कारावेके समामनन्त्यननुवषट्कारावेकेऽन्यतरꣳ सानुवषट्कारमेके ।

वषट्कृते जुहुतः पुनर्वषट्कृते जुहुत इत्येतेनैवोभयोः सानुवषट्कारत्वे सिद्धे सानुवषट्कारावेके समामनन्तीति पुनर्वचनं बह्वाचार्यसंमतोऽयमेव पक्ष इतिप्रदर्शनार्थम् । अननुवषट्कारावनुवषट्काररहितावुभावपीत्येक आचार्याः । अन्यतरं शुक्रामन्थिनोरन्यतरमेव ग्रहमनुवषट्कारसहितमेक आचार्याः । एवं च पक्षत्रयमेव सिद्धं भवति ।

उत्तरतःपुरस्ताद्बहिष्परिध्याहवनीयादङ्गारं निर्वर्त्यैष ते रुद्र भाग इति तस्मिन्नेतं मन्थिनः सꣳस्रावं प्रतिप्रस्थाता सर्वहुतं जुहोति ।

उत्तरत.पुरस्तादी(दै)शान्यां दिशि । रुद्रसंबन्धित्वात् । रुद्रस्येशानदिगधिपतित्वादिति भावः । बहिष्परिध्यन्तर्वेद्येवाङ्गारनिर्वर्तनम् । स्पष्टमेतत्सूत्रान्तरे—बहिष्परिध्यन्तर्वेद्याहवनीयादङ्गारं निरू(रु)ह्य तस्मिन्नेष ते रुद्र भाग इति प्रतिप्रस्थाता मन्थिनः संस्रावं सर्वहुतं जुहोतीति । आहवनीयादित्यपादाने पञ्चमी । अङ्गार आहुतिधारणसमर्थोऽर्थाद्यथा घटमानयेति सामान्यत उक्तेऽच्छिद्र एव घट आनीयते तथेति द्रष्टव्यम् । निर्वर्त्य निरू(रु)ह्य । बहिष्परिधीति परिधिसमभिव्याहाराद्धोमसंबन्धित्वाच्चाऽऽहवनीयस्य ग्रहणे सिद्ध आहवनीयवचनं यत्र मन्थिनो होमः कृतस्तत्समीपस्थ एवाङ्गारो ग्राह्य इत्यर्थविशेषज्ञापनार्थम् । तस्मिन्निरूढेऽङ्गारे । तस्मिन्निति वचनमाहुतिधारणसमर्थत्वद्योतनार्थम्, अथ वाऽदृष्टार्थमङ्गारनिरूहणं होमस्त्वाहवनीय एवेतिशङ्काव्यावृत्त्यर्थम् । एतमितिवचनमवशेषितस्य कृत्स्नस्यैव संप्रत्ययार्थम् । तथा चावशेषितस्यैकदेशनाशे नायं होम इति सिद्धं भवति । मन्थिग्रहणं शुक्रव्यावृत्त्यर्थम् । सूदवच्छुक्रपात्रꣳसादयतीति वचनादेव शुक्रसंस्रावहोमव्यावृत्तौ सत्यां मन्थिग्रहणं किमर्थमिति चेत् । न । तस्य पक्षान्तरत्वेनोपपत्तिसंभवेनात्र सर्वहोमोऽपि संभाव्येत तं वारयितुं मन्थि-

ग्रहणस्याऽऽवश्यकत्वात् । संस्राव्य संस्राव्येति संस्रावम् । णमुलन्तमिदम् । प्रतिप्रस्थातृग्रहणमध्वर्युव्यावृत्तये । सर्वहुतमितिवचनं बिन्दुमात्रमपि यथा नावशिष्टं भवति तथा सर्वस्य होमः कर्तव्य इत्येतदर्थम् । सर्वः सोमो हुतो यस्यां क्रियायां यथा भवति तथेति क्रियाविशेषणम् । जुहोतिचोदितत्वात्स्वाहाकारः । सोमस्यापूर्वत्वान्न दर्विहोमधर्माः । प्रतिपत्तिकर्मैतत् । होमस्य रुद्रदेवत्यत्वादुदकस्पर्शः । रुद्रदेवत्यत्वमेष ते रुद्र भाग इति मन्त्रवर्णात् । न तत्र रुद्रः पशूनभिमन्यत इति ब्राह्मणाच्च । आपस्तम्बोऽत्र विशेषमाह—आर्तपात्रमेतद्यन्मन्थिपात्रं यमृत्विजां द्विष्यात्तस्मै हरेदार्छतीहैवेति विज्ञायत इति । आर्तिकरमेतत्पात्रमतो न तानृत्विजां सकाशं नयेदायतन एव सादयेदिति भावः । ब्राह्मणेऽपि—ब्रह्मवादिनो वदन्ति कस्मात्सत्यान्मन्थिपात्रꣳ सदो नाश्नुत इत्यार्तपात्रꣳ हीति ब्रूयाद्यदश्नुवीतान्धोऽध्वर्युः स्यादार्तिमार्छेत्तस्मान्नाश्नुत इति ।

मध्यतःकारिणां चमसाध्वर्यवोऽनुवषट्कृते जुह्वति ।

स्पष्टम् ।

प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातुः प्र
यजमानस्य प्र सदस्यस्येति संप्रेष्यति ।

प्रैतु प्रकर्षेण गच्छत्वित्यर्थः । तत्तद्धोमानन्तर्यमेव गमने प्रकर्षः । उद्गातृचमसे प्रस्तोतृप्रतिहर्त्रोः संबन्धेऽपि जैमिनिमते सुब्रह्मण्यसंबन्धेऽपि उद्गातुरेव मुख्यत्वादेकवचनम् । सदस्यपक्षे प्रसदस्यस्येति । प्रब्रह्मण इत्यादिषु प्रशब्दोत्तरमैतु इत्यस्यान्वयः । ब्रह्मण इत्याद्यनन्तरं चमसशब्दस्यान्वयः । तथा चायमर्थो निष्पन्नो भवति—प्रैतु ब्रह्मणश्चमसः प्रैतूद्गातुश्चमसः प्रैतु यजमानस्य चमसः प्रैतु सदस्यस्य चमस इति । प्रैषपाठस्तु यथापठित एव ।

प्रैषार्थं विवृणोति—

सदो भक्षान्हरन्ति ।

सद इति द्वितीयैकवचनम् । सदः प्रति होत्रादिसदस्यान्तचमसस्थाः सोमा भक्षास्तान्हरन्ति चमसाध्वर्यव इत्यर्थः ।

सूदवच्छुक्रपात्रꣳ सादयति ।

सूदशब्दः शेषवाची, तद्वच्छुक्रग्रहस्य पात्रं सादयति । अध्वर्युरेवेति शेषः । शुक्रपात्रस्याध्वर्युसंबन्धित्वात् । आयतन एव । तथा चाऽऽपस्तम्बः—सूदवच्छुक्रपात्रमायतने सादयित्वेति ।

होत्रकाणां चमसाध्वर्यवः सकृत्सकृ-
द्धुत्वा शुक्रस्याभ्युन्नीयोपावर्तन्ते ।

मैत्रावरुणादीनां होत्रकाणां चमसाध्वर्यवः स्वं स्वं चमसं सकृत्सकृदेव हुत्वा

शुक्रो द्रोणकलशस्थः सोमस्तस्यैकदेशं स्वल्पं स्वल्पमाभिमुख्येन स्वे स्वे चमस आनी- याध्वर्युसमीपमागच्छन्तीत्यर्थः ।

तैरध्वर्युः प्रचरति ।

तैः पुनरभ्युन्नीतैः । चमससंबन्धि यद्यत्कार्यं तत्तेषां चमसाध्वर्युसंज्ञया प्राप्तं तद्वा- रणार्थमध्वर्युग्रहणम् । अध्वर्युशब्दस्य तेषु गौणत्वान्मुख्यासंभव एव तेषां कर्तृत्व- मिति भावः । अयमर्थ उक्तो जैमिनिनाऽपि चमसांश्चमसाध्वर्यवः समाख्यानादिति सूत्रेण ।

मैत्रावरुणचमसमादाय प्रशास्तर्यजेति संप्रे- ष्यति वषट्कृतानुवषट्कृते हुत्वा चमसाध्व- र्यवे प्रयच्छति सदो भक्षं हरति ।

अत्र चमसमन्वारभ्याऽऽश्रावणम् । प्रत्याश्राविते तमादाय प्रैष इति विशेषोऽत्र । चमसाध्वर्यवे प्रयच्छतीतिविधानादेवार्थादध्वर्योरत्र कर्तृतायां सिद्धायां पूर्वत्राध्वर्युवचनं मैत्रावरुणचमसाध्वर्युर्होमं कृत्वाऽन्यस्मै यस्मै कस्मै चमसाध्वर्यवे प्रयच्छतीत्ययमप्यर्थः संभाव्येत तं व्यावर्तयितुम् ।

एवमुत्तरैः प्रचरति ॥ १८ ॥

एवमित्यनेन तं तं चमसमन्वारभ्याऽऽश्रावणं प्रत्याश्राविते तं तमादाय प्रैषो वषट्- कारानुवषट्कारयोर्होमश्चमसाध्वर्यवे तस्य तस्य प्रदानं तस्य सदः प्रति हरणं चातिदिश्यते ।

तत्र प्रैषेषु विशेषमाह—

ब्रह्मन्यजेति ब्राह्मणाच्छंसिनं पोतर्यजेति पोतारं नेष्टर्यजेति नेष्टारमग्नीद्यजेत्याग्नीध्रम् ।

मैत्रावरुण यज, ब्राह्मणाच्छंसिन्यज, आग्नीध्र यजेत्येवं रूपाः प्रैषा अपि संभा- वितास्ते व्यावृत्ता भवन्ति । पोतर्यज नेष्टर्यजेत्यनयोः क्रमप्राप्तत्वाद्ग्रहणम् । अर्थः स्पष्टः । संप्रेष्यतीति शेषः सर्वत्र ।

तस्य चमसमादाय सदो गच्छति स होतुराचष्टेऽयाडग्नीदिति ।

तस्याऽऽग्नीध्रस्य । तस्य चमसमादायेतिवचनं स्वयंहरणार्थम् । सः, अध्वर्युः । तच्छ- ब्दश्चमसहस्तस्याध्वर्योः परामर्शाय । तेन प्रश्नोत्तरयोर्जातयोरेवाऽऽग्नीध्रचमसनिधानं नतु तत्पूर्वमिति सिद्धं भवति होतृग्रहणं कं प्रत्याख्यानमितिसंशयनिवृत्त्यर्थम् । षष्ठी- निर्देशः प्रश्नापेक्षतां गमयति । तेन होत्रा पृष्टः सन्नेवायाडग्नीदिति आचष्टे प्रश्नोत्तरं ब्रूयादिति अर्थः सिद्धो भवति । अयाडिष्टवानग्नीदाग्नीध्र इति वाक्यार्थः ।

---

१ ख. ङ ज. ड. म. कृत° हु° ।

स भद्रमकर्यो नः सोमं पाययिष्यतीति होता प्रत्याह ।

इदं याजुषहौत्रपरम् । भक्षप्रसङ्गादादौ तदुपयोगिनीं परिभाषामाह—

होमाभिषवाभ्यामध्वर्योर्भक्षो वषट्काराच्च
वषट्कर्तृणा२ समाख्यानाच्चमसिनाम् ।

अनेन भक्षनिमित्तान्युच्यन्ते । होमाभिषवाभ्यां समुच्चिताभ्यां भक्षोऽध्वर्योः । अध्वर्युग्रहणं प्रदर्शनार्थम् । तेन प्रतिप्रस्थात्रादीनामपि होमाभिषवाभ्यां समुच्चिताभ्यामेव भक्षणम् । ननु होमाभिषवाभ्यां च भक्षो नान्यतरेण कर्मणेत्येतावतैव सिद्धेऽत्र वचनं दूरत्वात्तत्परमेव समुच्चितयोर्होमाभिषवयोर्निमित्तत्वमत्र तु न स्यादिति शङ्का स्यात्तन्निवृत्त्यर्थम् । एवं चमसा येषां सन्ति ते चमसिनस्ते[षां] समाख्यानात् , होतृचमसो ब्रह्मचमस उद्गातृचमसो यजमानचमसः सदस्यचमसः प्रशास्तृचमसो ब्राह्मणाच्छंसिचमसः पोतृचमसो नेष्टृचमसोऽच्छावाकचमस आग्नीध्रचमस इति यत्तत्चमसाख्यानं कपिञ्जलचमसशब्दवत्तन्निमित्तकश्चमसिभक्ष इति । एतदेवास्य ब्रह्मचमसत्वं यच्चम्यतेऽस्मिन्सोमो ब्रह्मणेतिसंबन्धान्तरानपगमात् । यथोक्तं सूत्रान्तरे—का च तच्चमसिता स्यान्न चान्यः संबन्ध इति । वषट्काराच्च वषट्कर्तृणामित्यत्र चकारोऽनुवषट्कारसंग्रहणार्थः । तेनानुवषट्कारोऽपि भक्षणे पृथङ्निमित्तम् । अनुवषट्कारस्यापि पृथग्भक्षणनिमित्तत्वमाश्वलायन आह—प्रतिवषट्कारं भक्षस्तूष्णीमुत्तरमिति ।

होमाभिषवकर्त्रोरध्वर्युप्रतिप्रस्थात्रोर्वषट्कारनिमित्तकभक्षणकर्तृवषट्कर्तृणां समाख्यानिमित्तकभक्षणकर्तृणां चमसिनां च भक्षणे क्रमविशेषमाह—

वषट्कर्ता पूर्वो भक्षयति ततोऽध्वर्युर्जघन्यश्चमसी ।

वषट्कारप्रवक्ता पूर्वः प्रथमो भक्षयति । ततस्तत्कर्तृकभक्षणानन्तरमध्वर्युः । अध्वर्युग्रहणं होमाभिषवकर्त्रुपलक्षणम् । जघने भवो जघन्यः, भक्षणे चमसी जघन्यो भवतीत्यर्थः । यत्रैकस्मिन्पात्रे वषट्कारादिनिमित्तसमवायाद्बहवो भक्षणसमवेतास्तेषु वषट्कर्ता पूर्वः प्रथमं भक्षयति नाध्वर्य्वादयः । वषट्कर्तुः प्रथमभक्ष इति श्रुतेः । तस्माद्वषट्कर्ता प्रथमः सर्वभक्षान्भक्षयतीति श्रुतेर्होतुश्चित्पूर्वे हविरद्य माऽशतेति लिङ्गाच्च । निमित्तक्रमादपि वषट्कर्तुरेव प्राथम्यम् । होमाद्वषट्कारस्य पूर्वभावित्वात् । न चाभिषवस्य वषट्कारतः पूर्वभावित्वादध्वर्युप्राथम्यं कुतो नास्तीति शङ्कनीयम् । तन्मात्रस्यानिमित्तत्वात् । सर्वान्ते तु समाख्याभक्षस्तस्य समाख्यानुमेयत्वेन भक्षान्तरतो दुर्बलत्वात् । होतृप्रशास्तृब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राणां स्वयं निषद्य यजत इत्यस्मिन्पक्षेऽध्वर्युप्रतिप्रस्थात्रोर्वषट्कारप्रयुक्तोऽस्ति भक्षः । यजमानस्य वषट्कारनिमित्तक एव । अतिग्राह्यहोमे प्रतिप्रस्थातृनेष्टृनेतॄणां होमाभिषवनिमित्तक एव ।

होतृप्रशास्तृब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राणां समाख्यानिमित्तकोऽपि । ब्रह्मो-द्गातृयजमानसदस्यानां तु समाख्यानिमित्तक एव । निमित्तान्तरस्याभावात् । हारि-योजने वचनान्निमित्ताभावेऽपि सर्वेषामेव भक्षः । ततोऽध्वर्युस्ततश्चमसीति लाघवा-याद्वक्तव्ये अथन्यशब्दग्रहणं होमाभिषवनिमित्तकाध्वर्युकर्तृकभक्षणानन्तरकाल एव समाख्यानिमित्तः स्वस्वचमसे भक्षो न तु अध्वर्युणा कृततत्तच्चमसभक्षानन्तरमेव तत्तच्च-मसिकर्तृकस्वस्वचमससंबन्धिसमाख्याभक्ष इतिज्ञापनार्थम् ।

होमयोर्वषट्कारव्यवाये भक्षव्यवाये वषट्कारयोश्च होमव्यवाये प्रतिशेषं प्रतिग्रहणं च भक्षः ।

होमयोर्मध्ये वषट्कारव्यवायो नाम होमसमकालं वषट्कारोच्चारणाभावः । भक्ष-व्यवायो भक्षकाले मन्त्रोच्चारणाभावः । वषट्कारयोर्मध्ये होमव्यवायो नाम वषट्कारो-च्चारणकाले होमाभावः । तत्रोभयत्राप्युभयोः शेषं शेषं प्रतीति प्रतिशेषम् । ग्रहणं ग्रहणं प्रतीति प्रतिग्रहणम् । चकारः प्रतिशेषमित्येतेन समुच्चयार्थः । होमयोर्वषट्का-रयोरित्युभयत्रापि द्विवचनं द्विदेवत्यहोमावसराभिप्रायम् । तेन बहुत्वेऽपीदं भवति । होमशब्देन याग एवोच्यते । वषट्कारसांनिध्यात् । व्यवायशब्दग्रहणान्नैमित्तिकमे-वेदं प्रतिशेषप्रतिग्रहणभक्षणम् ।

नानागृहीतयोश्च समवाये ।

अत्र चकारोऽप्यर्थकः । नानागृहीतयोः पृथक्पृथग्गृहीतयोर्ग्रहयोरेकस्मिन्काले गृहीतयोरपि होमयोर्वषट्कारव्यवाये भक्षव्यवाये वषट्कारयोश्च होमव्यवाये प्रतिशेषं प्रतिग्रहणं च भक्ष इत्ययं विधिर्भवतीत्यर्थः । यथा प्रतिनिग्राह्यद्विदेवत्यमरुत्वतीयादिषु । एतत्प्रदर्शयितुमेव प्रायश्चित्तप्रकरणं परित्यज्यात्र वचनं सांनिध्याद्विदेवत्यमात्रविष-यकम् ।

न वैश्यराजन्ययोः सोमभक्षणं विद्यते ।

अल्पाच्तरत्वाद्वैश्यशब्दस्य पूर्वनिपातः ।

राजन्यवैश्ययोः सोमभक्षणाभावे प्रकारान्तरमाह—

यद्यब्राह्मणः सोमं पिपासेन्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य यदन्याश्चमसानुन्नयत्यथैतं यजमानचमसमत उन्नयति यदन्याश्चमसाञ्जुहत्यथैतस्य दर्भतरुणेनोपहत्यान्तःप-रिध्याहवनीयादङ्गारं निर्वर्त्येदं त्वदसीति जुहोति यदन्याश्चमसान्भक्षयत्यथैतस्य चमसस्य यजमानो भक्षयति ।

यदि पिपासेदित्यनेन मुख्यः पक्षो भक्षणाभाव एव राजन्यवैश्ययोः । पानेच्छा

१ ख. °रमेकका° । २ ख. °भिर्व द्य° ।

चेत्तदाऽयं प्रकारः । पानानिच्छायां नेति स्वर्थात् । यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं बिभक्षयिषेदित्यापस्तम्बः । एतच्च सूत्रकारेण यजमानशब्देन सूचितमेव । अब्राह्मणो ब्राह्मणभिन्नः क्षत्रियो वैश्यो वा । यद्यपि अब्राह्मणः शूद्रोऽपि तथाऽपि तस्याध्ययने तद्विहितकर्मसु चाधिकाराभावादेव व्यावृत्तिः । अशूद्राणामदुष्टकर्मणामुपनयनमध्यायेथं फलवन्ति च कर्माणीति धर्मसूत्रे शूद्रव्यतिरिक्तानामेवाधिकारस्योक्त्या तस्माच्छूद्रो यज्ञेऽनवक्लृप्त इति श्रुतेश्च शूद्रस्य यागनिषेधात् । जैमिनिनाऽपि चातुर्वर्ण्यमविशेषादिति सूत्रेण निषेध उक्तः । निषादरथकारयोस्तु वचनादधिकारः । किमिति वचनं न कुर्यान्नास्ति वचनस्यातिभार इति । न्यग्रोधो वटस्तस्य स्तिभिन्यः फलानि अङ्कुरा वा तान्क्रयकाले क्रयधर्मेणाऽऽहृत्याऽऽप्यायनकाल आप्यायप्रणयनकाले प्रणीयोपावहरणकाल उपावहृत्य राजाभिषवोत्तरमभिषवधर्मेण सम्यगन्यस्मिन्नश्मनि अन्यस्मिन्नपरेऽन्यैर्ग्रावभिः पिष्ट्वा दधन्यालोऽव्य सोमवद्धन्यालोडितं सोमरसं तदर्थककलशेषु अन्येन दशापवित्रेण संपीड्य संभृत्योन्नयनकाले दधन्युन्मृष्टास्पात्रे संभृतात्सोमरसाद्यजमानचमसमुन्नीय वषट्कारे हुतेषु सर्वेषु चमसेषु सव्यहस्ते ग्रहं गृहीत्वाऽनन्तरमुन्नीतस्य चमसस्यैकदेशं दर्भतरुणेन गृहीत्वाऽन्तःपरिध्याहवनीयादुत्तरतो होमाय समर्थमङ्गारं निरू(रु)ह्याहं त्वदस्मि मदसि त्वमेतदित्यनेन मन्त्रेण जुहोति । लोककृज्जातवेद इति मन्त्रान्तः । कृत्स्नपाठाभावाद्वाक्यशः पठितनैवेयमाहुतिः । जुहोतिचोदितत्वात्स्वाहाकारो मन्त्रान्ते । जातवेदा अग्निर्देवता लिङ्गात् । भक्षणकाले सर्वैर्भक्षेषु भक्षितेषु अनन्तरं यजमानो भक्षयतीत्यर्थः । बाह्वृच्ये केषांचित्सोमधर्माणां प्रत्यक्षाम्नानात्कलशग्रावचर्मदशापवित्रादीनां पात्राणां चोक्तत्वाच्च सोमधर्माणां लाभः । तेन क्रयकाले क्रयधर्माः । ओहनं न भवति । एतस्य केवलादृष्टार्थत्वात् । आप्यायनकाल आप्यायनं तु भवत्येव । एतस्य दृष्टार्थत्वात् । प्रणयनोपावहरणयोरपि सांनिध्यावस्थानाभिषवानुकूलत्वरूपदृष्टार्थत्वादेते अपि भवत एव । अभिषवकालेऽभिषवधर्माश्च भवन्तीति याज्ञिकाः । मीमांसकास्तु—अभिषवादिसंस्कारा नैमित्तकस्यापि फलचमसस्य समानविधाना ज्योतिष्टोमापूर्वसाधनत्वाविशेषादिति प्राप्ते नित्यसंस्कारप्राप्यानित्यफलचमसद्वारत्वायोगान्नैमित्तिकस्य तत्कालेऽनुपस्थितत्वाच्च न समानविधानत्वम् । तथा च जैमिनिः—नैमित्तिकमतुल्यत्वादसमानविधानं स्यादिति,[इति]प्राहुः । यद्यदेत्यर्थः । तेन यस्मिंकाल इत्यर्थो भवति । यदाऽन्यांश्चमसानुन्नयतीति पाठस्तु सरल एव । एवमुत्तरयोरपि पाठद्वयं द्रष्टव्यम् । अथशब्द आनन्तर्यार्थः । तेन सर्वचमसोन्नयनानन्तरमेवोन्नयनं न स्वस्थाने न च तत्पूर्वमिति सिद्धं भवति । एतच्छब्देन फलचमसः परामृश्यते । नियमार्थोऽयं परामर्शः । फलरससंबन्धवान्यजमानचमसस्तमेवानन्तरमुन्नयति न नित्यं यजमानचमसमिति । अतोऽस्मात्फलरसात् । उत्तरयोरप्यैतच्छब्दयोरिदमेव प्रयोजनम् । तरुणशब्दोऽग्रवाची । दर्भतरुणाभ्यां प्रस्तरे-

स्यत्र तथैव प्रसिद्धेः । एकवचनादेक एव दर्भः । साहित्ये तृतीयेयम् । तथा चायमर्थो भवति—दर्भतरुणसहितेन दर्व्याकारपात्रेण जुहोतीति । अथवा तरुणशब्दो दार्ढ्यार्थकः । तेन दृढेन दर्भेणेत्यर्थो भवति । अस्मिन्पक्षे न दर्व्याकारं पात्रं होमसाधनं किं तु दृढदर्भ एव । अस्मिन्पक्षे होमे स्रावणमात्रम् । अथवा तरुणशब्दः स्तम्बवाची । तथा च दर्भस्तम्बेन जुहोतीत्यर्थो भवति । अस्मिन्पक्षेऽपि स्रावणमात्रमेव । यत्र यत्र वषट्कृते यागस्तत्र तत्र तत्स्थान इयमाहुतिः । कम्पने तु नेयमाहुतिः किंतु कम्पनमेव । एतस्येति षष्ठी सशेषनाराशंसमात्राभिप्रायिका द्रष्टव्या । तेन यत्र सोमस्य सर्वभक्षणमितरेषां तत्रैतस्यापि सर्वभक्षणमेव । तत्र सोमलिङ्गानां मन्त्राणामूहः प्रकृतावपि नित्यविकारत्वात् । नैमित्तिकानामनूहो बाह्वृच्ये यदत्र शिष्टमित्यादिभिः सोमलिङ्गकैर्मन्त्रैर्भक्षणादिविधानात् । परोक्षमिव वा एष सोमो राजा यन्न्यग्रोध इति सोमशब्देन वटरसस्य स्तवनाच्च ।

द्विदेवत्यान्भक्षयन्ति ।

प्रकृतप्रयोगाधिकारार्थमिदं सूत्रम् ।

बहुवचनग्राह्याः क इत्याकाङ्क्षायामाह—

होताऽध्वर्युः प्रतिप्रस्थाता च ।

प्रतिप्रस्थातुः संपातद्वारकः संबन्ध इति भावः ।

क्रमं प्रदर्शयितुमाह—

एवमनुपूर्वाः ।

एवमेवानुपूर्वः क्रमो यत्र त एवमनुपूर्वाः । अयमेव क्रमः सार्वत्रिको भवति नत्वेतदर्थ एवेति परिभाषैवेयम् । उपह्वाने भक्षणे चायमेव क्रमः सर्वत्रेत्यर्थः ।

अन्योन्यस्मिन्नुपहवमिच्छन्ते ।

अन्योन्यमित्यव्ययत्वेनापेक्षितेऽन्योन्यस्मिन्निति सप्तम्यन्तः प्रयोगश्छान्दसः । अन्योन्यं परस्परमुपह्वानमिच्छन्त इच्छेयुः कुर्युरित्यर्थः । नानुपहूतेन सोमः पातवै सोमपीथेन ह[1] व्यर्धुको भवतीति निषेधादिति श्रुतिर्हेतुरत्र ज्ञेया । परस्परानुज्ञापनमुपहवस्तमकृत्वा न सोमः पातव्य उपहवरहितेन सोमपीथेन सोमपानेन व्यर्धुको विगतार्धिशीलो भवतीत्यर्थः ।

उपहवमन्त्रस्वरूपमाह—

उपह्वयस्वेत्यामन्त्रणः ।

मन्त्र इति शेषः पुंलिङ्गात् । आमन्त्र्यते संमुखी क्रियते प्रतिभक्षिता येन स मन्त्र आमन्त्रण इत्यर्थः । यस्योपह्वानं तस्य कर्मप्रयुक्तनामग्रहणं कर्तव्यमित्यर्थात् । अन्यथा

1 ख. ह्येत्र ।

कस्योपह्वानं क्रियतेऽनेनेति न ज्ञायेत । स्पष्टमेतदुक्तमापस्तम्बेन—असावसावुपह्वयस्वेति कर्मनामधेयेनाऽऽमन्त्रयत इति । तत्र प्रशास्तरुपह्वयस्व ब्रह्मन्नुपह्वयस्वेत्येवाऽऽमन्त्रणम् । प्रशास्तर्यज ब्रह्मन्यजेति लिङ्गात् ।

प्रतिवचनमन्त्रस्वरूपमाह—

उपहूत इति प्रतिवचनः ।

प्रत्युच्यतेऽनेनेति प्रतिवचनः पूर्ववन्मन्त्र इत्येव शेषः ।

यत्र क्व चैककाले भक्षयेयुरन्योन्यस्मिन्नुपहवमिच्छेरन् ।

एकः कालः समानकालः । तथा चाऽऽपस्तम्बः—ये समाने प्राये भक्षयन्ति तेषूपहवमिच्छन्त इति । प्रकर्षेणैतीति व्युत्पत्त्या प्रायशब्दः कालपरः । यत्र क्व चैककाल इति वचनात् । द्विदेवत्यादिषु भिन्नमेव निमित्तमुपहवस्यास्तीति मन्यते । तच्चैकपात्रत्वरूपत्वम् । तथा चाऽऽपस्तम्बः—ये चैकपात्रमिति । पात्रशब्देन तत्स्थः सोमो ल(ल)क्ष्यते । एकं पात्रं यस्येति बहुव्रीहिर्वा । एकपात्रस्थं सोममित्यर्थः । समाख्याभक्षणमतिग्राह्यभक्षणं च कालोदाहरणम् । एकपात्रोदाहरणानि द्विदेवत्यादीनि यथायथं द्रष्टव्यानि । अत्राऽऽचारशेषभक्षणम् । प्रतिभक्षितुरभावेऽप्युपहवोऽत्र । नानुपहूतेन सोमः पातव्य इति निषेधात् । स च सांनिध्याद्धोतुः ।

द्विरैन्द्रवायवं भक्षयति सकृत्सकृदितरौ ।

अनुत्सृजन्तौ पात्रमित्यापस्तम्बः । द्विर्वषट्काराद्द्विर्होमाच्च । सकृत्सकृदितरौ मैत्रावरुणाश्विनौ । सकृद्वषट्कारात्सकृद्धोमाच्चेति भावः । अत्राऽऽपस्तम्बेन द्विरैन्द्रवायवं भक्षयतो भक्षयन्ति भक्षयतीति वा सकृत्सकृदितरावित्युक्त्वा विकल्पितपक्षत्र(द्व(?)) यस्य तच्चेषां भक्षयत इत्यध्वर्युर्होता चेत्यर्थो भक्षयतीति स स इत्यर्थ इति स्वयमेव व्याख्यानं *कृतम् । तेन यो योऽत्र भक्षयिता स स भक्षयतीत्येकवचनार्थः सिद्धो भवति । भक्षयन्तीति पाठे तु प्रतिप्रस्थातुर्द्विर्भक्षणमप्राप्तमपि । एतस्मादेव बहुवचनबलात् । द्विवचनान्तपाठस्य त्वस्मत्सूत्रे नैव शङ्काऽस्ति । सकृत्सकृदिति वीप्सा ग्रहद्वित्वानुसारेण ।

पुरस्तादैन्द्रवायवं प्राणेषूपनिग्राह्यं पुरस्तान्मैत्रावरुणं चक्षुषोरुपनिग्राह्यꣳ सर्वतः-परिहारमाश्विनꣳ श्रोत्रयोरुपनिग्राह्यम् ।

भक्षयति भक्षयन्तीति वा पूर्वपाठानुसारेणात्राप्यनुवर्तते । सर्वतःपरिहारमित्याश्विने विशेषविधित्सया पूर्वयोर्ग्रहयोः पुरस्तादित्यनूदितं ब्राह्मणे । तस्यैवानुकरणं करोति

---

* अत्र सर्वपुस्तकेषु कृतवानिति पाठो विद्यते स प्रामादिक इति ज्ञेयम् ।

---

१ क. °स्य तस्मात्सू° । ख. °स्य तत्सू° ।

सूत्रकारः पुरस्तादैन्द्रवायवमित्यादिना । प्राणेष्विति बहुवचनान्नासिकाद्वयस्य मुखस्य च ग्रहणम् । नासिकाद्वयनिरोधे स्पष्टवागुच्चारणं नैव जायत इति प्रसिद्धम् । अतस्तयोरपि वागुच्चारणानुकूलत्वाद्ग्रहणम् । न च तस्मात्पुरस्ताद्वाचा वदतीति श्रुतेः प्राणशब्देन मुखस्यैव ग्रहणं बहुवचनं तु पूजार्थत्वेनाप्युपपद्यत एवेति वाच्यम् । अगतिकगतिकां पूजार्थतां विना निर्वाहे तत्कल्पनाया अनुचितत्वात् । णमुल्निर्देशादेकैकस्य ग्रहणम् । तच्चोर्ध्वमुपहवादित्युक्तमाश्वलायनेन । यथाऽध्वर्युं उपह्वयस्वेत्युक्त्वाऽवघ्राय नासिकाभ्यामिति । सर्वतःपरिहारं सर्वं शिरः परिहृत्य परिहृत्येति । इदमपि णमुलन्तम् । तेनात्रापि वारद्वयं परिहरणक्रिया भवति ।

सर्वान्भक्षयित्वा नानुसृजन्त्याऽवनयनात् ।

सर्वानित्यनन्तरं स्वस्वकाल इति शेषः । नानुसृजन्त्यावनयनादित्यत्र पूर्वोऽवाधिभक्षणं सर्वेषु । तथा चाऽऽपस्तम्बः—अनुत्सृजन्तौ पात्रं द्विरैन्द्रवायवं भक्षयतो भक्षयन्ति भक्षयति वा सकृत्सकृदितराविति ।

सर्वेषाꣳ संपातान्होतृचमसेऽवनीय पुरोडाशशकलमैन्द्रवायवस्य पात्रेऽवदधाति पयस्यां मैत्रावरुणस्य धाना आश्विनस्य तानि दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याꣳ सादयत्यातृतीयसवनात्परिशेरते ।

अवधानं निक्षेपणम् । पयस्याऽऽमिक्षा । मैत्रावरुणस्याऽऽश्विनस्येत्युभयत्र पात्रेऽवदधातीत्यनुवर्तते । वर्तनी शकटचक्रमार्गः । प्राकृत्यमेवाऽऽसादनमत्र । चक्रमार्गसादनानुगुणत्वात् । आतृतीयसवनादित्यत्राऽऽङ्भिविधौ । अत्र तृतीयसवनशब्देनैकया च दशभिश्च स्वभूत इत्येनस्याꣳ शस्यमानायां प्रानयुँजौ विमुच्येथामिति प्रतिप्रस्थाता द्विदेवत्यपात्राणि विमुच्यापरया द्वारोपनिर्हृत्य मार्जालीये प्रक्षाल्य पूर्वया द्वारा प्रपाद्याऽऽयतनेषु सादयतीतिवक्ष्यमाणप्रतिपादस्यनन्तृतीयसवनपदार्थोऽत्र । परिशेरत इति बहुवचनं हविर्विशिष्टपात्रत्वित्वात् । पात्रेष्वप्रक्षालितेष्वेव हविस्त्रित्यनिधानं प्रक्षालनावचनात् । तान्येवमरिक्तान्येव परिशेरते सादितानि भवेयुः । यज्ञस्य संतत्या इति ब्राह्मणम् ।

निरवदाय होत्र इडामादधाति ।

निरवदानं ग्रहणम् । आधाति प्रयच्छतीत्यर्थः ।

उपहूयमानामुपोद्यच्छन्ते चमसाꣳश्चमसाध्वर्यवः ।

उपहूयमानामिडाम् । उप समीप इडायाः समीप उदूर्ध्वं यच्छन्ते नियमयन्ति चमसांस्तं तं चमसं स स चमसाध्वर्युः ।

---

१ ख. पूर्ववद्भिर्मै° ।

होतृचमसमास्पृष्टं धारयति।

आस्पृष्टमीषत्स्पृष्टं तदीयचमसमाध्वर्युः। पूर्वत्र चमसेष्वूर्ध्वधारणमात्रं न तु स्पर्शः। होतृचमसे तु स्पर्श इति विशेषः।

उपहूतां प्राश्नन्ति ये प्रकृतौ।

ये प्रकृताविव्यनेन प्राशननिवृत्तिः क्रियते प्रतिप्रस्थातृमैत्रावरुणयोः संबन्धसत्त्वेऽपि।

इडाशकलमच्छावाकाय निदधाति प्राशितायां मार्जयित्वा।

प्राशितायामिति वचनमिडाशकलस्याच्छावाकार्थनिधानं प्राशनात्पूर्वमेव कर्तव्यमितिक्रमबोधनार्थम्। पूर्वसूत्रं क्रमबोधकं न भवति किंतु सामान्यप्रतिज्ञानात्रमनेन क्रियते। यजमानपञ्चमा चाश्नता भक्षयामार्जनादित्यनेनैवाङ्गत्वसिद्धौ पुनरत्र वचनमिडाप्राशनोत्तरमेव मार्जनं न तु मध्येऽन्यस्य प्राशप्राप्तौ तदुत्तरम्। एतेन ज्ञाप्यते मध्येऽन्यस्य प्राशनमप्यस्तीति। तच्च हविरुच्छिष्टस्य। तच्चोक्तमाश्वलायनेन—हविरुच्छिष्टं सर्वे प्राश्नन्तीति। परं तु तच्चतुर्णां प्राकृतानामेवर्त्विजां न त्वन्येषाम्। आश्वलायनसंबन्धिनां तु भवत्येव तत्सूत्रानुरोधात्।

वाजिनेन चरति यथा वैश्वदेवे ॥ १९ ॥

अध्वर्योर्मुख्यत्वादेकवचनं न त्वेतत्संबन्धीतरर्त्विजां निवृत्तिः। यथा वैश्वदेव इत्यतिदेशात्। चरन्तीति पठन्त्वृजुरेव। अत्रोत्कर्षो न भवति। तथा चाऽऽपस्तम्बः—न ह्येषां प्रासङ्गिकं वैशेषिकमुत्कर्षतीति। एतेषां पुरोडाशानां प्रासङ्गिकं प्रसङ्गोपजीव्यं पशुप्रयुक्तमनूयाजादि तदुत्कृष्यमाणं नैतेषां वैशेषिकं वाजिनचर्यादुत्कर्षति। कुतः, पाशुकैरनूयाजादिभिः पुरोडाशविशेषधर्माणां वाजिनचर्यादीनामसंबन्धादसति च संबन्धे तैः क्रमक्लृप्त्ययोगाच्च। उक्तं जैमिनिनाऽपि—प्रासङ्गिकं नोत्कर्षेदसंयोगादिति। असंबन्धाद्वाजिनचर्यादीनामसंबन्धादित्यर्थः।

सवनीयानां मार्जनप्रभृतीनि कर्माणि प्रतिपद्यते यथा निरूढपशुबन्धे पशुपुरोडाशस्य।

सवनीयानां पिष्टलेपफलीकरणप्रभृतीनि कर्माणि प्रतिपद्यत इत्येतावतैव सिद्धे मार्जनप्रभृतीनि कर्माणि प्रतिपद्यत इति पुनर्मार्जनग्रहणं वाजिनप्रचारानन्तरमपि पक्षे मार्जनकालोऽस्तीतिज्ञापनार्थम्।

यथाचमसं चमसिनो भक्षयन्ति तेषां व्याख्यातो भक्षमन्त्रः।

चमसमनतिक्रम्येति यथाचमसम्। तत्र चमसः स्वस्य स्वस्य। तेषां चमसिनां व्याख्यातो भक्षे हीत्यादिना सार्वत्रिकमेके समामनन्तीत्यन्तेन सूत्रेणोक्तः। व्याख्यातो

१ ख. प्रयोगो प॰।

भक्ष इति वक्तव्ये मन्त्रग्रहणं वैकल्पिकयोर्मन्त्रयोर्यो मन्त्रोऽध्वर्युणा परिगृहीतः स एव होत्राऽपि परिग्रहीतव्य इत्येतदर्थम् ।

सर्वेषां प्रथमो होता सकृत्सकृद्भक्षयति द्विः स्वे चमसे पुनः ।

सर्वेषां भक्षकर्तृणां मध्ये प्रथमः पूर्वं होता सर्वचमसानां सकृत्सकृद्भक्षणं करोति स्वचमसे द्विः । पुनःशब्दोऽवधारणे द्विः स्वे चमस एवेत्यर्थः । अनुवषट्कारस्य चमसगतसोमसंस्कारकत्वात्तस्य चानुवषट्कारनिमित्तभक्षणस्य स्वसत्ताकचमसभक्षण एव प्रवृत्तेरुचितत्वादिति भावः । प्रातःसवनमाध्यंदिनसवनयोर्होतृचमसे प्रतिभक्षितुरभावात्तन्त्रेण समाख्याभक्षस्य सिद्धिः ।

अभ्युन्नीतानामध्वर्युर्द्विर्भक्षितानाꣳ सकृत्सकृद्भक्षयति ।

द्विर्भक्षितानामित्यत्र प्रशास्त्रादिभिश्चमसिभिर्वषट्कारनिमित्तमनुवषट्कारनिमित्तं च द्विवारं भक्षितानां चमसस्थरसानां सतामध्वर्यु(र्यो)र्होमाभिषवोभयनिमित्तकं सकृत्सकृद्भक्षणमित्यर्थः ।

तृतीयꣳ होत्रका अन्ततः ।

होमाभिषवाभ्यामध्वर्योर्भक्षो वषट्काराच्च वषट्कर्तृणाꣳ समाख्यानाच्चमसिनां वषट्कर्ता पूर्वो भक्षयति ततोऽध्वर्युर्नेष्टाग्नीध्रश्चमसीत्यनेन मध्यतःकारिणां होत्रकाणां च समाख्याभक्षः प्राप्यते । तृतीयꣳ होत्रका इत्यत्र तृतीयग्रहणं यदि मध्ये प्रतिभक्षिता तदा समाख्याभक्षः पृथग्भवति अन्यथा तन्त्रं वषट्कारनिमित्तकभक्षसमाख्याभक्षयोर्होत्रकविषय इतिज्ञापनार्थम् । होत्रकाणामत्र पृथग्भवति प्रतिभक्षितुभर्त्वान्न तन्त्रमेतेषाम् । होतुस्तु नात्र समाख्याभक्षः पृथक्प्रतिभक्षितुरभावात्तस्य तु आद्ययोः सवनयोः प्रतिभक्षितुरभावात्समाख्याभक्षस्तन्त्रेणैव । यत्र यत्र प्रतिभक्षितुरभावस्तत्रोपहूयैव भक्षणम् । अन्ततोऽन्ते ।

सर्वान्भक्षयित्वाऽऽप्यायस्व समेतु त
इत्याप्याययन्ति ते नाराशꣳसा भवन्ति ।

चमसिन इति शेषः । सोमेन वसतीवरीभिर्वा वर्धनमाप्यायनम् । आप्याययतीति लिङ्गात् । मन्त्रेणाभिमर्शनमित्यन्ये । तथाऽभिमृशेरन्नित्याश्वलायनः । कात्यायनस्त्वाह- आप्यायस्व समेतु त इति द्वाभ्यां चमसानालभन्ते सोमं वा सिञ्चतीति । बौधायनस्तु वसतीवरीः प्रकृत्याऽऽहृताभिराप्याययेत्ताभिरभिषुणुयादिति । ते नाराशꣳसा भवन्ति । एवमाप्यायिताश्चमसा नराशंसदेवतात्वान्नाराशंससंज्ञां लभन्त इत्यर्थः ।

---

१ क. ग. प्रथमं॰ । २ क. ॰स्तत्रानुप॰ ।

तान्दक्षिणस्य हविर्धानस्य पश्चादक्षमुदगायतान्सा-
दयत्यन्तरा नेष्टुराग्नीध्रस्य च चमसौ सादयति ।

तान्नाराशंसान् । अन्यत्स्पष्टम् । नेष्टुराग्नीध्रस्य च चमसावन्तरा सादयति । अत्रान्तराशब्दोऽन्तरालविशिष्टपरो लक्षणया । इदं च वैशिष्ट्यं नेष्ट्राग्नीध्रचमसनिष्ठम् । अन्तरान्तरेणयुक्त इति द्वितीया ।

उपविशत्यच्छावाकोऽग्रेण स्वं धिष्णियं बहिःसदसम् ।

अग्रेण स्वं धिष्णियं बहिःसदसमित्यनेनैनवर्थः सदोबहिःप्रदेशपर्यन्तमेवात्र वचनान्नाहृह्यते ।

तस्मै पुरोडाशशकलमादद्दाद्दाच्छावाक वदस्व यत्ते वाद्यमिति ।

आददादित्येव पाठः । आदधदिति प्रमादपाठः । प्रयच्छन्निति तदर्थः । अच्छावाक यत्ते वाद्यं वक्तुं योग्यं तद्वदस्वेति ।

उपो अस्मान्ब्राह्मणान्ब्राह्मणा ह्वयध्वमित्य-
च्छावाकेनोच्यमानेऽच्छावाको वा अयमुपह-
वमिच्छते तं होतरुपह्वयस्वेति संप्रेष्यति ।

होतारं संप्रेष्यति । प्रैषे होतृशब्दश्रवणात् । अत्रप्रैषशब्देनाऽऽवेदनमुच्यते ।

यत्रैनं होत्रोपहूयमानं जानाति तस्मिन्कालेऽच्छा-
वाकचमसमादायोन्नीयमानायानुब्रूहीति संप्रेष्यति ।

यत्र यस्मिन्काल एनमच्छावाकं होत्रोत नो गाव उपहूता उपहूत इत्यनेन मन्त्रेणोपहूयमानमध्वर्युर्जानाति तस्मिन्कालेऽच्छावाकचमसं गृहीत्वोन्नीयमानायानुब्रूहीत्यच्छावाकं संप्रेष्यति । अत्रोन्नयनकर्ता तदीयचमसाध्वर्युरेव नोन्नेता । उक्तं चाऽऽपस्तम्बेनोन्नीयमानायानुब्रूह्यच्छावाकस्य चमसाध्वर्यो उन्नयस्वोभयतःशुक्रं कुरुष्वेति प्रैषमुखेनै(णे)व । तेनोन्नेतुरुन्नयनकर्तृत्वमत्र न भवति । परिप्लवया द्रोणकलशादुपस्तीर्य पूतभृत उन्नीय द्रोणकलशादभिघारयति सर्वचमसानामेष कल्प इतिसूत्रादयं विधिरस्मिंश्चमसेऽपि ।

तस्मिन्परिहितेऽच्छावाक यजेति संप्रेष्यति वष-
ट्कृते जुहोत्यनुवषट्कृते हुत्वा हरति भक्षम् ।

अच्छावाकेन तस्मिन्नुन्नीयमानसूक्ते परिहिते सति । आश्रावणप्रत्याश्रावणादिकं सौमिकपरिभाषासूत्रतः । अन्यत्स्पष्टम् ।

---

१ क. ज. झ. म. ड. °दधदा° ।

तेन न समं भक्षयति ।

भक्षनिमित्ते सत्यपि वचनादध्वर्योर्भक्षनिवृत्तिः ।

नास्मिन्नुपहवमिच्छते ।

अस्मिन्नध्वर्यावच्छावाक उपहवं नेच्छते ।

यद्यस्मिन्नुपहवमिच्छेत भक्षयेत्येव ब्रूयात् ।

यदि अस्मिन्नध्वर्यावच्छावाक उपहवमिच्छेत तदाऽध्वर्युर्भक्षयेत्येव ब्रूयान्नोपहूत इति ।

भक्षिताप्यायितमन्तरा नेष्टुराग्नी-
ध्रस्य च चमसौ सादयति ।

उपहवनिषेधादुपहवाभावेऽनुपहूतेन सोमो न पातव्य इति निषेधेन भक्षस्यैवाभावप्रसक्तौ तत्संबन्धित्वेनाऽऽप्यायनस्याप्यभावप्रसक्तौ तन्निवारणार्थमिदं भक्षिताप्यायितवचनम् । भक्षिताप्यायितमच्छावाकेन स्वचमसं नेष्टुराग्नीध्रस्य च चमसावन्तरैतयोश्चमसयोमध्ये सादयति । क्रमप्राप्तं तस्य तदेव स्थानमिति भावः ।

एतदेवात ऊर्ध्वमच्छावाकचमसस्य स्थानम् ॥ २० ॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्ने सप्तमः पटलः ।

एतदेव स्थानमत ऊर्ध्वमित आरभ्य तृतीयसवनान्तम् । अन्यत्स्पष्टम् । अयमच्छावाको बह्वृच एव कार्यः । तथा चैतरेयब्राह्मणे—यो ब्राह्मणो बह्वृचो वीर्यवान्स्यात्सोऽच्छावाकीयां कुर्यादिति ।

इत्यौकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्निचित्वाजपेययाजिसर्वतोमुखयाजिद्विषाहस्राग्निचित्पौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्रश्नस्य सप्तमः पटलः ॥ ७ ॥

अथाष्टमप्रश्नेऽष्टमः पटलः ।

ऋतुग्रहैः प्रचरतो द्वादशभिस्त्रयोदशभिश्चतुर्दशभिर्वा द्वादशसु सर्वान्नाना जुहुतस्त्रयोदशस्वन्यतरौ सह चतुर्दशसु सह प्रथमौ सहोत्तमौ ।

---

१ क. ख. ङ. भक्षयन्ति । २ क. ग. ङ. °यितामन्त°।

अथोदशस्त्वन्यतराविस्यनेन सहशब्दस्यान्वयः । सहग्रहणे परिप्लवयाऽध्वर्युकर्तृकं ग्रहणम् । उदचनेन प्रतिप्रस्थातृकर्तृकं यद्यध्वर्युः प्रतिग्रहीता । परिप्लवाद्वयस्याभावात् । इतरथा विपरीतम् । अन्यतरस्पष्टम् । तत्र पक्षत्रयप्रयोगास्त्वित्थम्—तत्राऽऽद्यपक्षे मधुश्चेत्यध्वर्युर्माधवश्चेति प्रतिप्रस्थाता शुक्रश्चेत्यध्वर्युः शुचिश्चेति प्रतिप्रस्थाता नभश्चेत्यध्वर्युर्नभस्यश्चेति प्रतिप्रस्थाता । एतेषु षट्सु ऋतुना प्रेष्येति प्रैषः । पात्रमुखविपर्यासः । तत इषश्चेत्यध्वर्युः, ऊर्जश्चेति प्रतिप्रस्थाता, सहश्चेत्यध्वर्युः, सहस्यश्चेति प्रतिप्रस्थाता । एतेषु चतुर्षु ऋतुभिः प्रेष्येति प्रैषः । पात्रमुखविपर्यासः । ततस्तपश्चेत्यध्वर्युस्तपस्यश्चेति प्रतिप्रस्थाता । एतयोर्ऋतुना प्रेष्येति प्रैषः । एतदनन्तरमत्र सहग्रहणं सहहोमश्च कुत्रापि नास्ति । भक्षक्रमस्तु होत्रासहाध्वर्युरेव न प्रतिप्रस्थाता पोत्रा सह प्रतिप्रस्थाता नेष्ट्रा सहाध्वर्युः, आग्नीध्रेण सह प्रतिप्रस्थाता ब्राह्मणाच्छंसिना सहाध्वर्युः प्रशास्त्रा सह प्रतिप्रस्थाता । एतदनन्तरं पात्रमुखविपर्यासः । होत्रा सहाध्वर्युः पोत्रा सह प्रतिप्रस्थाता नेष्ट्रा सहाध्वर्युः, अच्छावाकेन सह प्रतिप्रस्थाता पोत्रा सहाध्वर्युः पृथगेव । ततो होत्रा सह हविर्धान एव प्रतिप्रस्थाता पृथगेव । अस्मिन्नेव पक्षे स्वयं वा निषद्य यजत इत्येतत्पक्षस्वीकारश्चेत्तदाऽन्तिमे याज्ये होतुर्न भवतः । तत्प्रयुक्तो भक्षश्च नास्ति । अध्वर्योर्होतरेतद्यजेत्यस्य लोपः । अध्वर्युप्रतिप्रस्थातारौ हविर्धानयोर्मध्ये प्राङ्मुखावुपविश्य ग्रहावन्यहस्ते दत्त्वोभाभ्यामाश्वलायनोक्तरीत्या याज्यामुक्त्वाऽध्वर्युरुत्तिष्ठेत्ततः प्रतिप्रस्थाता तु तत्रैवोपविष्टो भवेत् । अध्वर्युरेव ग्रहहोमार्थमुत्तरवेदिं गत्वा ग्रहं वषट्कृते हुत्वा सदस्युपविशेत् । एवं प्रतिप्रस्थाताऽपि सदस्युपविशेत् । अत्राध्वर्युप्रतिप्रस्थात्रोरध्वर्युपात्रे वषट्कारनिमित्तं परस्परं भक्षः परस्परोपाह्वानेन । होमाभिषवोभयरूपनिमित्तप्रयुक्तो भक्षस्त्वध्वर्योरेव न प्रतिप्रस्थातुः । तत्र पूर्वमध्वर्योरेव भक्षः । तस्यैव ग्रहग्रहणकर्तृत्वात् । अध्वर्युकर्तृको होमाभिषवोभयरूपनिमित्तप्रयुक्तो भक्षस्तु सदस्येव । तस्य हविर्धाने चर्मन्नधिग्रावभिरभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीति श्रुतेः । स्वयं वा निषद्य यजत इत्येतस्मिन्पक्षे यजमानस्य प्रयोगस्त्वित्थम्—होतरेतद्यजेत्यस्य लोपः । यजमानः प्राङ्मुखो भूत्वा स्वासनोपविष्ट एव याज्यां ब्रूयात् । हविर्धान एव वषट्कारान्ते प्रतिप्रस्थातारमेवोपहूय वषट्कारप्रयुक्तं भक्षं कुर्यात् । ततः प्रतिप्रस्थाता होमाभिषवोभयरूपनिमित्तकं यजमानमुपहूय सदसि भक्षयति । स्वयं वा निषद्य यजत इत्येतस्मिन्पक्षे होतुर्बाधः । अथ द्वितीयपक्षः—तत्र यद्यन्तिमयोः सहहोमस्तस्य प्रयोगः—मधुश्चेत्यादि सहस्यश्चेत्यन्तं पूर्ववत् । ततस्तपश्चेत्यध्वर्युर्गृहीत्वा वषट्कृते हुत्वा हविर्धानमागत्य तत्रैवोप-

---

१ ख. होत्रा ।

विष्टेऽध्वर्यौ तपस्यश्चेति प्रतिप्रस्थाता। उपयामगृहीतोऽसि सꣳसर्पोऽस्यꣳहस्पत्याय त्वेत्येताभ्यां मन्त्राभ्यां सहैव गृहीत्वा प्रतिप्रस्थातैव प्रथमतः प्रवृत्तत्वात्पैवं द्वावेभौ सहवषट्कृते हुत्वा संपातावनयनं कुरुतः। अथ भक्षः—तत्राच्छावाकभक्षान्तो भक्ष-क्रमः पूर्ववत्। ततः प्रथमे भक्षे होत्रध्वर्योरेव सह न प्रतिप्रस्थातुः। द्वितीये भक्षे होतृ-प्रतिप्रस्थात्रध्वर्यूणां भक्षः। स्वयं वा निषद्य यजत इत्येतस्मिन्पक्ष एकादशे भक्षे पूर्व-वदध्वर्युप्रतिप्रस्थात्रोरेव भक्षो न होतुः स्वकर्तृकयाज्यायाम्। यजमानसंबन्धियाज्यायां तु प्रतिप्रस्थात्रध्वर्योरेव यजमानेन सह भक्षः। प्रतिप्रस्थातुः प्रथमतः प्रवृत्तत्वात्पूर्वं तस्य पश्चादध्वर्योः। यदि त्वाग्रयोः सहहोम इति पक्षस्तदा मधुश्चेति मन्त्रेणाध्वर्युर्माधवश्चेति मन्त्रेण प्रतिप्रस्थाता सहैवोभौ गृहीत्वा सहैव वषट्कृते हुत्वा संपातावनयनं कुरुतः। ऋतुना प्रेष्येति प्रैषोऽध्वर्योरेव। शुक्रश्चेत्यध्वर्युर्ऋतुना प्रेष्येति प्रैषः शुचिश्चेति प्रति-प्रस्थाता, ऋतुना प्रेष्येति प्रैषः। नभश्चेत्यध्वर्युर्ऋतुना प्रेष्येति प्रैषः। नभस्यश्चेति प्रतिप्रस्थाता, ऋतुना प्रेष्येति प्रैषः। इषश्चेत्यध्वर्युर्ऋतुना प्रेष्येति प्रैषः। ततः पात्र-मुखविपर्यासः। ऊर्जश्चेति प्रतिप्रस्थाता। ऋतुभिः प्रेष्येति प्रैषः। सहश्चेत्यध्वर्युर्ऋ-तुभिः प्रेष्येति प्रैषः। सहस्यश्चेति प्रतिप्रस्थाता, ऋतुभिः प्रेष्येति प्रैषः। तपश्चेत्य-ध्वर्युर्ऋतुभिः प्रेष्येति प्रैषः। ततः पात्रमुखविपर्यासः। तपस्यश्चेति प्रतिप्रस्थाता, ऋतुना प्रेष्येति प्रैषः पृथगेव जुहोति न सह। नात्र संपातावनयनं सहहोमाभावात्। उपयामगृहीतोऽसि सꣳसर्पोऽस्यꣳहस्पत्याय त्वेत्यध्वर्युः पृथगेव गृह्णाति पृथगेव जुहोति च। नात्रापि संपातावनयनं सहहोमाभावात्। भक्षस्तु होत्रा सहाऽऽद्यो भक्षोऽध्वर्युप्रतिप्रस्थात्रोः। तत्र मुखतः प्रवृत्तत्वादध्वर्योः पूर्वम्। पश्चात्प्रतिप्रस्थातुः। ततः पोत्रा सहाध्वर्युः। नेष्ट्रा सह प्रतिप्रस्थाता। आग्नीध्रेण सहाध्वर्युः। ब्राह्मणाच्छं-सिना सह प्रतिप्रस्थाता। प्रशास्त्रा सहाध्वर्युः। होत्रा सह प्रतिप्रस्थाता। ततः पात्र-मुखविपर्यासः। ततः पोत्रा सहाध्वर्युः। नेष्ट्रा सह प्रतिप्रस्थाता। अच्छावाकेन सहा-ध्वर्युः। ततो होत्रा सहाध्वर्युः पृथगेव भक्षयति। एवं प्रतिप्रस्थाताऽपि होत्रा सह पृथगेव भक्षयति। अत्रोभयोरपि प्रतिभक्षितुरेवोपाह्वानमिति विशेषः। याज्यास्तु प्रथ-मद्वितीयर्तुग्रहमन्त्रकरणकग्रहणयोर्होतुर्याज्या। तृतीये तु पोतुः। चतुर्थे नेष्टुः। पञ्चम आग्नीध्रस्य। षष्ठे ब्राह्मणाच्छंसिनः। सप्तमे प्रशास्तुः। अष्टमे होतुः। नवमे पोतुः। दशमे नेष्टुः। एकादशेऽच्छावाकस्य। द्वादशे होतुः प्रथमा याज्या। त्रयोदशे होतु-र्द्वितीया याज्या। स्वयं वा निषद्य यजत इत्येतस्मिन्पक्षेऽन्तिमयोर्याज्ययोर्होतृकर्तृकता-बाधः। भक्षस्य बाधः। एतत्पक्षानुसारिप्रयोगस्तु अनन्तरमुक्त एव। चतुर्दशपक्षे विनिवे-शस्तु त्रयोदशग्रहग्रहणपक्षीयाद्यग्रहसहहोमपक्षवत्। अत्र त्रयोदशचतुर्दशयोर्होतुर्द्वि-तीया याज्येति विशेषः। अथ भक्षः—तत्राऽऽद्ये भक्षे होत्रध्वर्युप्रतिप्रस्थातारो निमित्तक्रमानुसारेण परस्परमुपहूय भक्षयन्ति। द्वितीये भक्षे पोत्रा सहाध्वर्युः।

तृतीये भक्षे नेष्ट्रा सह प्रतिप्रस्थाता । चतुर्थ आग्नीध्रेण सहाध्वर्युः । पञ्चमे ब्राह्मणाच्छंसिना प्रतिप्रस्थाता । षष्ठे प्रशास्त्रा सहाध्वर्युः । सप्तमे होत्रा सह प्रतिप्रस्थाता । अष्टमे पोत्रा सहाध्वर्युः । नवमे नेष्ट्रा सह प्रतिप्रस्थाता । दशमेऽच्छावाकेन सहाध्वर्युः । एकादशे होत्रा सहाध्वर्युर्होतारमेवोपहूय पृथगेव भक्षयति । द्वादशत्रयोदशयोरन्तिमे भक्षे होत्रा सहाध्वर्युप्रतिप्रस्थातारौ क्रमेण परस्परमुपहूय भक्षयतः । अत्र प्रैषोऽध्वर्योरेवोभयत्रापि । संपातावनयनमप्युभयत्र । चतुर्दशत्वपक्षे मन्त्रन्यूनता तु अन्ताल्लोपो विवृद्धिर्वेति न्यायेन परिहरणीया । एतेन न्यायेनान्तिममन्त्रस्याऽऽवृत्तिः । एतत्त्रितयपक्षसाधारण्यार्थमेव सूत्रे यस्य यस्य वषट्कारे जुहुतस्तं तं प्रति भक्षयत इति साधारण्येनोक्तिः । तेन परस्परभक्षवैपरीत्येऽपि न बाधः । अथ त्यागाः—इन्द्राय मघव माधवाय चेदं० इति प्रथमयोस्त्यागः । मरुद्भ्यः शुक्रायेदं० त्वष्ट्रे शुचय इदं० अग्नये नभस इदं० इन्द्राय नभस्यायेदं० मित्रावरुणाभ्यामिषायेदं० देवाय द्रविणोद ऊर्जायेदं० देवाय द्रविणोदे सहस इदं० देवाय द्रविणोदे सहस्यायेदं० देवाय द्रविणोदे तपस इदं० देवाय द्रविणोदे तपस्यायेदं० अग्नये गृहपतये संसर्पायांहस्पत्यायेदं० इति क्रमेण त्यागाः ।

असन्ना हूयन्ते ।

अनासादिता एव हूयन्त इत्यर्थः । ऋतुग्रहा इति शेषः ।

पूर्वस्य पूर्वस्य शेष उत्तरमुत्तरमभिगृह्णीतः ।

एतेनैव ज्ञातं भवति सशेषा हूयन्त इति । अभि अभिमुखो भूत्वा गृह्णातीत्यर्थः ।

उपयामगृहीतोऽसि मधवे त्वेति स्वेन पात्रेणाध्वर्युः पूर्वं गृह्णात्युपयामगृहीतोऽसि माधवाय त्वेति स्वेन पात्रेण प्रतिप्रस्थातोत्तरम् ।

स्पष्टम् ।

व्यतिषङ्गं गृह्णीतः ।

व्यतिषज्य व्यतिषज्येति व्यतिषङ्गम् । णमुल्प्रयुक्ताया वृद्धेरभावश्छान्दसः । अध्वर्यौ होमार्थं गते द्वारि प्रतिप्रस्थाता भवति । एवं प्रतिप्रस्थातरि गतेऽध्वर्युर्द्वारि भवतीति व्यतिषङ्गशब्दार्थः । आपस्तम्बोऽपि स्पष्टमिदमाह—द्वार्येन व्यतीत इति । द्वार्येव व्यतीतो व्यतिगच्छतो मिथः संगतौ भवतः । अन्यत्र त्वेकैकावेव चरत इत्यर्थः । अस्मिन्विषये हेतुर[पि] प्रदर्शयिष्यते सूत्रकृता ।

---

१ ख. शापितं ।

पूर्वोऽध्वर्युरपरः प्रतिप्रस्थाता ।

गृह्णातीति शेषः ।

पूर्वेण पूर्वेण मन्त्रेणाध्वर्युरुत्तरेणोत्तरेण प्रतिप्रस्थाता ।

स्पष्टम् ।

दक्षिणेनाध्वर्युः संचरत्युत्तरेण प्रतिप्रस्थाता ।

आहवनीयसंलग्नदेशेनोभयोः संचरणम् । उभयत्रैतत्प्रत्ययश्रवणात् । अत्र हेतुः श्रुतावुक्तः—प्रसिद्धमेवाध्वर्युर्दक्षिणेन प्रपद्यते प्रसिद्धं प्रतिप्रस्थातोत्तरेणेति ।

नान्योन्यमनुप्रपद्येत ।

अन्योन्यस्य पृष्ठमनुगच्छतः । द्वारि भवन इदं हेतुभूतं सूत्रम् ।

प्रविशन्तमध्वर्युं ग्रहेण परिगृह्णाति निष्क्रामन्तं पात्रेण ।

परीत्यनेन ग्रहेणाध्वर्युं स्वेनान्तर्हितं करोतीति परिग्रहशब्दार्थः । निष्क्रामन्तं केवलेन पात्रेण परिगृह्णाति । अत्रापि पूर्ववदेव परिग्रहशब्दार्थः । अथ वाऽध्वर्युर्ग्रहस्योत्तरतो यथा भवति तथा करोति । अयं वा परिग्रहशब्दार्थ उभयत्र । यद्यप्यत्र श्लेषो वर्तते तथाऽपि प्रदेशयागद्रव्यस्य तस्मिन्नभावात्पात्रव्यवहारः । शेषस्तु प्रतिपत्त्यर्थः ।

ऋतुना प्रेष्येति त्रिरध्वर्युराह त्रिः प्रतिप्रस्थाता ।

ऋतुग्रहाणां चतुर्दशत्वपक्ष एतस्य बाधः ।

पात्रयोर्मुखे विपर्यस्यर्तुभिः प्रेष्येति द्विरध्वर्युराह द्विः प्रतिप्रस्थाता ।

स्पष्टम् । एतयोः पात्रयोरुभयतोमुखत्वं श्रुतावुक्तम्—उभयतोमुखमृतुपात्रं भवतीति । तत्र येन मुखेन पूर्वं हुतं ततो मुखान्तरेण होम इत्यर्थः ।

पुनर्मुखे विपर्यस्यर्तुना प्रेष्येति सकृदध्वर्युराह सकृत्प्रतिप्रस्थाता ।

स्पष्टम् ।

अध्वर्यू यजतमित्युच्यमाने होतरेतद्यजेति संप्रेष्यति ।

संप्रेष्यतीत्येकवचनाद्यजुर्वेदेनाध्वर्युरितिपरिभाषासूत्राच्चाध्वर्योरेव प्रैषो न प्रतिप्रस्थातुः ।

स्वयं वा निषद्य यजतः ।

अध्वर्यू यजतमिति प्रैषे द्विवचनोपक्रमादत्रापि यजत इति द्विवचनान्त एव पाठः । एकवचनान्तपाठे प्रैषेण सह विरोधापत्तेः । अस्मिन्पक्षे होतरेतद्यजेत्यस्य लोपः । अध्वर्युप्रतिप्रस्थातारौ हविर्धानयोर्मध्ये पृष्ठ्यायाः दक्षिणतोऽध्वर्युः पृष्ठ्याया उत्तरतः

१ क. ज. झ. ञ. °ण प्रतिगृ° । २ ङ. ज. झ ञ. यजते ।

प्रतिप्रस्थानेत्येवं प्राङ्मुखावुपविश्य ग्रहावन्वारभ्येते प्रज्ञातौ दत्त्वोभावाश्वलायनधर्मेण याज्यां वदतः । प्रतिप्रस्थाता हविर्धान एवोपविष्टो भवेदध्वर्युरेव ग्रहहोमार्थमुत्तरवेदिं गत्वा ग्रहं वषट्कृते हुत्वा सदस्युपविशेत् । अत्राध्वर्युप्रतिप्रस्थात्रोरध्वर्युपात्रे वषट्कारनिमित्तं परस्पराह्वानेन परस्परं भक्षः । तत्र होमाभिषवोभयरूपनिमित्तप्रयुक्तो भक्षस्तु अध्वर्योरेव न प्रतिप्रस्थातुः । तत्र पूर्वमध्वर्योरेव भक्षः । तस्यैव मुखतः प्रवृत्तत्वात् । होमाभिषवोभयरूपनिमित्तप्रयुक्ताध्वर्युकर्तृकभक्षस्तु सदस्येव । तस्माद्धविर्धाने चमसानि ग्रावभिरभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीति श्रुतेः । प्रतिप्रस्थातुस्तु वषट्कारप्रयुक्तभक्षकर्तृत्वाद्धविर्धान एव भक्षो न सदसि ।

अध्वर्योः पात्रे प्रतिप्रस्थाता संपातमवन-
यति तस्यैकदेशमध्वर्युः प्रतिप्रस्थातुः पात्रे ।

स्पष्टम् ।

प्रतिप्रस्थानेन भक्षयन्ति ।

प्रतिप्रस्थानेन प्रतिप्रस्थातृपात्रेण भक्षयन्ति अध्वर्युप्रतिप्रस्थातारौ होत्रादयश्च ।

द्विर्होता सकृत्सकृ*दितरे ।

प्रथममुखे द्विर्भक्षणं वषट्कारप्रयुक्तं होतुरेव नेतरेषां, स्वयं वा निषद्य यजत इत्येतत्पक्षाभाव इदं सूत्रं नान्यथा । सकृत्सकृदितरे । इतरेऽध्वर्युप्रतिप्रस्थातारौ प्रशास्त्रादयश्च । यजमानकर्तृकः स्वयंयजनपक्षस्तु याजमानसूत्रे वक्ष्यति ।

यस्य यस्य वषट्कारे जुहुतस्तं तं प्रति भक्षयतः ।

ऋतुग्रहविषयकप्रयोगक्रमप्रदर्शनानन्तरे पक्षत्रयसाधारण्यायेदं सूत्रमित्येतत्सूत्रस्य दर्शितं प्रयोजनम् । अर्थस्तु स्पष्ट एव ।

मार्जालीये पात्रं प्रक्षाल्याऽऽयतने सादयति ॥ २१ ॥

पात्रं प्रतिप्रस्थानपात्रमायतने स्वस्थाने ।

इन्द्राग्नी आगतꣳ सुतमिति स्वेन पात्रेणा-
भक्षितेनैन्द्राग्नं कलशाच्छन्नान्तं गृह्णाति ।

धियेषितेत्यन्तं मन्त्रमुक्त्वोपरिष्टादुपयामा अन्त इति परिभाषासूत्रादुपयामगृहीतोऽसीत्युक्त्वा तदन्ते ग्रहग्रहणम् । होमाभिषवाभ्यामध्वर्योर्भक्ष इति परिभाषातः स्वपात्रेऽध्वर्योर्भक्षस्य प्राप्तौ तस्मिन्नेव पात्रे भक्षश्चेत्तद्गतसोमस्योच्छिष्टत्वेन तस्मिन्ग्रहणायोगात्पात्रान्तरे तत्स्थं सोममादायापि भक्षः स्यात्तदर्थमभक्षितेनेतिवचनम् । स्वेन पात्रेण पात्रगतसोमेनेत्यर्थः । पात्रस्य भक्षणासंभवात् । तृतीया साहित्ये । तेन पात्रस्थसोमेन

---

* सूत्रपुस्तकेषु इतराविति पाठो विद्यते ।

सहैन्द्राग्नं ग्रहं गृह्णातीत्यर्थः। शस्त्रस्योत्तरत्र विधानादेव शस्त्रवत्त्वे सिद्ध इदं वचनं ग्रहग्रहणकाले ज्ञानावश्यकत्वार्थम्। एतदभावे यजुर्भ्रेषप्रायश्चित्ते भुवः स्वाहेति दक्षिणाग्नौ होतव्यम्।

तꣳ सादयित्वाऽग्रेण होतारं प्राङ्मुख उपविश्येडा देवहूरिति शस्त्रमुपाकरोति।

तं ग्रहम्। मन्त्रपठनमेव शस्त्रोपाकरणम्।

यत्रैनꣳ होताऽभ्याह्वयते तस्मिन्काले शोꣳसामोद इवेति प्रत्याह्वयते शोꣳसामोद इवोथामोद इवेति वा।

यत्र यस्मिन्काल इत्यर्थः। उत्तरत्र तस्मिन्काल इत्युपादानात्। एनमध्वर्युं होता शोंसावोमित्यभिमुखीकरणार्थं यस्मिन्काल आह्वयते तस्मिन्नेवावसरे शोꣳसामोद इवेति होतारं प्रत्याह्वयतेऽध्वर्युः। प्रत्याह्वानं प्रत्युत्तरदानम्। शोꣳसामोद इवोथामोद इवेति विशिष्टं वा प्रत्याह्वानवाक्यम्।

उत्तिष्ठन्प्रदक्षिणं पर्यावर्तमानः प्रथमं प्रतिगरं प्रतिगृह्णात्यभिमुखोऽत *ऊर्ध्वस्तिष्ठन्प्रह्वो वा।

उत्तिष्ठन्निति शत्रन्तेन प्रदक्षिणं पर्यावर्तमान इति शानजन्तेन चोत्थानप्रभृतिप्रदक्षिणपर्यावर्तनसमकालता प्रथमप्रतिगरस्य भवतीत्यर्थः। अत ऊर्ध्वमभिमुखस्तिष्ठन्प्रह्वो वा,+सर्वे प्रतिगरा वक्तव्या इत्यर्थः।

सर्वेषु विरामेषु प्रणवे च।

सर्वे ये विरामास्तेषु। सर्वग्रहणाद्दृग्गता निगदगताश्चैते सर्वे गृह्यन्ते प्रणवे चाऽऽश्वलायनसूत्रप्रसिद्धा एव सर्वे प्रतिगरा गृह्यन्त इत्यर्थः। तच्चाऽऽश्वलायनसूत्रमित्थम्—अनभिहिंकृत्य शोंसावोमित्युच्चैराहूय तूष्णीं शंसं शंसेदुपांशु सप्रणवमसंतन्वन्नेष आहावः प्रातःसवने शस्त्रादिषु पर्यायप्रभृतीनां च सर्वत्र चान्तःशस्त्रं तेन चोपसंतानः शस्त्रस्वरः प्रतिगर ओथामोद इवेति शोंसामोद इवेत्याहावे प्लुतादिः प्रणवेऽप्लुतादिरवसाने प्रणवे प्रणव आहावोत्तरेऽवसाने च प्रणवान्तो वा यत्र यत्रान्तःशस्त्रं प्रणवेनावस्यति प्रणवान्त एव तत्र प्रतिगरः शस्त्रान्ते तु प्रणव इति। शस्त्रस्य स्वर इव स्वरो यस्य स शस्त्रस्वरः। उत्तरपदलोपोऽत्र द्रष्टव्यः। स शस्त्रस्वर इत्यर्थः। सवनस्वरस्याविधेयत्वादन्योऽपि योऽनुब्राह्मणपक्षे निष्केवल्यस्य विशिष्टस्वरो विहितः शस्त्रस्य तस्य प्रापणार्थं वचनम्। ओथामोद इवेत्ययं प्रतिगरसंज्ञो भवति शस्त्रस्वरश्च

---

* ऊर्ध्वं तिष्ठन्निति पाठो युक्तः। + अस्य वाक्यस्य पूर्ववाक्येनासंबद्धत्वादत्र किंचित्त्रुटितं स्यादिति प्रतिभाति।

भवति । प्रतिगीर्यते प्रत्युच्चार्यत इति प्रतिगरः । वक्ष्यमाणविशेषविशिष्टतया सकृदेव विधातुं शक्येऽपि सामान्यस्य पृथगभिधानं प्रतिगरशब्दव्यवहारेऽपि सामान्येनास्य ग्रहणार्थम् । शोंसामोद इवेत्याहाव इत्यत्र प्रतिगरो भवतीति शेषः । यत्पुनरत्र प्रतिगरान्तरविधिर्मध्ये विधीयते तज्ज्ञापयति प्रतिगरान्तरमप्यस्ति मध्यवर्त्याहावेऽयं नियम्यते तेन शस्त्रमध्येऽयमेव स्याच्छस्त्रादावयं वा स्यात् । ब्राह्मणोक्तः शंसामोदै-वोमिति वेति ॥ प्लुतादिः प्रणवेऽप्लुतादिरवसाने व्यवहितस्येमौ विशेषविधी अनन्तरस्य प्रणवावसानरूपेण विषयभेदासंभवात् । प्रणवे प्रणव आहावोत्तर इति सूत्रं प्लुतादेरप-वादकम् । आहावोत्तरे प्रणवे प्रणव एव प्रतिगरो भवति । आहाव उत्तरो यस्मात्स आहावोत्तरस्तस्मिन्नाहावोत्तरे प्रणवे प्रणवः प्रतिगरो भवति । अवसाने चेत्यस्मिन्सूत्रे प्रणवः प्रतिगरो भवतीति शेषः ॥ शस्त्रान्ते शस्त्रमध्ये वाऽवसानेऽयं विधिर्भवति । प्रणवान्तो वेत्यनेन सूत्रेण विषयद्वयविकल्प उच्यते । यत्र यत्र चान्तःशस्त्रे प्रणवेना-वस्यति प्रणवान्त एव तत्र प्रतिगरः । शस्त्रान्ते तु प्रणव इत्यनेन पूर्वोक्तप्रतिगरद्वयस्य विषयव्यवस्थापनमात्रं क्रियते । विस्तरस्तु तदीयभाष्यग्रन्थादितो द्रष्टव्यः ।

नार्धर्चाल्लुप्यते ।

अर्धर्चावसानकाल एव तस्य प्रतिगरस्य मुख्यः कालः । तत्पूर्वमुत्तरं वा प्रतिगरे लोपः ।

नाभि प्रतिगृणाति ।

अर्धर्चसमाप्तिः प्रतिगरस्य कालः । तस्यापि स्वकालादुत्तरो गौण इति न्यायमनु-सृत्याभि तत्पूर्वं तदुत्तरं वा न प्रतिगृणीयादित्यर्थः । एतत्प्रायश्चित्तमापस्तम्बेनोक्तम्—यदर्धर्चाल्लुप्येताभिप्रतिगृणीयाद्वा त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि प्रजापत इति चतस्र आहुतीर्जुहुयाद्व्याहृतीश्चेति । अर्धर्चे प्रतिगरस्यावचनमर्धर्चाल्लोपः । यथोक्त-कालातिरिक्तकालिकं वचनमभिप्रतिगरः ।

उभयं व्याहावे करोति शोंसामोद इवोथामोद इवेति ।

संततक्रमपठितगतमध्यतन आहावः । तदन्तगतो व्याहावः । तत्रायं प्रतिगरः । आश्वलायनसूत्रोक्तप्रतिगरं बाधित्वा सूत्रकृद्विहितो विशेषः प्रतिगरो याजुषहौत्रविषये द्रष्टव्यः । यथा स्वादुष्किलीयासु । अत्र पाठो लोपेऽभिप्रतिगरणे च यद्विहितमापस्त-म्बेन प्रायश्चित्तं तस्य प्राप्त्यर्थः ।

यत्र क्व च होता विरमेदोथामोद इवेति [1]ब्रूयात् ।

इदमपि नार्धर्चाल्लुप्यते नाभिप्रतिगृणातीत्येतादृशापराधे सति एतत्प्रायश्चित्तप्राप्त्य-

---

१ ज. म. प्रतिब्रू° ।

र्थम् । अथवा विरामेषु प्रणवरहित एव प्रतिगर ओथामोद इवेति । अन्यत्र तु शाखान्तरसिद्ध इत्यर्थतः । नन्वयमपि शाखान्तरसिद्धः । किमिदं वचनं छोपादौ स्वसूत्रोक्तमाग्ने नय इत्यादिकं सौमिकप्रायश्चित्तमेतत्प्रतिगरविषय एव, अन्यथाऽऽपस्तम्बोक्तमित्येतदर्थम् ।

सर्वशस्त्राणामेष कल्पः ।

सर्वग्रहणं होतृशस्त्रविषयका एवैते प्रतिगरा इति शङ्काव्यावृत्त्यर्थम् ।

उक्थशा इति शस्त्रं प्रतिगीर्य सर्वत्र प्रातःसवने जपति ।

स्पष्टम् ।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसांश्चमसाध्वर्यव उक्थशा यज सोमस्येति संप्रेष्यति ।

शस्त्रप्रतिगरग्रहादानयोरेककाले सर्वथाऽसंभवेन भेदेव शस्त्रप्रतिगरणोत्तरत्वे ग्रहादानस्य सिद्ध इदं वचनमेतच्छस्त्राङ्गभूताभिहिंकाराभाव आश्वलायनसूत्रसिद्ध एव प्रकृत्यविनियुक्तत्वेऽप्यस्माकमिष्ट इति ज्ञापयितुम् । गृहीतं ग्रहम् । अन्यत्स्पष्टम् ।

वषट्कारानुवषट्कारौ नाराशंसाननुप्रकम्पयन्ति ।

चमसाध्वर्यवो वषट्कारमनुवषट्कारं चानु नाराशंससंज्ञकांश्चमसान्प्रकम्पयन्ति ।

व्याख्यातो ग्रहनाराशंसानां भक्षः ।

ग्रहश्च नाराशंसाश्च ग्रहनाराशंसास्तेषां ग्रहनाराशंसानां भक्षो व्याख्यातो यथाचमसं चमसिनो भक्षयन्ति तेषां व्याख्यातो भक्षमन्त्रः सर्वेषां प्रथमो होता सकृद्भक्षयतीत्यादिना तृतीयं होत्रका अन्तत इत्यन्तेन सूत्रेणोक्त इत्यर्थः ।

आप्यायनसादने च नाराशंसानाम् ॥ २२ ॥

व्याख्याते इति शेषः । असर्वान्भक्षयित्वाऽऽप्यायस्व समेतु त इत्याप्याययन्तीत्यादिना पश्चादक्षमुदगायतान्सादयतीत्यन्तेन सूत्रेणोक्ते इत्यर्थः ।

ओमासश्चर्षणीधृत इति शुक्रपात्रेण वैश्वदेवं कलशात्स्तुतशस्त्रवन्तं गृह्णाति ।

सूदवच्छुकपात्रं सादयतीति विधानादेव भक्षणप्राप्तिशङ्काया वारितत्वादभक्षितेनेति वचनाभावः । स्तुतशस्त्रवन्तमिति वचनं ग्रहग्रहणकाले ज्ञानावश्यकत्वार्थम् । एतज्ज्ञानाभावे यजुर्भ्रेषप्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ ।

तं सादयित्वा स्तोत्रमुपाकरोति तद्व्याख्यातम् ।

तत्स्तोत्रोपाकरणं व्याख्यातमुपावर्त्यध्वमिनीतराणि स्तोत्राणीत्यनेन सूत्रेणोक्तमित्यर्थः ।

अपवृत्ते स्तोत्रे शस्त्रमुपाकरोति तद्व्याख्यातम् ।

अपवृत्ते समाप्ते स्तोत्रे शस्त्रमुपाकरोति । तच्छस्त्रोपाकरणमनेन होतारं प्राङ्मुख उपविश्येष्टा देवहूः इति शस्त्रमुपाकरोतीत्यनेन व्याख्यातमुक्तमित्यर्थः ।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसांश्चमसाध्वर्यव उन्नेतारश्चा यज सोमस्येति संप्रेष्यति व्याख्यातमनुवषट्कृते ग्रहनाराशंसानां भक्षः सर्वभक्षाः ।

शस्त्रं प्रतिगीर्येतिवचनमित आरभ्य यो यः शस्त्रसंबन्धमिहिंकारकृत आश्वलायनसूत्रकृतो विशेषः स एवास्माकमिष्टः प्रकृत्यनुपयुक्तत्वेऽपि । कालार्थवचनार्थताऽपि एतयोः । षोडश्यादिषु वक्ष्यमाणेषु तु कालार्थतैव प्रयोजनम् । सर्वभक्षा इत्यनन्तरं चमसा इति शेषः ।

नाऽऽप्यायनसादने भवतः ।

सर्वभक्षा एव भवन्ति न त्वाप्यायनसादने अपि भवत इत्यर्थः ।

त्रिभिरुक्थ्यविग्रहैः प्रचरतः ।

उक्थ्यविग्रह इति संज्ञा वक्ष्यमाणग्रहाणां त्रयाणाम् । प्रचरतोऽध्वर्युप्रतिप्रस्थातारौ ।

उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वेत्युक्थ्यस्थाल्या उक्थ्यपात्रेण तृतीयं मैत्रावरुणं गृह्णाति ।

मैत्रावरुणं मित्रावरुणदेवताकं ग्रहमुद्दिश्योक्थ्यस्थालीगतस्य सोमस्य तृतीयमंशं गृह्णाति ।

एष ते योनिर्मित्रावरुणाभ्यां त्वेत्यायतने सादयति ।

आयतने स्वस्थाने । अन्यत्स्पष्टम् ।

पुनर्हविरसीति स्थालीं प्रत्यभिमृशति ।

स्थाली, उक्थ्यस्थाली । भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हतीतिन्यायाद्भाव्युपयोगस्योक्थ्यस्थालीगतस्य सोमस्य संस्कारार्थेदम् । तेनान्तिमग्रहग्रहणेऽग्रे ग्रहणाभावेन भाव्युपयोगत्वाभावान्न संस्कारः । प्रत्यभिमर्शो नाम यस्माद्द्रव्यं गृहीतं तस्याभिमर्शः प्रत्यभिमर्शः । एतदभिप्रेत्यैव सूत्रकारोऽपि निर्वचनं करिष्यति ।

मैत्रावरुणचमसमुख्यावेकादश चमसानुन्नयति ।

एकादशेति सदस्यसत्त्वेऽन्यथा दशैव ।

अत्र विशेषमाह—

पुरस्तादाग्नीध्रचमसादच्छावाकचमसमुन्नयति स्तुतशस्त्रे भवतः ।

स्पष्टम् ।

शस्त्रं प्रतिगीर्य ग्रहमादत्ते चमसाꣳश्चमसाध्वर्यव
उक्थशा यज सोमानामिति संप्रेष्यति ॥ २३ ॥

अत्र शस्त्रं प्रतिगीर्येति मैत्रावरुणशस्त्रार्थं, पूर्वं तु होतृशस्त्रविषय इति विषयभेदः । द्विदेवत्यर्तुग्रहेष्वादित्यग्रहसावित्रयोश्च नानुवषट्कारो विद्यत इत्यनेनेतरेषु ग्रहेषु वषट्कारानुवषट्कारयोः प्राप्तित्वेनात्रापि वषट्कारानुवषट्कारौ ।

हुत्वा देवेभ्यस्त्वा देवा युवं पृणज्मि यज्ञस्याऽऽ-
युषे जुष्टमिति मैत्रावरुणचमसे ग्रहसंपातमवनयति ।

हुत्वेतिवचनं सदसि भक्षहरणानन्तरं यदापस्तम्बेन संपातावनयनमुक्तं तद्व्यवच्छेदार्थम् । संपातमवनयतीत्यनेन संपातशब्देन मैत्रावरुणचमसे स्वल्पावनयनमुच्यते ।

बाह्यतः सद आलभ्य ।

सदसो बाह्यतो बहिः स्थितः सन्सदोभूमिं स्पृष्ट्वा संपातमवनयतीति पूर्वेणान्वयः ।

यदि कामयेताध्वर्युरात्मानं यज्ञयशसेनार्पयेयमिति
ब्राह्मणव्याख्यातान्यन्ववनयनानि तेषां यथाकामी ।

यज्ञकर्मकौशलं यज्ञयशसं तेन यज्ञयशसा निमित्तेनाऽऽत्मानं योजयितुमिच्छति तदाऽन्तराऽऽहवनीयं च हविर्धानं च तिष्ठन्नवनयेत् । यदि यजमानं तथेच्छति तदाऽन्तरा सदोहविर्धाने । यदि सदस्यांस्तदा सदसि स्थित्वाऽवनयेदित्येतान्यष्टशान्यवनयनानि ब्राह्मण उक्तानि तेषां मध्ये यथेच्छा तथा काम्यमनुष्ठेयमित्यर्थः ।

सर्वेषां प्रथमो मैत्रावरुणः सकृत्सकृद्भक्षयति द्विः स्वे चमसे
तस्याध्वर्युर्द्विर्भक्षितस्य सकृद्भक्षयति तृतीयं मैत्रावरुणः ।

मैत्रावरुणस्य प्रतिभक्षितृमद्भावात्तृतीयो भक्षः समाख्याभक्षस्तस्य पृथगेव भवति । इतरेषां तु समाख्याभक्षमात्रं प्रशास्तुरत्रोपह्वानं तस्य वषट्कर्तृत्वात् ।

ततः प्रतिप्रस्थातोत्तराभ्यामुक्थ्यविग्रहाभ्याꣳ-
स्तुतशस्त्रवद्भ्यां प्रचरत्येतेनैव कल्पेन ।

एतेनैव कल्पेनेत्यनेनैव स्तुतशस्त्रवत्त्वे सिद्धे स्तुतशस्त्रवद्भ्यामितिवचनमस्मिञ्छस्त्रेऽपि शस्त्रं प्रतिगीर्येत्येतत्सूत्रज्ञापितधर्मप्राप्त्यर्थम् । स्तुतशस्त्राभ्यामित्युभयवचनं ज्ञानावश्यकत्वार्थमेव । अन्यत्स्पष्टम् ।

तत्र विशेषमाह—

इन्द्राय त्वेति द्वितीये ग्रहणसादनौ संन-
मति पुनर्हविरसीति स्थालीं प्रत्यभिमृशति ।

गृह्यतेऽनेनेति ग्रहणः । उपयामगृहीतोऽसीन्द्राय त्वेति ग्रहणो मन्त्रः । साद्यतेऽ-

१ ङ. ज. झ. ञ. °तानि काम्यान्य° । २ घ. च. °स्मिञ्छास्त्रे° ।

नेनेति सादनः । एष ते योनिरिन्द्राय त्वेति सादनः । एतौ संनमति । अनयोरूहः कर्तव्य इत्यर्थः ।

**ब्राह्मणाच्छꣳसिचमसमुख्यांश्चमसानुन्नयन्ने-
कस्मै चमसगणाय राजानमतिरेचयति ।**

अच्छावाकसंबन्धिस्तुतशस्त्रप्रयुक्तचमससमूहाय यावानुपयुज्यते सोमस्तावदेवाति-रेचयति न न्यूनं नातिरिक्तमतिरेचयति । सर्वथाऽतिरेको यथा न भवति तथा प्रयत्नेन यतितव्यमतिरेके प्रायश्चित्तस्य श्रवणात् ।

**ब्राह्मणाच्छꣳसिचमसे ग्रहसंपातमव-
नयति न प्रतिप्रस्थाता भक्षयति ।**

तस्य चमसे संपातेऽवनीतेऽपि होमाभिषवाभ्यां भक्ष इति प्राप्तस्य भक्षस्यायं निषेधः । ब्राह्मणाच्छंसिनः समाख्याभक्षस्तन्त्रेणैव प्रतिभक्षितुरभावात् । नोपहवो यद्युपहूतः स्याद्भक्षयेत्येव ब्रूयादिति वदेदच्छावाकचमसे तथा दर्शनात् ।

इन्द्राग्निभ्यां त्वेति तृतीये ग्रहणसादनौ संनमति ।

तृतीय उक्थ्यविग्रहे ।

न स्थालीं प्रत्यभिमृशति ।

तस्याः स्थाल्या रिक्तत्वात् ।

**अच्छावाकचमसमुख्यांश्चमसानुन्नय सर्वꣳ राजानमुन्नय
माऽतिरीरिचो दशाभिः कलशौ मृष्ट्वा न्युब्जेति संप्रेष्यति ।**

पूतभृतो बिल उदीचीनदशं पवित्रं वितत्य तस्मिन्द्रोणकलशस्थं राजानं सर्वं पूतभृत्यवनीय दशाभिः कलशौ पूतभृद्द्रोणकलशौ दशापवित्रेण शुष्कौ कृत्वा न्युब्ज न्यञ्चौ कुरु इति प्रैषार्थः । उन्नेताऽत्र प्रेष्य एकवचनात् । सर्वꣳ राजानमुन्नयेत्येता-वतैव सिद्धे माऽतिरीरिच इतिवचनमत्रातीव कठिनमतिविस्तृतं प्रायश्चित्तमस्तीत्यतः सावधानताऽत्राऽऽवश्यकीति ज्ञापनार्थम् ।

प्रैषार्थं स्पष्टयति—

**अच्छावाकचमसमुख्यांश्चमसानुन्नयति
सर्वꣳ राजानमुन्नयति नातिरेचयति ।**

स्पष्टोऽर्थः ।

दशाभिः कलशौ मृष्ट्वा न्युब्जति ।

दशाभिः पवित्रदशाभिः कलशौ पूतभृद्द्रोणकलशौ मृष्ट्वा शुष्कौ कृत्वा न्युब्जति न्यग्बिलौ करोति ।

अच्छावाकचमसे ग्रहसंपातमवनयति न प्रतिप्रस्थाता भक्षयति ।

गतव्याख्यानं पूर्वत्र ।

अग्निः प्रातःसवने पात्वस्मानिति सꣳस्थिते जुहोति ।

सवनाहुतिमित्यापस्तम्बः । सवनसंस्थाप्रयुक्तेयमाहुतिरिति संस्थाप्रयुक्तत्वमेतदाहुतेर्दर्शयति । तेन सोमातिरेके सति तत्प्रायश्चित्तान्ते जुहोति । प्रायश्चित्तान्यपि अग्निं नर इत्यादीनि सोमस्कन्दनप्रायश्चित्तानि च प्राक्सवनाहुतेः कार्याणि ।

प्रशास्तः प्रसुवेति संप्रेष्यति ।

प्रसुव सदोबहिर्निःसरणार्थं सर्वेभ्योऽनुज्ञां देहीत्यर्थः ।

सर्पतेत्याह प्रशास्ता ।

स सर्पतेत्याहेति तच्छब्देनैव प्रशास्तृपरामर्शे सिद्धेऽध्वर्योरनुज्ञायाचनार्थकप्रैषे प्रशास्तृग्रहणं विना प्रसुवेत्येतावदुच्यमानेऽपि प्रशास्तारं जानीयात्प्रेष्यमिति पक्षान्तरं गमयति । अत्राऽऽपस्तम्बः—येन प्रसर्पन्ति तेन निःसर्पन्तीति । ते येन पथा पूर्वं प्रसृता ऋत्विजस्तेनैव गच्छन्तीत्यर्थः ।

संतिष्ठते प्रातःसवनं प्रातःसवनम् ॥ २४ ॥

इति हिरण्यकेशिसूत्रेऽष्टमप्रश्नेऽष्टमः पटलः ।

स्पष्टम् । द्विरुक्तिः प्रश्नसमाप्तिद्योतनार्था ।

इत्योकोपाह्वश्रीमदग्निष्टोमयाजिसाहस्राग्नियुक्तवाजपेययाजिसर्वतोमुखयाजिद्विसाहस्राग्नियुक्तपौण्डरीकयाजिगणेशदीक्षिततनूजगोपीनाथदीक्षितविरचितायां श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नालाभकृतविद्वज्जनसंतापशामिकायां ज्योत्स्नाख्यायां वृत्तावष्टमप्रश्नस्याष्टमः पटलः ॥ ८ ॥

संपूर्णोऽयमष्टमः प्रश्नः ।